817

अग्नि पुराण

Agni Purāṇa	Title
	Author
	Editor
	Year, Vols.
	Publisher
817	Remarks

अग्नि० १

॥श्रीगणेशाय नमः॥ ॥सरस्वतीं श्रियं गौरीं गणेशं स्कंदमीश्वरं॥ ब्रह्माणं वह्निमिंद्रादीन्वासुदेवं नमा
म्यहं॥ १॥ नैमिषे हरिमीजाना ऋषयः शौनकादयः॥ तीर्थयात्राप्रसंगेन स्वागतं सूतमब्रुवन्॥ २॥ ॥ऋष
य ऊचुः॥ ॥सूत त्वं पूजितोस्माभिः सारात्सारं वदस्व नः॥ येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते॥ ३॥ सूत उ
वाच॥ ॥सारात्सारो हि भगवान्विष्णुः सर्गादिकृद्विभुः॥ ब्रह्माहमस्मि तं ज्ञात्वा सर्वज्ञत्वं प्रजायते॥ ४॥ द्वे ब्रह्म
णी वेदितव्ये शब्दब्रह्म परं च यत्॥ द्वे विद्ये वेदितव्ये हि इति चाथर्वणी श्रुतिः॥ ५॥ अहं शुकश्च पैलाद्या गत्वा ब
दरीकाश्रमं॥ व्यासं नत्वा पृष्टवंतः सोस्मान्सारमथाब्रवीत्॥ ६॥ शुकाद्यैः शृणु सूत त्वं वसिष्ठो मां यदब्र
वीत्॥ ब्रह्मसारं हि पृष्टं तं मुनिभिश्च परात्परं॥ ७॥ वसिष्ठ उवाच॥ ॥द्विविधं ब्रह्म वक्ष्यामि शृणु व्यासाखि
लाद्घं॥ यथाग्निर्मां पुरा प्राह मुनिभिर्दैवतैः सह॥ ८॥ पुराणं परमाग्नेयं ब्रह्मविद्याक्षरं परं॥ ऋग्वेदाद्यपरं
ब्रह्म सर्वदेवसुखं परं॥ ९॥ अग्निनोक्तं पुराणं यदाग्नेयं वेदसंमितं॥ भुक्तिमुक्तिप्रदं पुण्यं पठतां शृण्वतां नृणां॥
१०॥ कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्म परात्परं॥ मुनिभिः पृष्टवान्देवं पूजितं ज्ञानकर्मभिः॥ ११॥ वसिष्ठ उ
वाच॥ ॥संसारसागरोत्तारनावं ब्रह्मेश्वरं वद॥ विद्यासारं यद्विदित्वा सर्वज्ञो जायते नरः॥ १२॥ अग्निरुवाच॥ राम० १
विष्णुः कालाग्निरुद्रोहं विद्यासारं वदामि ते॥ विद्यासारं पुराणं यत्सर्वं सर्वस्य कारणं॥ १३॥ सर्गस्य प्रतिसर्ग

सालिंगं सस्याप्यस्य नुगुक्षितः॥ गायत्र्या होमयेदग्नौ पूर्वत्रिमधुराप्लुतं॥ यस्मिन्नृक्षे व्याधिमाप्नोति तस्मिन्
स्नाने बलिष्ठ्यं मे मानसानां निजादीनां विशेषतो ग्रहरं जयेत्॥ वातपित्तकफदोषा धातवश्च तथा शृणु मु
के पंचदशाया दस्ते विधयाति च सुश्रुत॥ ॥अंगानैकेत किंचन्वं रमताश्चापरेण च॥ किंनु नागो मलस्तत्रवि
ण्मूत्रास्वेदरूपिकाः॥ नाशामलं कर्णमलं तपादे हमलं च यतः॥ रसनात्रोडूरस स्तत्र समाह्वेणि तत्तां व्रजेत्
मांसाद्रक्तं ततो मेदो मेदसोस्थिप्रस्थि संभवः॥ आस्थोमज्जा ततः शुक्राच्छुक्राज्जातस्त्वथोजसः॥ देशमात्मबलं
प्रकृतिमेव वा॥ ज्ञात्वा किंचिच्छित्तं कुर्याद्भिषजस्य तथा बलं॥ तिथिरिक्तां त्यजेद्भौमं मंदं तद्दारुणोग्रकं॥ ह
रिगोद्विजचंद्रार्कसुरा यानप्रतिपूज्य च॥ शृणु मंत्रमिदं विद्वान् भेषजारंभमाचरेत्॥ ब्रह्मदक्षाश्विरु
द्रेंद्रभूचंद्रार्कानिलानिलः॥ ऋषयः सौषधीग्रामा भूतसंघाश्च पांतु ते॥ रसायनमिवर्षीणां देवानाममृ
तं यथा॥ सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते॥ वातश्लेष्मात्मको देशो बहुवृक्षो बहूदकः॥ अनूप इति
विख्यातो जांगलस्तद्विवर्जितः॥ किंचिद्वृक्षोदके देशो स्मथा साधारणः स्मृतः॥ जांगलः पित्तबहुलो म
ध्यमः साधारणः स्मृतः॥ रूक्षः शीतश्चलो वायुः पित्तमुष्णं कटुत्रयं॥ स्थिरोम्लः स्निग्धमधुरं बलासस्तं प्रव
क्ष्यते॥ वृद्धिं समानैरेतेषां विपरीतैर्विपर्ययः॥ रसाः स्वाद्वम्ललवणाः श्लेष्मला वायुनाशनाः॥ कटुतिक्त
कषायश्च वातुलाः श्लेष्मनाशनाः॥ कट्वम्ललवणा ज्ञेयास्तथा पित्तविवर्धनाः॥ त्यक्तस्वादुकषायाश्च

तथा पित्तविनाशनाः ॥ रसस्यैतद्गुणानास्ति विपाकस्यैतदिष्यते ॥ वीर्येष्वाक्कफवातघ्ना शीता पित्तविना
शना ॥ प्रभावतस्तथा कर्म ते च कुर्वन्ति सुव्रत ॥ शिशिरे च वसंते च निदाघे च यथाक्रमात् ॥ चयप्रको
पप्रशमानाः कफस्य तु प्रकीर्तिताः ॥ निदाघवर्षारात्रेय तथा शारदि सुव्रत ॥ चयप्रकोपप्रशमाः क
फस्य तु प्रकीर्तिताः ॥ नि-दाघवर्षारात्रे च तथा शारदि सुव्रत ॥ चयप्रकोपप्रशमाः पवनस्य प्रकीर्तिताः ॥ मे
घकाले च शरदि हेमंते च यथाक्रमात् ॥ चयप्रकोपप्रशमास्तथा पित्तप्रकीर्तिताः ॥ वर्षादियो विसर्गस्तु हेमं
ताद्यास्तथा त्रयः ॥ शशिराद्यास्तथादानं ग्रीष्मांताश्च तथ स्त्रयः ॥ सौम्यो विसर्गस्त्वादानमाग्नेयं परिकीर्तितं ॥ व
र्षादीन् त्रीनृतून् सोमश्चरत्यपि यसौ रसान् ॥ जनयत्यम्ललवणमधुरांस्त्रीन्यथाक्रमं ॥ शिशिरादीनृतूनर्कक
श्चरत्यपि सौ रसान् ॥ विवर्द्धयेत्तथा तिक्तकषायकटुकान् क्रमात् ॥ यथा रजनी वर्द्धंते बलमेके हि वर्द्धते ॥ क्रम
शोथ मनुष्याणां हीयमाना तु हीयते ॥ रात्रिभुक्तदिनानां च वयसश्च तथैव च ॥ आदिमध्यरसानेषु कफपित्तस
मीरणाः ॥ प्रसमे याति कोपादौ कालेस्तेषां वयः स्मृतः ॥ प्रकोपो नमकेकालेसमंतेपां प्रकीर्तितः ॥ अतिभोजनतो
विप्र तथा चाभोजनेन च ॥ रोगा हि सर्वे जायंते वेगोदीरणधारणैः ॥ अन्नेन कुक्षेर्द्वावंशौ एक पानेन पू राम
रयेत् ॥ आश्रयं पवनादीनां तथैवेत मशेषयेत् ॥ व्याधिं निदानस्य तथा विपरीतमपोषधं कर्तव्यमेतदेवा
त्र मया सारं प्रकीर्तितं ॥ नाभेरर्द्धं मध्यं च गुदं श्रोण्यो तथैव च ॥ बलाशयितु पानानां देहस्थानं प्रकीर्तितं ॥ त
था पि सर्वगात्रेषु ते देहे वा पुर्विशेषतः ॥ देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतं ॥ कुशाग्रके शाग्रयजोवक्र

स्य वंशं मन्वंतरस्य च वंशानुचरितादेश्च मत्स्य कौर्मादि रूपकं ॥ द्वे विद्ये भगवान् विष्णु परा चैवापरा द्विज ॥ ऋ
ग्यजुः सामथर्वाख्या वेदांगानि च षड्द्विज ॥ १४ ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ॥ छंदोभिधा
नं मीमांसा धर्मशास्त्रं पुराणकं ॥ १५ ॥ न्यायो वैद्यं गांधर्वं धनुर्वेदोर्थशास्त्रकं ॥ अपरेयं परा विद्या यया ब्र
ह्माधिगम्यते ॥ १६ ॥ यत्तदद्दृश्यमग्राह्यमगोत्रचरणं व्रजन् ॥ विष्णुनोक्तं यथा मत्यं देवेभ्यो ब्रह्मणा पुरा ॥ १७
तथा ते कथयिष्यामि हेतुं मत्स्यादि रूपिणं ॥ ॥ इत्यादि महापुराणे आग्नेये प्रथमोध्यायः ॥ १ ॥ वसिष्ठ उवाच ॥ ॥
मत्स्यादि रूपिणं विष्णुं ब्रूहि कार्यादि कारणं ॥ पुराणं ब्रह्म चाग्नेयं यथा विष्णोः पुरा श्रुतं ॥ १ ॥ ॥ अग्निरुवाच ॥
मत्स्यावतारं वक्ष्येहं वसिष्ठ शृणु वै हरेः ॥ अवतारक्रिया दुष्टनष्ट्यै सत्पालनाय हि ॥ २ ॥ आसीदतीतकल्पांते ब्र
ह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादिका मुने ॥ ३ ॥ मनुर्वैवस्वतस्तेपे तपो वै भुक्तिमुक्तये ॥
एकदा कृतमालायां कुर्वतो जलतर्पणं ॥ ४ ॥ तस्यांजल्युदके मत्स्यः स्वल्प एकोभ्यपद्यत ॥ क्षेप्तुकामं जले प्राह न २
मां क्षिप नरोत्तम ॥ ५ ॥ ग्राहादिभ्यो भयं मेत्र तत् श्रुत्वा कलशेक्षिपत् ॥ मनुर्वृद्धः पुनर्मत्स्यः प्राह तं देहि मे बृह
त् ॥ ६ ॥ स्थानमेतद्वचः श्रुत्वा राजाथोदंचनेक्षिपत् ॥ तत्र वृद्धो ब्रवीद्भूपं पृथु देहि पदं मनो ॥ सरोवरे पुनः
क्षिप्तो ववृधे तत्प्रमाणवान् ॥ ऊचे देहि बृहत् स्थानं प्राक्षिपच्चांबुधौ मनुः ॥ ७ ॥ लक्षयोजनविस्तीर्णः स क्षमा

अग्नि॰ त्रेणसोभवत्॥ मत्स्यंतमद्भुतंदृष्ट्वाविस्मतःप्राब्रवीन्मनुः॥९॥ कोभवान्ननुवैविष्णुर्नारायणनमोऽस्तुते॥ ॥माय
यामोहयसिमांकिमर्थत्वंजनार्दन॥१०॥ मनुनोक्तोब्रवीन्मत्स्योमनुंवैपालनेरतं॥ अवतीर्णोभवनायजगतो
२ दुष्टनष्टये॥११॥ सप्तमेह्यद्यदिनेत्वब्धिःप्लावयिष्यतिवैजगत्॥ उपस्थितायांनावित्वंबीजादीनिविधायच॥
१२॥ सप्तर्षिभिःपरिवृतोनिशांब्राह्मींचरिष्यति॥ उपस्थितस्यमेशृंगेनिबध्नीयामहाहिना॥१३॥ इत्युक्त्वा
तर्द्धेमत्स्योमनुःकालंप्रतीक्षकः॥ स्थितःसमुद्रउद्रेकेनावमारुरुहेतदा॥१४॥ एकशृंगधरोमत्स्योहैमो
नियुतयोजनः॥ नावंबबन्धतस्यशृंगेमत्स्याख्यंचपुराणकं॥१५॥ शुश्रावमत्स्यात्पापघ्नंसंस्तुवन्स्तुति
भिःस्तुतं॥ ब्रह्मवेदप्रहर्तारंहयग्रीवंचदानवं॥१६॥ अवधीद्वेदमंत्राद्यान्पालयामासकेशवः॥ मातु
रुद्धेहवाराहेकूर्मरूपोभवद्धरिः॥१७॥ ॥इत्यादिमहापुराणेआग्नेयेविद्यासारेमत्स्यावतारः॥२॥ अग्नि
रुवाच॥ ॥वक्ष्येकूर्मावतारंचसंश्रुतंपापनाशनं॥ पुरादेवासुरेयुद्धेदैत्यैर्देवाःपराजिताः॥१॥ स्तुत्वा
क्षीराब्धिगंविष्णुमूचुःपालयवासुरान्॥ ब्रह्मादीकान्हरिःप्राहसंधिंकुर्वंतुचासुरैः॥२॥ क्षीराब्धि
मथमानार्थंचअमृतार्थंश्रियेसुराः॥ अरयोपिहिसंधेयाःसतिकार्यार्थगौरवे॥३॥ युष्मान्अमृतभाजो राम॰
यकारयामिनदानवान्॥ मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिं॥४॥ क्षीराब्धिमत्सहायेननिर्मथध्वम २

तंद्रिताः॥ विष्णूक्ताःसंविदंकृत्वादैत्यैःक्षीराब्धिमागताः॥५॥ ततोमथितुमारब्धाःयतःपुच्छंततःसुराः॥ फण
निश्वाससंतप्ताहरिणाप्यायितासुराः॥६॥ मथ्यमानेर्णवेसोद्रिरनाधारोह्यपोविशत्॥ कूर्मरूपंसमास्था
यदध्रेविष्णुश्चमंदरं॥७॥ क्षीराब्धेर्मथ्यमानाच्चविषंहालाहलंत्वभूत्॥ हरेणधारितंकंठेनीलकंठस्ततोह
रः॥८॥ ततोभूत्वारुणीदेवीपारिजातस्तुकौस्तुभः॥ गावश्चाप्सरसोदिव्यालक्ष्मीदेवीहरिंगता॥९॥ पश्यंतसर्व
देवास्तांस्तुवंतःसश्रियोभवन्॥ ततोधन्वंतरिर्विष्णुरायुर्वेदप्रदर्शकः॥१०॥ बिभ्रत्कमंडलुंपूर्णममृतेन
समन्वितं॥ अमृतंतत्कराद्दैत्याःसुरेभ्यस्तुमदायच॥११॥ गृहीत्वाजग्मुर्जंभाद्याविष्णुस्त्रीरूपधृक्ततः॥
तांदृष्ट्वारूपसंपन्नांदैत्याःप्रोचुर्विमोहिताः॥१२॥ भवभार्याभृतंगृह्यपाययास्मान्वरानने॥ तथाप्युक्त्वा
हरिस्तेभ्योगृहीत्वापाययत्सुरान्॥१३॥ चंद्ररूपधरोराहुःपिबंश्चार्केंदुनार्पितं॥ हरिणाप्यरिणाछिन्नं
सबाहुंतच्छिरःपृथक्॥१४॥ कृपयात्भगवानीतंवरदंहरिमब्रवीत्॥ राहुर्मत्तस्तुचंद्रार्कौप्राप्स्यतेग्रह
णंग्रहः॥१५॥ नवेयंयेतेदाद्दानंदास्यंतेस्यात्तदक्षयं॥ तथेत्याहाथतंविष्णुःततःसर्वैस्तदामरैः॥१६
स्त्रीरूपंसंपरित्याज्यहरेणोक्तःप्रदर्शय॥ दर्शयामासरूपंतापस्त्रीरूपंभगवान्हरिः॥१७॥ माययामो
हितःशंभुःगौरींत्यक्त्वास्त्रियंगतः॥ नग्नउन्मत्तरूपोभूत्स्त्रियःकेशानधारत॥१८॥ अगाद्विमुच्यकेशा

स्त्रीरूपं धावावचतां गतां॥ स्खलितं तस्य वीर्यं कौ पत्र यत्र शंकरस्य हि॥१९॥ तत्र तत्र च तत्क्षेत्रं लिंगानां कन
कस्य च॥ मायेयमिति तां ज्ञात्वा स्वरूपस्थोभवद्धरः॥२०॥ शिवमाह हरी रुद्र जिता माया त्वया हि मे॥
न जेतुमेनां शक्तो मे त्वामृते न्यः पुमान् भुवि॥२१॥ अप्राप्यायामृतं दैत्या देवैर्युद्धे निपातिताः॥ त्रिदिवस्थाः
सुराश्चाः सुराश्चासन् यः पठेत्स दिवं व्रजेत्॥२२॥ ॥इति अग्निपुराणे कुर्मावतारः॥३॥ ॥अग्निरुवाच॥
अवतारं वराहस्य वक्ष्येहं पापनाशनं॥ हिरण्याक्षोऽसुरेशोभूत् देवान् जित्वा दिवं स्थितः॥१॥ देवैर्ग
त्वा ततो विष्णुर्यज्ञरूपो वराहकः॥ अभूत् तं दानवं हत्वा दैत्यैः सार्द्धं च कंटकं॥२॥ धर्मदेवादिरक्षाकृ
त्ततः सोंतर्दधे हरिः॥ हिरण्याक्षस्य वै भ्राता हिरण्यकशिपुस्तथा॥३॥ जितदेवयज्ञभागः सर्वदे
वाधिकारकृत्॥ नारसिंहं वपुः कृत्वा तं जघान सुरैः सह॥४॥ स्वपदस्थान् सुरांश्चक्रे नारसिंहः सुरै
स्तुतः॥ देवासुरे पुरा युद्धे बलिप्रभृतिभिः सुराः॥ जिताः स्वर्गात्परिभ्रष्टा हरिं ते शरणं गताः॥ सुराणा
मभयं दत्वा अदित्या कश्यपेन च॥६॥ स्तुतो सौ वामनो भूत्वा ह्यदित्यां स क्रतुं ययौ॥ बलेः श्रीयजमान
स्य गंगाद्वारे गृणन् श्रुतं॥७॥ वेदान् पठंतं तं श्रुत्वा वामनं वरदोब्रवीत्॥ निवारितोपि शुक्रेण बलिर्ब्रू
हि यदिच्छसि॥८॥ तत्तेहं संप्रदास्यामि वामनो बलिमब्रवीत्॥ पदत्रयं मे गुर्वर्थं दीयतां बलिमब्रवी

त्॥९॥ तोये तु पतिते हस्ते वामनोभूदवामनः॥ भूर्लोकं स भुवर्लोकं स्वर्लोकं च पदत्रयं॥ चक्रे बलिं च सुत
लं तच्छक्राय ददौ हरिः॥ शक्रो देवैर्हरिं स्तुत्वा भुवनेशः सुखी त्वभूत्॥११॥ वक्ष्ये परशुरामस्य चावतारं शृणु
द्विज॥ उद्धतान् क्षत्रियान् मत्वा भुभारहरणाय सः॥१२॥ अवतीर्णो हरिः शांत्यै देवविप्रादिपालकः॥ जम
दग्नेरेणुकायां भार्गवः शस्त्रपारगः॥१३॥ दत्तात्रेयप्रसादेन कार्तवीर्यो नृपस्त्वभूत्॥ सहस्रबाहुः सर्वो
र्वीपतिः स मृगयां गतः॥१४॥ कृतवान्थरामेण शिरश्छित्वा निपातित॥ श्रांतो निमंत्रितोरण्ये मुनिना जमदग्नि
ना॥ कामधेनुप्रभावेन भोजितः सबलो नृपः॥१५॥ अप्रार्थयत् कामधेनुं यदा स न ददौ तदा॥ कृतवान्थ
रामेण शिरः छित्वा निपातितः॥१६॥ युद्धे परशुना राजा सधेनुः स्वाश्रमं ययौ॥ कार्तवीर्यस्य पुत्रैस्तु ज
मदग्निर्निपातितः॥१७॥ रामे वनं गते दैवादथ रामः समागतः॥ पितरं निहतं दृष्ट्वा पितृनाशामर्षितः॥
१८॥ त्रिःसप्तकृत्वा पृथिवीं निःक्षत्रामकरोद्विभुः॥ कुरुक्षेत्रे पंच कुंडान् कृत्वा संतर्प्य वै पितॄन्॥१९॥ क
श्यपाय महीं दत्वा महेंद्रे पर्वते स्थितः॥ कूर्मस्य च वराहस्य नृसिंहवामनस्य च॥२०॥ अवतारं स रामस्य श्रु
त्वा याति दिवं नरः॥ नयात्मसुच्यते भीतो पापानां महतामपि॥२१॥ इत्याग्नेये नृसिंहावतारः॥ अग्निरुवा
च॥ ॥ रामायणमहं वक्ष्ये नारदेनोदितं पुरा॥ वाल्मीकये यथा तद्वत् पवित्रं भुक्तिमुक्तिदं॥१॥ ॥नारद उ॰

अ०पु०
४

विष्णुनाभ्यजोब्रह्मामरीचिर्ब्रह्मणःसुतः॥मरीचेःकश्यपस्तस्मात्सूर्योवैवस्वतोमनुः॥२॥ततस्तस्मात्तथेक्ष्वाकु
स्तस्यवंशेककुत्स्थकः॥ककुत्स्थस्यरघुस्तस्मादजोदशरथस्ततः॥३॥रावणादेर्वधार्थायचतुर्धाभूत्स्व
यंहरिः॥राज्ञोदशरथाद्रामःकौशल्यायांबभूवह॥४॥कैकेय्यांभरतःपुत्रःसुमित्रायांचलक्ष्मणः॥शत्रुघ्नः
ऋष्यशृंगेणतासुसंदत्तपायसात्॥५॥प्राशितायज्ञसंसिद्धाद्रामाद्याश्चसमाःपितुः॥यज्ञविघ्नविनाशायविश्वा
मित्रार्थितोनृपः॥६॥रामंसंप्रेषयामासलक्ष्मणंमुनिनासह॥रामोगतोस्त्रशस्त्राणिशिक्षितस्ताडकांतकृ
त्॥७॥मारीचंमानवास्त्रेणमोहितंदूरतोनयत्॥सुबाहुंयज्ञहंतारंसबलंचावधीद्बली॥८॥सिद्धाश्रमनि
वासीचविश्वामित्रादिभिःसह॥गतःक्रतुंमैथलस्यद्रष्टुंचापंसहानुजः॥९॥शतानंदनिमित्तेनविश्वामि
त्रप्रभावकः॥१०॥रामायकथितोराज्ञासमुनिःपूजितःक्रतौ॥१०॥धनुरापूरयामासलीलयासबभंजतत्
वीर्यशुल्कांचजनकःसीतांकन्यांत्वयोनिजां॥११॥ददौरामायरामोपिपित्रादौहिसमागते॥उपयेमेजानकीं
तांऊर्मिलांलक्ष्मणस्तदा॥१२॥श्रुतकीर्तिंमांडवींचकुशध्वजसुतेतथा॥जनकस्यानुजस्यैतेशत्रुघ्नभ
रतावुभौ॥१३॥कन्येद्वेउपयेमातेजनकेनसुपूजितौ॥रामोगात्सवसिष्ठाद्यैर्जामदग्न्यंविजित्यच॥१४॥अयोध्यां राम
भरतोप्यागात्सशत्रुघ्नोयुधाजितः॥१५॥इत्याग्नेयेरामायणेबालकांडं॥५॥नर२३०॥ ॥भरतेयगतेरामःपित्रा ४

दीनभ्यपूजयत्॥राजादशरथोराममुवाचशृणुराघव॥१॥गुणांधाकाराज्यंवैप्रजाभिरभिषेचितं॥मनसा
हंप्रभातेतेयौवराज्यंददामिहि॥२॥रात्रौत्वंसीतयासार्द्धंसंयतःसुव्रतोभव॥राज्ञश्चमंत्रिणश्चाष्टौसवसिष्ठाद्या
स्तथाब्रुवन्॥३॥दृष्टिर्जयंतोविजयःसिद्धार्थोराष्ट्रवर्द्धनः॥अशोकोधर्मपालश्चसुमंत्रःसवसिष्ठकः॥४॥पित्रादि
वचनंश्रुत्वातथेत्युक्त्वासराघवः॥स्थितोदेवार्चनंकृत्वाकौशल्यायैनिवेद्यतत्॥राजोवाचवसिष्ठादीन्रा
ज्याभिषेचने॥संभारान्संभवंतुस्मइत्युक्त्वाकैकयीगतः॥अयोध्यालंकृतींदृष्ट्वाज्ञात्वारामाभिषेचनं॥५॥
भविष्यतीत्याचचक्षेकैकेयीमंथरासती॥पादौगृहीत्वारामेणकर्षितासापराधतः॥६॥तेनवैरेणसाराम
वनवासंचकांक्षति॥कैकेयित्वंसमुत्तिष्ठराज्याभिषेचनं॥७॥मरणंतवपुत्रस्यममतेनात्रसंशयः॥कुब्ज
योक्तंचतच्छ्रुत्वाएकमाभरणंददौ॥८॥उवाचमेयथारामस्तथामेभरतःसुतः॥उपायंतुनपश्यामि
भरतोनराज्यभाक्॥९॥कैकेयीमब्रवीत्क्रुद्धाहारंत्यक्त्वाथमंथरा॥बालिशेरक्षभरतमात्मानंमांच
राघवात्॥१०॥भविताराघवोराजाराघवस्यततःसुताः॥राजवंशस्तुकैकेयिभरतात्परिहास्यते॥११॥देवा
सुरेपुरायुद्धेशंबरेणहताःसुराः॥रात्रौभर्तागतस्तत्ररक्षितोविद्ययात्वया॥१२॥वरद्वयंतदाप्रादात्याचे
दानींनृपंचयत्॥रामस्यचवनेवासंनववर्षाणिपंचच॥१३॥यौवराज्यंचभरतेतदीदानींप्रदास्यति॥प्रो

अ॰पु॰ स्नाहिताकुब्जयासाअनर्थेर्थदर्शनी॥१४॥उवाचसत्वयापन्मेकथितंकारयिष्यति॥क्रोधागारंप्रविश्य
५ थपतिताभुविमूर्छिता॥१५॥द्विजादीनर्चयित्वाथराजादशरथस्तदा॥ददर्शकैकेयींरुष्टामुवाचकथमीदृ
शी॥१६॥रोगार्त्ताकिंभयोद्विग्ना:किमिछसिकरोमितत्॥येनरामेणहिविनानजीवामिमुहूर्त्तकं॥१७॥यथा
मेततनुर्प्पात्रोवांछितंतवसुंदरी॥सत्यंब्रूहीतिसोवाचनृपमत्थंददासिचेत्॥१८॥वरद्वयंपूर्वदत्तंसत्यार्थं
देहिमेनृप॥चतुर्दशसमारामोवनेवसतुसंयतः॥१९॥संभारैरेभिरद्यैवभरतोऽत्राभिषिच्यतां॥विषंपि
त्वामरिष्यामिदास्यसित्वंनचेन्नृप॥२०॥तछ्रुत्वामूर्छितोभूमौवज्राहतइवापतत्॥मुहूर्त्ताच्चेतनांप्राप्यकै
केयीमिदमब्रवीत्॥२१॥किंकृतंतवरामेणमयावापापनिश्चये॥यन्मामेवंब्रवीषित्वंसर्वलोकाप्रियंकरि
२२॥केवलंत्वत्प्रियंकृत्वाभविष्यामिसुनंदितः॥नलेभार्यकिंत्वरात्रिभरतोनेहराःसुतः॥२३॥प्रज्ञाधिवि
धवाराज्यंमृतेमयिगतेसुते॥सत्यपाशेनबद्धस्तुराममाहूयचाब्रवीत्॥२४॥कैकेय्यावंचितोरामराज्यं
कुरुनिरत्यतां॥त्वयावनेतुवस्तव्यंकैकेयीभरतोनृपः॥२५॥पितरंचैवकैकेयींनमस्कृत्यप्रदक्षिणं॥कृ राम॰
त्वानत्वाचकौशल्यांसमाश्वास्यसलक्ष्मणः॥२६॥सीतयाभार्ययासार्धंदशरथःसुमंत्रकः॥त्वादानानि ५
विप्रेभ्योदीननाथेभ्यएवसः॥२७॥मातृभिश्चैवपित्राद्यैःशोकार्त्तैर्निर्गतःपुरात्॥उषित्वातमसातीरेरात्रौपौ

रान्विहायच॥२८॥प्रभातेतमपश्यंतोऽयोध्यांतेपुनरागताः॥रुदन्राजापिकौशल्यागृहमागात्सुदुःखितः
२९॥पौराजनाःस्त्रियःसर्वारुरुदुःराजयोषितः॥रामोरथाश्चीराढ्यःशृंगवेरपुरंययौ॥३०॥गुहेनपूजितस्तत्र
गुदिमूलमाश्रितः॥लक्ष्मणसगुहौरात्रौदत्तुजागरंहितौ॥३१॥सुमंत्रंसरथंत्यक्त्वाप्रातर्नावाचजाह्नवीं॥रा
मलक्ष्मणसीताश्चतीर्णास्तेयुःप्रयागकं॥३२॥भरद्वाजंनमस्कृत्यचित्रकूटंगिरिंययुः॥वास्तुपूजांतत्र
कृत्वास्थितामंदाकिनीतटे॥३३॥सीतायैदर्शयामासचित्रकूटंचराघवः॥एकाक्षेणैवशरणंप्राप्तोदे
वान्विहायसः॥३४॥रामेवनंगतेराजायदाह्नीनिशीचाब्रवीत्॥कौशल्यांसकथांपूर्वांयदज्ञामाहतःपुरा॥
३५॥कौमारेसरयूतीरेयत्तदत्तकुमारकः॥पुत्रंविनामरिष्यामित्वंचशोकान्मरिष्यसि॥३६॥पुत्रंविनास्मरन्
शोकात्कौशल्येमरणंमम॥कथांकथयवाचाचसुस्कारराजादिवंगतः॥३७॥सुप्तंमत्वातुकौशल्यासुप्ताशो
कार्तमेवसा॥सुप्रभातेशयानश्चसुतमागधवंदिनः॥३८॥कौशल्यातंमृतंज्ञात्वाहाहतास्मीतिचापतत्॥नरा
नार्योऽथरुरुदुःरानीतोभरतस्तदा॥३९॥वसिष्ठाद्यैःसशत्रुघ्नःशास्त्रराजगृहात्पुरीं॥दृष्ट्वासशोकांकैकेयींनिं
दयामासदुःखितः॥४०॥वसिष्ठाद्यैजनैरुक्तेराज्यंकुर्वितिसोब्रवीत्॥व्रजामिरामसमानेतुंरामोराजागतोब
ली॥४१॥शृंगवेरंप्रयागंचभरद्वाजेनभोजितः॥नमस्कृत्यभरद्वाजंरामलक्ष्मणनामतः॥४२॥पितास्वर्ग

अ॰पु॰ गतोरामअयोध्यायांनृपोन्नमः।।रामश्रुत्वाजलंदत्वागृहीत्वापादुकेव्रज।।४३।।राज्यायाहंनयास्यामिसत्याच्चा
रजटाधरः।।रामोक्तोभरतश्चागात्नंदिग्रामेस्थितोबली।।त्यक्त्वायोध्यांपादुकेतेपूज्यराज्यमपालयत्।। ।।इत्याग्ने
६ येरामायणेअयोध्याकांडेषष्ठोध्यायः।।६।। ।।नारदउवाच।। ।।रामोवसिष्ठंमातॄंश्चनत्वात्रिंचप्रणम्यसः।।अनु
सूयांचतत्पत्नींशरभंगंसुतीक्ष्णकं।।१।।अगस्त्यभ्रातरंनत्वाअगस्त्यंतत्प्रसादतः।।धनुःखड्गंचसंप्राप्यदंड
कारण्यमागतः।।२।।जनस्थानेपंचवट्यांस्थितोगोदावरीतटे।।तत्रशूर्पनखायाताभक्षितुंतान्भयंकरी।।३।।रा
मंसुरूपंदृष्ट्वासाकामिनीवाक्यमब्रवीत्।।कस्त्वंकस्मात्समायातोभर्तामेभवचार्थितः।।४।।एतौचभक्षयिष्यामिइ
त्युक्त्वातंसमुद्यता।।तस्यानासांचकर्णौचरामोक्तोलक्ष्मणोछिनत्।।५।।रक्तंक्षरंतीप्रययौखरंभ्रातरमब्रवी
त्।।मरिष्यामिविनासाहंखरजीवामिवैतदा।।६।।रामस्यभार्यासीतास्तितस्यास्तिलक्ष्मणोनुजः।।तेषांय
द्रुधिरंकोष्णंपाययिष्यसिमांयदि।।७।।खरस्तथेतितामुक्त्वाचतुर्दशसहस्रकैः।।रक्षसांदुस्तरंप्रागात्तथा
त्रिशिरसासह।।रामंरामोपियुयुधेशरैर्विध्याधराक्षसान्।।हस्त्यश्वरथपादातंबलंनिन्येयमक्षयम्।।त्रिशी
र्षाणंखरंरौद्रंयुध्यंतंचैवदूषणं।।ययौशूर्पनखालंकांरावणाग्रेपतद्भुवि।।१०।।अब्रवीत्रावणंक्रुद्धानत्वंरा राम॰
जानराक्षसः।।खरादिहंतारामस्यसीतांभार्याहरस्वच।।११।।रामलक्ष्मणरक्तस्यपानाज्जीवामिनान्यथा।।तथे ६

त्याहचतच्छ्रुत्वामारीचंप्राहमेव्रज।।१२।।स्वर्णचित्रोमृगोभूत्वारामलक्ष्मणकर्षकः।।सीतांमेतांहरिष्यामिअन्य
थामरणंतव।।१३।।मारीचोरावणंप्राहरामोमृत्युर्लतिदुरं।।रावणादपिमर्तव्यंमर्तव्यंराघवादपि।।१४।।अवश्यं
यदिमर्तव्यंवरंरामोनरावणः।।इतिमत्वामृगोभूत्वासीताग्रेव्यचरन्मुहुः।।१५।।सीतयाप्रेरितोरामःशरेणैनाव
धीच्चतं।।म्रीमाणोमृगःप्राहहासीतेलक्ष्मणेतिच।।१६।।सोमित्रीःसीतयोक्तोऽथविरुद्धंराममागतः।।राव
णोप्यहरत्सीतांहत्वागृध्रंजटायुषं।।१७।।जटासाविरथोग्रेगेअंकमादायजानकीं।।गतोलंकामशोकाख्ये
धारयमासचाब्रवीत्।।१८।।भवभार्याममाग्र्यात्वंराक्षस्योरक्ष्यतामियं।।रामोहत्वातुमारीचंदृष्ट्वालक्ष्मण
मब्रवीत्।।१९।।मायामृगोसौमित्रेपयात्वमिहचागतः।।तथाशीताहृतान्नंनापश्यत्सगतोऽथतां।।२०
शुशोचविललापार्त्तोमांत्यक्त्वाक्वगतासिवै।।लक्ष्मणाश्वासितोरामोमार्गयामासजानकीं।।२१।।दृष्ट्वाजटायुस्तं
प्राहरावणोहृतवांश्चतां।।मृतोऽथसंस्कृतस्तेनकबंधंचावधीत्ततः।।२२।।शापमुक्तोब्रवीद्रामंसत्वंसुग्रीवमा
व्रज।। ।।इत्याग्नेयेरामायणेआरण्यकांडे।।७।।नारदउवाच।।रामःपंपासरोगत्वाशोचन्सशबरींगतः।।हनु
मतासुग्रीवंनीतोमित्रंचकारह।।१।।सप्ततालान्विनिर्भिद्यशरेणैकेनपश्यतः।।पादेनदुंदुभेःकायंचि
क्षेपदशयोजनं।।२।।तद्रिपुंवालिनंहत्वाभ्रातरंवैरकारिणं।।किष्किंधांकपिराज्यंचरुमांतारांसमर्पयन्।।३

अ॰पु॰ ७ ऋष्यमूके हरिशाय किष्किंधेशोब्रवीत्स च ॥ ३ ॥ तां त्वं प्राप्स्यसे यद्वत्तथा राम करोमि ते ॥ ४ ॥ तच्छ्रुत्वा माल्यवत्पृष्ठे
चातुर्मास्यं चकार सः ॥ किष्किंधायां च सुग्रीवो यदा नायाति दर्शनं ॥ ५ ॥ तदाब्रवीत्तं रामोक्तो लक्ष्मणो व्रज राघ-
व ॥ न च संकुचितः पंथा येन वाली हतो गतः ॥ ६ ॥ समये तिष्ठ सुग्रीव मा वालीपथमन्वगाः ॥ सुग्रीव आह सं-
सक्तो गतं कालं न बुद्धवान् ॥ ७ ॥ इत्युक्त्वा स गतो रामं नत्वोवाच हरीश्वरः ॥ आनीता वानराः सर्वे सीतायाश्च
गवेषणे ॥ ८ ॥ त्वन्मतात्प्रेषयिष्यामि विचिन्वंतु च जानकीं ॥ पूर्वादौ मासमायांतु मासादूर्ध्वं निहन्मि तान् ॥ ९ ॥
इत्युक्ता वानराः सर्वे पश्चिमोत्तरमार्गगाः ॥ जग्मुः रामं ससुग्रीवमपश्यंतस्तु जानकीं ॥ १० ॥ रामांगुलीयं संगृह्य
हनुमान्वानरैः सह ॥ दक्षिणे मार्गयामास सुप्रभायाः गुहादिके ॥ ११ ॥ मासादूर्ध्वं च विंध्यस्थो अपश्यंतस्तु जा-
नकीं ॥ ऊचुर्वृथा मरिष्यामो जटायुर्धन्य एव सः ॥ १२ ॥ सीतार्थे योऽत्यजत्प्राणान्रावणेन हतो रणे ॥ तच्छ्रुत्वा प्रा-
ह संपातिर्विहाय कपिभक्षणम् ॥ १३ ॥ भ्राता सोस्मज्जटायुर्वै मयोड्डीनोर्कमंडलं ॥ अर्कतापाद्रक्षितोगाद्दग्धपक्षो
हमत्रगः ॥ १४ ॥ रामवार्ताश्रवात्पक्षौ जातौ भूयोथ जानकीम् ॥ पश्याम्यशोकवनिकागतां लंकागतां किल ॥ १५ ॥ राम॰ ७
शतयोजनविस्तीर्णे लवणाब्धौ त्रिकूटके ॥ ज्ञात्वा रामं ससुग्रीवं वानराः कथयंतु वै ॥ १६ ॥ इत्याग्नेये महापुरा-
णे किष्किंधाकांडे ॥ ८ ॥ ॥ नारद उवाच ॥ संपातिवचनं श्रुत्वा हनुमानंगदादयः ॥ अब्धिं दृष्ट्वाब्रुवंस्तेब्धिं लंघये-

त् ॥ १ ॥ कपीनां जीवनार्थाय रामकार्यप्रसिद्धये ॥ शतयोजनविस्तीर्णं पुप्लुवेब्धिं समारुतिः ॥ २ ॥ दृष्ट्वा स्थितं च मैना-
कं सिंहिकां विनिपात्य च ॥ लंकां दृष्ट्वा राक्षसानां गृहाणि वनिता गृहे ॥ ३ ॥ दशग्रीवस्य कुंभस्य कुंभकर्णस्य
रक्षसः ॥ विभीषणस्येंद्रजितो गृहेऽन्येषां च रक्षसां ॥ ४ ॥ नापश्यत्पानभूम्यादौ सीतां चिंतापरायणः ॥ अशोक-
वनिकां गत्वा दृष्टवांछिंशिपातले ॥ ५ ॥ राक्षसीरक्षितां सीतां भव भार्येति वादिनं ॥ रावणं शिंशिपास्थोऽपश्यन्नेति
सीतां तु वादिनीम् ॥ भव भार्या रावणस्य राक्षसीवादिनी कपिः ॥ गते तु रावणे प्राह राजा दशरथोऽभवत् ॥ ७ ॥ रामो-
ऽस्य लक्ष्मणः पुत्रौ वनवासगतौ वरौ ॥ रामपत्नी जानकी त्वं रावणेन हृता बलात् ॥ ८ ॥ रामः सुग्रीवमित्रस्त्वां मा-
र्गयन्प्रेषयंश्च मां ॥ साभिज्ञानं चांगुलीयं रामदत्तं गृहाण वै ॥ ९ ॥ सीतांगुलीयं जग्राह साऽपश्यन्मारुतिं तरौ ॥ भू-
योऽग्रचोपविष्टं तमुवाच यदि जीवति ॥ १० ॥ रामः कथं न नयति शंकितामब्रवीत्कपिः ॥ रामः सीते न जानाति
ज्ञात्वा त्वां स नयिष्यति ॥ ११ ॥ रावणं राक्षसं हत्वा सबलं देवि मा शुचः ॥ साभिज्ञानं देहि मे त्वं मणिं सीता ददत्क-
पेः ॥ उवाच मां यथा रामो नयेच्छीघ्रं तथा कुरु ॥ काकाक्षिपातनकथां प्रातयाहि चरो कहा ॥ मणिं कपिं गृही-
त्वाह हनुमानेष्यते पतिः ॥ अपवातेन्वराकाचित् दृष्टमारुतमाशुभे ॥ १२ ॥ हनुमानुवाच ॥ ॥ अथ तां दर्शयि-
ष्यामि ससुग्रीवं च राघवं ॥ सीताब्रवीत्तद्धनुमन्नयतां मां हि राघवः ॥ १३ ॥ हनुमान्स दशग्रीवदर्शनोपायमा-

अ॰पु॰
९

करोत्॥ वनं बभंज तत्स्थांश्च हत्वा दंतनखादिभिः॥१४॥ हत्वा तु किंकरान् सर्वान् सप्त मंत्रिसुतानपि॥ पुत्रं मुख्यकु
मारं च शक्रजिच्च बबंध तं॥ नागपाशेन पिंगाक्षं दर्शयामास रावणं॥ उवाच रावणः कस्त्वं मारुतिः प्राह रावणं॥
रामदूतो राघवाय सीतां देहि मरिष्यसि॥१५॥ रामबाणैर्हतः सार्धं लंकास्थै राक्षसैर्ध्रुवं॥ रावणो हंतुमुद्युक्तो वि
भीषणनिवारितः॥१६॥ दीपयामास तत्पुच्छं दीप्तपुच्छः स मारुतिः॥ दग्ध्वा लंकां राक्षसांश्च दृष्ट्वा सीतां प्रणम्य तां॥
१७॥ समुद्रपारमागम्य दृष्टा सीतेति चाब्रवीत्॥ अंगदाद्यैः पीत्वा मधु वने मधु॥१८॥ जित्वा दधिमुखादींश्च दृष्ट्वा
रामं च तेब्रुवन्॥ दृष्टा सीतेति रामोपि हृष्टः पप्रच्छ मारुतिं॥१९॥ कथं दृष्टा त्वया सीता किमुवाच च मां प्रति॥
सीताकथामृतेनैव सिंच मां कामवह्निगं॥२०॥ हनुमानब्रवीत् लंघयित्वाब्धिमागतः॥ सीतां दृष्ट्वा पुरीं मे
दग्ध्वा सीतामणिं प्रगृह्य वै॥२१॥ हत्वा त्वं रावणं सीतां प्राप्स्यसे राम मा शुच॥ गृहीत्वा तं मणिं रामो रुरो
द विरहातुरः॥२२॥ मणिं दृष्ट्वा जानकीमेव दृष्टा सीता नय स्व मां॥ तया विना न जीवामि सुग्रीवाद्यैः प्रबो
धितः॥२३॥ समुद्रतीरं गतवान् तत्र रामं विभीषणः॥ गतस्तिरस्कृतो भ्राता रावणेन दुरात्मना॥ रामाय दे राम॰
हि सीतां त्वं इत्युक्त्वा ना सहायवान्॥ रामो विभीषणं मित्रं लंकैश्वर्येभ्यषेचयेत्॥२४॥ समुद्रं प्रार्थयन्मा ९
र्गं यदा नादात्तदा शरैः॥ भेदयामास रामं च तु वानाब्धिः समागतः॥२५॥ नलेन सेतुं बध्वाब्धौ लंकां व्रजग

मिरकः॥ अहं त्वया कृतः पूर्वं रामोब्धिं नलसेतुना॥२६॥ कृते न तरुशैलाद्यैः कुतः पारं महोदधेः॥ वानरैः स
सुवेलस्थः सह लंकां ददर्श वै॥२७॥ ॥इत्याग्नेये रामायणे सुंदरकांडे नवमोऽध्यायः॥९॥ नारद उवाच॥ ॥रा
मोक्तश्चांगदो गत्वा रावणं प्राह जानकी॥ दीयतां राघवायाशु अन्यथा त्वं मरिष्यसि॥१॥ रावणो हंतुमुद्युक्तः
संध्यागा हत राक्षसः॥ रामायाह दशग्रीवो युद्धमेकं तु मन्यते॥२॥ रामो युद्धाय तच्छ्रुत्वा लंकां स कपिराययौ
वानरा हनूमान् मैंदो द्विविदो जांबवान् नलः॥३॥ नीलस्तारोंगदो धुम्रः सुषेणः केसरी गजः॥ पनसो विनतो
रंभः सरभः क्राथनो बली॥४॥ गवाक्षो दधिवक्त्रश्च गवयो गंधमादनः॥ एते चान्ये च सुग्रीव एतैर्युक्तो
ह्यसंख्यकैः॥५॥ रक्षसां वानराणां च युद्धं संकुलमाबभौ॥ राक्षसा वानरान् जघ्नुः शरशक्तिगदादिभि
ः॥६॥ वानरा राक्षसान् जघ्नुर्नखदंतशिलादिभिः॥ हस्त्यश्वरथपादातं राक्षसानां बलं हतं॥७॥ हनुमान् गि
रिशृंगेन धुम्राक्षमवधीद्रिपुं॥ अकंपनं प्रहस्तं च युध्यंतं नील आवधीत्॥८॥ इंद्रजिच्छरबंधाच्च विमुक्तौ रा
मलक्ष्मणौ॥ तार्क्ष्यसंदर्शनाद्बाणैर्जघ्नतू राक्षसं बलं॥ रामः शरैर्जर्जरितं रावणं चाकरोद्रणे॥ रावणः
कुंभकर्णं च बोधयामास दुःखितः॥१०॥ कुंभकर्णः प्रबुद्धोथ पीत्वा घटसहस्रकं॥ मद्यस्य महिषादीनां भ
क्षयित्वाह रावणं॥११॥ अतो गच्छामि युद्धाय रामं हन्मि सवानरं॥ इत्युक्त्वा वानरान् सर्वान् कुंभकर्णो मम

अ०पु० १

दह॥१०॥ग्रहीतस्तेनसुग्रीवःकर्णनासंचकर्त्तसः॥कर्णनासाविहीनोसौभक्षयामासवानरान्॥११॥रामो
थकुंभकर्णस्यबाहूचिछेदसायकैः॥ततःपादौततश्छित्वाशिरोभूमौन्यपातयत्॥१२॥अनुकुंभोनिकुं
भमकराक्षश्चराक्षसः॥अयसोभासकृस्मिश्चविरूपाक्षश्चसंगरो॥देवांतकोनरांतश्चत्रिशिराचातिकायकः
रामेणलक्ष्मणेनैतेवानरैःसविभीषणैः॥युध्यमानास्तथाहन्युःराक्षसानुविपातिता॥इंद्रजिन्मायायायु
ध्यन्नमादहीत्सबवंधह॥वरदत्तैर्नागपाशैरोघातूध्यातौविशिल्यकौ॥विशल्याद्यायवर्णतोमारुत्यानीतप
र्वते॥हनुमान्धारयामासतत्रागंयत्रसंस्थितं॥निकुंभिलायांहोमादिकुर्वंतंहंतुमुद्यतः॥अविध्यवारितो
राजारथस्थःसचगोपपौ॥इंद्रोक्तमातलीरामंरथस्थंप्रचकारतं॥रामरावणयोर्युद्धंरामरावणयोरिव॥
रावणोवानरान्हंतिमारुत्याद्याश्चरावणं॥रामःशस्त्रैस्तमस्त्रैश्चववर्षजलदोयथा॥तस्यध्वजंसचिछे
दरथमश्वांश्चसारथिं॥१३॥धनुर्बाहुंशिरांस्येवउत्तिष्ठंतिशिरांसिहि॥पैतामहेनहृदयंभित्वारामेण
रावणः॥१४॥भूतलेपातितःसर्वैराक्षसैरुरुदुःस्त्रियः॥आश्वास्यतंचसंस्कृत्यरामाज्ञप्तोविभीषणः
१५॥हनूमताचयद्रामःसीतांशुद्धांगृहीतवान्॥रामोवह्नौप्रविष्टांतांशुद्धामिंद्रादिभिःस्तुतः॥१६॥ब्र
ह्मणादशरथेनविष्णुनाराक्षसार्दनः॥इंद्रोर्चितोमृतंहृष्टोजीवयामासवानरान्॥रामेणपूजिताजग्मुःयु

राम० ९

रा

द्धदृष्टादिवंचते॥रामोविभीषणायादाद्धर्मकामस्पृच्छ्वानरान्॥ससितःपुष्पकेस्थित्वागतमार्गेणवै
गतः॥दर्शयन्वनदुर्गाणिसीतायैहृष्टमानसः॥भरद्वाजंनमस्कृत्यनंदिग्रामंसमागतः॥१७॥भरतेनग
तश्चागादयोध्यांतत्रसंस्थितः॥वसिष्ठादीन्नमस्कृत्यकौशल्यांचैवकैकयीम्॥१८॥सुमित्रांप्राप्तरा
ज्योयद्विजादीन्सोभ्यपूजयत्॥वासुदेवंसुधामात्मानमश्वमेधैरथायजत्॥१९॥सर्वदानानिस
ददौपालयामाससप्रजाः॥पुत्रवत्धर्मकामादीन्दुष्टनिग्रहणेरतः॥२०॥सर्वोधर्मपरोलोकःस
र्वसस्याचमेदिनी॥नाकालमरणंचासीत्तदारामेराज्यंप्रशासति॥२१॥॥इत्याग्नेयेमहापुराणेयुद्धका
ंडवर्णनोनामाध्यायः॥१०॥नारदोवाच॥॥उपेतेराघवंजग्मुरगस्त्याद्याःसुपूजिताः॥धन्यस्त्वंविजयीयस्मा
त्इंद्रजिद्विनिपातितः॥१॥ब्रह्मात्मजःपुलस्त्योतोविश्रवास्तस्यकैकसी॥पुष्पोत्कटाभूत्प्रथमातत्पु
त्रोभूद्धनेश्वरः॥२॥कैकस्यांरावणोजज्ञेविंशद्बाहुर्दशाननः॥तपसाब्रह्मदत्तेनवरेणजितदैवतः॥
३॥कुंभकर्णःसनिद्रोभूद्धर्मिष्ठोभूद्विभीषणः॥स्वसासुपनिखातेषांरावणान्मेघनादकः॥४॥इंद्र
जित्त्विंद्रजिज्ज्ञेयोरावणादधिकोबली॥हतस्त्वयालक्ष्मणेनदेवादेःक्षेममिच्छता॥५॥इत्युक्त्वातेगतावि
प्राअगस्त्याद्यानमस्कृताः॥देवप्रार्थितरामोक्तःशत्रुघ्नोलवणार्दनः॥६॥अभूत्स्वर्गधुराकारीरामो

त्र

अ॰ग्नि॰ १०

कोभरतोवधीत्॥कोटित्रयंचशैलूषपुत्राणांनिशितैःशरैः॥७॥शैलूषंहत्वगंधर्वंसिंधुतीरनिवासिनः॥तक्षंच
पुष्करंपुत्रंस्थापयित्वाथदेशयोः॥८॥भरतोगात्सशत्रुघ्नोराघवंपूजयन्स्थितः॥रामोदुष्टान्निहत्याजौशि
ष्टान्संपाल्यदानवः॥९॥पुत्रौकुशलवौजातौवाल्मीकेराश्रमेचरौ॥लोकापवादात्सक्तायांतातौमच
रितश्रवात्॥१०॥राज्येभिषिच्यब्रह्माहमस्मीतिध्यानतत्परः॥दशवर्षसहस्राणिदशवर्षशतानिच॥
११॥राज्यंदत्वाक्रतून्कृत्वास्वर्गदेवार्चितोययौ॥सपौरःसानुजःसीतापुत्रोजनपदास्थितः॥१२॥अग्नि
रुवाच॥॥वाल्मीकिर्नारदात्श्रुत्वारामायणमकारयत्॥सविस्तरंयएतच्चशृणुयात्सदिवंव्रजेत्॥
१३॥॥इत्याग्नेयेमहापुराणेउत्तरकांडेएकादशोध्यायः॥११॥॥अग्निरुवाच॥॥हरिवंशंप्रवक्ष्यामिविष्णु
नाभ्यंबुजादजः॥ब्रह्मणोत्रिस्ततःसोमःसोमाज्जातःपुरूरवा॥१॥तस्मादायुरभूत्तस्मात्नहुषोतोय न
यातिकः॥यदुंचतुर्वसुंतस्माद्देवयानीव्यजायत॥२॥द्रुह्युंचानुंचपुरुंचशर्मिष्ठावार्षपर्वणी॥यदोःकुले
यादवाश्चवसुदेवस्तदुत्तमः॥३॥भवोभारावताराथंदेवक्यावसुदेवतः॥हिरण्यकशिपोःपुत्राःषड्गर्भा
योगनिद्रया॥४॥विष्णुप्रयुक्तयानितादेवकीजठरंपुरा॥अभूच्चसप्तमोगर्भोदेवक्याजठराद्बलः॥५॥सं राम॰
क्रामितोभूज्जोहिण्यांरौहिणेयस्ततोहरिः॥कृष्णाष्टम्यांचनभसिअर्द्धरात्रेचतुर्भुजः॥६॥देवक्यावसुदेवेन १०

ततोबलोद्विबाहुकः॥वसुदेवकंसभयात्यशोदाशयनेनयत्॥७॥यशोदाबालिकांगत्यदेवकीशयनेन
यत्॥कंसोबालध्वनिंश्रुत्वातांचिक्षेपशिलातले॥८॥वारितोपिसदेवक्यामृत्युर्गर्भोष्टमोमम॥श्रुत्वाशरीरि
णीवाचमतोगर्भास्तुमारिताः॥९॥साक्षिप्ताबालिकाकंसमाकाशस्थाब्रवीदिदं॥किंमयाक्षिप्तयाकंसजातो
यस्त्वांवधिष्यति॥१०॥सर्वस्वभूतोदेवानांभूभाराहरणायसः॥इत्युक्त्वासाचशुंभादीन्हत्वाइंद्रेणचस्तुता॥
११॥आर्यादुर्गादिवगर्भाअंबिकाभद्रकाल्यपि॥भद्राक्षेम्याक्षेमकरीनैकबाहुर्नमामिताः॥१२॥त्रिसंध्यंयः
पठेन्नामःसर्वान्कामानवाप्नुयात्॥कंसोपिपूतनादींश्चाप्रेषयत्बालनाशने॥१३॥यशोदायतिनंदायव
सुदेवेनचार्पितौ॥रक्षणायचकंसादेर्भतिनैवहिगोकुले॥१४॥रामकृष्णौचतौल्योष्टौगो/निर्गोपालकैःसह
सर्वस्यजगतःपालौगोपालौतौबभूवतुः॥१५॥कृष्णश्चोलूखलेबद्धोदाम्नाययन्नयशोदया॥यमलार्जुनम
ध्येशाप्तगतोचयमलार्जुनौ॥१६॥परिवेत्तुश्चशकटःपादक्षेपात्स्तनार्थिना॥पूतनास्तनपानेनसाहताह
तुमुद्यता॥१७॥वृंदावनगतःकृष्णःकालियंयमुनाह्रदात्॥जित्वानिःसार्यचाब्धिस्थंचकारबलसंस्तुतः॥
१८॥क्षेमंतालवनंचक्रेहत्वाधेनुकगर्द्दभं॥अरिष्टवृषभंहत्वाकेशिनंहयरूपिणं॥शक्रोत्सवंपरित्यज्य
कारितोगोभ्ययत्नकः॥पर्वतंधारयित्वाचशक्राद्वृष्टिर्निवारिता॥२०॥नमस्कृत्यमहेंद्रेणगोविंदेपार्थोनु

नोर्पितः॥ इंद्रोश्ववत्स्तुष्टेन भूयस्कृष्टेन कारितः॥२१॥ रथस्थो मथुरां चागात्कंसोक्रूरसंस्तुतः॥ गोपीभिरनुर
क्ताभिः क्रीडिताभिर्निरीक्षितः॥२२॥ रजकं चाप्ययच्छंतं हत्वा वस्त्राणि सोग्रहीत्॥ सहरामेण मालाभृत्माला
कारे वरं ददौ॥२३॥ दत्तानुलेपनां कुब्जामृजुं चक्रे हरिः कुजां॥ मत्तं कुवलयापीडं द्वारि रंगं प्रविश्य च॥२४॥
कंसादीनां पश्यतां च मंचस्थानां नियुद्धकं॥ चक्रे चाणूरमल्लेन मुष्टिकेन बलोकरोत्॥२५॥ चाणूरमुष्टिकौ ता
भ्यां हतौ मल्लौ तथापरे॥ मथुराधिपतिं कंसं हत्वा तत्पितरं हरिः॥२६॥ चक्रे यादवराजानं स्तीप्राप्ती च कंस
गे॥ जरासंधस्य ते पुत्र्यौ जरासंधस्तदीरितः॥२७॥ चक्रे स मथुरारोधं यादवैर्युयुधे शरैः॥ रामकृष्णौ च म
थुरां त्यक्त्वा गोमंतमागतौ॥२८॥ जरासंधं विजित्याजौ पौंड्रकं वासुदेवकं॥ पुरीं तु द्वारकां कृत्वा चावस २
द्यादवैर्वृतः॥२९॥ भौमं तु नरकं हत्वाहृता तेन चक्रा॥ देवगंधर्वयक्षाणां ता उवाह नार्दनः॥३०॥
षोडशस्त्रीसहस्राणि रुक्मिण्याद्यास्तथाष्टकं॥ सत्यभामायुतः कृष्णो गरुडे नरकार्दितः॥३१॥ मणिशै
लं सरत्नं चइंद्रं जित्वा हरिर्दिवि॥ पारिजातं समानीय सत्यभामागृहे करोत्॥३२॥ सांदीपनेश्च सच्छास्त्रं श्रु
त्वा तद्बालकं ददौ॥ जित्वा पंचजनं दैत्यं यमेन च सुपूजितः॥३३॥ अवधीत्कालयवनं मुचुकुंदेन पूजितः॥ राम·
वसुदेवं देवकीं च भक्तविप्रांश्च सोर्चयेत्॥३४॥ रेवत्यां बलभद्राच्च जज्ञाते निशठोल्मुकौ॥ कृष्णात्सांबो जांब ११

वत्यास्तु अन्यास्वो भवन्सुताः॥३५॥ प्रद्युम्नोभूद्रुक्मिण्यां षष्ठेह्नि स हृतो बलात्॥ शंबरेणांबुधौ क्षिप्तो मत्स्यो
जग्राह धीवरः॥३६॥ समत्स्यं शंबरमदात्मायावत्यै च शंबरः॥ मायावती मत्स्यमध्ये दृष्ट्वा स्वपतिमादरात्॥ पुपोष
सा तं चोवाच रतिस्तेहं पतिर्मम॥ कामस्त्वं शंभुनानंगः हतोहं शंबरेण च॥३७॥ कृता च तस्य पत्नी त्वं माया तं शंब
रं जहि॥ तच्छ्रुत्वा शंबरं हत्वा प्रद्युम्नः सह भार्यया॥३८॥ मायावत्या ययौ कृष्णं कृष्णो हृष्टोथ रुक्मिणी॥ प्रद्युम्ना
दनिरुद्धोभूदुषापतिरुदारधीः॥४०॥ बाणो बलेस्तत्सुतस्य सुतो यो शोणितं पुरं॥ तपसा शिवपुत्रोभून्मायूर
ध्वजपाततः॥४१॥ युद्धं प्राप्स्यसि बाणत्वं बाणं तुष्टः शिवोभ्यधात्॥ शिवेन क्रीडतीं गौरीं दृष्ट्वा सासस्पृहा प
तौ॥४२॥ तामाह गौरी भर्त्ता ते निशि स्वप्ने तु दर्शनात्॥ वैशाखमासे द्वादश्यां पुंसो भर्त्ता भविष्यति॥४३॥ गौर्यु
क्ता हर्षिता तो बाला गृहे सुप्ता ददर्श तं॥ आत्मना संगतं ज्ञात्वा तं सख्या वै चित्रलेखया॥४४॥ लिखिताद्विचित्रपटा
दनिरुद्धं च सानयत्॥ कृष्णपौत्रं द्वारकातो दुहिता बाणमंत्रिणः॥४५॥ कुंभांडस्यानिरुद्धोगाद्धुरा मस्सम
पास॥ बाणध्वजस्य संपातो रक्षिभिः स निवेदितः॥४६॥ अनिरुद्धस्य बाणेन युद्धमासीत्सुदारुणं॥
श्रुत्वा तु नारदात्कृष्णः प्रद्युम्नबलभद्रवान्॥४७॥ गरुडस्थो मजित्वाग्नीन्ज्वरं माहेश्वरं तथा॥ हरिशंक
रयोर्युद्धं बभूवाथ शराशरि॥४८॥ नंदीविनायकस्कंदमुख्यास्तार्क्ष्यादिभिर्जिताः॥ जृंभिते शंकरे नष्टे जृंभ

अ·पु·
१२

णास्त्रेण विष्णुना ॥४९॥ छिन्नं सहस्रं बाहूनां रुद्रेणाभयसंश्रितं ॥ विष्णुना जीवितो बाणो द्विबाहुः प्राब्रवीच्छिवं ॥५०
त्वयाय दत्ताभयं दत्तं बाणस्यास्य मया च तत् ॥ आवयोर्नास्ति भेदो वै भेदी नरकमाप्नुयात् ॥५१॥ शिवाद्यैः पूजितो
विष्णुः सानिरुद्ध उषादियुक् ॥ द्वारकां तु गतो रेमे उग्रसेनादियादवैः ॥५२॥ अनिरुद्धात्मजो वज्रो मार्कंडे
यात्तु सर्ववित् ॥ बलभद्रः प्रलंबघ्नो यमुनाकर्षणोऽभवत् ॥५३॥ द्विविदस्य कपेर्भत्ता कौरवोन्मादनाशनः ॥ हरि
रेमे नैकमूर्त्ती रुक्मिण्यादिभिरीश्वरः ॥५४॥ पुत्रानुत्पादयामास त्वसंख्यातान् स यादवान् ॥ हरिवंशं पठे
युस्स प्राप्तकामो हरिं व्रजेत् ॥५५॥ ॥ इत्याग्नेये महापुराणे हरिवंशो द्वादशोऽध्यायः ॥ ॥ अग्निरुवाच ॥ ॥ भा
रतं संप्रवक्ष्यामि कृष्णमाहात्म्यलक्षणं ॥ भूभारमहरद्विष्णुर्निमित्तीकृत्य पांडवान् ॥१॥ विष्णुनाभ्यब्जजो ब्र
ह्मा पुत्रोऽत्रिस्ततः ॥ सोमः सोमाद्बुधस्तस्मादैल आसीत् पुरूरवाः ॥२॥ तस्मादायुस्ततो राजा नहुषोतो यया
तिकः ॥ ततः पुरुस्तस्य वंशे भरतोऽथ नृपः कुरुः ॥३॥ तद्वंशे शांतनुस्तस्माद्भीष्मो गंगासुतो ध्वजौ ॥ चित्रांग
दो विचित्रस्य सत्यवत्यां च शांतनोः ॥४॥ स्वर्गं गते शांतनौ च भीष्मो भार्याविवर्जितः ॥ अपालयद्भ्रातृराज्यं
बालश्चित्रांगदो हतः ॥५॥ चित्रांगदेन द्वे कन्ये काशिराजस्य चांबिका ॥ अंबालिका च भीष्मेण आनीते विजि
तारिणा ॥ ज्यायो वैचित्रवीर्यस्य यक्ष्मणा स दिवं गतः ॥ सत्यवत्यास्त्वनुमतादंबिकायां सुतोऽभवत् ॥७॥ धृतरा

राम·
१२

ष्ट्रोंबालिकायां पांडुश्च व्यासतः सुतः ॥ गांधार्यां धृतराष्ट्राच्च दुर्योधनमुखं शतं ॥८॥ शतशृंगाश्रमपदे भार्या
योगाद्यतोऽमृतः ॥ ऋषिशापात्ततो धर्मात् कुंत्यां पांडोर्युधिष्ठिरः ॥९॥ वाताद्भीमोऽर्जुनः शक्रात् माद्र्यामश्विकु
मारतः ॥ नकुलः सहदेवश्च पांडुमाद्रीसुतो नृप ॥१०॥ कर्णः कुंत्यां हि कन्यायां जातो दुर्योधनाश्रितः ॥ कुरु
पांडवयोर्वैरं दैवयोगाद्बभूव ह ॥११॥ दुर्योधनो जतुगृहे पांडवान् दहत् कुधीः ॥ दग्धागाराद्विनिष्क्रांता मा
तृषष्ठास्तु पांडवाः ॥ ततस्त एकचक्रायां ब्राह्मणस्य निवेशने ॥ मुनिवेषम् स्थिताः सर्वे निहत्य बकराक्ष
सम् ॥१३॥ ययुः पंचालविषयं द्रौपद्यास्ते स्वयंवरे ॥ संप्राप्ता बाहुवेधेन द्रौपदी पंच पांडवाः ॥१४॥ अर्द्धराज्यं
पुनः प्राप्तास्ततो दुर्योधनादिभिः ॥ गांडीवं च धनुर्दिव्यं पावकादथसुत्तमं ॥१५॥ सारथिं चार्जुनः संख्ये कृ
ष्णमक्षय्यसायकान् ॥ ब्रह्मास्त्रादींस्तथा द्रोणात् सर्वे सर्वविशारदाः ॥१६॥ कृष्णेन सोऽर्जुनो वह्निं खांडवे सम
तर्पयत् ॥ इंद्रवृष्टिं वारयंश्च शरबंधेन पांडवः ॥१७॥ जितदिशः पांडवैस्तु राज्यं चक्रे युधिष्ठिरः ॥ बहुस्वर्णं राज
सूयं न सेहे तत् सुयोधनः ॥१८॥ भ्रात्रा दुःशासनेनोक्तः कर्णेन प्राप्तभूतिना ॥ द्यूतकार्ये शकुनिना द्यूतेन स
युधिष्ठिरं ॥१९॥ अजयत्तस्य राज्यं च सभास्थो मायया हसन् ॥ जितो युधिष्ठिरो भ्रातृयुक्तश्चारण्यकं ययौ ॥
२०॥ वने द्वादश वर्षाणि प्रतिज्ञातानि सोऽनयत् ॥ अष्टाशीतिसहस्राणि भोजयन् पूर्ववद्द्विजान् ॥२१॥ स धौम्यो भी

अ·पु० १३ पदीषष्ठास्ततः प्रायाद्विराटकं॥ कंको द्विजो ह्यविज्ञातो राजा भीमोऽथ सूपकृत्॥२२॥ बृहन्नडार्जुनो भार्या सैरं
ध्रीयमजौ तथा॥ अन्यनाम्ना भीमसेनः कीचकं चावधीन्निशि॥२३॥ द्रौपदीं हर्तुकामं तं अर्जुनश्चावधीत्
कुरून्॥ कुर्वतो गोग्रहादेवं तैर्ज्ञाताः पांडवा अथ॥२४॥ सुभद्रा कृष्णभगिनी अर्जुनात्स्म अजीजनत्॥ अभि
मन्युं ददौ तस्मै विराटश्चोत्तरां सुतां॥२५॥ सप्ताक्षौहिणीशः आसीद्धर्मराजो रणाय सः॥ कृष्णो दूतोऽब्रवीद्गत्वा
दुर्योधनममर्षणम्॥२६॥ एकादशाक्षौहिणीशं नृपं दुर्योधनं तदा॥ युधिष्ठिरायार्द्धराज्यं देहि ग्रामांश्च पं
च वा॥२७॥ युध्यस्व वा वचः श्रुत्वा कृष्णमाह सुयोधनः॥ भूसूच्यग्रं न दास्यामि योत्स्यामि ग्रहणोद्यतः॥२८
विश्वरूपं दर्शयित्वा अदृष्टं स्वं विदुरार्चितं॥ अगाद्युधिष्ठिरं प्राह योधयैनं सुयोधनं॥२९॥ इत्याग्नेये महापुरा
णे आदिपर्वाणि त्रयोदशोऽध्यायः॥१३॥ अग्निरुवाच॥ ॥ यौधिष्ठिरी दौर्योधनी कुरुक्षेत्रं ययौ चमूः॥ भीष्मद्रो
णादिकान्दृष्ट्वा नायुध्यत गुरूनिति॥१॥ पार्थमुवाच भगवान्न शोच्या भीष्मकमुख्यकाः॥ शरीराणि विनाशी
नि नश्शरीरी विनश्यति॥२॥ अयमात्मा परं ब्रह्म अहं ब्रह्मास्मि विद्धि तं॥ सिद्ध्यसिद्ध्योः समो योगी राजधर्मं प्रपाल
य॥३॥ कृष्णोक्तोऽथार्जुनो युध्यन् रथस्थो वाद्यशब्दवान्॥ भीष्मः सेनापतिरभूदादौ दुर्योधने रणे॥४॥ पांडवानां राम· १३
शिखंडी च तयोर्युद्धं बभूव ह॥ धार्तराष्ट्राः पांडवाश्च जघ्नुर्युद्धे सभीष्मकाः॥५॥ धार्तराष्ट्रान् शिखंड्याद्याः पां

डवा जघ्नुराहवे॥ देवासुरसमं युद्धं कुरुपांडवसेनयोः॥६॥ बभूव स्वस्थदेवानां पश्यतां प्रीतिवर्द्धनम्॥ भी
ष्मोऽस्त्रैः पांडवं सैन्यं दशाहोभिर्न्यपातयत्॥७॥ दशमेऽर्जुनो बाणैर्भीष्मं वीरं ववर्ष ह॥ शिखंडी द्रुपदोक्तोऽस्त्रै
र्ववर्ष जलदोपथा॥८॥ हस्त्यश्वरथपादातमन्योन्यास्त्रनिपातितं॥ भीष्मः स्वच्छंदमृत्युश्च युद्धमार्गं प्रदर्श्य च॥
९॥ वसूक्तो वसुलोकाय शरशय्यागतः स्थितः॥ उत्तरायणमाकांक्षन् ध्यायन्विष्णुं स्तुवन्स्थितः॥१०॥ दुर्यो
धने तु शोकार्ते द्रोणः सेनापतिस्त्वभूत्॥ पांडवे हर्षिते सैन्ये धृष्टद्युम्नश्चमूपतिः॥११॥ तयोर्युद्धं बभूवोग्रं
यमराष्ट्रविवर्द्धनं॥ विराटद्रुपदाद्याश्च निमग्ना द्रोणसागरे॥१२॥ दौर्योधनी महासेना हस्त्यश्वरथपत्तिना॥
धृष्टद्युम्नाभिपतिता द्रोणः काल इवाबभौ॥१३॥ हतोऽश्वत्थामचेत्युक्ते द्रोणः शस्त्राणि चासृजत्॥ धृष्ट
द्युम्नशराक्रांतः पतितः स महीतले॥१४॥ पंचमेऽहनि दुर्द्धर्षः सर्वक्षत्रं प्रमथ्य च॥ दौर्योधने तु शोकार्ते कर्णः
सेनापतिस्त्वभूत्॥१५॥ अर्जुनः पांडवानां च तयोर्युद्धं बभूव ह॥ शस्त्राशस्त्रि महारौद्रं देवासुररणोपमं॥
१६॥ कर्णार्जुनाख्ये संग्रामे कर्णोऽरीनवधीच्छरैः॥ द्वितीयेऽहनि कर्णस्तु अर्जुनेन निपातितः॥१७॥ शल्यो दि
नार्द्धं युयुधे ह्यवधीत्तं युधिष्ठिरः॥ युयुधे भीमसेनेन हतसैन्यः सुयोधनः॥१८॥ बहून्हत्वा नरादींश्च भी
मसेनमथाब्रवीत्॥ गदया प्रहरंतं तु भीमस्तं तु न्यपातयत्॥१९॥ गदयान्यानुजांस्तस्य तस्मिन्नष्टादशेऽह

अ०पु०
१४

नि॥रात्रौ सुप्तं च बलं पांडवानामपातयत॥२०॥अक्षौहिणीप्रमाणं तु अश्वत्थामा महाबलः॥द्रौपदेयान्स
पांचालान् धृष्टद्युम्नं च सोवधीत्॥२१॥पुत्रहीनां द्रौपदीं तां रुदतीमर्जुनस्ततः॥शिरोमणिं तु जग्राह ऐषी
कास्त्रेण तस्य च॥२२॥अश्वत्थामास्त्रनिर्दग्धं जीवयामास वै हरिः उत्तरायास्ततो गर्भं स परीक्षिन्नृपः॥
२३॥कृतवर्म्मा कृपो द्रौणिस्त्रयो मुक्तास्ततो रणात्॥पांडवाः सात्यकी कृष्णः सप्त मुक्ता न चापरे॥२४॥स्त्रिय
श्चार्त्ताः समाश्वास्य भीमाद्यैः स युधिष्ठिरः॥संस्कृत्य प्राहतान् वीरान् दत्तोदकधनादिकः॥२५॥भीष्माच्छां
तनवाच्छ्रुत्वा धर्म्मान्सर्वांश्च नृणां तिदात्॥राजधर्मान्मोक्षधर्मान् दानधर्म्मान्नृपो नवेत्॥२६॥अश्वमेधे
द दौ दानं ब्राह्मणेभ्योरिमर्दनः॥श्रुत्वार्जुनान्मौसले स यादवानां च संक्षयं॥२७॥राज्ये परीक्षितं स्थाप्य सानु
जः स्वर्गमाप्तवान्॥॥इत्याग्नेये महापुराणे चतुर्दशोध्यायः॥१४॥॥अग्निरुवाच॥॥युधिष्ठिरे तु राज्य
स्थे आश्रमादाश्रमांतरम्॥धृतराष्ट्रो वनमगात् गांधारी च पृथा द्विज॥१॥विदुरस्त्वग्निना दग्धो वनजे
न दिवं गतः॥एवं विष्णुर्भुवो भारमहरत् दानवादिकं॥२॥धर्माया धर्मनाशाय निमित्तीकृत्य पांडवान्॥
स विप्रशापव्याजेन मुशलेनाहनत्कुलं॥३॥यादवानां द्वारकायां वज्रं राज्येभ्यषेचयत्॥देवादेशात्प्रभा
से स देहं त्यक्त्वा स्वयं हरिः॥४॥इंद्रलोके ब्रह्मलोके पूज्यते स्वर्गवासिभिः॥बलभद्रोनंतमूर्त्तिः पातालस्वर्गमा

राम॰
१५

पिवान्॥५॥अविनाशी हरिर्देवो ध्यानिभिर्ध्येय एव सः॥विना तं द्वारकास्थानं प्लावयामास सागरः॥६॥
संस्कृत्य यादवान् पार्थो दत्तोदकधनादिकः॥स्त्रियोष्टावक्रशापेन भार्या विष्णोश्च याः स्थिताः॥७॥पुनस्तच्छा
पतो नीता गोपालैर्लगुडायुधैः॥अर्जुनं हित्वा तिरस्कृत्य पार्थः शोकं चकार ह॥८॥व्यासेनाश्वासितो मेने बलं मे ह
रिसंन्निधौ॥हस्तिनापुरमागत्य पार्थः सर्वं न्यवेदयत्॥९॥युधिष्ठिराय स भ्रात्रे पालकाय नृणां तदा॥तद्
नुस्तानि चास्त्राणि स रथस्ते च वाजिनः॥१०॥विनाकृष्णेन तन्नष्टं दानमश्रोत्रिये यथा॥तच्छ्रुत्वा धर्मरा
जस्तु राज्ये स्थाप्य परिक्षितं॥११॥प्रस्थानं प्रस्थितो धीमान् द्रौपद्या भ्रातृभिः सह॥संसारानित्यतां ज्ञात्वा जपन्न
ष्टशतं हरेः॥महापथे तु पतिता द्रौपदी सहदेवकः॥नकुलः फाल्गुनो भीमो राजा शोकपरायणः॥१३
इंद्रानीतरथारूढः सानुजः स्वर्गमाप्तवान्॥दृष्ट्वा दुर्योधनादींश्च वासुदेवं च हर्षितः॥१४॥एतत्ते भार
तं प्रोक्तं यः पठेत्स दिवं व्रजेत्॥॥इत्याग्नेये महापुराणे भारते पंचदशोध्यायः॥१५॥॥अग्निरुवाच॥॥
वक्ष्ये बुद्धावतारं च पठतः शृण्वतोर्थदं॥पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः॥१॥रक्षरक्षेति शरणं वद
तो जग्मुरीश्वरम्॥मायामोहस्वरूपोसौ शुद्धोदनसुतोभवत्॥२॥मोहयामास दैत्यांस्तांस्त्याजिता वे
दधर्मकं॥ते च बौद्धा बभूवुर्हि तेभ्योन्ये वेदवर्जिताः॥३॥आर्हतः सोभवत्पश्चादार्हतानकरोत्परा

अ॰पु॰ न्॥एवंपाषंडिनोजातावेदधर्मादिवर्जिताः॥४॥नरकार्हंकर्मचक्रुर्ग्रहीष्यंत्यधमादपि॥सर्वेकलियुगांते
१५ तुभविष्यंतिचसंकराः॥५॥दस्यवःशीलहीनाश्चवेदोवाजसनेयकः॥दशपंचचशाखावैप्रमाणेनभ
विष्यति॥६॥धर्मकंचुकसंवीताअधर्मरुचयस्तथा॥मानुषान्भक्षयिष्यंतिम्लेच्छाःपार्थिवरूपिणः॥७
कल्कीविष्णुयशःपुत्रोयाज्ञवल्क्यपुरोहितः॥उत्छेदयिष्यतिम्लेच्छानुद्गृहीतास्त्रःकृतायुधः॥८॥स्थापयिष्य
तिमर्यादांचातुर्वर्ण्येयथोचितां॥आश्रमेषुचसर्वेषुप्रजाःसद्धर्मवर्त्मनि॥९॥कल्किरूपंपरित्यज्यहरिः
स्वर्गंगमिष्यति॥ततःकृतयुगंनामराजवत्संभविष्यति॥१०॥वर्णाश्रमाश्चधर्मेषुस्वेषुस्थास्यंतिसक्रमं
एवंसर्वेषुकल्पेषुसर्वमन्वंतरेषुच॥११॥अवताराअसंख्याताअतीतानागतादयः॥विष्णोर्दशावतारां
श्चान्यःपठेत्छृणुयान्नरः॥१२॥सोवाप्तकामोविमलःसकुलःस्वर्गमाप्नुयात्॥धर्माधर्मव्यवस्थानमे
वंवैकुरुतेहरिः॥१३॥अवतीर्णःसजगतःस्वर्गादेःकारणंहरिः॥॥इत्यादिमहापुराणेआग्नेयेबुद्ध
कल्क्यवतारःषोडशोऽध्यायः॥१६॥॥अग्निरुवाच॥॥जगत्सर्गादिकांक्रीडांविष्णोर्वक्ष्येधुनाशृणु॥ राम॰
स्वर्गादिहेतुःस्रष्टादिर्निगिवान्सगुणोगुणः॥१॥ब्रह्माव्यक्तंसदग्रेभूत्नखंरात्रिदिनादिकं॥प्रकृ १५
तिंपुरुषंविष्णुःप्रविश्याक्षोभयत्ततः॥२॥सर्गकालेमहत्तत्त्वमहंकारस्ततोभवत्॥वैकारिकस्तैजसश्चभू

तादिश्चैवतामसः॥३॥अहंकाराच्छब्दमात्रमाकाशमभवत्ततः॥स्पर्शमात्रोनिलस्तस्माद्रूपमात्रोनलस्त
तः॥४॥रसमात्राआपइहतोगंधमात्राधरित्र्यभूत्॥अहंकारात्तामसात्तुतैजसानींद्रियाणिच॥५॥वैकारिका
देवामनएकादशेंद्रियं॥ततःस्वयंभूर्भगवान्सिसृक्षुर्विविधाःप्रजाः॥६॥अपएवससर्जादौतासुवीर्य
मवासृजत्॥आपोनाराइतिप्रोक्ताआपोवैनरसूनवः॥७॥अयनंतस्यताःपूर्वंतेननारायणःस्मृतः॥हिरण्य
ब्रह्मास्व वर्णमभवत्तदंडमुदकेशयं॥८॥तस्मिन्जज्ञेस्वयंभूरितिनःश्रुतं॥हिरण्यगर्भोभगवानुषित्वापरिवत्सरं
९॥तदंडमकरोद्द्वैधंदिवंभुवमथापिच॥तयोःशकलयोर्मध्येआकाशमसृजत्प्रभुः॥१०॥अप्सुपारिप्लवां
पृथ्वींदिशश्चदशावादधे॥तत्रकालंमनोवाचंकामंक्रोधमथोरतिं॥११॥ससर्जसृष्टिंतद्रूपांस्रष्टुमिच्छन्
प्रजापतिः॥विद्युतोशनिमेघांश्चरोहितेंद्रधनूंषिच॥१२॥वयांसिचससर्जादौपर्जन्यंचाथवक्त्रतः॥ऋ
चोयजूंषिसामानिनिर्ममेयज्ञसिद्धये॥१३॥साध्यास्तैरयजन्देवान्भूतमुच्चावचंभुजः॥सनत्कुमारंरु
द्रंचससर्जक्रोधसंभवं॥१४॥मरीचिमत्र्यंगिरसंपुलस्त्यंपुलहंक्रतुं॥वसिष्ठंमानसान्सप्तब्रह्मणाइ
तिनिश्चिताः॥१५॥सप्तेतेजनयंतिस्मप्रजारुद्राश्चसत्तम॥द्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोभवत्॥१६
अर्द्धेननारीतस्यांसब्रह्माचासृजतःप्रजाः॥॥इत्याग्नेयेमहापुराणेजगत्सर्गेसप्तपुराणेजगत्सर्गेसप्तद

शोऽध्यायः॥१७॥अग्निरुवाच॥॥प्रियव्रतोत्तानपादौ मनोः स्वायंभुवात्सुतौ॥अजीजनत सुतां कन्यां शत
रूपा तपोन्विताम्॥१॥काम्या कर्दमभार्यातः सम्राट् कुक्षिर्विराट् प्रभुः॥सुरुच्यामुत्तमो जज्ञे पुत्रोत्तानपा
दतः॥२॥सुनीत्यां च ध्रुवः पुत्रस्तपस्तेपे स कीर्तये॥ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि हे मुने॥३॥तस्मै प्री
तो हरिः प्रादान्मुनेरग्रे स्थानकं स्थिरं॥श्लोकं पपाठ तस्यैशना वृद्धिं दृष्ट्वा च तस्य च॥४॥अहो स्य तपसो वीर्य्यम
हो श्रुतमहो श्रुतमहोद्भुतं॥यमद्य पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः॥५॥तस्माच्छिष्टिं च भव्यं च ध्रुवाच्छं
भुर्व्यजायत॥श्लिष्टेराधत्त सुच्छाया पंच पुत्रानकल्मषान्॥६॥रिपुं रिपुंजयं पुष्पं वृकलं वृकतेजसं॥रि
पो राधत्त बृहती चाक्षुषं सर्वतेजसं॥७॥अजीजनत्पुष्करिण्यां वारिण्यां चाक्षुषो मनुः॥जं
तः पुरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः॥८॥अग्निष्टुदतिरात्रश्च सुद्युम्नश्चातिमन्युकः॥ऊरोर
जनयत्पुत्रान्षडाग्नेयी महाप्रभान्॥अंगं सुमनसं स्वातिं क्रतुमंगिरसं शयं॥अंगात्सुनीथा पुत्रं
वै वेनमेकं व्यजायत॥१०॥अरक्षकः पापरतः स हतो मुनिभिः कुशैः॥प्रजार्थमृषयो थास्य ममंथुर्दक्षि
णं करं॥११॥वेनस्य मथिते पाणौ संबभूव पृथुर्नृपः॥तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः॥१२॥ दि
रिष्यति महातेजा यशश्च प्राप्स्यते महत्॥सुधन्वी कवची जातस्तेजसा निर्दहन्निव॥१३॥पृथुर्वै १६

एषः प्रजाः सर्वा अरक्षत्स कुर्वन् पूर्वजः॥राजसूयाभिषिक्तानामाद्यः स पृथिवीपतिः॥१४॥तस्माच्चैव समुत्पन्नौ नि
पुणौ सूतमागधौ॥ततस्तोत्रं कृतं वीरौ राजाभूज्जनरंजनात्॥१५॥दुग्धा गौस्तेन सस्यानि प्रजानां जीवनाय च॥स
ह देवैर्मुनिगणैर्गंधर्वैः साप्सरोगणैः॥१६॥पितृभिर्दानवैः सार्पैर्वीरुद्भिः पर्वतैर्जनैः॥तेषु तेषु च पात्रेषु दुह्यमा
ना वसुंधरा॥१७॥प्रादात्यथेप्सितं क्षीरं तेन प्राणानधारयत्॥पृथोः पुत्रौ तु धर्मज्ञौ जज्ञातेंतर्द्धिपालिनौ॥१८
शिखंडिनी हविर्धानमंतर्द्धानाद्व्यजायत॥हविर्धानात्षडाग्नेयी धिषणाजनयत्सुतान्॥१९॥प्राचीनबर्हि
षं शुक्रं गयं कृष्णं व्रजाजिनौ॥प्राचीनाग्राः कुशास्तस्य पृथिव्यां यजनो यतः॥२०॥प्राचीनबर्हिर्भगवान्महाना
सीत्प्रजापतिः॥सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः॥२१॥सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः॥अ
पृथग्धर्मचरणास्तेतप्यंत महत्तपः॥२२॥दशवर्षसहस्राणि समुद्रसलिलेशयाः॥प्रजापतित्वं संप्रा
प्य तुष्टा तु विष्णोश्च निर्गताः॥२३॥भूःखं व्याप्तं हि तरुभिस्तांस्तरूनप्यदहंश्च ते॥मुखजाग्निमरुद्भ्यां च दृष्ट्वा चा
यद्रुमसंक्षयं॥२४॥उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन्॥कोपं यच्छत दास्यंति कन्यां वो मारि
षां वरां॥२५॥तपस्विनो मुनेः कंडोः प्रम्लोचायां ममैव च॥भविष्यं जानता सृष्टा भार्या वोस्तु कुलंकरी॥
२६॥अस्यां तु तस्य ते दक्षः प्रजाः संवर्द्धयिष्यति॥प्रचेतसस्तां जगृहुर्दक्षोऽस्यां च ततो भवत्॥२७॥अचरा

अ०पु०
१७

श्चवराश्चैवद्विपदोथचतुष्पदः॥ससर्ज्जमनसादक्षःपश्चादसृजतःस्त्रियः॥२८॥ददौसदशधर्मायकश्यपाय
त्रयोदश॥सप्तविंशतिसोमायचतस्रोरिष्टनेमिने॥२९॥द्वेचैवबहुपुत्रायद्वेचैवांगिरसेप्यदात्॥तासुदेवा
श्चनागाद्यामैथुनान्मनसापुरा॥३०॥धर्म्मसर्गंप्रवक्ष्यामिदशपत्नीषुसुव्रतिः॥विश्वेदेवास्तुविश्वायाःसाध्या
साध्यान्व्यजायत॥३१॥मरुत्वत्यांमरुत्वंतोवसोस्तुवसवोभवन्॥भानोस्तुभानवःपुत्रामुहूर्त्तास्तुमुहूर्त्तजा नो
॥३२॥नद्यायाधर्म्मतोघोषोनागवीथीचजामिजा॥पृथिवीविषयंसर्वंमरुत्वत्यांव्यजायत॥३३॥संकल्पा
यास्तुसंकल्पाःइंदोर्नक्षत्रतःसुताः॥आपोध्रुवश्चसोमश्चधरश्चैवानिलोनलः॥३४॥प्रत्युषश्चप्रभासश्च
वसवोष्टौचनामतः॥आपस्यपुत्रोवैतंड्यःश्रमःशांतोमुनिस्तथा॥३५॥ध्रुवस्यकालोलोकांतोवर्चाःसोमस्यवैसुतः
धरस्यपुत्रोद्रविणोहुतहव्यवहस्तथा॥३६॥मनोहरायाःशिशिरःप्राणोथरमणस्तथा॥पुरोजवोनिल
स्यासीदविज्ञातोनिलस्यच॥३७॥अग्निपुत्रकुमारश्चशरस्तंबेव्यजायत॥तस्यशाखोविशाखश्चनैगमेय
श्चपृष्टजा॥३८॥कृत्तिकातःकार्त्तिकेयोयतिःसनत्कुमारकः॥प्रत्युषाद्देवलोजज्ञेविश्वकर्माप्रभास राम०
तः॥३९॥कर्त्ताशिल्पसहस्राणांत्रिदशानांचवर्द्धकिः॥मनुष्याश्चोपजीवंतिशिल्पंवैभूषणादिकं॥४०॥ १७
सुरभीकश्यपाद्रुद्रानेकादशविजज्ञुषी॥महादेवप्रसादेनतपसाभावितासती॥४१॥अजैकपादहिर्बुध्न्यस्तु

शरुद्रश्चसत्तम॥त्वष्टुश्चैवात्मजःश्रीमान्विश्वरूपोमहायशाः॥४२॥हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः॥
वृषाकपिश्चशंभुश्चकपर्द्दीरैवतस्तथा॥४३॥मृगव्याधश्चसर्प्पश्चकपालीदशचैवकः॥रुद्राणांचशतं
लक्षंयैर्व्याप्तंसचराचरं॥४४॥॥इत्याग्नेयेमहापुराणेजगत्सर्गेअष्टादशोध्यायः॥१८॥॥अग्निरुवा
च॥॥कश्यपस्यवदेसर्गमदित्यादिषुहेमुने॥चाक्षुषेतुषितदेवास्तेदित्यांकश्यपात्तथा॥१॥आसन्विष्णु
श्चशक्रश्चत्वष्टाधातातथार्यमा॥पूषाविवस्वान्सविताभित्रोवरुणकोभगः॥३॥अमीचद्वादशादित्याश्च
सत्ववैवस्वतेंतरे॥अरिष्टनेमिपत्नीनामपत्यानीहषोडश॥२॥बहुपुत्रस्यविदुषश्चतस्रोविद्युतःस्मृताः॥प्र
त्यंगिरसजाःश्रेष्ठाःकृशाश्वस्यसुरायुधाः॥४॥उदयास्तमनेसूर्येतद्वदेतेयुगेयुगे॥हिरण्यकशिपुर्दि
त्याद्धिरण्याक्षश्चकश्यपात्॥५॥सिंहिकाचाभवत्कन्याविप्रचित्तेःपरिग्रहः॥राहुप्रभृतयस्तस्यांसैंहिके
याइतिस्मृता॥६॥हिरण्यकशिपोःपुत्राएयकशिपोःपुत्राश्चत्वारःप्रथितौजसः॥अनुह्रादश्चह्रादश्चप्र
ह्रादश्चातिवैष्णवः॥७॥संह्रादश्चचतुर्थोभूत्ह्रादपुत्रोह्रदस्तथा॥ह्रदस्यपुत्रश्चायुष्मांस्छिविर्बाष्कलएव
च॥८॥बलेःपुत्रशतंत्वासीद्वाणज्येष्ठंमहामुने॥पुराकल्पेहिरण्येनप्रसाद्योमापतिंप्रभुम्॥९॥पार्श्व
तोविहरिष्यामिइत्येवंमानईश्वरात्॥हिरण्याक्षसुताःपंचझर्झरःशकुनिस्तति॥१०॥द्विमूर्द्धाशंबराद्याश्च

अ०पु०
१८ का

शतमासन्दनोःसुताः॥स्वर्भानोश्चप्रभाकन्यापुलोमस्तुशचीस्मृतिः॥११॥उपदानवीहयशिराशर्मिष्ठावा
र्षपर्वणी॥पुलोमाकालकाचैववैश्वानरसुतेउभे॥१२॥कश्यपस्यतुभार्येतेतयोःपुत्राश्चकोटयः॥प्रह्लाद
स्यचतुःर्कोटीनिवातकवचाःकुले॥१३॥ताम्रायाःषट्सुताःस्युश्चकाकीश्येनीचभास्यपि॥गृध्रिकाशु
चिसुग्रीवीताभ्यःकाकादयोभवन्॥१४॥अश्वाश्चोष्ट्राश्चताम्रायाअरुणोगरुडस्तथा॥विनतायाःसह
स्रंतुसर्पाश्चसुरसाभवाः॥१५॥काद्रवेयासहस्रंतुशेषवासुकितक्षकाः॥दंष्ट्रिणःक्रोधवशजाधरो
त्थाःपक्षिणोजले॥१६॥सुरभ्यांगोमहिष्यादिइरोत्पन्नास्तृणादयः॥खसायांयक्षरक्षांसिमुनेरप्सरसोभ
वन्॥१७॥अरिष्टायांचगंधर्वाःकश्यपाद्धिस्थिरंचरं॥एषांपुत्रादयोसंख्यादेवैर्वैदानवाजिता॥१८॥दिति
र्विनष्टपुत्रावैतोषयामासकश्यपं॥पुत्रमिंद्रप्रहर्त्तारमिच्छतिप्रायकश्यपात्॥१९॥पादाप्रक्षालनात्सु
प्तातस्यागर्भंजघानह॥छित्वासांनिध्यवेंद्रस्तंदेवामरुतोभवन्॥२०॥शक्रस्यैकोनपंचाशत्सहायादीप्त
तेजसः॥एतत्सर्वंहरिर्ब्रह्माअभिषिच्यपृथुंनृपं॥२१॥ददौक्रमेणराज्यानिअन्येषामधिपोहरिः॥द्विजौ
षधीनांचचंद्रस्त्वपांतुवरुणोनृपः॥२२॥राज्ञांवैश्रवणोराजासूर्याणांविष्णुरीश्वरः॥वसूनांपावकोरा
जामरुतांवासवःप्रभुः॥२३॥प्रजापतीनांदक्षोथप्रह्लादोदानवाधिपः॥पितृणांचयमोराजाभूतानांचह

ते

राम·
१८

रःप्रभुः॥२४॥हिमवांश्चैवशैलानांनदीनांसागरःप्रभुः॥गंधर्वाणांचित्ररथोनागानामथवासुकी॥२५॥सर्पा
णांतक्षकोराजागरुडःपक्षिणामथ॥ऐरावतोगजेंद्राणांगोवृषोथगवामपि॥२६॥मृगाणामथशार्दूलः
प्लक्षोवानस्पतीश्वरः॥उच्चैःश्रवास्तथाश्वानांसुधन्वापूर्वपालकः॥२७॥दक्षिणस्यांशंखपदःकेतुमान्पश्चिमे
जने॥हिरण्यरोमकःसौम्येप्रतिसर्गोयमीरितः॥२८॥॥इतिमहापुराणेआग्नेयेप्रतिमासर्गेएकोन
विंशोऽध्यायः॥१९॥॥अग्निरुवाच॥॥प्रथमोमहतःसर्गोविज्ञेयोब्रह्मणस्तुसः॥तन्मात्राणांद्वितीयस्तुभूत
सर्गोहिसस्मृतः॥१॥वैकारिकस्तृतीयस्तुसर्गऐंद्रीयकःस्मृतः॥इत्येवंप्राकृतःसर्गसंभूतोबुद्धिपूर्वकः॥
२॥मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः॥तिर्यक्स्रोतस्तुयःप्रोक्तस्तैर्यग्योन्यस्सतः॥३॥तथो
र्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसस्मृतः॥ततोर्वाक्स्रोतसांसर्गःसप्तमःसतुमानुषः॥४॥अष्टमोनुग्रहः
सर्गःसात्विकस्तामसंतुयः॥पंचैतेविकृताःसर्गाःप्राकृतस्तेत्रयःस्मृताः॥५॥प्राकृतावैकृताश्चैवकौमा
रोनवमस्तथा॥ब्रह्मतोनवसर्गास्तुजगतोमूलहेतवः॥६॥ख्यात्याद्यादक्षकन्याश्चभृग्वाद्याउपयेमिरे॥नि
त्योनैमित्तिकःसर्गस्त्रिधाप्रकथिताजनैः॥७॥प्राकृतोदैनंदिनस्यादंतरप्रलयादनु॥जायांतियत्रानुदिनं
नित्यसर्गोहिसस्मृतः॥८॥देवौधाताविधातारौभृगोःख्यातिरसूयत॥श्रियंचपत्नीविष्णोर्यस्तुताशक्रेणवृद्

ये॥९॥ धातुर्विधातुर्द्वौ पुत्रौ क्रमात्प्राणो मृकंडकः॥ मार्क्कंडेयो मृकंडाच्च जज्ञे वेदशिरास्ततः॥१०॥ पौर्णमासश्च
संभूत्यां मरीचेरभवत्सुतः॥ स्मृत्यामंगिरसः पुत्राः सिनीवाली कुहुस्तथा॥११॥ राका चानुमतिश्चात्रेरनसूया
प्यजीजनत्॥ सोमं दुर्वाससं पुत्रं दत्तात्रेयं च योगिनं॥ १२॥ प्रीत्यां पुलस्त्यभार्यायां दत्तोलिस्तत्सुतोऽभवत्॥ क्षमायां
पुलहाज्जाताः सहिष्णुः कर्मपादिकाः॥१३॥ संनत्यां च क्रतोरासन्वालिखिल्या महौजसः॥ अंगुष्ठपर्वमात्रास्ते
ये हि षष्टिसहस्रिणः॥१४॥ ऊर्जायां च वसिष्ठाच्च राजा गात्रोर्ध्वबाहुकः॥ सवनश्चानघश्चैव सुतपाः सप्त चर्षयः
१५॥ पावकः पवमानोऽभूच्छुचिः स्वाहाग्नितोऽभवत्॥ अग्निष्वात्ता बर्हिषदोऽनग्नयः साग्नयोऽपि जात्॥१६॥ पि
तृभ्यश्च स्वधायां च मेना वै धारणी सुते॥ हिंसा भार्या त्वधर्म्मस्य तयोर्जज्ञे तथानृतं॥ कन्या च निकृतिस्ताभ्यां
भयं नरकमेव च॥ माया च वेदना चैव मिथुनं त्विदमेतयोः॥ तयोर्जज्ञेऽथ वै माया मृत्युं भूतापहारिणं॥ वेदना च
सुतं चापि दुःखं जज्ञेऽथ रौरवात्॥ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे॥ ब्रह्मणश्च रुदन्जातो रोदना
द्रुद्रनाम च॥ भवं सर्वमथेशानं तथा पशुपतिं द्विज॥ भीममुग्रं महादेवमुवाच स पितामहः॥ दक्षकोपाच्च तत्या
ज देहं तत्याज सा सती॥ हिमवद्दुहिता भूत्वा पत्नी शंभोरभूत्पुनः॥ ऋषिभ्यो नारदाद्युक्ताः पूजाः स्नानादिपूर्वि
काः॥ स्वायंभुवाद्यास्ताः कृत्वा विश्वादे भुक्तिगाः॥ इत्याग्नेये जगत्सर्गः॥२०॥ नारद उवाच॥ सामान्यपूजां वि

ष्णोर्वक्ष्ये मंत्राश्च सर्वदान्॥ समस्तपरिवाराय अच्युताय नमो यजेत्॥ धात्रे विधात्रे गंगायै यमुनायै निधी त
था॥ द्वारश्रियं वास्तुनरं शक्तिं कूर्म्ममनंतकं॥ पृथिवीं धर्मकं ज्ञानं वैराग्यैश्वर्यमेव च॥ अधर्मादीन् कंदनालं प
द्मं केसरकर्णिकाः॥ ऋग्वेदाद्यं कृताद्यं च सत्वाद्यर्कादिमंडलं॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा च तां यजेत्॥
प्रह्वी सत्या तथेशानानुग्रहामलमूर्तिकां॥ दुर्गां गिरं गणं क्षेत्रं वासुदेवादिकं यजेत्॥ हृदयं च शिरः शिखा वर्म
नेत्रमथास्त्रकं॥ शंखं चक्रं गदां पद्मं श्रीवत्सं कौस्तुभं यजेत्॥ वनमालां श्रियं पुष्टिं गरुडं गुरुमर्चयेत्॥ इंद्रमग्निं य
मं रक्षो जलं वायुं धनेश्वरं॥ ईशानं तमजं वायुं वाहनं कुमुदादिकं॥ विष्वक्सेनं मंडलादौ सिद्धिः पूजादिना भवे
त्॥ शिवपूजा च सामान्या पूर्वं नंदिनमर्चयेत्॥ महाकालं यजेद्गंगां यमुनां च गणादिकं॥ गिरं श्रियं गुरुं वास्तुं
नाादि धर्मकादिकं वामा ज्येष्ठा तथा रौद्री काली कलविकारिणी॥ बलविकारिणी चापि बलप्रमथनी क्रमात्॥
सर्वभूतदमनी च मनोन्मनी शिवासने॥ ह्रां ह्रं ह्रौं शिवमूर्तिं सांगं च कं शिवं यजेत्॥ हें शिवाय च आदित्यादि होमी
ज्ञानादि चक्रं॥ गौरीं गणं शक्रमुखान् चंडीं हृदादिकाः॥ कामान् सूर्यार्चने मंत्रा दंडी पूज्यश्च मंगलाः॥ उ
च्चैःश्रवाश्वारुणश्च प्रभूतं विमलं यजेत्॥ साराराध्यौ परसुखस्कंदाद्यमथ योजयेत्॥ दीप्ता सूक्ष्मा जया भद्रा वि
भूति विमला तथा॥ अमोघा विद्युता चैव पूज्या सर्वतोमुखी॥ अर्कासनं हृदं खसोल्काय ति मूर्तिं कं क्रां क्रीं सः स

पयिनमः॥ आत्मने हृदयाय च॥ अर्काय शिरसे तद्वदग्नीषोमाय वायुगान्॥ मूर्त्तिः स्वरेण त्रिशिखाङ्कं कव
चं स्मृतं॥ नानेत्रं नस्त्रथा कीस्त्रं राज्ञी शक्तिस्त्वरे गता॥ सोमोंगारको घबुधो जीवः शुक्रः शनिक्रमात्॥ राहुःके
तुस्तेजश्चण्डः संक्षेपाद् अथ पूजनं॥ आसनं मूर्त्तयो मूलेन दद्याद्यं परिवारकः॥ विष्वक्सेनं विष्णुमूर्त्तिनौ श्रीं श्रीधरो
हरिः॥ ह्रीं सर्वमूर्त्तिर्मिनो पमितित्रिलोकसमोदनं॥ क्लीं हृषीकेशोऽहं विष्णुः स्वरैर्दीप्तिदद्यादिकं॥ समस्तैः पंच
मीपूजा संग्रामादौ जयादिका॥ चक्रं गदा मातृखड्गं मुषलं शंखशार्ङ्गकं॥ पाशांकुशौ च श्रीवत्सं कौस्तु
भं वनमालया॥ श्रीं श्रीं महालक्ष्मीस्ता क्षौं गुरुरिमा दयोचनिं॥ सरस्वत्या मनामूर्त्तिःतु ह्रां देवी सरस्वती॥
हृदाद्या लक्ष्मी मेधा च कलातुष्टिश्च पुष्टिका॥ गौरी प्रभामतिर्दुर्गा गिणोगुरुश्च क्षेत्रयः॥ नयांगन्या गणप
तयेव ह्रीं गौर्यै चश्र्यै ऐं क्लीं त्वारिताऐं क्लीं सौं त्रिपुरा च तुर्थ्यंत्तं नमोत प्रणवाद्या श्च नामाद्याम क्षरं बिंदुसं
युतं॥ क्षौंयुतं वा सर्वमंत्राः पूजनाज्जपनः स्मृता॥ होमस्तिलघृताद्येश्च धर्मकामार्थमोक्षदः पूजामन्त्रान्
पठेद्यस्तु भुक्तभोगो दिवं व्रजेत्॥ इत्याग्नेये पे[illegible]सुदेवपूजादिरेकोनविंध्यायः॥२१॥ नारद उवाच॥॥ व
क्ष्ये स्नानं क्रियाद्यर्थं सिंहेनं तमूर्त्तिकं॥ गृहीत्वा तां द्विधा कृत्वा मलस्नानमथैकया॥ निमज्याचाम्य विन्यस्य
सिंहेन कृतरक्षकः॥ विधिः स्नानं ततः कुर्यात् प्राणायामपुरःसरं॥ हृदि ध्यायन् हरिं स्नानं मंत्रेण शाक्ष

रेण हि॥ त्रिधा पाणितले मृत्स्नां दिग्बंधं सिंहजप्ततः॥ वासुदेवप्रजप्तेन्नीर्थं संकल्प्य चालभेत्॥ पात्रं वेदादि
नामं वैः सम्माज्जाराध्यमूर्त्तिना॥ कृत्वा घमर्षणं वस्त्रं परिधाय समाचरेत्॥ विन्यस्य मंत्रैर्निर्मोक्ष पाणि
ध्रूजलमेव च॥ नारायणेन संयम्य वायुरा घ्रायचोत्सृजेत्॥ लं ध्यायन् हरिं पश्चाद्दत्वार्घ्यं द्वादशाक्षरं॥
स्वात्र्येचोक्तितस्त्वप्रयोगप्रीगदितक्रमात्॥ मंत्रान्दिक्पालपर्यंतान्त्रषीन्पितृगणानपि॥ मनुष्या
न्सर्वभूतानि स्थावरान्तांस्तथाचमेत्॥ न्यस्य चात्मनि संहृत्य मंत्रान्योगपीठं व्रजेत्॥ एवमन्यासु पूजा
सु मूलाद्यैः स्नानमाचरेत्॥ ॥इत्याग्नि पुराणे स्नानविधिनः विंशोध्यायः॥ ॥नारद उवाच॥ ॥व
क्ष्ये पूजाविधिं विप्रा यत्कृत्वा सर्वमाप्नुयात्॥ प्रक्षालिता क्रियाचम्य वाग्यतः कृतरक्षकः॥ प्राङ्मुखः स्वस्तिकं बध्वा
पद्माद्यपरमेव वा॥ यं बीजं नाभिमध्यस्थं धूम्रं चंडानिलात्मकं॥ विशोष्यास्य दशाशेषं तुध्यायन्वा पार्थिकल्मषं॥ क्षीं
हृत्पंकजमध्यस्थं बीजं तेजोनिधिं स्मरन्॥ अधोर्ध्वतिर्यग्गाभिस्तु ज्वालाभिः कल्मषं दहन्॥ शशांककृतिवध्या
येद्वरस्थं सुधांशुभिः॥ हृत्पद्मव्यापिभिर्देहं स्वकामाप्लावयेत्सुधीः॥ सुषुम्णायोनिमार्गेण सर्वनाडीविस
र्पिभिः॥ शोधयित्वा निमेत्तत्त्वं करशुद्धिं रयोस्त्वकं॥ व्यापकं हस्तयोरादौ दक्षिणांगुष्ठतोऽङ्गकं॥ मूलं देहे
द्वादशांगं न्यसन्मंत्रैर्द्विजिपंक्केः॥ हृदयं च शिरश्चैव शिखा वर्मास्त्रलोचनं॥ उदरं च तथा पृष्ठं बाहू ऊरू पाद

फलस्यांतो न विद्यते॥३५॥मृन्मयाद्दारुजे पुण्यं पदारुजादिष्टकाभवेत्॥इष्टकोत्थात्शैलजे स्यात्हेमादेरधिकं राम.
फलं॥३६॥सप्तजन्मकृतं पापं प्रारंभादेव नश्यति॥देवालयस्य स्वर्गस्यात्स नरकान्नस गच्छति॥३७॥कुलानां ४०
शतमुद्धृत्य विष्णुलोकं नयेन्नरः॥यमो यमभटानाह देवमंदिरकारिणे॥३८॥यम उवाच॥प्रतिमापूजादि

कृतो नानेया नरकं नराः॥देवालयाद्यकर्त्तारः आनेयास्ते तु गोचराः॥३९॥विचरध्वं यथान्यायं नियोगो मे तु पाल्य
तां॥मानभंगं करिष्यंति भवतां जंतवः क्वचित्॥४०॥केवलं च जगद्धातमनंतं समुपाश्रिताः॥भवद्भिः परिहर्त
व्यास्तेषां नात्रास्ति संस्थितिः॥४१॥यत्र भागवता लोके तच्चित्तास्तत्परायणाः॥पूजयंति सदा विष्णुं ते वस्त्याज्याः सु
दूरतः॥४२॥यस्तिष्ठन्प्रस्वपन्गच्छन्नुत्तिष्ठन्स्खलिते क्षुते॥संकीर्तयंति गोविंदं ते वस्त्याज्याः सुदूरतः॥४३॥नित्य
त्यनैमित्तिकैर्देवं ये यजंते जनार्दनं॥नावलोक्या भवद्भिस्ते तद्व्रतायांति तद्गतिं॥४४॥ये पुष्पधूपवासोभिः भू
षणैश्चातिवल्लभैः॥अर्चयंति न वो ग्राह्या नराः कृष्णाश्रयेगताः॥४५॥उपलेपनकर्त्तारः संमार्जनपराश्च ये
कृष्णालये परित्याज्यास्तेषां पुत्रास्तथा कुलं॥४६॥येन चायतनं विष्णोः कारितं तत्कुलोद्भवं॥पुंसां शतं ना
वलोक्यं भवद्भिर्दुष्टचेतसा॥४७॥यस्तु देवालयं विष्णोर्दारुशैलमयं तथा॥कारयेन्मृन्मयं वापि सर्वपापैः प्र
मुच्यते॥४८॥अहन्यहनि यागेन यजतां यन्महाफलं॥प्राप्नोति तत्फलं विष्णोः यः कारयति केतनं॥४९॥कुल
नां शतमागामि समतीतं तथा शतं॥कारयन्भगवद्धाम नयत्यच्युतलोकतां॥५०॥सप्तलोकमयो विष्णुस्तस्य
यः कुरुते गृहं॥तारयत्यक्षयांल्लोकानक्षयान्प्रतिपद्यते॥५१॥इष्टकाचयविन्यासो यावंत्यब्दानि तिष्ठति॥ नि
तावद्वर्षसहस्राणि तत्कर्त्तुर्दिवि संस्थितिः॥५२॥प्रतिमाकृद्विष्णुलोकं स्थापको लीयते हरौ॥देवसद्मप्रति

कृतिप्रतिष्ठाकृतिगोचरे॥५३॥ ॥अग्निरुवाच॥ ॥यमोक्तानानयंसेथप्रतिष्ठादिकृतंहरेः। हयशीर्षः प्रतिष्ठाद्यं दे
वानांब्रह्मणाब्रवीत्॥ ॥इत्याग्नेये महापुराणे देवालयादिमाहात्म्ये सप्तविंशतितमोऽध्यायः॥ ॥हयग्रीव उवा
च॥ ॥विष्ण्वादीनां प्रतिष्ठादी वक्ष्ये ब्रह्मन्शृणुष्व मे। प्रोक्तानि पंचरात्राणि सप्तरात्राणि वै मया॥१॥ व्यस्तानि
मुनिभिर्लोके पंचविंशतिसंख्यया। हयशीर्षं तंत्रमाद्यं तंत्रं त्रैलोक्यमोहनं॥२॥ वैभवं पौष्करं तंत्रं प्रल्हादं
गार्ग्यगालवं। नारदीयं च संप्रश्नं शांडिल्यं चैश्वरं तथा॥३॥ सत्योक्तं शौनकं तंत्रं वासिष्ठं ज्ञानसागरं। स्वा
यंभुवं कापिलं च तार्क्ष्यं नारायणीयकं॥४॥ आत्रेयं नारसिंहाख्यं सानंदाख्यं तथारुणं। बौधायनं तथा
ष्टांगं विश्वोक्तं तस्य सारतः॥५॥ प्रतिष्ठां हि द्विजः कुर्यान्मध्यदेशादिसंभवः। न कच्छदेशसंभूतः कावेरीकोंक
णोद्भवः॥६॥ कामरूपकलिंगोत्थः कांचीकाश्मीरकोशलः। आकाशवायुतेजोंबुभूरेवा पंचरात्रयः॥७॥
अचैतन्यास्तमोद्रिक्ताः पंचरात्रविवर्जिताः। ब्रह्माहं विष्णुरमल इति विद्यात्स देशिकः॥८॥ सर्वलक्षणहीनो
पि सगुरुस्तत्वपारगः। नगराभिमुखाः स्थाप्या देवा न च पराङ्मुखाः॥९॥ कुरुक्षेत्रे गयादौ च नद्यादिषु स
मीपतः। ब्रह्मा मध्ये तु नगरे पूर्वे शक्रस्य शोभनं॥१०॥ अग्नावग्नेश्च मातॄणां भूतानां च यमस्य च। दक्षिणे चं
डिकायाश्च पितृदैत्यादिकस्य च॥११॥ नैरृते मंदिरं कुर्याद्वरुणादेश्च वारुणे॥ वायोर्नागस्य वायव्ये सौम्ये

यक्षगुहस्य च॥१२॥ चंडीशस्य महेशस्य पोशे विष्णोश्च सर्वतः। पूर्वे देवे क्षणं पीड्य प्रसादं स्वल्पकं त्वथ॥
१३॥ समं चाप्यधिकं वापि न कर्तव्यं विजानता। उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रयसंमितां॥१४॥ प्रसादं का
रयेदन्यं नो तं पीडयेद्बुधः। भूमौ तु शोधितायां तु कुर्याद्भूमिपरिग्रहं॥१५॥ प्राकारसीमापर्यंतं ततो भू
तबलिं हरेत्। मांसं हरिद्राचूर्णं च सलाजं दधिसक्तुभिः॥१६॥ अष्टाक्षरेण शाक्तुं पातयित्वा च दिक्षु च।
राक्षसाश्च पिशाचाश्च येऽस्मिन् तिष्ठंति भूतले॥१७॥ सर्वे ते व्यपगच्छंतु स्थानं कुर्यामहं हरेः। ईषेणवाह
यित्वा तु गोभिश्चैवावचारयेत्॥१८॥ परमाणुर्वृष्टके नैव त्रसरेणुः प्रकीर्तितः। त्रसरेणुश्च बालाग्रं लिक्षा
वैरष्टभिर्मता॥१९॥ ताभिर्यूकाष्टभिः स्यात्ताताश्चाष्टौ यवमध्यमः। यवाष्टकैरंगुलं स्यात् चतुर्विंशांगुलः
करः॥२०॥ चतुरंगुलसंयुक्तः स हस्तः पद्महस्तकः॥ ॥इत्याग्नेये प्रतिष्ठायां भूपरिग्रहे अष्टविंशतिमो
ऽध्यायः॥ ॥श्रीभगवानुवाच॥ ॥पूर्वमासीन्महद्भूतं सर्वभूतभयंकरं। तं देवैर्निहतं भूमौ सवासं पुरु
षः स्मृतः॥१॥ चतुःषष्टिपदे क्षेत्रे ईशं कोणार्धसंस्थितं। घृताक्षतैस्तर्पयेत्तु पर्जन्यं च पदे ततः॥२॥ उत्पता
भिर्जयंतं च द्विपदस्थं पताकया। महेंद्रं चैककोष्ठस्थं सर्वरक्तैः पदे रविं॥३॥ वितानेनार्धपदगं सत्यं पादे
भ्रंशाघृतैः। व्योम शाकुनमांसेन कोणार्धपदसंस्थितं॥४॥ स्रुवा चार्धपदे वह्निं पूषाणं लाजयैकतः॥
न

अ०पु०
४२

स्कंदेनवितथंक्षिस्वमथनेनगृहक्षतं॥५॥मांसोदनेनधर्मेशमेकेकस्मिन्स्थितःस्वयं॥गंधर्वाह्विपदंगंधैःभृंगराजमाकुल
जिह्वया॥६॥एकस्वमर्दसंस्त्वंचभृंगंलीलंपदेरूपा॥पितृन्कृशरयाईस्त्वंदंतकाष्ठेपदेस्थितं॥७॥दौवारिकेंदुसं
स्त्वंचसुग्रीवंपावकेनतु॥पुष्पदंतंकुशास्तंबैःपद्मैर्वरुणमेकतः॥८॥असुरंसुरयाद्विस्त्वंरोगमर्ईचमंडकैः॥
पदेनागस्तुस्वस्त्रक्षेर्द्विसंस्थितं॥९॥मुख्यौदकेनभल्लाटंपादसोमंगदंतया॥मधुनापायसेनाथशालुकेनगिरिद्
ये॥१०॥पदेदितिंलोपिकाभिःरदेदितिमथापदं॥पूरिकाभिस्ततश्चापमीशाधःपयसापदे॥११॥ततोथश्चाप
वत्संतुदध्नाचैकंपदेस्थितं॥लड्डुकैस्तुमरीचिंस्कंदवतीयाव्रतुष्टये॥१२॥सवित्रेरक्तपुष्पाणिब्रह्माधःकोण
कोष्ठके॥तदधःकोष्ठकेदद्यात्साविश्रेचकुशोदकं॥१३॥विवस्वतेरुणंदद्यात्चंदनंचतुरंघ्रिषु॥रक्षोधःको
णकोष्ठेतुइंद्रायान्तुनिशान्विते॥१४॥इंद्रजयायतस्याधोघृतानंकोणकोष्ठके॥चतुष्पयेषुदातव्यंमित्रायपय
ड़ंपायसं॥१५॥वाय्वधःकोणदेशेषुरुद्रायाघपक्वमांसकं॥तदधःकोणकोष्ठेतुपयपत्रफलंतथा॥१६॥मही
धरायमांसार्थमांसंचचतुरंघ्रिषु॥मध्येचतुष्पदेस्वाप्यब्रह्मणोविलतंदुलाः॥१७॥चरकींमांससर्पिभ्यांस्कंदेन
शरयास्रजा॥रक्तपत्रैर्विदारीचकंदर्पंचसनोदनैः॥१८॥पूतनांपलपित्ताभ्यांमांसासृग्भ्यांचपूजयेत्॥पिल्ला
मृगास्थिभिःपापांपिनपिष्टस्रजोस्रजा॥१९॥ईशाद्यान्रक्तमांसेनअभावाद्रक्षतैर्यजेत्॥रक्षोमातृगणेभ्य

राम
४२

श्चपिशाचादिभ्यएवच॥२०॥पितृभ्यःक्षेत्रपालेभ्योबलिंदद्यात्प्रकामतः॥हुत्वाचैतानसंतर्प्यप्रासादादीनकारये
त्॥२१॥ब्रह्मस्थानेहरिंलक्ष्मींगणंपश्चात्समर्चयेत्॥महीनरेवास्कमर्यंवेद्धंन्यासहितंघटं॥२२॥ब्रह्माणंमध्यतः
कुंभमब्रह्माद्याश्चगिरिश्वरान्॥दद्यात्पूर्णाहुतिंपश्चात्स्वस्तिवाच्यप्रणम्यच॥२३॥प्रगृह्यकर्करींसम्यक्
मंडलंतुप्रदक्षिणं॥सूत्रमार्गेणसिंचन्तोयधारांतुभ्रामयेत्॥२४॥ततोगन्धस्येनभ्येइस्तमात्रंप्रमाण
तः॥चतुरस्रलंकंचाधश्चापिलिप्याव्येत्रतत्॥२५॥ध्यात्वाचतुर्भुजंविष्णुंअर्घंदत्वातुकुंभतः॥कर्कर्यश्चिरये
त्पश्चाअक्षतपुष्पाणिचन्यसेत्॥२६॥दक्षिणावर्त्तनेत्रेश्वबीजैर्दिक्षुचपूजयेत्॥पूर्ववृत्तेनमार्गेणसर्वबीजा
निवापयेत्॥२७॥ततोगतेनमार्गेणतस्यखातस्यकारयेत्॥अर्घदानंविनिष्पाद्यगोवस्त्रादीन्ददेगुरो॥
प २८॥कालज्ञोस्थपनयेवेस्त्वादिभ्यअर्चनं॥ततस्तुखानयेद्यंत्रान्जनांतंयावदेवत॥२९॥पुरुषाधेस्थितं
शिल्पंनग्रहेदोषजंभवेत्॥अस्थिशल्येभिघातेवैभित्तिवैगृहिणांसरुं॥३०॥यन्नामशब्दंशृणुयात्तत्रशा
ल्यंतउद्भवं॥॥इत्याग्नेयेमहापुराणेअर्घदानंनामएकोनत्रिंशोऽध्यायः॥॥भगवानुवाच॥॥पादप्रतिष्ठां
प्रवक्ष्यामिशिलाविन्यासलक्षणं॥अग्नितोमंडपंकुर्यात्कुंडानांतुचतुष्टयं॥१॥कुंभान्यासेष्टकान्यासो
द्वारंस्तंभोछ्रयंशुभे॥पादोनंपूरयेत्खातंतत्रवास्तुयजेत्समे॥२॥इष्टकाश्चसुपक्वाःस्फद्वादशांगुलसंमि

ता:॥स्वविस्तारत्रिभागेनवैपुल्येनसमन्वित:॥३॥करप्रमाणाश्रेष्ठास्यात्‌शिलास्यांनशिलामये॥नवकुं
भान्स्थाप्यमयान्स्थापयेदिष्टकाघटान्‌॥४॥अद्भि:पंचकषायेणसर्वौषधिजलेनच॥गंधतोयेनचतथाकुं
भैस्तापयस्तुपूजितै:॥५॥हिरण्यव्रीहिसंयुक्तैर्गंधचंदनचर्चितै:॥आपोहिष्ठेतितिसृभि:शन्नोदेवीतिचाप्यथ:
६॥तरत्समंदीरितिचपावमानीभिरेवच॥उदुत्तमंवरुणमितिकयानश्चतथैवच॥७॥वरुणस्येतिमंत्रेणहंस:शु
चिषदित्यपि॥श्रीसूक्तेनचतथाशिलांसंस्थाप्यसंघटान्‌॥८॥शय्यायांमंडपेप्राच्यमंडलेहरिमर्चयेत्‌॥जुहु
याज्जनयित्वाग्निंसमिधोद्वादशींतत:॥९॥आघारावाज्यभागौचप्रणवेनैवकारयेत्‌॥अष्टाहुतीस्तपाष्ट
पै:आज्यंव्याहृतिभि:क्रमात्‌॥१०॥लोकेशानामग्नयेचसोमायचग्रहेस्वच॥पुरुषोत्तमायइतिव्याहृतेहुती
र्जुहुयात्तत:॥११॥प्रायश्चित्तंतत:पूर्णांमृत्तियासघतांलिशान्‌॥वेदाद्यैर्दद्दिग्भ्योनिकुंभाङेषुषट्पकूरय
क्र:॥१२॥प्राङ्मुखस्तुगुरु:कुर्याद्दष्टदिक्षुबलिंप्यच॥मध्येचैकांशिलांकुंभंन्यसेत्देवान्सुरान्‌यथा॥१३॥पद्मं
चैवमहापद्मंमकरंकच्छपंतथा॥मुकुंदंचतथानंदंपद्मंशंखंचपद्मिनी॥१४॥कुंभान्संचालयेत्तेषुन्यसेदिष्टेष्टका: राम०
क्रमात्‌॥ईशानांतास्त्वग्न्यादौदिष्टिकांप्रथमंन्यसेत्‌॥१५॥शक्तयोविमलाद्यास्तुइष्टकानांतुदेवता:॥न्यसनी ४३
यापधायोगंमध्येतस्यात्वनुग्रहा:॥१६॥अव्यंगेचाक्षतेपूर्णेमुनेरंगिरस:सुते॥इष्टकेत्वंप्रयच्छेष्टंप्रतिष्ठांका

रयाम्यहं॥१७॥मंत्रेणानेनविन्यस्यइष्टकादेशिकोत्तम:॥गर्भाधानंतत:कुर्यात्‌मध्यस्थानेसमाहित:॥१८॥कुं
भोपरिष्टाद्देवेशापद्मिनींन्यस्यदेवतां॥मृत्तिकाश्चैवपुष्पाणिधातवोरत्नमेवच॥१९॥लोहादिनिक्षिपेत्तत्रयजेद्दै
गर्भभाजने॥द्वादशांगुलविस्तारेचतुरंगुलकोच्छ्रये॥२०॥पद्माकारेताम्रमयेभाजनेप्रपिधायजेत्‌॥एकां
तेसर्वभूतेश्चोपर्वतासनमंडिते॥२१॥समुद्रपरिवारेत्वंदेविगर्भसमाश्रय॥नंदेनंदयवाशिष्टेवसुभि:प्रजया
सह॥२२॥जयेभार्गवदायादेप्रजानांविजयावहे॥पूर्णेंगिरसदायादेपूर्णकामंकुरुष्वमां॥२३॥भद्रेकाश्यप
दायादेकुरुभद्रांमतिंमम॥सर्वबीजसमायुक्तेसर्वरत्नौषधीवृते॥२४॥जयेतसुरुचिरेनंदेवासिष्ठेरम्यता
मिह॥प्राजापतिसुतेदेवीचतुरस्रेमहीयसि॥२५॥सुभगेसुप्रभेभद्रेगृहेकाश्यपिरम्यतां॥पूजितेपरमाचार्यै
र्गंधमाल्यैरलंकृते॥२६॥भवभूतिकरीदेविगृहेभार्गविरम्यतां॥देशस्वामिपुर:स्वामिगृहस्वामिपरिग्रहे॥
२७॥मनुष्यादिकपुष्ट्यर्थंपशुवृद्धिकरीभव॥एवमुक्त्वातत:खातंगोमूत्रेणतुसेचयेत्‌॥२८॥कृत्वानिधा
पयेद्गर्भंगर्भाधानमथंनिशि॥गोवस्त्रादिप्रदद्याच्चगुरवेन्येषुभोजनं॥२९॥गर्भंन्यस्येष्टकांन्यस्यततोगर्भं
प्रपूजयेत्‌॥पीठबंधमत:कुर्यान्मितप्रासादमानत:॥३०॥पीठोत्तमंचोच्छ्रयेणप्रासादस्यार्द्धविस्तरात्‌॥
पादहीनंमध्यमंस्यात्कन्यसंचोत्तमार्द्धत:॥३१॥पीठबंधोपिविष्टात्तुवास्तुयोगंपुनर्यजेत्‌॥पादप्रतिष्ठाका

रितुनिः पापो दिवि मोदते ॥३२॥ देवागारं करोमीति मनसा यस्तु चिंतयेत् ॥ तस्य कायगतं पापं तदहा हि प्र
णश्यति ॥३३॥ कृते तु किं पुनस्तस्य प्रासादे विधिदैवते ॥ अष्टेष्टकसमायुक्तं यः कुर्याद्देवतालयं ॥३४॥ न तस्य
फलसंपत्तिं वक्तुं शक्नोति केनचित् ॥ अनेनैवानुमेयं हि फलं प्रासादविस्तरात् ॥३५॥ ग्राममध्ये च मध्ये च प्र
त्यक्द्वारं प्रकल्पयेत् ॥ ग्राममध्ये च मध्ये च प्रत्यग्द्वारं प्रकल्पयेत् ॥ विदिक्षु च सर्वासु ग्रामप्रत्यङ्मु
खं भवेत् ॥३६॥ दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥ ॥ इत्याग्नेये महापुराणे पादयोगनागमत्रिंशो
ध्यायः ॥ ॥ हयग्रीव उवाच ॥ ॥ प्रासादं संप्रवक्ष्यामि सर्वसाधारणं शृणु ॥ चतुरस्रीकृते क्षेत्रे भजेत् षोडशधा
बुधः ॥१॥ मध्ये तस्य चतुर्भिस्तु कुर्याद्वायिसमन्वितं ॥ द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत् ॥२॥ जंघो
च्छ्रायं तु कर्तव्यं चतुर्भागेन चायतं ॥ जंघाया द्विगुणोच्छ्रायं मंजर्याः कल्पयेद्बुधः ॥३॥ तुर्यभागेन मंजर्यासम्यक्
प्रदक्षिणा ॥ तन्मान निर्गमं कार्यं उभयोः पार्श्वयोः समं ॥ शिखरेण समं कार्यं मग्रे जगति विस्तरं ॥ द्विगुणापि
न कर्तव्यं यथाशोभानुरूपतः ॥५॥ विस्तारान्मंडपस्याग्रे गर्भसूत्रद्वयेन तु ॥ दैर्घ्यादित्यादिकं कुर्यात् मध्येव
स्त्रैर्विभूषितं ॥६॥ प्रासादगर्भमानं वा कुर्वीत मुखमंडलं ॥ एकाशीतिपदैर्वास्तु दृष्ट्वा मंडपमारभेत् ॥७॥ शुक्रा
ग्द्वारविन्यासे यजेद्द्वात्रिंशदंतगान् ॥ सर्वसाधारणं चैतत् प्रासादस्य तु लक्षणं ॥८॥ मानेन प्रतिमायां वा प्रा

सादमपरं शृणु ॥ प्रतिमायां प्रमाणेन कर्तव्या पिंडिका शुभा ॥९॥ गर्भस्तु पिंडिकार्द्धेन गर्भमानात्तु भित्तयः ॥ भि
त्तेरायाममानेन उत्सेधं तु प्रकल्पयेत् ॥१०॥ भित्त्युच्छ्रायं तु द्विगुणं शिखरं कल्पयेद्बुधः ॥ शिखरस्य चतुर्थेन अ
ग्रतो मुखमंडपं ॥११॥ अष्टमांसेन गर्भस्य रथकानां तु निर्गमः ॥ परिधेर्गुणभागेन रथकांतत्र कल्पयेत् ॥१२॥
तत्तृतीयेन वा कुर्यात् रथकानां तु निर्गमं ॥ वामत्रयं स्थापनीयं रथकत्रितये तथा ॥१३॥ शिखरार्द्धं हि सूत्राणि
चत्वारि विनिपातयेत् ॥ शुकनाशोर्द्धतः सूत्रं तिर्यग्भूतं निपातयेत् ॥१४॥ शिखरस्यार्द्धभागस्थं सिंहं तत्र
तु कारयेत् ॥ शुकनासां स्थिरीकृत्य मध्यसंधौ विधारयेत् ॥१५॥ अपरे च तथा पार्श्वे तद्वत् सूत्रं निधापयेत् ॥
तदूर्द्धं तु भवेद्वेदी सकंठामनसारकं ॥१६॥ स्कंधभग्नं न कर्तव्यं विकरालं तथैव च ॥ ऊर्द्धं तु वैवेदिकाना
मलकं परिकल्पयेत् ॥१७॥ विस्ताराद्विगुणं द्वारं कर्तव्यं तु सुशोभनं ॥ उदुंबरौ तदूर्द्धं च न्यसेत् शाखा सुमं
गलैः ॥१८॥ द्वारस्य तु चतुर्थांशे कार्यौ चंडप्रचंडकौ ॥ विष्वक्सेनं वत्सदंडौ शाखोर्द्धोदुंबरे श्रियं ॥१९॥ दिग्गु
जैः स्नाप्यमानां तां घटैः सान्द्रां सुरूपिकां ॥ प्रासादस्य चतुर्थांशैः प्राकारस्योच्छ्रयो भवेत् ॥२०॥ प्रासादात् पा
दहीनस्तु गोपुरस्योच्छ्रयो भवेत् ॥ पंचहस्तस्य देवस्य एकहस्तात्तु पीठिका ॥२१॥ गारुडं मंडपे चाग्रे एकं भौमा
दिधाम च ॥ कुर्याद्धि प्रतिमायानां दिक्षु चाष्टासु चोपरि ॥२२॥ पूर्वे वराहं दक्षे च नृसिंहं श्रीधरं जले ॥ उत्तरे ह

यक्षी वैचि आग्नेय्यां जामदग्न्यकं ॥२३॥ नैर्ऋत्यां रामकं वायौ वामनं वासुदेवकं ॥ ईशे प्रासादरचना देया वस्व
र्कादिभिः ॥२४॥ द्वारस्य चाष्टमाद्यं गं त्यक्त्वा वेधोन दोषभाक् ॥ ॥ इत्याग्नेये महापुराणे प्रासादलक्ष
णं नाम एकत्रिंशोध्यायः ॥ ॥ भगवानुवाच ॥ ॥ प्रासादे देवताः स्थाप्या वक्ष्ये ब्रह्मन् शृणुष्व मे ॥ पंचायत
नमध्ये तु वासुदेवं निवेशयेत् ॥१॥ वामनं न हरिं चाश्वशीर्षं तत्वं नृसूकरं ॥ आग्नेये नैर्ऋते चैव वायव्ये
चैव गोचरे ॥२॥ अथ नारायणं मध्ये आग्नेय्यां विकान्यसेत् ॥ नैर्ऋत्यां भास्करं वायौ ब्रह्माणं लिंगमैशि
के ॥३॥ अथवा रुद्ररूपं तु अथवा मनवा मस्तु ॥ वासुदेवं न्यसेन्मध्ये एवं दीरामरामकान् ॥४॥ इंद्रा
दीन् लोकपालांश्च अथवा नरवामस्तु ॥ पंचायतनकं मध्ये मध्ये तु पुरुषोत्तमं ॥५॥ लक्ष्मी वैश्रवणौ पू
र्वे दक्षे मातृगणं न्यसेत् ॥ स्कंदं गणेशमीशानं सूर्यादीन् पश्चिमे ग्रहान् ॥६॥ उत्तरे देशमस्यादीन् आ
ग्नेय्यां चंडिकां तथा ॥ नैर्ऋत्यामंबिकां स्थाप्य वायव्ये तु सरस्वतीं ॥७॥ पद्मां मैशे वासुदेवं मध्ये नारायणं च
वा ॥ त्रयोदशानपेत्मध्ये विश्वरूपं नयेद्धरिं ॥८॥ एवं दीकेशवादीन्वा अन्यवामस्तु मत्रविं ॥ मृन्मयी
दारुघटिता लोहजा रत्नजा तथा ॥९॥ शैलजा गंधजा चैव कौमदी सप्तधा स्मृता ॥ कौमदी गंधजा चैव
मृन्मयी प्रतिमा तथा ॥१०॥ तत्कालपूजिता श्चैताः सर्वकामफलप्रदा ॥ अथ शैलमयीं वक्ष्ये शिला यत्र च राम० ४५

गृह्यते ॥११॥ पर्वतानामभावे न गृह्णीयाद्भूगतां शिलां ॥ पांडुरा क्षरुणा पीताः कृष्णा शस्ता तु वर्णिनी
१२ ॥ नपदालभ्यते सम्यक् वर्णिनो वर्णिताः शिलाः ॥ वर्ण्याभावा पादनं तत्र जुहुयात् सिद्धविद्यया ॥ शिलायाश्चन्नरे
खाग्रं कृष्णाग्रं सिंहहोमतः ॥ कांस्यघंटानिनादस्यात् पुलिंगा विस्फुलिंगिका ॥१३॥ तन्मंदलक्षणस्ताः स्यात्
रूपाभावा नपुंसका ॥ दृष्टं पतेमंडलाय स्यां सगर्भां तां विसर्जयेत् ॥१४॥ प्रतिमार्थं वनं गत्वा वनयोगं समाचरेत् ॥
तत्र पत्रोपलिप्याय मंडले तु हरिं यजेत ॥१५॥ बलिं दत्वा कर्मशास्त्रं घंटादीकमथार्चयेत् ॥ हुत्वा यज्ञाग्नितो ये
न अस्त्रेण प्रोक्षयेत् शिलां ॥१६॥ रक्षां कृत्वा नृसिंहेन मूलमंत्रेण पूजयेत् ॥ हुत्वा पूर्णाहुतिं दद्यात् ततो भूते ब
लिं गुरुः ॥१७॥ अत्र ये संस्थिता सत्वा यातुधाना श्च गुह्यकाः ॥ सिद्धादयो वा ये चान्ये तान्संपूज्य क्षमापयेत् ॥
१८॥ विचार्थयातमस्माकं यत्रैषा केशवाज्ञया ॥ विष्णवर्थं यद्भवेत्कार्यं युष्माकमपि तद्भवेत् ॥१९॥ क्षेमेगणछता
न्यत्र सुस्थास्थाने मिदं च रात् ॥ एवं प्रबोधितास्सत्यायांति त्रप्ना यथा सुखं ॥२०॥ शल्पज्ञिश्चचरुं प्राश्य स्वप्नमंत्रं
जपेन्निशि ॥ ॐ नमः सकललोकाय विष्णवे प्रभविष्णवे ॥ विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥२१॥ आचक्ष्व
देवदेवेश प्रपन्नोस्मि तवांतिकं ॥ स्वप्ने सर्वाणि कार्याणि हृदिस्थानि तु यानि मे ॥२२॥ ॐ ॐ हूं फट् फट् स्वा
हा ॥ उक्ते स्वप्ने शुभं सर्वं त्व शुभे सर्वहोमतः ॥ प्रातरर्घ्यं शिलायां तु दत्वा स्वेशास्त्रकं यजेत् ॥२३॥ कुद्दालटंकशस्त्रा

द्यं मध्वाज्याक्तसुखं चरेत्॥२४॥आत्मानं चिंतयेद्विष्णुं शाल्मिनं विश्वकर्मकं॥शस्त्रं विश्वात्मकं दद्यात्सुखवत्स्व
दिदर्शयेत्॥२५॥जितेंद्रिये ष्टकं हस्तशल्मीं तु सुखरस्त्रकां॥शिलां कृत्वा पिंडिकार्थं किंचिन्न्यूनां तु कल्पयेत्॥२६॥
रथं स्थाप्य समानीय सवस्त्राकारवेश्मनि॥पूजयित्वा तु घटयेत्प्रतिमां स तु कर्मकृत्॥२७॥॥इत्याग्नेये महापु
राणे शैलादिद्वात्रिंशोऽध्यायः॥॥श्रीभगवानुवाच॥॥वासुदेवादिप्रतिमालक्षणं प्रवदामि ते॥प्रासादस्यो
त्तरे पूर्वमुखां वा चोत्तराननां॥१॥संस्थाप्य संपूज्य बलिं दत्वा थो मध्यसूत्रकं॥शिलां शिलसितु नवधा विभज्य नव
मे शके॥२॥सूर्यो भिक्के शिलायास्तु भागं स्वांगुलमुच्यते॥द्व्यंगुलं गोलकं नाम्ना कलानेत्रं तदुच्यते॥३॥भागमेकं
तथा जानौ ग्रीवायां भागमेव च॥मुकुटं तालपत्रं स्यात्तताल मात्रं तथा मुखं॥४॥ताले नैकेन कंठं च ताले न तद्व
दयं तथा॥नाभिमेंद्रूतरं तालं द्विजाली मूलकौ तथा॥५॥तालद्वयेन जंघा स्यात्तत्सूत्राणि शृणुस्व मतं॥कार्यं
सूत्रद्वयं पादे जंघामध्ये तथापरं॥६॥जानौ सूत्रद्वयं कार्यमूरुमध्ये तथापरं॥मेढ्रे तथापरं कार्यं कट्यां सूत्रं त
थापरं॥७॥मेखलाबंधसिध्यर्थं नाभ्यां चैवापरं तथा॥हृदये च तथा कार्यं कंठे सूत्रद्वयं तथा॥८॥ललाटे चापरं का
र्यं मस्तके च तथापरं॥मुकुटे परिकर्त्तव्यमूर्ध्वमेकं विचक्षणेः॥९॥सूत्राण्यूर्द्ध्वं प्रदेयानि सप्तैव कमलोद्भवं॥
कक्षांत्रिकांतरेणैव षट्सूत्राणि प्रदापयेत्॥१०॥मध्यसूत्रं तु संत्यज्य सूत्रान्तेपि विनिवेदयेत्॥ललाटं नासि

का चक्रं कर्त्तव्यं चतुरंगुलं॥११॥ग्रीवा कर्णौ तु कर्त्तव्यौ आयामो चतुरंगुलौ॥द्व्यंगुले हनुके कार्ये विस्ताराच्चि
बुकं तथा॥१२॥अष्टांगुलं ललाटं तु विस्तारेण प्रकीर्त्तितं॥विद्धं षडंगुलं कर्णमविद्धं चतुरंगुलं॥१३॥चि
बुकेन समं विद्धमविद्धं वा षडंगुलं॥गंधपात्रं तथावर्त्तं शष्कुलीं कल्पयेत्तथा॥१४॥अंगुलेनाधरः कार्यः
तस्यार्द्धेनोत्तराधरः॥अर्द्धांगुलं तथा गोजीवक्कं च चतुरंगुलं॥१५॥आयामेन तु वै पुल्यात्तस्यार्द्धमंगुलमुच्यते॥
अव्यात्तमेवं स्यात्तवक्त्रं व्यातं त्र्यंगुलमुच्यते॥१६॥नासा वंशसमुच्छ्रायमूले त्वेकांगुलं मतं॥उच्छ्रायार्द्धंगुलं चा
नो करवीरोपमां मतं॥१७॥अंतरं चक्षुषोः कार्यं चतुरंगुलमानतः॥द्व्यंगुलं चाक्षुकोपं तं द्व्यंगुलं चतुरंतयोः॥
१८॥तारा नेत्रत्रिभागेन दृग्तारा पंचमांशकाः॥द्व्यंगुलं नेत्रविस्तारं द्रोणी चार्द्धांगुला मता॥१९॥तत्प्रमा
णाभ्रुवौ लेखा भ्रुवौ चैव तत्समे मते॥भ्रूमध्यं द्व्यंगुलं कार्यं भ्रूदैर्घ्यं चतुरंगुलं॥२०॥षट्त्रिंशदंगुलायामं
मस्तकस्य तु वेष्टनं॥मूर्त्तिनां केशवानां च द्वात्रिंशद्वेष्टनं भवेत्॥२१॥पंचनेत्रं स्थधोग्रीवा विस्तारादेष्टनं पुनः॥
त्रिगुणं तु भवेद्धूर्ध्वं विस्तारार्द्धांगुलं पुनः॥२२॥ग्रीवा त्रिगुणमायामे ग्रीवामक्षांतरं भवेत्॥स्कंधाव ष्टांगुलौ कार्यौ
त्रिकलावंशकौ स्तंभौ॥२३॥सप्तनेत्रौ स्मृतौ बाहू प्रबाहू षोडशांगुलौ॥त्रिकाले निस्तृतौ बाहू प्रबाहू वापि
तत्समौ॥२४॥बाहुदंडो ईतो ज्ञेयः सपरिहकलानि च॥सप्तदशांगुलौ मध्ये कुर्परो र्द्धं च षोडशः॥२५॥कुर्प

रस्यनवेन्नाहं त्रिगुणाः कमलोद्भवः॥ नाहमवाहमध्ये तु षोडशांगुलमुच्यते॥२६ विस्तारेण करतलं कीर्त्ति
तं तु षडंगुलं॥ दैर्घ्यं सप्तांगुलं कार्यं मध्यपंचांगुलं मतं॥२७॥ तर्जन्या नामिका चैव तस्मादर्द्धांगुलं विना॥ क
निष्ठांगुष्टकौ कार्यौ चतुरंगुलसंमितौ॥२८॥ द्विपर्वांगुष्टकः कार्यः शेषागुल्यस्त्रिपर्विका॥ सर्वासां पर्वणार्द्धेन न
मां खनं विधीयते॥२९॥ वक्षसो यत्प्रमाणं तु जठरं तत्प्रमाणतः॥ अंगुलैकं भवेन्नाभिर्वेधेन स प्रमाणतः॥३०॥ ना
भिमध्ये परिणाहे द्विचत्वारिंशदंगुलः॥ अंतरं स्तनयोः कार्यं तालमत्र प्रमाणतः॥३१॥ चूचुकौ यवमात्रौ तु मं
डलं द्विपदं भवेत्॥ चतुःषष्ठ्यंगुलं कार्यं वेष्टनं वक्षसः स्फुटं॥३२॥ चतुर्मुखं तदर्द्धं यद्वेष्टनं परिकीर्त्तितं॥ परिणा
हं तथा कट्यां चतुःपंचाशदंगुलैः॥ विस्तार ऊरुमूले तु प्रोच्यते द्वादशांगुलं॥३३॥ तस्मादभ्याधिकं मध्ये ततो
निम्नतरं क्रमात्॥ विस्तारो ह्यष्टजं जानु त्रिगुणा परिणाहतः॥३४॥ जंघामध्ये तु विस्तारः सप्तांगुल उदाहृतः॥
त्रिगुणा परिधेश्चास्य जंघाग्रे पंचविस्तरात्॥ त्रिगुणं परिधिश्चास्य पादौ तालप्रमाणकौ॥ आयामादुत्थि
तौ पादौ चतुरंगुलमेव च॥३५॥ गुल्फाग्रं वेष्टनं कर्त्तव्यं प्रमाणाच्चतुरंगुलं॥ त्रिकर्णविस्तृतौ पादौ अंगुष्ठो गुल्फकः
स्मृतः॥३६॥ पंचांगुलस्य तु नाहो दीर्घता तद्वत्प्रदेशिनी॥ अष्टमांशं समाशेना शेषा गुल्फः क्रमेण तु॥३७॥ राम०
सपादांगुलमुच्छेधः अंगुष्ठस्य प्रकीर्त्तितं॥ यवोनमंगुलं कार्यमंगुष्ठस्य नखं सदा॥३८॥ अर्द्धांगुलं तथान्या ४९

संक्रमान्मूलं तु कारयेत्॥ षडंगुलौ वृषणौ कार्यौ मेढ्रं तु चतुरंगुलं॥३९॥ परिणाहोत्र नरवाग्रं कर्त्तव्यं चतुरंगु
लं॥ षडंगुलपरिणाहौ वृषणौ परिकीर्त्तितौ॥४०॥ प्रतिमाभूषणाद्यास्मादेतदुद्देशलक्षणं॥ अनयैव दिशा
कार्यं लोके दृष्ट्वा तु लक्षणं॥४१॥ दक्षिणे चक्रे च क्रमधस्तात्पद्ममेव च॥ वामे शंखं गदाधस्तात् वासुदेव
स लक्षणात्॥४२॥ श्रीपुष्टी चापि कर्त्तव्ये पद्मवीणाकरान्विते॥ कुरुमात्रोच्छ्रिता याम्येमानाविद्याधरौ तथा॥
४३॥ प्रभामंडलसंस्थौ तौ प्रभा हस्त्यादिभूषणा॥ पद्माभे पादपीठं तु प्रतिमादेवमाचरेत्॥४४॥ ॥इत्याग्ने
ये महापुराणे प्रतिमालक्षणं नामत्रयत्रिंशोध्यायः॥ ॥श्रीभगवानुवाच॥ ॥ पिंडिकालक्षणं वक्ष्ये दैर्घ्येण प्र
तिमासमा॥ उच्छ्रियं प्रतिमार्द्धं तु चतुःषष्टिपुटीरतां॥१॥ मध्यमा पंक्तिद्वयं चाधस्तदूर्ध्वं पत्तु कोष्ठकं॥ समंता
दुभयोः पार्श्वेऽन्तस्थं परिमार्जयेत्॥२॥ ऊर्ध्वपंक्तिद्वयं त्यक्त्वा अधस्तात्पत्तु कोष्ठकं॥ अंतस्थान्मार्जयेद्यत्नात्
पार्श्वयोरुभयोः समं॥३॥ तयोर्मध्यगतौ तत्र चतुष्कौ मार्जयेत्ततः॥ चतुर्थो मार्जयित्वा तु ऊर्ध्वपंक्तिद्वयं बुधः॥४
मेखलाभागमात्रं स्यात्खातं तस्या द्विमानतः॥ भागं भागं परित्यज्य पार्श्वयोरुभयोः समं॥५॥ दत्वा चैकपदं बाह्ये प्र
माणं कारयेद्बुधः॥ त्रिभागेन च भागस्य अग्रे स्यात्तोयनिर्गमात्॥६॥ नानाप्रकारभेदेन भद्रे यं पिंडिकाशुभा॥
अष्टतालातु कर्त्तव्या देवीलक्ष्मीस्तथा स्त्रियः॥७॥ भ्रुवौ यवाधिके कार्ये यवहीना तु नासिका॥ गोलकेनाधिकं व

क्रमहीनं तिर्यग्दृष्टिविवर्जितं ॥८॥ आयाते नयने कार्ये त्रिभागोनैर्यवैस्त्रिभिः ॥ तदर्द्धेन तु वै तुल्यं नेत्र
योः परिकल्पयेत् ॥९॥ कर्णपार्श्वे ऽधिकः कार्यः स्तकराणां समस्त्वतः ॥ न मेकाला विहीनं तु कुर्याद
दृद्दयं तथा ॥१०॥ ग्रीवा सार्द्धकला कार्या तद्विस्तारो पदत्रोन्मिता ॥ नेत्रद्विबाहु विस्तारो ऊरू जानु पिं
डिका ॥११॥ अंघ्रिपृष्ठे स्फिचौ कट्यां यथायोगं प्रकल्पयेत् ॥ सप्तांगो नालस्तथां गुल्फो दीर्घविंकंप
ना हतः ॥१२॥ नेत्रैकवर्जिता यामा जंघोरू च तथा कटिः ॥ सव्यपार्श्वे च तत्तत्वं वरं पीतं कुचद्वयं ॥
१३॥ तालमात्रौ स्तनौ कार्यौ कटिः सार्द्धकलाधिका ॥ लक्ष्मा त्रोषं पुरो धस्तात् दक्षिणे चांबुजे करे ॥१४॥
वामे बिंनोस्त्रियोपार्श्वेष्ठु मेचामरहास्तिके ॥ दीर्घघोणस्तु गरुडश्चक्रांगाधानघोवदे ॥१५॥ इत्याग्नेये म
हापुराणे प्रतिष्ठायां पिंडिकालक्षणं नाम चतुस्त्रिंशोऽध्यायः ॥ ॥श्रीभगवानुवाच ॥ शालिग्रामादि
मूर्तींश्च वक्ष्येहं भुक्तिमुक्तिदाः ॥ वासुदेवः सितो द्वारि श्लिष्टलग्नद्विचक्रकः ॥१॥ ज्ञेयः संकर्षणो लग्नद्वि
चक्रो रक्तउत्तमः ॥ सूक्ष्मचक्रो बहुच्छिद्रः प्रद्युम्नो नीलदीर्घकः ॥२॥ पीतो निरुद्धः पद्मांको वर्तुलो द्वा
स्त्रिरेखवान् ॥ कृष्णो नारायणो नाम्नूर्तुन्नतः शिशिरदीर्घवान् ॥३॥ परमेष्ठी साब्जचक्रः पृष्ठछिद्रश्च बिं
दुमान् ॥ स्थूलचंद्रचक्रो सितो विष्णुर्मध्ये रेखा गदाकृतिः ॥४॥ नृसिंहः कपिलः स्थूलः चक्रः स्यात् पंचबिंदु

कः ॥ वराहः शक्तिलिंगः स्यात्तच्चक्रौ विषमौ स्मृतौ ॥५॥ इंद्रनीलनिभः स्थूलस्त्रिरेखालांछितः शुभः ॥ कू
र्मस्तु तो नतः पृष्ठे वर्तुलावर्तुको सितः ॥६॥ हयग्रीवो कुशाकाररेखा नीलः सबिंदुकः ॥ वैकुंठ एकचक्रो
ऽभी मणिभः पुच्छेरेखकः त्स्योदीर्घस्त्रिबिंदुः स्यात् काचवर्णस्तु पूरितः ॥ श्रीधरो वनमालांकः पंचरेखासु
वर्तुलः ॥ वामनो वर्तुलश्चातिह्रस्वो नीलः सबिंदुकः ॥ श्यामास्त्रिविक्रमो दक्षरेखो वामे वरकृतः ॥७॥ अनं
तो नागभोगींकोनै कांतोनेकमूर्तिमान् ॥ स्थूलो दामोदरं मध्यं चक्रो द्वास्थूलबिंदुकः ॥८॥ सुदर्शनस्त्वे
कचक्रो लक्ष्मीनारायणो द्वयात् ॥ त्रिचक्रश्चाच्युतो देवस्त्रिचक्रो वा त्रिविक्रमः ॥ जनार्दनश्चतुश्चक्रो वा
सुदेवस्तु पंचभिः ॥ षट्चक्रश्चैव प्रद्युम्नः संकर्षणस्तु सप्तभिः ॥ पुरुषोत्तमो ष्टचक्रो नवव्यूहो नवां
कितः ॥ दशावतारो दशभिः दशैकानानिरुद्धकः ॥ द्वादशात्मा द्वादशभिरत ऊर्ध्वमनंतकः ॥ ॥ इत्याग्ने
येमहापुराणे शालिग्रामादिलक्षणं नाम पंचत्रिंशो ऽध्यायः ॥ ॥श्रीभगवानुवाच ॥ शालिग्रामादिच
क्रांकपूजां सिद्धिं वदामि ते ॥ त्रिविधा स्यात्हरेः पूजा काम्याकाम्यो भयात्मिका ॥१॥ मानादीनां तु पंचा
नां काम्याप्यो चोभयात्मिका ॥ वराहस्य नृसिंहस्य वामनस्याप्यमुक्तये ॥२॥ चक्रादीनां त्रयाणां तु

अ॰पु॰
४९

शालिग्रामार्चनं शृणु॥ उत्तमा निष्फला पूजा कनिष्ठा सफलार्चना॥३॥ मध्यमा मूर्त्तिपूजा स्यात्तच्च
क्राब्जे चतुरस्रके॥ प्रणवं हृदि विन्यस्य षडंगं करदेहयोः॥४॥ कृत्वा मुद्रास्त्रयं चक्राद्बहिः
पूर्वे गुरुं यजेत्॥ आप्ये गणं च वायव्ये धातारं तां नैऋते यजेत्॥५॥ विधातारं च कर्त्तारं हर्त्तारं द
क्षसौम्ययोः॥ विष्वक्सेनं यजेदीशे आग्नेये क्षेत्रपालकं॥६॥ ऋगादिवेदान्प्रागादौ आधा
रानंतकं शुभं॥ पीठपद्मं चार्कचंद्रब्रह्माख्यमंडलत्रयं॥७॥ आसनं द्वादशार्णेन ततः स्थाप्य शि
लां यजेत्॥ व्यस्तेन च समस्तेन स्वबीजेन यजेत्क्रमात्॥८॥ पूर्वादावथ वेदाद्यैर्गायत्र्याख्यां जि
नादिना॥ प्रणवेनार्चयेत्पश्चात्मुद्रास्त्रिस्त्रः प्रदर्शयेत्॥९॥ विष्वक्सेनस्य चक्रस्य क्षेत्रपाजस्य
दर्शयेत्॥ शालिग्रामस्य प्रथमात्पूजार्थो निष्कलोच्यते॥१०॥ पूर्ववत्षोडशारं च सप
द्मं मंडलं लिखेत्॥ शंखचक्रगदाखड्गैर्गुर्वाद्यं पूर्ववद्यजेत्॥११॥ पूर्वे सौम्ये धनुर्बा राम॰
णान्वेदाद्यैरासनं ददेत्॥ शिलां न्यसेद्द्वादशार्णैस्तृतीया पूजनं शृणु॥१२॥ अष्टार ४९

मेब्जं विलिखेत्सुवर्गाद्यं पूर्ववद्यजेत्॥ अष्टार्णमासनं दत्वा तेनैव च शिलां न्यसेत्॥१३॥ पूजयेदष्टधा तेन गायत्र्याप्या
प तेततः॥ इत्याग्नेये महापुराणे शालग्रामादिपूजाविधिर्नाम षट्त्रिंशोऽध्यायः॥ ॥ श्रीभगवानुवाच॥ ॥ अ
रूपकेशवः पद्मशंखचक्रगदाधरः॥ नारायणः शंखपद्मगदी चक्री प्रदक्षिणं॥१॥ ततो गदी माधवोरिशंख
पद्मी नमामि तान्॥ चक्री कौमोदकी पद्मशंखी गोविंद ऊर्जितः॥२॥ मोक्षदः श्रीगदी पद्मी शंखी पद्मी च चक्रधृ
क्॥ चक्रशंखाब्जगदिनं मधुसूदनमानमे॥३॥ भक्त्या त्रिविक्रमः पद्मवामनः पातु मां सदा॥ चक्रः कौमोदकी
चक्री पद्मी खड्गी च शंख्यपि॥४॥ हृषीकेशो गदी चक्री शंखी पद्मी च पातु वः॥ वरदः पद्मनाभस्तु शंखाब्जारिग
दाधरः॥५॥ दामोदरः पद्मशंखगदी चक्री नमामि तं॥ ततो गदी शंखचक्री वासुदेवोब्जजीजगत्॥६॥ संकर्षणो
गदी शंखी पद्मी चक्री च पातु वः॥ गदी चक्री शंखगदी प्रद्युम्नः पद्मभृत्प्रभुः॥७॥ अनिरुद्धश्चक्रगदी शंखीप
द्मी च पातु वः॥ सुरेशोत्यब्जशंखाढ्यः श्रीगदी पुरुषोत्तमः॥८॥ अधोक्षजः पद्मगदी शंखी चक्री च पातु वः॥ देवो
नृसिंहश्चक्राब्जगदी शंखी नमामि तं॥९॥ अच्युतः श्रीगदी पद्मी चक्री शंखी च पातु मां॥ वानरूपी शंखगदी उपेन्द्र
श्चक्रपद्म्यपि॥१०॥ जनार्दनः पद्मचक्री शंखधारी गदाधरः॥ पः शंखी चक्रपद्मी च हरिः कौमोदकीधरः॥११॥
कृष्णः शंखी गदापद्मी चक्री मे भुक्तिमुक्तिदः॥ आदिमूर्त्तिर्वासुदेवः स्तस्मात्संकर्षणः प्रभुः॥१२॥ संकर्षणाच्च

प्रद्युम्नाद्यनिरुद्धकः ॥ केशवादिप्रभेदेन एकैकस्य त्रिधा क्रमात् ॥१३॥ द्वादशाक्षरकं स्तोत्रं चतुर्विंशतिमूर्त्तिमत् ।
यः पठेच्छृणुयाद्वापि निर्मलः सर्वमाप्नुयात् ॥१४॥ ॥इत्याग्नेये महापुराणे चतुर्विंशतिमूर्त्तिस्तोत्रं नाम सप्तत्रिं
शोऽध्यायः ॥ ॥ श्रीभगवानुवाच ॥ ॥ दशावतारमत्स्यादिलक्षणं प्रवदामि ते ॥ मत्स्याकारस्तु मत्स्यः स्यात्कूर्मः कूर्मा
कृतिर्भवेत् ॥१॥ नराङ्गो वाथ कर्त्तव्यो नृवराहो गदादिभृत् ॥ दक्षिणे वामके शंखं लक्ष्मीर्वा पद्ममेव वा ॥२॥ श्रीर्वा
मकूर्परस्था तु क्ष्मानंतौ चरणानुगौ ॥ वराहस्थापनाद्राज्यं भवाब्धितरणं भवेत् ॥३॥ नरसिंहो विवृत्तास्यो वामो
रुःक्षतदानवः ॥ तद्वक्षो दारयन्माली स्फुरच्चक्रगदाधरः ॥४॥ छत्री कुंडी वामनः स्यादथवा स्याच्चतुर्भुजः ॥
रामश्चापेषुहस्तः स्यात्खड्गी परशुनान्वितः ॥५॥ रामश्चापी शरी खड्गी शंखी वा द्विभुजः स्मृतः ॥ गदालांगलधा
री च रामो वाथ चतुर्भुजः ॥६॥ वामार्द्धे लांगलं दद्यादधः शंखं सुशोभनं ॥ मुशलं दक्षिणार्द्धे तु चक्रं चाधः सुशो
भनं ॥७॥ शान्तात्मा लंबकर्णश्च गौरांगश्चाम्बरावृतः ॥ ऊर्ध्वपद्मस्थितो बुद्धो वरदाभयदायकः ॥८॥ धनुस्तूणान्वितः क
ल्की म्लेच्छोत्सादकरो द्विजः ॥ अथवाश्वस्थितः खड्गी शंखचक्रशरान्वितः ॥९॥ लक्षणं वासुदेवादिनरस्य प्रवदामि ते ॥ दक्षिणो
र्ध्वे गदा वामे वामाधश्चक्रलक्षणं ॥१०॥ ब्रह्मेशौ पार्श्वगौ नित्यं वासुदेवोऽतिपूर्ववित् ॥ शंखी सवरदो वाथ द्विभुजो वा चतुर्भुजः ॥११॥
लांगली रामो गदापद्मधरः स्मृतः ॥ प्रद्युम्नो दक्षिणे चक्रं शंखं वामे धनुः करे ॥१२॥ गदाधन्याहृतः प्रीत्या प्रद्युम्नो वा धनुः शरी ॥

चतुर्भुजोऽनिरुद्धः स्यात्तथा नारायणो विभुः ॥१३॥ चतुर्मुखश्चतुर्बाहुर्बृहज्जठरमंडलः ॥ लंबकूर्चो जटायुक्तो
ब्रह्मा हंसाग्रवाहनः ॥१४॥ दक्षिणे चाक्षसूत्रं च स्रुवं वामे तु कुंडिका ॥ आज्यस्थाली चरुस्थाली सावित्री वाम
दक्षिणे ॥१५॥ विष्णुरष्टभुजस्तार्क्ष्ये करे खड्गं तु दक्षिणे ॥ गदा शरश्च वरदो वामे कार्मुकखेटके ॥१६॥ चक्रशंखौ
चतुर्बाहुर्नरसिंहश्चतुर्भुजः ॥ शंखचक्रधरो वापि विदारितमहासुरः ॥ चतुर्बाहुर्वराहस्तु शेषः पाणिपदे धृतः ॥
धारयन्बाहुना पृथ्वीं वामनः कमलाधरः ॥१७॥ पादलग्ना धरा कार्या पदा लक्ष्मीर्व्यवस्थिता ॥ त्रैलोक्यमोह
नस्तार्क्ष्ये अष्टबाहुस्तु दक्षिणे ॥१८॥ चक्रं खड्गं च मुशलं अंकुशं वामके करे ॥ वामे खड्गं च शंखं च गदापाशं च
तोमरं ॥१९॥ लांगलं परशुं दंडं छुरिकां चर्म क्षेपणं ॥ विंशद्बाहुश्चतुर्वक्त्रो दक्षिणे स्थाप्य वामके ॥२०॥ त्रिनेत्रो
वामपार्श्वेन शयितो जलशाय्यपि ॥ श्रिया धृतैकचरणो विमलाद्याभिरीडितः ॥२१॥ नाभिपद्मश्चवक्त्रो करि
शंकरिके हरिः ॥ स्थूलर्ष्टिधारी दक्षे च गदाचक्रधरोऽपरे ॥२२॥ रुद्रकेशवलक्ष्मांगो गौरीलक्ष्मीसमन्वितः ॥ शंख
चक्रगदावेदपाणिश्चाश्वशिरो हरिः ॥२३॥ वामपादधृतः शेषो दक्षिणः कूर्मपृष्ठगः ॥ दत्तात्रेयो द्विबाहुः स्यात्
वामोत्संगे श्रिया सह ॥२४॥ विष्वक्सेनश्चक्रगदी हलशंखी हरेर्गणः ॥ ॥ इत्याग्नेये महापुराणे प्रतिमालक्ष
णं नामाष्टत्रिंशोऽध्यायः ॥ ॥ श्रीभगवानुवाच ॥ ॥ चंडी विंशतिबाहुः स्यात् बिभ्रती दक्षिणैः करैः ॥ शूलासिशक्ति

चक्राणि पाशखेटायुधान्वयं ॥१॥ उग्ररूं शक्तिकां वामे नागपाशं च खेटकं ॥ कुठारं कुशं चापं च घंटां च जगदास्त
था ॥२॥ आदर्शमुद्गरान् हस्तेष्विंडिकां दशबाहुका ॥ तन्मध्ये महिषश्छिन्नो मूर्द्धपातितमस्तकः ॥ शस्त्रोद्यतः कुद्ध
नेत्रो तं नीवासं भवःपुमान् ॥ शूलहस्तोव मश्च क्रोरक्तस्रग्मूर्द्धजेक्षणः ॥४॥ सिंहेनास्वाद्यमानश्च पाशबद्धो गले भृशं ॥
याम्यांघ्र्याक्रांतसिंहं च सव्यांघ्रालीढगासुरे ॥५॥ चंडिकेयं त्रिनेत्रा च सशस्त्रा रिपुमर्दिनी ॥ नवपद्मात्मजे स्थाने पूज्या
दुर्गा स्वमूर्त्तितः ॥६॥ आदौ मध्ये तथैन्द्रादौ नवतत्वात्मभिः क्रमात् ॥ अष्टादशभुजैकांतदक्षे चामुंडखेटकं ॥७॥
आदर्शतर्जनी चापं ध्वजं डमरुकं तथा ॥ पाशं वामे बीभ्रती च शक्तिमुद्गरशूलकं ॥८॥ वज्रखड्गांकुशशरान्वच
क्रं देवीशलाकया ॥ एते स्वायुधैर्युक्ताः शेषाः षोडशबाहुकाः ॥९॥ डमारं वाजनीत्यक्ता रुद्रचंडादयो नव ॥ रुद्र
चंडा प्रचंडा च चंडोग्रा चंडनायका ॥१०॥ चंडा चंडवती चैव चंडरूपाति चंडिका ॥ उग्रचंडा तु मध्यस्था रोचना
भा च साशिव ॥११॥ नीलाभ्रुक्ता धूम्रिका च पीता श्वेता च सिंहगा ॥ महिषो ग्यःपुमान् शस्त्री ततः कुच प्रहस्तुष्टि
का ॥१२॥ साली दानवदुर्गाः स्युः स्वाप्याः पुत्रादिवृद्धये ॥ तथा गौरी चंडीकाद्याः कुड्यक्षं वरदाग्निधृक् ॥१३॥
सैव रंभा वने सिद्धाग्निहीना ललिता तथा ॥ स्कंदमूर्द्ध करा वामे द्विती ये धृतदर्पणा ॥१४॥ याम्ये कुलांजलिहस्ता
सौभाग्यतत्रचोर्द्धिका ॥ लक्ष्मीर्याम्यकरांभोजा वामे श्रीफलसंयुताः ॥१५॥ पुष्पाक्षमालिकाहस्ता वीणाभृद्वा स

रस्वती ॥ कुंभाब्जहस्ता श्वेता मामकरेपारिजा स्ववी ॥१६॥ कूर्मदाप्रमुना कुंभकरा श्यामा च धून्मतेग सवीणास्तु
वरः शुक्लः शूलमात्रा ग्रतोवृषे ॥१७॥ गौरी चतुर्मुखी ब्रह्मी अक्षमालास्रुवान्विता ॥ कुंडेक्षयांतिणी वामे हंसगा
शांकरी सिता ॥१८॥ शरचापौ दक्षिणे स्यात् वामे वज्री धनुर्वृषे ॥ कौमारी शिखिगा रक्ता शक्तिहस्ता द्विबाहु
का ॥१९॥ चक्रशंखधरा सव्ये वामे लक्ष्मीर्गदाम्बुधृक् ॥ दंडशंखासिगदया वाराही महिषस्थया ॥२०॥ ऐं
द्री गजे वज्रहस्ता सहस्राक्षि तु सिद्धये ॥ चामुंडा कोटराक्षी स्यात् निर्मांसा तु त्रिलोचना ॥२१॥ निर्मांसाद
स्थिसारा च ऊर्द्धकेशी कृशोदरी ॥ द्वीपिचर्मपरिवामे कपालं पट्टिसंकरे ॥२२॥ शूलं कर्त्री दक्षिणे स्यात्
सवरूढा स्थिभक्षणा ॥ सर्वारूढा स्थिलक्षणा प्रतिपामंतरं विना ॥ विनायका नृत्यकारोऽष्ट हस्तकुक्षिग
जाननः ॥२३॥ हहहंडोत्कपवीतिमुखं सप्तकलेभवेत् ॥ विस्तारादैर्घ्यतश्चैव कुंडं षट्त्रिंशदंगुलं ॥२४॥
कण्ठाहादशनाडीतु ग्रीवा सार्द्धकलोस्थिता ॥ षट्त्रिंशदंगुलं कंठं गुह्यमध्यं द्विमंगुलं ॥२५॥ नाभिरूरू
द्वादशांजंघे पादे च दक्षिणे ॥ स्वदंतं परशुं वामे लड्डुकं चोत्पलं प्रिये ॥२६॥ सुमुखी चा बिडालाक्षी पा
र्श्वे स्कंदोमयूरगः ॥ स्वामी शाखो विशाखश्च द्विभुजो बालरूपधृक् ॥२७॥ दक्षे शक्तिः कुक्कुटोप एकवक्त्रो
थ षण्मुखः ॥ षड्भुजो वाथ द्वादशभिर्ग्रामिरण्ये विवाहकः ॥२८॥ शक्तिपाशानि स्त्रिंशदंतौ तततर्जनी सु

अ.पु.
५२

तः॥ शक्त्रादक्षिणहस्तेषु षट्सु वामकरे तथा॥२९॥ शिखिपिच्छं धनुः खेटं पताकाभयकुक्कुटं॥ करालकर्त्त
रीमूलपाशुस्त्रो ग्याम्यसोम्ययोः॥३०॥ सिंहस्थाष्टभुजा देवी शिरोडमरकान्विता॥ तेनसाम न्चामुंडा नादे
व्यपि नृत्यती॥३१॥ इयमेव महालक्ष्मी रूपविष्टा चतुर्मुखी॥ नृवाजिमहिषीभिश्चखादयंती कोस्थिता
न्॥३२॥ दशबाहुत्रिनेत्रा च शस्त्रा प डमरुत्रिकं॥ बिभ्रती दक्षिणे हस्ते वामे घंटां च खेटकं॥३३॥ घंटा
गं चीत्रिशूलं च सिद्धचामुंडिकाह्वया॥ सिद्धयोगीश्वरी देवी सर्वसिद्धिप्रदायका॥३४॥ एतद्रूपा भवेदन्या पा
शांकुशायुतारूपा॥ भैरवी रूपविद्यातु भुजैर्द्वादशभिर्युता॥३५॥ एताः स्मशानजा रौद्रा आद्याष्टकमिदं स्मृतं॥
क्षामा शिवा हृता हृद्धा द्विभुता विद्वतानना॥३६॥ दंतुरा क्षेमकारी स्यात् भूमौ जानुकरास्थिता॥ यक्षिणप न्त्रे
दीर्घा स्त्यक्षणा किन्नोवक्त्री हस्त्ययः॥३७॥ पिंगाक्षस्तु सुमीहाख्या रूपिणी ऐन्द्रा रसः सदा॥ साक्षिमाली त्रिशूली च
नंदीशो द्वारपालकः॥३८॥ महालोडसिमुंडी स्यात् शूलखेटधरीस्तथा॥ कृशो भृंगी च नृत्यन्वै कूष्मांडः स्थूलसर्प
वान्॥३९॥ गजगोकर्णवक्त्राद्या वीरभद्रादयो गणाः॥ घंटाकर्णोष्टदशदोः पापरोगं विदारयन्॥४०॥ वस्त्रासिचक्रदंडेषु सु
शलांकुशमुद्गरान्॥ दक्षिणे तर्जनी खेटं शक्तिं मुंडं च पात्रकं॥४१॥ चापं घंटां कुठारं च द्वाभ्यां चैव त्रिशूलकं॥ घंटामा
लाकुलो देवो विस्फोटकरुगर्दनः॥४२॥ इत्याग्नेये महापुराणे प्रतिमालक्षणं नामैकोनचात्वारिंशोध्यायः॥ ॥ श्रीभगवानु॥

राम
५२

सु
सप्ताश्वे सैकचक्रे रथेस्य सूर्यो द्विपद्मधृक्॥ मसिभाजनलेखिन्यौ बिभ्रत् कुंडी तु दक्षिणे॥१॥ वामे तु पिंगलो द्वा
रि दंडभृत स रवेक्षणः॥ वालव्यंजनधारिण्यो पार्श्वे राज्ञी च निष्प्रभा॥२॥ अथवाश्वसमारूढः कार्य एकस्तु
भास्करः॥ वरदद्व्यब्जिनः सर्वे दिक्पाला द्यास्त्रकराः क्रमात्॥३॥ मुद्गरं शक्तिचक्राब्जभृतोग्न्यादि विदि
क्स्थिताः॥ सूर्यार्यमादिरक्षोंता चतुर्हस्ता द्विषट्कुलो॥४॥ वरुणः सूर्यनामा च सहस्रांशुस्तथापरः॥
धाता तपनसंज्ञश्च सविता च गभस्तिकः॥५॥ रविश्चैवाथ पर्जन्यस्त्वष्टा मित्रोथ विष्णुकः॥ मेषादिराशिसं
स्थाश्च मासादि कर्त्तिकांतकाः॥६॥ कृष्णो रक्तो मनाग्रक्तः पीतः पांडुरकः सितः॥ कपिलः पीतवर्णश्च शुक्ल
कालो धवलस्तथा॥७॥ धूम्रा नीला क्रमाद्धृच्छक्तयः केशराग्रगाः॥ इडा सुषुम्णा विश्वार्चिरिंदुसंज्ञा प्र
मर्दनी॥८॥ प्रहर्षणी महाकाली कपिला च प्रबोधिनी॥ नीलांबरा घनांतस्था अमृताख्या च शक्तयः॥९॥
वरुणादेश्च तद्वर्णाः केशराग्रेषु विन्यसेत्॥ तेजश्चंडो महावक्रो द्विभुजः खड्गपद्मभृत्॥१०॥ कुंडिकाज
प्यमाली दु कुजः शक्त्यक्षमालिकः॥ बुधश्चापाक्षपाणिः स्यात् जीवः कुंड्यक्षमालिकः॥११॥ शुक्रः कुंड्यक्ष
माली स्यात् किंकिणीसूत्रवाञ्छनिः॥ अर्द्धचंद्रधरो राहुः केतुः खड्गी च दीपभृत्॥१२॥ अनंतस्तक्षकः कर्कः प
द्मो महाब्जशंखपाः॥ कुलिकाः सूत्रिणः सर्वे फणवक्त्रा महाप्रभाः॥१३॥ इंद्रो वज्री गजारूढश्छागोग्नि

अ॰पु॰
५२

श्वशक्तिमान्॥ यमो दंडी च महिषो नैरृतः खड्गवारे॥१४॥ मकरे वरुणः पाशी वायुर्ध्वजधरो मृगे॥ गदी कुबेरो मे
षस्थ ईशानस्तु जटी वृषे॥१५॥ द्विबाहवो लोकपाला विश्वकर्माक्षसूत्रभृत्॥ हनूमानजहस्तः स्यात् पद्भ्यां संपीडि
ताः श्रियः॥१६॥ वीणाहस्ताः किंनराः स्युर्माला विद्याधराश्च खे॥ दुर्बलांगाः पिशाचाः स्युर्वैताला विकृताननाः॥१७
॥ क्षेत्रपालाः शूलयुताः प्रेता महोदराः कृशाः॥॥ इत्याग्नेये महापुराणे प्रतिमालक्षणे चत्वारिंशोऽध्यायः॥॥ श्रीभ
गवानुवाच॥॥ योगान्यष्टाष्टकं वक्ष्ये ऐशादीशांतचक्रवत्॥ अक्षोभ्या रक्षकर्णी च राक्षसी क्षपणाक्षया॥१॥ पिं
गाक्षी चाक्षया क्षेपइला नीलालया तथा॥ लोला लत्का च लंकेशी नालसा विमला पुनः॥२॥ हुताशना च विशाला
क्षी हुंकारा वडवामुखी॥ महाक्रूरा क्रोधना च भयंकरी महानना॥३॥ सारारख्या रसंग्राही संवारा तालजं
घिका॥ रक्ताक्षी सुप्रसिद्धा तु विद्युज्जिह्वा करंकिणी॥४॥ मेघनादा प्रचंडोग्रा कालकर्णी वरप्रदा॥ चंद्रा
चंद्रावती चैव प्रपंचा प्रलयांतिका॥५॥ पिचुवक्त्रा पिशाची च पिशिताशा च लोलुया॥ धमनी तापनी चैव वा
मनी विकृतानना॥६॥ वायुवेगा बृहत्कुक्षी विकृता विश्वरूपिका॥ यमजिह्वा जयंती च दुर्जया च जयांतिका॥ राम
७॥ बिडाली रेवती चैव पूतना विजयांतिका॥ अष्टहस्ताश्चतुर्हस्ता इछास्त्रास्सर्वसिद्धिदाः॥८॥ भैरवाश्चार्कह ५२
स्तास्याद्धंतरासो जटेंदुभृत्॥ खड्गांकुशकुठारेषुविश्वाभयभृदेकतः॥९॥ चापत्रिशूलखट्वांगपाशकार्ध

धरोद्यतः॥ गजचर्मधरो द्वाभ्यां कृत्तिवासोऽहिभूषितः॥१०॥ प्रेतासनो मातमध्ये पूज्यपंचाननोथवा॥ रविनाना
ग्निपर्यंतं दीर्घैः कैकनेदितां॥११॥ तत्षडंगानि जातैस्तैः स्वानितं चक्रमांबूजेत्॥ मंदिराग्निदरारूढं सुवर्णरस
कान्तिनं॥१२॥ नादबिंदुद्विसपुटं मातनाथागदाषितं॥ वीरभद्रो वृषारूढो मात्राग्रेस चतुर्मुखः॥१३॥ गौरी तु
द्विभुजा त्र्यक्षा शूलिनी दर्पणान्विता॥ शूलांगपाणतिका कुंडी वरदा च चतुर्भुजा॥१४॥ अब्जस्था ललिता स्कंदग
णादर्शशलाकया॥ चंडिका दशहस्ता स्यात् शूलखड्गासिशक्तिधृक्॥१५॥ दक्षे वामे नागपाशं चर्मांकुशाकुठ
रकं॥ धनुः सिंहे च माहिषः त्रिशूलेन प्रहितोग्रतः॥१६॥ ॥ इत्याग्नेये महापुराणे प्रतिमालक्षणे एकचत्वारिं
शोऽध्यायः॥४१॥ ॥ श्रीभगवानुवाच॥॥ लिंगादिलक्षणं वक्ष्ये कमलोद्भव तच्छृणु॥ दैर्घ्यार्द्धं च स्तुमिर्भक्ता स
त्रागत्रयं ततः॥१॥ विष्कंभे भूतनागैस्तु चतुरस्त्रं तु कारयेत्॥ आयाम वृतिविभक्तिस्या एकद्वित्रिक्रमान्यसे
त्॥ ब्रह्मविष्णुशिवांशेषु वर्द्धमानोपि मुच्यते॥ चतुरग्रे स्यक्रमाद्विरत्यकोशेषु लांछयेत्॥ अष्टाग्रं वैष्णवं भा
गं सिध्यत्येवं न संशयः॥२॥ षोडशाग्रं ततः कुर्यात् द्वात्रिंशाग्रं ततः पुनः॥ चतुःषष्ट्याग्रगं कुर्याद्वृत्तं संसाधयेत्त
तः॥३॥ कल्पयेद्यलिंगस्य शिरो वै देहिकोत्तमः॥ विस्तारमथ लिंगस्य अष्टधा संविभाजयेत्॥४॥ भागार्द्धं तु संत
त्यक्त्वा छत्राकारं शिरो भवेत्॥ त्रिषु भागेषु सदृशं आयामं यस्य विस्तरं॥५॥ तद्विभागसमं लिंगं सर्वकामफलप्रदं

अ०पु०
५४

देर्घ्यस्य तु चतुर्थेन विष्कंभं देवपूजिता ॥ सर्वेषामेव लिंगानां लक्षणं शृणु सांप्रतं ॥ मध्ये सूत्रं समास्फाल्य ब्रह्मरुद्रां
तिकं बुधः ॥७॥ षोडशांशं स्फुटं लिंगस्य षड्भागैर्भाजितो यदा ॥ तद्वैष्णवमनस्सूत्रं स्यां मानमंतरमुच्यते ॥८॥ यवाष्टु
न्नमेकार्यं रेखाणां यवहानितः ॥ अर्धभागं त्रिधा कृत्वा ऊर्ध्वमेकं परित्यजेत् ॥९॥ अष्टधा तद्द्वयं कृत्वा ऊर्ध्वभागत्र
यं त्यजेत् ॥ ऊर्ध्वं तु पंचमाद्भागाद्भ्रामरेखा पुनस्त्यजेत् ॥१०॥ भागमेकं परित्यज्य संगमं कारयेत्तयोः ॥ एतत्सा
धारणं कृत्वा लिंगानां लक्षणं मया ॥११॥ सर्वसाधारणं वक्ष्ये पिंडिकां तन्निबोध मे ॥ ब्रह्मभागं भवेन्न्यूनं च हृत्वा लिंग
स्य चोच्छ्रये ॥१२॥ न्यसेद्ब्रह्मशिलां विद्वान् सम्यक् कूर्मशिलोपरि ॥ तथा सच्छ्रयं हुत्वा पिंडिकां प्रविभाजये
त् ॥१३॥ विभागमूर्ध्वतं पीठं विस्तारं लिंगसंमितं ॥ त्रिभागं मध्यतः खातं कृत्वा पीठं विभाजयेत् ॥१४॥ स्वमा
नार्द्धत्रिभागेन बाहुल्यं परिकल्पयेत् ॥ बहिर्न्त्स्या त्रिभागेन मेखलामथ कल्पयेत् ॥१५॥ खातं स्यान्मेखलां
तस्य क्रमात्रिस्तं च कारयेत् ॥ मेखलाषोडशांशेन खातं वा तत्प्रमाणतः ॥१६॥ उच्छ्रायं यन्नु पीठस्य विस्तारांगं तु
पं कारयेत् ॥ भूमौ प्रविष्टमेकं तु भागैकैकेन निर्मितः ॥१७॥ कंठं भागैस्त्रिभिः कार्यं भागेकेन च पट्टिका ॥ षंडेन त्वा राम
र्ध्वपट्टं तु एकांशेन शेषपट्टिका ॥१८॥ भागं भागं प्रविष्टं तु यावत्कंठं ततः पुनः ॥ निर्गमं भागमेकं तु पाव द्वे शेष ५४
पट्टिका ॥१९॥ प्रमाणस्य त्रिभागेन भागेन निर्गमस्तु त्रिभागतः ॥ मध्ये तु ल्पप्रविष्टानां ग्रंथेत्रंशेन चाग्रत ॥२०॥

इत्थं निम्नं तु कुर्वीत खातं तस्योत्तरेण वै ॥ पिंडिकासहितं लिंगं एतत्साधारणं स्मृतं ॥२१॥ ॥ इत्याग्नेये महापुराणे
लिंगलक्षणं नाम द्विचत्वारिंशोऽध्यायः ॥४२॥ ॥ श्रीभगवानुवाच ॥ ॥ वक्ष्याम्यन्यप्रकारेण लिंगमानादि
कं शृणु ॥ वक्ष्ये न वगजं लिंगं घृतजं बुद्धिवर्द्धनं ॥१॥ भूतये वस्त्रलिंगं तु लिंगं तात्कालिकं विदुः ॥ पक्वापक्वं
कं मृन्मयं स्यात् अपक्वात् पक्वजं वरं ॥२॥ रसजं रसलोहादि रत्नगर्भं तु बंधयेत् ॥ मानादिलोष्टं सि
द्धादिस्थापिते घस्वयंभुवि ॥३॥ बाणवत्स्वेच्छया तेषां पीठप्रासादकल्पना ॥ पूजयेत्सूर्यबिंबस्थं
दर्पणे प्रतिबिंबितं ॥४॥ पृष्ठे हरस्तु सर्वत्र लिंगे पूजार्चनं भवेत् ॥ हस्तोत्तरविधं शैलं दारुजं तद्द्हे वहि
५॥ नवमंगुलमानेन द्वारगर्भकरे स्थिरे ॥ अंगुलाद्गृहे लिंगं स्यात्तयावत्स्यं च दशांगुलं ॥६॥ द्वारमानाधिकं स
स्याकं नव भागभमानत ॥ नव भागर्भमानेन लिंगं वा मे चपूजयेत् ॥७॥ एवं लिंगानि षट्त्रिंशात्तेषां निज्येष्ट
मानतः ॥ मध्यमाने त्रशादत्रिंशात् शाङ्क्विंशाद धमेन्नव ॥८॥ इत्युमे कसेनलिंगानां शतमष्टोत्तरं भवेत् ॥ एकां
गुलादिपंचांतकन्यसं च लघुच्यते ॥९॥ षडादिदशापर्यंतं चलं लिंगं च मध्यमं ॥ एकादशांगुलादि स्यात् ज्येष्ठ
पंचदशांतिकं ॥१०॥ षडंगुलं महारत्नैरत्नैरन्यैर्नवांगुलैः ॥ रविभिर्हेमतारोत्थं लिंगं शेषैस्त्रिपंचभिः ॥११॥ षोडशां
गे चवेदास्रे युग्मांसु भोर्द्ध देशतः ॥ द्वात्रिंशत्षोडशांशाश्च कोणयोस्तु विलेपयेत् ॥१२॥ चतुर्विंशभागा नातं कं

नविंशतिस्त्रिषुगेषु तथा॥ पार्श्वभित्तौ तु च वित्ताभ्यां च रलिंगस्तु चेद्वरं॥१३॥ द्वाभ्यां सर्वगं तु नागांगे हरिहिनांरितः क्रमात्॥
लिंगं द्वारोच्छ्रयादेशात् न्यवेत्पादेरतः क्रमात्॥१४॥ गर्भार्द्धेन समं लिंगं भूतांशैः स्यात्त्रिभिर्वरं॥ तयोर्मध्ये चसूत्रा
णिसप्तसंपातयेत्समं॥१५॥ एवं स्युर्नवसूत्राणि भूतसूत्रे ऽथ मध्यमं॥ त्र्यंतरे रामरामं च लिंगानां दीर्घतो नव॥१६
हस्तादिवर्द्धितेहस्तो यावत्स्युर्नवपाणयः॥ हीनमध्योत्तरलिंगं त्रिविधं त्रिविधात्मकं॥१७॥ एकैकलिंगमध्येषु त्रीणि
त्रीणि च पादजाः॥ लिंगानि घटयेद्धीमान्षट्सु चाष्टोत्तरेषु च॥१८॥ स्थिरदीर्घप्रमाणेषाद्वारगर्भकरात्मिका।
भागेशं चाप्यनीशं च देवेत्यातुस्यसंज्ञितं॥१९॥ चत्वभागं चाप्यनीशं च देवेत्यातुस्यसंज्ञितं॥ चत्वारि लिंगरूपा
णि विष्कंभेन तु लक्षयेत्॥२०॥ दीर्घमायान्वितं कृत्वा लिंगं कृत्वा त्रिरूपकं॥ चतुरष्टास्रवृत्तं च तुल्यत्रयगुणात्म
क॥२१॥ लिंगानामीप्सितं दैर्घ्यं तेन कृत्वांगुलानि वै॥ ध्वजाद्यायैः सुरैर्भूतैः शिखिभिर्नहरेत्कृतिं॥२२॥ तान्यं
गुलानि पद्धेषं न लक्षयेद्वस्रनाभ्यं॥ ध्वजाद्या ध्वजसिंहे तु वृषाश्वे शुभ परे स्मृता॥२३॥ स्वरेषु पद्गांधारपंचमाः
शुभदायकाः॥ भूतेषु च शुभा भूः स्यात्स्यारोहे हवनीयकः॥२४॥ ज्ञात्वा द्वाभ्यस्य चार्द्धांशे नगैर्गजितः क्रमा
त्॥ रसभूतास्वरस्वांशांशं गाधिकंशो ते न वित्॥२५॥ आद्यानाद्यसुरेशा हस्तुजानां चतुरस्रता॥ पंचमं वर्द्धमा
नाख्यं मासं नान्हं भद्रदितः॥२६॥ द्विधा भेदा वक्ष्यन्ति न वस्यं तेविस्यं कर्माणि॥ आद्यादीनां त्रिधास्त्वोल्पात्पदर

द्वांतरद्वृधाः॥२७॥ त्रिधा हस्ता जिनाक्षं चयुक्तं सर्वसमेन च॥ पंचविंशतिलिंगानि नाद्येदेवार्चिते तथा॥२८॥ पंच
सप्तभिरेकलातजिने भक्तमनं तिहि॥ चतुर्दशास हस्त्राणि चतुर्दशशतानि च॥ एवमष्टांगविस्तारं न वैकंक
रगमतिः॥ तेषां कर्णार्द्धकोणस्थे स्त्रिंद्यात्कोणाद्दिसूत्रकैः॥३०॥ विस्तारं मध्यतः कृत्वा स्वाप्य वाम मध्यतः स्व
यं॥ द्विभागाहर्द्ध मध्यंगो अष्टाग्रः स्यात्शिवांशकः॥३१॥ पादाक्रान्तं ततकोब्रह्मनाम्स्यांतो विष्णुरित्यतः॥ मूर्द्धां
तोस्त्रभागेशो व्यक्ते चतुर्गतिं॥३२॥ पंचलिंगस्य वस्त्वायां शिरो वर्द्धम्यमुच्यते॥ छत्राभं कुक्कुटाभं वा बालेंदुपुरु
षाकृतिं॥३३॥ एकैकस्य चतुर्भेदैः काम्यवेदात्फलं वदेत्॥ लिंगमस्तकविस्तारं वसुभक्तं तु कारयेत्॥३४॥
अंत्यभागं चतुर्वृत्तविस्तारो छ्रायतो भजेत्॥ चत्वारि तत्र छत्राणि भागभागानुपातनात्॥३५॥ पुंडरीकं तु ना
गेन विशालाक्षा द्विलोचनात्॥ —— त्रिगणतनातु श्रीवत्सं भानुभिर्वेदनोपरात्॥ शिरः सर्वसमश्रेष्टकुक्कुटाकु
सुराकृपात्॥ चतुर्भागात्वकेलिंगे त्रपुषं ह्यलोपनात्॥३६॥ अनाद्यस्य शिरः प्रोक्तः मर्द्धचंद्रं शिवः शृणु॥ त्र्यं
गात्मांते युगांगेषु एकद्वास्यात्मता कृपं॥३८॥ पूर्णबालेंदु कुमुदं द्वित्रिवेदक्षयात्तत्क्रमात्॥ चतुस्त्रिरेखब
हुलं मुखलिंगमतः शृणु॥३९॥ पूजाभागं प्रकर्त्तव्यं रूलिंग्निपदकल्पितं॥ अकोंशं पूर्ववृत्तस्वाकृपटस्थानानि
विवर्जयेत्॥४०॥ शिरोनालिमकर्त्तव्या ललाटं नासिका ततः॥ वदनं चिबुकं ग्रीवा युग्मागेर्भुजाक्षिणिः॥४१॥क

राज्यं मुक्तिकृत्वा प्रतिमायाः प्रमाणतः॥ मुखं प्रतिसमं कार्यो विस्तारादष्टमांगुलः॥४२॥ चतुर्मुखं मया प्रो
क्तं विमुखं चोच्यते शृणु॥ किंतु पादाधिकां तस्य लाद्यादीनि निर्दिशेत्॥४३॥ मुखैश्च तु त्रिभिर्भागैस्तत्कर्तव्योपप
श्चिमोर्जितं॥ विस्तारादष्टमांशेन मुखानां प्रतिनिर्गमः॥४४॥ एकवक्त्रं तथा कार्यं पूर्वास्यं सौम्यलोचनं॥ लला
टं नासिका वक्त्रं ग्रीवायां च विवर्जयेत्॥४५॥ भुजाश्च पंचमांसेन भुजहानिं विवर्जयेत्॥ विस्तारस्य षडंगेन मु
खे निर्गमनं हितं॥४६॥ सर्वेषां मुखलिंगानां त्रिपुणां वापि कुकुटा॥॥ इत्याग्नेये महापुराणे व्यक्ताव्यक्तलिंगल
क्षणं नाम त्रिचत्वारिंशोऽध्यायः॥४३॥ श्रीभगवानुवाच॥ अतः परं प्रवक्ष्यामि पिंडिकानां तु लक्षणं॥ दैर्घ्येण
प्रतिमातुल्या तदर्द्धेन तु विस्तृता॥१॥ उच्छ्रिता पामतोर्द्धेन सुविस्तारार्द्धमागतः॥ त्रिभागेन तु वा हन्यं तत्र भागेन
मेखला॥२॥ खातं च तत्प्रमाणं तु किंचिदुत्तरतोन्नतं॥ विस्तारस्य चतुर्थेन प्रमाणस्य विनिर्गमः॥३॥ सम
स्तेस्य विस्तारमग्रे कुर्यात्तदर्द्धतः॥ विस्तारस्य तृतीयेन तोपमार्गं तु कारयेत्॥४॥ पिंडिकार्द्धेन वा हमे दैर्घ्य
देशस्य कीर्तितं॥ कुंभं वा हन्यदीर्घं च ज्ञात्वा पुनः प्रकल्पयेत॥५॥ उच्छ्रयं पूर्ववत् कुर्यात् भागं षोडशसंख्य
या॥ अधः पंक्तिद्विभागं तु कर्यात्त्रिभागिकं॥ रेखास्तैकैकरांका पीः प्रविष्टा निर्गमास्तथा॥ पट्टिका पिंडिका चै
षा सामान्या प्रतिमासु च॥७॥ प्रसादद्वारमानेन प्रतिमाद्रव्यमुच्यते॥ गजव्यालकसंयुक्ता प्रजास्या तत्प्रति

मासु च॥८॥ पिंडिका नियथायोगे ते कर्तव्या सततं हरेः॥ सर्वेषामेव देवानां विमुक्तमानमुच्यते॥९॥ देवानामपि सर्वा
सां लक्ष्मस्कमानमुच्यते॥९॥ देवानामानमुच्यते॥९॥ देवानामपि सर्वासां लक्ष्मकं गानमुच्यते॥ ॥इत्याग्नेये
महापुराणे पिंडिकालक्षणं नाम चतुःचत्वारिंशोऽध्यायः॥४४॥ श्रीभगवानुवाच॥ प्रतिष्ठां पंचकं वक्ष्ये
प्रतिमानां तु पुरुषः॥ प्रकृतिः पिंडिका लक्ष्मी प्रतिष्ठा योगकस्तयोः॥१॥ इच्छाफलार्थिभिस्तस्मात् प्रतिष्ठाक्रि
यते नरैः॥ गर्भसूत्रं तु निःसार्य प्रसादस्याग्रतो गुरुः॥२॥ अष्टषोडशाविंश्यंतं मंडपं चापमादिकं॥ स्नाना
र्थं कलशार्थं च यागद्रव्यार्थमब्रुत॥३॥ त्रिभागेनार्द्धभागेन वेदीं कुर्यात्तु शोभनां॥ कलशैर्घटिकाभिश्च वि
नाताय्यैश्च हृष्यपेत्॥४॥ पंचगव्येन संप्रोक्ष्य सर्वद्रव्याणि धारयेत्॥ अलंकृतो गुरुर्विष्णुं ध्यात्वात्मानं प्र
पूजयेत्॥५॥ अंगुलीयप्रभृतिभिर्मूर्तिपावनयादिभिः॥ कुंडे कुंडेस्वापयेच्च मूर्त्तिपान् स्तत्र पारगान्
॥६॥ चतुःकोणे चार्द्धकोणे वर्तुले पद्मसंन्निभे॥ पूर्वादौ तोरणार्थं तु पिप्पलोदुंबरौ वटः॥७॥ प्लक्षः सुशोभ
नं पूर्वं सुवर्णादु त्वतोरणं॥ सुक्रमंत्रसुहोत्रं च आज्यसौम्यसमुत्थितं॥ द्वीपं च हस्तं तु संप्राप्य द्वागा पृथिवी
तु पूजयेत्॥ तोरणास्तंभमूले तु कलशान्मंगलान् कुरात॥९॥ प्रदद्यादुपरिष्टाच्च कुर्याच्चक्रं सुदर्शनं॥ पंच
हस्तप्रमाणं तु ध्वजं कुर्याद्विचक्षणः॥१०॥ वैपुल्यं चास्य कुर्वीत षोडशांगुलसंमितं॥ सप्तहस्तोच्छ्रयं वा

स्पकुर्यात्कुंडं सुरोत्तम ॥११॥ अरुणोग्निनिभश्चैव कृष्णस्तु ज्ञोप्य पीतकः ॥ रक्तवर्णस्तथा श्वेतः श्वेतवर्णःक्रि
मात् द्विजाः ॥१२॥ कुमुदः कुमुदाख्यश्च पुंडरीकोथ वामनः ॥ शंकुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥
१३॥ पूज्याः कोटिगुणैर्युक्ताः पूर्वाद्या ध्वजदेवताः ॥ जंबूद्वक्षमधुरा स्तूपं कबिंबोपमा घटाः ॥१४॥ अष्टौ विंद्वा
धिकं नाम नालं मंडलवर्जिताः ॥ सहिरण्या वस्त्रकंठास्तोरणाद्वहिः ॥१५॥ घटास्थाप्यास्तु पूर्वादौ वेद्य
काद्या स्ककोणगात् ॥ चतुरस्रापयेत्कुंभान् आजिघ्रेति च मध्यतः ॥१६॥ कुंभेष्वावाहयेच्छक्रादीन् पूर्वादौ प्रपूज
येत्क्रमात् ॥ इंद्रागच्छ च देवराज वज्रहस्त गजस्थित ॥१७॥ पूर्वद्वारं तु मे रक्ष देवैः सह नमोस्तु ते ॥ त्रातारमिं
द्ररूपेण अर्चयित्वा यजेद् बुधः ॥१८॥ आगच्छाग्ने शक्तिहस्त छागस्थ वनसंयुतः ॥ रक्षाग्नेयीं दिशं नः देवैः पूजां
गृह्ण नमोस्तु ते ॥१९॥ अग्निमीडे ति अर्चयित्वा यजेदाग्नयेनमः ॥ माहिषस्थ यमागच्छ दंडहस्त महाबलः ॥२०॥
रक्ष त्वं दक्षिणद्वारं वैवस्वत देव नमोस्तु ते ॥ वैवस्वतं संगमनमित्यनेन यजेद्यमं ॥२१॥ नैरृतागच्छ खड्गाढ्य बल
वाहन संयुतः ॥ इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैरृतीं दिशं ॥२२॥ एष ते नैरृते मंत्रेण यजेदर्घ्यादिभिर्नरः ॥ मक राम
रारूढ वरुण पाशहस्त महाबल ॥२३॥ आगच्छ पश्चिमं द्वारं रक्ष रक्ष नमोस्तु ते ॥ उरुं हि राजा वरुणं यजेद ५७
र्घ्यादिभिर्गुरुः ॥२४॥ आगच्छ वायो पवन ध्वजहस्त सवाहनः ॥ वायव्यं रक्ष देवैस्त्वं समरुद्भिर्नमोस्तु ते ॥२५॥

वात इत्यादिभिश्चादिदो नमो वायवेपि वा ॥ आगच्छ सोम सबलगदाहस्त सवाहनः ॥२६॥ रक्ष त्वमुत्तरं द्वारं सकु
बेर नमोस्तु ते ॥ सोमं राजानमिति च यजेत्सोमाय वै नमः ॥२७॥ आगच्छैशान सबल शूलहस्त वृषस्थित ॥
यज्ञमंडपस्यैशानीं दिशं रक्ष नमोस्तु ते ॥२८॥ ईशानमस्येति यजेदीशानाय नमोपि वा ॥ ब्रह्मन्नागच्छ हंस
सस्त्रुक्स्त्रुवव्यग्रहस्तक ॥२९॥ सलोकोर्ध्वां दिशं रक्ष यज्ञस्यास्य नमोस्तु ते ॥ हिरण्यगर्भेति यजेत्तु नमस्ते
ब्रह्मणेपि वा ॥३०॥ अनंतागच्छ चक्राढ्य कूर्मस्थाहिगणेश्वर ॥ अधोदिशं रक्ष रक्ष अनंतेशा नमोस्तु ते ॥३१
नमोस्तु सर्पेति यजेदनंताय नमोपि वा ॥ ॥ इत्याग्नेये महापुराणे दिक्पालयागे पंचचत्वारिंशोऽध्यायः ॥४५॥
श्रीभगवानुवाच ॥ ॥ भूमेः परिग्रहं कुर्यात् क्षिपेद्व्रीहिंश्च सर्षपान् ॥ नरसिंहेन रक्षोघ्नान् प्रोक्षयेत्तं च ग
व्यतः ॥१॥ नमिषदे तु संपूज्य सर्वलोकांग कं हरिं ॥ अस्त्र मंत्रेण कर्कं तच्चाष्टशतं जपेत् ॥२॥ अच्छिन्न धार
या सिंचन् व्रीहिं संकल्पधारयेत् ॥ प्रदक्षिणं परिभ्राम्य कलशं विकिरोपरि ॥३॥ सवस्त्रे कलशे भूयः पूजये
दच्युतं श्रियं ॥ योगे योगेति मंत्रेण अभ्यर्चेत्स्थंडिले तु मंडले ॥४॥ कुंभे भूरिंतिलिकां चाग्नि ष्वापां दिग्वि दिक्षु च ॥
विद्याधिपान् यजेद्विष्णुं मधुघातं त्रिविक्रमं ॥५॥ वामनं दिक्षु वह्न्यादौ हृषीकेशं च श्रीधरं ॥ पद्मनाभं दामो
दरं ऐशान्यां स्नानमंडपे ॥६॥ अभ्यर्च्य पश्चिमादै शान्यां चतुष्पदे सविदिके ॥ स्नानमंडपके सर्वं व्याख्यानी

अ॰पु॰ यनिक्षिपेत्॥७॥स्नानकुंभेषुकुंभांश्चतुर्दिक्ष्वधिवासयेत्॥कलशाःस्नापनीयास्तुअभिषेकार्थमादरात्॥
५९ ८॥वटोदुंबरकाश्वत्थांश्चपंचकाशोकश्रीद्रुमान्॥पलाशार्जुनपक्षांस्तुकदंबबकुलाम्रजान्॥९॥पल्लवांस्तुस
मानीयपूर्वकुंभेविनिक्षिपेत्॥पद्मकरोचनीदूर्वादर्भपिंजूलमेवच॥जातीपुष्पंकुंदपुष्पंचंदनं॥सिद्धार्थ
तगरंचैवतंदुलंदक्षिणेन्यसेत्॥सुवर्णंरजतंचैवकूलद्वयमृदंतथा॥नद्याःसमुद्रगामिन्याविशेषाजाह्नवीमृदं॥
१०॥गोमयंचयवान्शालीन्तिलांश्चैवापरेन्यसेत्॥विष्णुपर्णींश्यामलतांभृंगराजंशतावरीं॥११॥सहदेवांमुर
सिंहींबलांव्याघ्रींसलक्ष्मणां॥ऐशान्यामपरेकुंभेमंगल्यान्विनिवेशयेत्॥१२॥वल्मीकमृत्तिकांसप्तस्थानो
त्थांनपरेन्यसेत्॥जाह्नवीवालुकातोयंविन्यसेदपरेघटे॥१३॥वराहवृषनागेंद्रविषाणोद्धृतमृत्तिकां॥
मृत्तिकांपद्ममूलस्यकुशस्यचपरेन्यसेत्॥१४॥चंदनागरुकर्पूरंकुंकुमंतत्रापरेन्यसेत्॥वैडूर्यंविद्रुमंमु
क्तास्फटिकंवज्रमेवच॥एतानेकत्रनिक्षिप्यस्थापयेद्देवसत्तमं॥१५॥नदीनदतडागानांसलिलैरपरेन्यसेत्॥
एकाशीतिपदेचान्येमंडलेकलशान्न्यसेत्॥१६॥गंधोदकाद्यैःसंपूर्णान्श्रीसूक्तेनाभिमंत्रयेत्॥पंचसिद्धार्थ
कंगंधंकुशाग्रंचाक्षतंतथा॥१७॥तिलान्फलंतथापुष्पंअर्घ्यंपूर्वतोन्यसेत्॥पद्मश्यामलतादूर्वाविष्णुपर्णी राम॰ ५९
कुशांस्तथा॥पाद्यार्घंदक्षिणेभागेमधुपर्कंतुपश्चिमे॥हेमादिपात्रेस्रक्तात्तुनानावर्णादिपुष्पकं॥१९॥

इत्याग्नेयेमहापुराणेकलशाधिवासेषट्चत्वारिंशोऽध्यायः॥ ॥श्रीभगवानुवाच॥हरेस्सांनिध्यकरणम
स धिवासनमुच्यते॥वर्तिंसर्वगंधाल्लात्मानंपुरुषोत्तमं॥१॥ॐकारेणसमायोज्यचिच्छक्तिमभिमानिनीं॥निः
सप्येनैकतांकृत्वाक्तस्मिन्सर्वगतेविभौ॥२॥यजयेन्मरुताशोष्यवह्निबीजेनदीपयेत्॥संहरेत्वायुना
चाग्निंवायुमाकाशतोरयेत्॥३॥अधिभूतादिदैवैश्चसाध्यासैर्विषयैःसह॥तन्मात्रशतकान्कृत्वासं
हरेत्तत्क्रमाद्बुधः॥४॥आकाशंमनसाकृत्वमनोहंकरणेकुरु॥अहंकारंचमहतितंचाप्यव्याकृतेनय
त॥५॥अव्याहृतंज्ञानरूपेवासुदेवःसईरितः॥सतोमव्याहृतीमायामवष्टभ्यसमक्षया॥६॥संकर्षण
संज्ञावात्मास्पशक्तिमसृजत्प्रभुः॥क्षोभयामासप्रद्युम्नंतेजोरूपंसचासृजत्॥७॥अनिरुद्धंचसनमात्रं
ब्रह्माणंगंधरूपकं॥अनिरुद्धःसचब्रह्माअद्भ्योससर्जहि॥८॥तस्मिन्हिरण्मयंचांडंसोसृजत्पंचभूतव
त्॥तस्मिन्संक्रमणेजीवःशक्तिरर्थोपसंस्कृता॥९॥प्राणोजीवेनसंयुक्तोवृद्धिमानितिशब्द्यते॥जीवो
व्याहृतगंधस्तुप्राणासाध्यात्मिकाःस्मृता॥१०॥प्राणैर्युक्तातततोबुद्धिःसंजाताचाष्टवृत्तिकी॥अहंकारस्ततो
जज्ञेमनस्तस्मादजायत॥११॥अर्थाःप्रजज्ञिरेपंचसंकल्पादिषुतस्ततः॥शब्दःस्पर्शश्चरूपंचरसोगंधइ
तिस्मृताः॥१२॥ज्ञानशक्तियुतान्येतैरारब्धानींद्रियाणितुत्वक्श्रोत्रघ्राणचक्षुर्षिजिह्वाबुद्धींद्रियाणितु

१३ ॥ पायुपादस्तपाणि वागुपस्थस्तु पंचमः ॥ कर्मेंद्रियाणि चैतानि पंचभूतान्यथ शृणु ॥१४॥ आकाशवायुते
जांसि सलिलं पृथिवी तथा ॥ स्थूलमेभिः शरीरं तु सर्वाधारं प्रजायते ॥१५॥ एतेषां वाचका मंत्रान्न्यासयोग्यान्
उत्तमाः ॥ जीवभूतं मकारं च देवस्य व्यापकं न्यसेत् ॥१६॥ प्राणतत्त्वं भकारं तु जीवोपाधिगतं न्यसेत् ॥१७॥ हृदय
स्थं बकारं तु बुद्धितत्त्वं न्यसेद्बुधः ॥ फकारमपि तत्रैव अहंकारमयं न्यसेत् ॥१८॥ मनस्तत्त्वं पकारं तु न्यसेत्सं
कल्पसंभवं ॥ शब्दतन्मात्रतत्त्वं तु नकारं मस्तके न्यसेत् ॥१९॥ स्पर्शात्मकं धकारं तु वक्रदेशे तु विन्यसेत्
त्वचि ॥ डकारं नेत्रयुग्मे तु रसनायां ठकारकं ॥२०॥ टकारं नासिकायां च ञकारं चापि विन्यसेत् ॥ ढकारं
करयोर्न्यस्य डं पायौ चस्थे तकारं पादयुग्मके ॥ बसौ युक्ता रसभूत्त्वं ते जसं हृदि विन्यसेत् ॥ खकारं वायुतत्त्वं च
नासिकायां न्यसेच्छायेत् ॥ सकारं विन्यसेन्नित्यं पुस्तके ॥२२॥ विन्यसेत्पृथिवीतत्त्वं खतत्त्वं मस्तके बुधः ॥
हृत्पुंडरीके संन्यस्य यकारं सूर्यदैवतं ॥२३॥ द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ॥ कलाषोडशसंयुक्तं सका
रं तत्र चिंतयेत् ॥२४॥ तन्मध्ये चिंतयेन्मंत्री बिंदुं कोटिसुमंगलं ॥ हकारं विन्यसेत्तत्र प्रणवेन सुरोत्तमां ॥२५॥ ॐ परमे
ष्ठ्यासुरोत्तमाय नमः ॥ पुरुषात्मने शंनामानि नीलां च विश्वात्मने नमः ॥२६॥ ॐ नमः सर्वात्मने इत्युक्ताः पंचश
क्तयः ॥ स्थाने तु प्रथमा योज्या द्वितीया चासने मता ॥२६॥ तृतीया शयने तद्वत् चतुर्थी यानकर्मणि ॥ प्रत्यर्चयां प

चमी स्यात्तं च पोपनिषत्स्मृता ॥२७॥ ककारं विन्यसेन्मध्ये ध्यात्वा मंत्रमयं हरिं ॥ यां मूर्तिं स्थापयेत्तस्यां मूलमंत्रं न्य
सेत्ततः ॥२८॥ ॐ नमो भगवते वासुदेवाय मूलकं शिरोघ्राणललाटेषु मुखे वै हृदि क्रमात् ॥२९॥ भुजयोर्जंघयोरंघ्रोः के
शवं शिरसि न्यसेत् ॥ नारायणं न्यसेद्वक्त्रे ग्रीवायां माधवं न्यसेत् ॥३०॥ गोविंदं भुजयोर्न्यस्य विष्णुं च हृदये न्यसेत् ॥ म
धुसूदनकं पृष्ठे वामनं जठरे न्यसेत् ॥३१॥ कट्यां त्रिविक्रमं न्यस्य जंघायां श्रीधरं न्यसेत् ॥ हृषीकेशं दक्षिणायां पद्मना
भं च गुल्फयोः ॥३२॥ दामोदरं पादयोश्च चक्रपाणिं षडंगके ॥ एतत्साधारणं प्रोक्तमादिमूर्तेर्मुनिसत्तम ॥३३॥ अथवा
यस्य देवस्य प्रारब्धं स्थापनं भवेत् ॥ तस्यैव मूलमंत्रेण सजीवकरणं भवेत् ॥३४॥ यस्या मूर्तेस्तु यन्नाम तस्याद्यं चाक्ष
रं च यत् ॥ तस्सुरैर्वादिरेफैर्वे ह्यंगानि परिकल्पयेत् ॥३५॥ हृदयादीनि देवेश मूलं च दशमाक्षरं ॥ यथा देवे तथा
देहे तत्त्वानि विनियोजयेत् ॥३६॥ चक्राब्जं मंडले विष्णुं यजेद्गंधादिना ततः ॥ पूर्ववच्चासने ध्यायेत्सगात्रं सपरिच्छ
दं ॥३७॥ अग्ने चक्रं द्वादशारं तत्परिशुद्धि चिंतयेत् ॥ पूजयेद्द्वारकाग्रेष्टं सूर्यं द्वादशधा पुनः ॥३८॥ कलाषोडश
संयुक्तं सोमं तत्र विचिंतयेत् ॥ सवनत्रितयं नाभौ सवितुर्दशकोत्तमः ॥ पद्मं च द्वादशदलं पद्ममध्ये विचिं
तयेत् ॥ तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्चेद्देशिकः ॥३९॥ प्रतिमायां हरिं न्यस्य तत्र संपूजयेत्सुरान् ॥ गंधपुष्पादि
भिः सम्यक् सांगं सावरणं क्रमात् ॥४०॥ द्वादशाक्षरबीजैस्तु केशवादीन्समर्चयेत् ॥ द्वादशारे मंडले तु लोकपा

लादिकं क्रमात् ॥४२॥ प्रतिमामर्चयेत्पश्चात् गंधपुष्पादिभिः द्विज ॥ पौरुषेण तु सूक्तेन श्रियाः सूक्तेन पिंडिकां ॥ जन
नादिक्रमात् पश्चाज्ज्वलयेद्वैष्णवानलं ॥ हुत्वाग्निं वैष्णवैः मंत्रैः कुर्याच्छांत्युदकं बुधः ॥४३॥ ततः सिक्त्वा प्रतिमा मूर्द्धि
वह्निप्रणयनं चरेत् ॥ दक्षिणेग्निं हुतमिति कुंडेग्निं प्रणयेद्बुधः ॥४४॥ अग्निमग्निं तु पूर्वे तु कुंडेग्निं प्रणयेद्बुधः
उत्तरे प्रणयेदग्निमग्निमग्नी हि धीमहि ॥४५॥ अग्निप्रणयने मंत्र स्वमग्नेत्यभिरुच्यते ॥ पलाशसमिधां तु स
होत्तर सहस्रकं ॥४६॥ कुंडे कुंडे होमयेच्च ब्राह्मीन् वेदादिकैस्तथा ॥ संस्थान्तिलाज्याहुतिभिः मूलमंत्रेण वेष्ट
ते ॥४७॥ कुर्यात्ततः शांतिहोमं मधुरत्रितयेन च ॥ द्वादशार्णैः स्पृशेत्पादौ नाभिं हृन्मस्तकं ततः ॥४८॥ घृतं दधि
पयो हुत्वा स्पृशेन्मूर्द्ध्नि न्यसेत्ततः ॥ स्पृष्ट्वा शिरोनाभिपादांश्चतस्रः स्थापयेच्च गोः ॥४९॥ गंगा च यमुना गोदा क्रमा
नाम्ना सरस्वती ॥ त्वक्स्तोता विष्णुगायत्र्या गायत्र्या श्रपयेच्चरुं ॥५०॥ होमयेच्च बलिं दद्यात् उत्तरे भोजयेत् द्विजान् ॥
मासाधिपानां तुष्ट्यर्थं होमगां गुरवे ददेत् ॥५१॥ दिक्पतिभ्यो बलिं दत्त्वा रात्रौ कुर्याच्च जागरं ॥ ब्रह्मगीतादिशब्दे
न सर्वभागाधिवासनात् ॥५२॥ ॥ इत्याग्नेये महापुराणे अधिवासनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ श्री
भगवानुवाच ॥ ॥ पिंडिकास्थापनार्थं तु गर्भागारं तु सप्तधा ॥ विभजेद्ब्रह्मभागे तु प्रतिमां स्थापयेद्बुधः ॥१॥
देवमानुषपैशाचं भागेषु न कदाचन ॥ ब्रह्मभागं परित्यज्य किंचिदाश्रित्य चांऽजां ॥२॥ देवमानुषभागाभ्यां स्था

प्य यत्नात्तु पिंडिकां ॥ नपुंसकशिलायां तु रत्नन्यासं समाचरेत् ॥३॥ नारसिंहेन हुत्वा च रत्नन्यासं च तेन वै ॥ का
ड़ीन् रत्नानि धातूंश्च लोहान्वै चंडिकादीकान् ॥४॥ पूर्वादि नवगर्तेषु न्यसेन्मध्येपि यास्रुचि ॥ अथ चेंद्रादि
मंत्रैश्च गर्तं गुग्गुलुनावृतं ॥५॥ रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः ॥ समित्वा केर्दर्तुपुंजैः सह दैवैः
समन्वितैः ॥६॥ सवाद्यैतैश्च सह कृत्स्नपंचगव्येन शोधयेत् ॥ प्रोक्षयेद्गंधतोयेन नदीतीर्थोदकेन च ॥७॥ होम
येत्स्थंडिलं कुर्यात्सिकताभिः समं ततः ॥ सार्द्धहस्तप्रमाणं च चतुरस्रं सुशोभनं ॥८॥ अष्टदिक्षु यथान्यायं
कलशानपि विन्यसेत् ॥ पूर्वाद्यानष्टवर्णेन अग्निमानीय संस्कृतं ॥९॥ अष्टांशेनाष्टशतं शायाज्यं पूर्णां प्रदा
पयेत् ॥ शांत्युदकं ताम्रपात्रे मूलेन शतमंत्रितं ॥१०॥ सिंचेद्देवस्य तन्मूर्ध्नि श्रीश्चते दानपान्युत ॥ ब्रह्मपानेन
चाधत्यग्निष्ठ ब्रह्मणस्पते ॥११॥ त्वं विष्णो रिति मंत्रेण प्रासादाभिमुखं नयेत् ॥ शिबिकायां हरिं स्थाप्य भ्र
मरीवपुरादिकं ॥१२॥ गीतवेदादिशब्दैश्च प्रासादद्वारि धारयेत् स्त्रीभिर्विप्रैर्मंगलाष्टघटैः संस्थापयेद्ध
रिं ॥१३॥ ततो गंधादिनाभ्यर्च्य मूलमंत्रेण देशिकः ॥ अतो देवेति वस्त्राद्यैर्मश्शाङ्गाद्यं निवेद्य च ॥१४॥ स्थिरे ल
ग्ने पिंडिकायां देवस्यलेति धारयेत् ॥ ॐ त्रैलोक्यविक्रांताय नमस्ते तु त्रिविक्रम ॥१५॥ संस्थाप्य पिंडिकायां तु
स्थिरं कुर्याद्विचक्षणः ॥ ध्रुवाद्यैरिति मंत्रेण विश्वतश्चक्षुरित्यपि ॥१६॥ पंचगव्येन संस्थाप्य स्नाप्य गंधो

अ०पु० ५९ दकेन च॥ पूजयेत्सकलीकृत्य सांगं साधारणं हरिं॥१७॥ ध्यायेत् खातमुमूर्त्तिस्तु पृथिवी वज्रपीठिका॥ क
ल्पयेद्विग्रहं तस्य तेजसैः परमाणुभिः॥१८॥ जीवमावाहयिष्यामि पंचविंशतितत्वगं॥ चैतन्यं परमानंदं जा
ग्रत्स्वप्नादिवर्जितं॥१९॥ देहेंद्रियमनोबुध्धिप्राणाहंकारवर्जितं॥ ब्रह्मादिस्तंबपर्यंतं हृदयेषु व्यवस्थितं॥
२०॥ हृदयात्प्रतिमाबिंबे स्थिरो भव परेश्वर॥ सजीवं कुरु बिंबं त्वं सबाह्याभ्यंतरेस्थित॥२१॥ अंगुष्ठ
मात्रपुरुषो देहोपाधिषु संस्थितः॥ ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकं॥२२॥ सजीवीकरणं कृत्वा प्र
णवेनाद्वितीयकं॥ सांनिध्यकरणं नाम हृदयेस्मत्स्यपुंवै जपेत्॥२३॥ सूक्तं तु पौरुषं ध्यायेत् इदं गुह्यं मनुं न
येत्॥ नमस्तेस्तु सुरेशाय संतोषविभवात्मने॥२४॥ ज्ञानविज्ञानरूपाय ब्रह्मतेजोनुपायिने॥ गुणातिक्रांतवे
द्याय पुरुषाय महात्मने॥२५॥ अक्षयाय पुराणाय विष्णवे संहितो भव॥ यच्च ते परमं तत्वं यच्च ज्ञानम
यं वपुः॥२६॥ तत्सर्वमेकतो लीनमस्मिन्देहे विबुध्यतां॥ आत्मानं संनिधिं कृत्य ब्रह्मादीपरिवारकान्॥२७
स्वनाम्ना स्थापयेदन्यानायुधादीन्समुद्रया॥ यात्रावर्षादिकं दृष्ट्वा तेषु संनिहितो हरिः॥२८॥ अग्निमं राम०
डपमासाद्य गुरुडं स्थाप्य पूजयेत्॥ दिग्गीशान् दिग्गीदेवांश्च स्थाप्य संपूज्य देशिकः॥३०॥ विष्वक्सेनं तु संस्था ६१
प्य शंखचक्रादि पूजयेत्॥ सर्वपार्षदकेभ्यश्च भूतेभ्यो बलिमर्पयेत्॥३१॥ ग्रामवस्त्रसुवर्णादि गुरवे दक्षिणां

ददेत्॥ योगापयोगीन्द्व्याघमाचायपि नरोर्पयेत्॥३२॥ आचार्यदक्षिणार्धं तु ऋत्विग्भ्यो दक्षिणां ददेत्॥
अन्येभ्यो दक्षिणां दद्यात् भोजयेद्ब्राह्मणांस्ततः॥३३॥ अवारितान्नफलं दद्यात् यजमानाय वै गुरुः॥ विष्णुं न
येत्प्रतिष्ठा कृत्वा आत्मना सकलं कुलं॥३४॥ सर्वेषामेव देवानामेष साधारणो विधिः॥ मूलमंत्राः पृथक्
तेषां शेषं कुर्यात्समानकं॥३५॥ ॥इत्याग्नेये वासुदेवादिप्रतिष्ठा नामाष्टचत्वारिंशोऽध्यायः॥४८॥ ॥श्री
भगवानुवाच॥ ॥ वक्ष्ये चावभृतस्नानं विष्णोर्लुकिति होमयेत्॥ एकाशीतिपदे कुंभान् स्थाप्य संस्नापयेद्धु
रिं॥ पूजयेद्गंधपुष्पाद्यैर्बलिं दत्वा गुरुं यजेत्॥ द्वारप्रतिष्ठां वक्ष्यामि द्वाररोहे मवैददेत्॥१॥ अष्टभिः कलशैः
स्नाप्यन्यग्रोदुंबरको गुरुः॥ गंधादिभिः समभ्यर्च्च्य मंत्रैर्वेदादिभिर्गुरुः॥२॥ कुंडेषु होमयेद्वह्निं समिद्धा
ज्यतिलादिभिः॥ दत्वा शय्यादिकं हुत्वा दद्याद्वाधारशक्तिकां॥३॥ एरखापाविन्यसेन्मूले देवे चंडप्रचंडको
ऊर्ध्वोदुंबरको देवीं लक्ष्मीं सुरगणार्चितां॥४॥ यस्याभ्यर्च्चय धान्यायं श्रीसूक्तेन चतुर्मुखे॥ हुत्वा तु श्रीफ
लादीनि आचार्यादिषु दक्षिणे॥५॥ प्रतिष्ठासिद्धद्वारस्य आचार्यः स्थापयेद्धरिं॥ प्रासादस्य प्रतिष्ठां तु तत्स्थ
तिष्ठेत्तु तां शृणु॥६॥ समाप्ते शुकनासायां वेद्याः प्राग्गर्भमस्तके॥ सौवर्णं राजतं कुंभं अथवाश्रकनिर्मलं॥
७॥ अहरात्रौषधीनां तु बीजरोहान्वितं शुभं॥ सर्वरत्नं प्रजितं चाभिमंडले चाधिवासयेत्॥८॥ सपल्लवं नसिं

हेनहुत्वासंपातसंचितं।।नारायणात्मतत्वेनआपूर्णंतंन्यसेत्ततः।।९।।वैराजरूपंतंध्यायेत्प्रासादस्य
सुरेश्वरः।।ततःपुरुषवत्सर्वंप्रासादंचिंतयेद्बुधः।।१०।।अधोदत्वासुवर्णंतुतत्कुंभंतंघटंन्यसेत्।।गुर्वादौ
दक्षिणांदद्याद्ब्राह्मणादेश्चभोजनं।।११।।ततःपश्चाद्धृदिबंधंतदूर्ध्वंकंठबंधनं।।कंठोपरिष्टात्कर्त्तव्यंविम
लामलसारकं।।१२।।तदूर्ध्वंचूलकंकुर्यात्चक्रंवाथसुदर्शनं।।मूर्तिर्वादेवदेवस्यगृहगुप्तांनिवेदयेत्।।
१३।।कलशंवाप्यकुर्वीततदूर्ध्वंचक्रमुत्तमं।।वेद्याश्चपरितस्थाप्याअष्टौविद्येश्वरास्त्वजः।।१४।।चतुरोवात्व
थदिक्षुस्थापनीयागरुत्मताः।।ध्वजारोहंप्रवक्ष्यामियेनभूतादिनश्यति।।१५।।प्रासादबिंबद्रव्याणांयाव
तःपरमाणवः।।तावद्वर्षसहस्राणितत्कर्ताविष्णुलोकभाक्।।१६।।कुंभांडवेदीविद्यानांभ्रमणाद्वायुनानघ
।।कंठवस्त्रावेष्टनेतेयंफलंकोटिगुणंध्वजात्।।१७।।पताकांप्रकृतिंविद्धिदंडंपुरुषरूपिणं।।प्रासादंवासुदेवस्य
मूर्तिभूतंनिबोधमे।।१८।।धरणींवारणींविद्धिआकाशंसुषिरात्मकं।।तेजस्तत्पावकंविद्धिवायुस्पर्शगतंतथा।।
१९।।पाषाणादिष्वेवजलंपार्थिवंपृथिवीगुणं।।प्रतिशब्दोद्भवंशब्दंस्पर्शःस्यात्कर्कशादिकं।।२०।।शुक्ला
दिकंभवेद्रूपंरसमन्नादिदर्शनं।।धूपादिगंधंगंधस्तुवाग्भेर्यादिषुसंस्थितं।।२१।।शुकनासाश्रितानासा रा.म. ६२
बाहूतद्रथकौस्मृतौ।।शिरस्त्वंडंनिगदितंकलशंमूर्धजंस्मृतं।।२२।।कंठंकंठमितिज्ञेयंस्कंधंवेदीनिगद्यते।।

मुखंद्वारंभवेदस्यप्रतिमाजीवउच्यते।।२३।।तच्छक्तिंपिंडिकांविद्धिप्रकृतिंचतथाकृतिं।।निश्चलत्वंचगर्भोस्या
स्त्वाधिष्ठातृकेशवः।।२४।।एवमेषहरिःसाक्षात्प्रासादत्वेनसंस्थितः।।जंघातस्यशिरोज्ञेयःस्कंधेधाताम
वस्थितः।।२५।।ऊर्ध्वभागेस्थितोविष्णुरेवंतस्यस्थितस्यहि।।प्रासादस्यप्रतिष्ठांतुध्वजरूपेणमेशृणु।।२६।।
ध्वजंकृत्वासुरैर्दैत्याजिताःशस्त्रादिचिह्नितं।।अंडोर्ध्वंकलशंतद्वत्तदूर्ध्वंविन्यसेद्ध्वजं।।२७।।बिंबार्धमानंवक्रं
तुत्रिभागेनापिकारयेत्।।अष्टारंद्वादशारंवामध्येमूर्तिसमन्वितं।।२८।।नारसिंहेनतार्क्ष्येणध्वजदंडस्तु
निर्व्रणः।।प्रासादस्यतुविस्तारोमानंदंडस्यकीर्तितं।।२९।।शिखरार्धेनवाकुर्यात्तृतीयेनाथवापुनः।।द्वार
स्यदीर्घाद्विगुणंदंडंवापरिकल्पयेत्।।३०।।ध्वजयष्टिर्देवगृहेईशान्यांवायवेथवा।।क्षौमाद्यैश्चध्वजंकुर्या
द्विचित्रंचैकवर्णकं।।३१।।घंटाचामरकिंकिण्याभूषितंपापनाशनं।।दंडाग्राद्धरणींयावद्धस्तैकंविस्तरेणु
तु।।३२।।महाध्वजःसर्वदःस्यात्तुपंचाशद्धीनतोर्चितः।।ध्वजेचार्धेनविज्ञेयापताकामानवर्जिता।।३३।।विस्ता
रेणध्वजाकार्याविंशदंगुलसंमितः।।अधिवासविधानेनचक्रंदंडंध्वजंतथा।।३४।।देववत्सकलंकृत्वाम
ध्येस्नपनादिकं।।नेत्रोन्मीलनकंत्यक्त्वापूर्वोक्तंसर्वमाचरेत्।।३५।।अधिवासयेद्विधिनाशय्यायांस्थाप्य
देशिकः।।ततःसहस्रशीर्षेतिसूक्तंचक्रेन्यसेद्बुधः।।३६।।तथासुदर्शनंमंत्रंमनस्तत्वंनिवेशयेत्।।मनोरू

पेण तस्मै वै सञ्जीवकरणं स्मृतं ॥३७॥ अरेषु मूर्त्तयो न्यस्याः केन्द्रा वाद्याः सुरोत्तमाः ॥ नाभ्यञ्च प्रतिनेमिषु न्यसेत्त
त्वानि देशिकः ॥३८॥ नृसिंहं विश्वरूपं वा चक्रमध्ये निवेशयेत् ॥ चक्रं लिविसेतु कुंडे स्नात्वा तान्न्यस बीजकं ॥४०॥
विष्कलं परमात्मानं ध्वजे ध्यायन्न्यसेद्धरिं ॥ तच्छक्तिं व्यापिनीं ध्यायेत् ध्वजरूपं चलाचलं ॥४१॥ मंडलेस्था
प्य चाभ्यर्च्य होमं कुंडे प्रकारयेत् ॥ कलशे स्वर्णकलशं न्यस्वा रत्नानि पंच च ॥४२॥ स्थापयेच्चक्रमंत्रेण स्व
र्णचक्रमधः स्मृतं ॥ पारदेन तु संस्थाप्य नेत्रपट्टेन छादयेत् ॥४३॥ ततो निवेशयेच्चक्रं तन्मध्ये नृहरिं स्मरेत् ॥
ॐ क्षौं नृसिंहाय नमः पूजयेत् स्थापयेद्धरिं ॥४४॥ ध्वजं गृहीत्वा हस्तेषु यजमानः सबांधवः ॥ दधिभक्तयुते पा
त्रे ध्वजस्याग्रं निवेशयेत् ॥४४॥ ध्रुवाद्येन फट्टं तेन ध्वजमंत्रेण पूजयेत् ॥ शिरस्यादाय तत्पात्रं नारायणमनु
स्मरन् ॥४५॥ प्रदक्षिणं तु कुर्वीत तूर्यमंगलनिःस्वनैः ॥ ततो निवेशयेद्दंडं मंत्रेणाष्टाक्षरेण तु ॥४६॥ वृक्षाम्न
नेन सूक्तेन ध्वजं संचेदिच क्षणः ॥ पातं ध्वजं कुंजरादिद्द्याद्दाचार्यके द्विजः ॥४७॥ एष साधारणः प्रोक्तो ध्व
जस्यारोहणे विधिः ॥ यस्य देवस्य यच्चिह्नं तन्मंत्रेण स्थिरं चरेत् ॥४८॥ स्वर्गत्वा ध्वजदानाहं स्वविराजावनीमवे
त् ॥ ॥ इत्याग्नेये महापुराणे ध्वजारोहणं नामैकोनपंचाशत्तमोऽध्यायः ॥४९॥ ॥ श्रीभगवानुवाच ॥ ॥ समुदाये
न देवीदेः प्रतिष्ठा प्रवदामि ते ॥ लक्ष्म्याः प्रतिष्ठाप्रथमं तथा देवीगणस्य च ॥१॥ पूर्ववत्सकलं कुर्यात् मंडपस्न

पनादिकं ॥ भद्रपीठे श्रियं न्यस्य स्थापयेदष्टवै घटान् ॥२॥ घृतेनाभ्यंज्य मूलेन स्नापयेत्संचगव्यकैः ॥ हिरण्यव
र्णां हरिणीं नेत्रे चोन्मीलयेच्छ्रियाः ॥३॥ तस्मा आवाह इत्येवं प्रदद्यान्मधुरत्रयं ॥ अश्वपूर्वेति पूर्वेण तां कुंभेनाभि
षेचयेत् ॥४॥ कांसोस्मीति तां याम्येन यश्चिमेनाभिषेचयेत् ॥ चाक्षुंप्रभासेमुत्ताय आदित्यवर्णेति चोत्तरा ॥५॥ जुपै
ति मे मित्रा मे यात् क्षुत्पिपासेति नैरुतात् ॥ गंधद्वारेति वायव्यां मनसः काममस्माहृति ॥६॥ ईशानकलशेनैव
श्रीरस्तौचं वकर्दमात् ॥ एकाशीतिघटैः स्नानं मंत्रेणापः सृजेत् क्षितिं ॥७॥ आर्द्रां पुष्करणीं गंधैः राजमित्यादिपु
ष्पकैः ॥ तस्मा आवाह वस्त्रेण स आनंदेति चाखिलं ॥ श्रीयंति येन सर्प्यायां श्रीसूक्तेन च संनिधिं ॥ लक्ष्मीबीजे
न पूछक्तिं विनस्यास्यार्चयेत्तु नः ॥९॥ श्रीसूक्तेन मंडले यकुंडे पद्मानि होमयेत् ॥ करवीराणि वा कृलास
हस्रशतमेव च ॥१०॥ गृहोपकरणं तादृक् श्रीसूक्तेन च चार्चयेत् ॥ ततः प्रासादसंस्कारं संवह्नित्वा तु पूर्ववि
त ॥११॥ मात्रर्थे पिंडिकां कृत्वा प्रतिष्ठा स्थापनं श्रियाः ॥ श्रीसूक्तेन सांनिध्यं पूर्ववत्सघृतं यजेत् ॥१२॥ चिच्छक्तिं
रोधयित्वा तु मूलेनानु सांनिध्यकं चरेत् ॥ भूस्वर्णवस्त्रगोन्नादि गुरवे ब्राह्मणेर्पयेत् ॥१३॥ ततः प्रासादसंस्कारं स
वं कृत्वा तु पूर्ववत् ॥ एवं देव्याखिलास्थाप्य राज्यस्वर्गादिमावपेत् ॥१४॥ ॥ इत्याग्नेये महापुराणे श्रीस्थापनं पंच
शत्तमोऽध्यायः ॥५०॥ ॥ भगवानुवाच ॥ ॥ एवं तार्क्ष्यस्य चक्रस्य ब्रह्मणो नरहरेस्तथा ॥ प्रतिष्ठा विष्णुवत्कार्या

स्वस्वमंत्रेण तां शृणु ॥ १ ॥ सुदर्शन महाचक्रराज आवाण शांत दुष्टभयंकर छिंधि छिंधि भिंधि भिंधि विदारय विदा
रय परमंत्रान् ग्रस ग्रस भक्षय भक्षय भूतान् त्रासय हूं फट् सुदर्शनाय नमः ॥ अभ्यर्च्य चक्रं चानेन रणे दारयते रि
पून् ॥ ॐ क्षौं नरसिंह उग्ररूप ज्वल २ प्रज्वल २ स्वाहा ॥ नरसिंहस्य मंत्रोयं पातालाक्षस्य वच्मि ते ॥ ॐ क्षौं नमो भ
गवते नरसिंहाय प्रदीप्तसूर्यकोटिसहस्रसमतेजसे वज्रनखदंष्ट्रायुधाय स्फुटविकर्णकेशरसटाप्रक्षुभि
तमहार्णवांभोदुंदुभिनिर्घोषाय सर्वमंत्रोत्तारणाय एह्येहि भगवन्नरसिंह पुरुष परापर ब्रह्म सत्येन स्फुर
स्फुर विक्रम आक्रम आक्रम गर्ज गर्ज मुंच सिंहनादान् विदारय २ आविश २ सर्वयंत्ररूपाणि यंत्रजातयश्छिंद
न २ छिंद २ संक्षिप २ दर २ दारय २ स्फुट २ स्फोटय २ ज्वालामालासंघातमय सर्वतो अनंतज्वालावज्राशनिचक्रेण स
र्वपातालानुत्सादय २ सर्वतोनंतज्वालावज्रशरपंजरेण सर्वपातालान्परिवारय २ सर्वपातालासुरवासिनां
हृदयान्याकर्षय २ शीघ्रं दह २ पच २ मथ २ शोषय २ निकृंतय २ तावद्यावन्मे वशमागताः पातालेभ्यः फट् यंत्र
रूपेभ्यः फट् मंत्रजातिभ्यः फट् संशयाया त्वा भगवन्नरसिंहरूप विष्णो सर्वापद्भ्यः सर्वमंत्ररूपेभ्यो रक्ष २ हूं फट् न
मोस्तु ते ॥ नरसिंहस्य विद्येयं हरिरूपादिसिद्धिदा ॥ त्रैलोक्यमोहनैर्मंत्रैः स्थाप्यं त्रैलोक्यमोहनः ॥ २ ॥ गदाद्दक्षी
णाग्नि करोद्विभुजो वाथ चतुर्भुजः ॥ वामोर्द्धे कारयेच्चक्रं पांचजन्यमधोक्षज ॥ ३ ॥ श्रीपुष्टिसंयुतं कुर्यात्तद्वनेन सह

भद्रया ॥ प्रासादे स्थापयेद्विष्णुं गृहे वा मंडपेपि वा ॥ ४ ॥ वामनं चैव वैकुंठं हयास्यमनिरुद्धकं ॥ स्थापयेज्जलशाय्यं धर्मंमत्स्या
दिं श्चावतारकान् ॥ ५ ॥ संकर्षणं विश्वरूपं लिंगं वै रुद्रमूर्त्तिकां ॥ अर्धनारीश्वरं तद्वत् हरिशंकर मातृकाः ॥ ६ ॥ भैरवं च
तथा सूर्यं ग्रहान् स्थापयेद्विनायकं ॥ गौरीमिंद्रादिकाल्लेख्यांश्चित्रजांश्च बलावलं ॥ ७ ॥ पुस्तकानां प्रतिष्ठां च वक्ष्ये लिखन
तद्विधिं ॥ स्वस्तिके मंडलेभ्यर्च्य शर यंत्रासनस्थितां ॥ ८ ॥ लेख्यं च लिखितं पुस्तं गुरुं चैवोर्द्धहरिं यजेत् ॥ पूजमानो गुरु
र्ध्यात् हरेर्लिपिकृतं नरं ॥ ९ ॥ प्राङ्मुखः पद्मिनीध्यायन्नलिखेन्नाश्लोकपंचकं ॥ रौप्यस्थमष्याहैम्या च लेखन्या नाग
राक्षरं ॥ ब्राह्मणान्भोजयेच्छक्त्या शक्त्या दद्याच्च दक्षिणां ॥ गुरुं विद्यां हरिं प्रार्च्य पुराणादि लिखेन्नरः ॥ ११ ॥ पूर्ववृ
न्मंडपाद्ये च ऐशान्यां भद्रपीठके ॥ दर्पणे पुस्तकं दृष्ट्वा सिंचयेत्पूर्ववत् घटैः ॥ १२ ॥ नेत्रोन्मीलनकं कृत्वा शय्या
यां तन्यसेन्नरः ॥ न्यसेत्तु पौरुषं सूक्तं वेदाद्यं तत्र पुस्तके ॥ १३ ॥ कृत्वा सजीवकरणं मांर्च्य हुत्वा चरुं ततः ॥ संप्रा
प्य दक्षिणाभिः प्रवरादीन् भोजयेत् द्विजान् ॥ १४ ॥ रथेन हस्तिना वापि भ्रामयेत्पुस्तकं नरैः ॥ गृहे देवालया
दौ तु पुस्तकं स्थाप्य पूजयेत् ॥ १४ ॥ वस्त्रादिवेष्टितं पाठादादावंते सदार्चयेत् ॥ जगच्छांत्यै चाव धार्य पुस्तकं वाचयेन्न
रः ॥ १५ ॥ वस्त्रादिवेष्टितं पाठादादावंते सदार्चयेत् ॥ जगच्छांत्यै चाव धार्य पुस्तकं वाचयेन्नरः ॥ १६ ॥ अध्यायमे
कं कुर्यात्प्रिपूजमानादि सेचयेत् ॥ द्विजाय पुस्तकं दत्वा फलसंख्या तो न विद्यते ॥ १७ ॥ त्रीण्याहुरतिदानानि गावः पृ

अ०पु. ६५

ष्विसरस्वती॥ विद्यादानफलंदत्वामत्स्यादिपत्रसंचयं॥१८॥ यावत्कृत्स्नत्रसंख्यानमक्षराणांतथानघा॥ तावद्वर्षस
हस्राणिविष्णुलोकेमहीयते॥१९॥ पंचरात्रंपुराणानिभारतादिददद्धरिः॥ कुलैकविंशमुद्धृत्यपरेतत्वेतुलीयते॥२०॥
इत्याग्नेयेमहापुराणेदेवादिप्रतिष्ठानामैकपंचाशततमोऽध्यायः॥५१॥ ॥श्रीभगवानुवाच॥ ॥कूपवापितडागानां
प्रतिष्ठांवच्मितांशृणु॥ जलरूपेणहिहरिःसोमोवरुणउत्तमः॥१॥ अग्निसोममयंविश्वंविष्णुरापस्तुकारणं॥ है
मंरूप्यंरत्नजंवावरुणंकारयेन्नरः॥२॥ द्विभुजंहंसपृष्ठस्थंदक्षिणेनाभयप्रदं॥ वामेननागपाशंतुनदीनागादि
संयुतं॥३॥ यागमंडपमध्येस्यात्वेदिकाकुंडमंडितं॥ तोरणंवारुणंकुंभंन्यसेच्चकरकान्वितं॥४॥ भद्रकेचा
र्द्धचंद्रेवास्वस्तिकेद्वारकुंभकान्॥ अग्न्याधानंवाप्यकुंडेकृत्वापूर्णांप्रदापयेत्॥५॥ वरुणंस्नानपीठेतुयेतेशातेति
संस्पृशेत्॥ घृतेनाभ्यंजयेत्पश्चात्तन्मूलमंत्रेणदेशिकः॥६॥ शन्नोदेवीतिप्रक्षाल्यशुद्धवत्यादिवोदकैः॥ अधिवा
सयेदष्टकुंभान्सामुद्रंपूर्वकुंभके॥७॥ गांगमग्नौवर्षातोयंदक्षेरक्षेत्स्वनैऋतं॥ नदीतोयंपश्चिमेतुवायव्येतु
नदोदकं॥८॥ उद्भिज्जंचोत्तरेस्थाप्यऐशान्यांतीर्थसंभवं॥ अलाभेतुनदीक्षेदंयासांराज्ञेतिमंत्रयेत्॥९॥ ने राम. ६५
त्रेचोन्मीलयेद्दिव्यंतच्चक्षुर्मधुरत्रयैः॥ ज्योतिःसंपश्ययजयेद्देशपासुरवेगामध्यार्प्पयेत्॥१०॥ समुद्रज्येष्ठेतिसिंचेत्तंव
रुणंपूर्वकुंभतः॥ समुद्रंगच्छगांगेयात्सोमोधेन्वेतिवर्षकात्॥११॥ देवीरापोनिर्झराद्भिःनदाद्भिःपंचनद्य

तः॥ उद्भिदाद्यश्चोद्भिदेनपावमान्याचतीर्थकैः॥१२॥ आपोहिष्ठापंचगव्याद्धिरण्यवर्णेतिस्वर्णजात्॥ आपोहि
ष्ठेतिवर्षोत्थैर्व्याहृत्याहृयसंभवैः॥१३॥ वरुणंचोत्तडागोत्थैर्वरुणाभिस्तुवाप्यतः॥ आपोदेवीतिनिरजोरे
काशीतिघटैस्ततः॥१४॥ स्नापयेद्वरुणस्येतित्वन्नोवरुणचार्घकं॥ वरुणेतिपवित्रंतुप्रणवेनोत्तरीयकं॥१५॥
सद्वारुण्येनपुष्पादिप्रदद्याद्वरुणायतु॥ चामरंदर्पणंछत्रंव्यंजनंवैजयंतिकां॥१६॥ मूलेनोत्तिष्ठसंस्था
प्यतांरात्रिमधिवासयेत्॥ वरुणंचेतिसान्निध्यंसद्वारुण्येनपूजयेत्॥१७॥ सजीवकरणंमूलात्पुन
र्गंधादिनायजेत्॥ मंडलेपूर्ववत्प्राच्यकुंडेतुसमिधादिकं॥१८॥ वेदादिमंत्रैर्गंधाद्याश्चतस्रोधेनवो
दुहेत्॥ दिक्षुघोरेयवच्चरुंततःसंस्थाप्यहोमयेत्॥१९॥ व्याहृत्यावाप्यगायत्र्यामूलेनोषन्मयेत्तथा॥ सू
र्यायप्रजापतयेद्यौस्वाहांताचांतकचिक्षिकः॥२०॥ तस्मैष्टयिव्याहृत्यैश्चहस्वहरयेततः॥ इहरत्येवेइमांता
अग्नीमीष्टश्चरौहकः॥२१॥ विष्णुश्चवरुणोमाताराय स्पोषोमहेंद्रकः॥ अग्निर्यमोनैऋतोयंवरुणोवायुरेवच॥
२२॥ कुवेरईशानंतोपब्रह्माराजाजनेश्वरः॥ तस्मैस्वाहेदंविष्णुश्चतद्विप्रासेतिहोमयेत्॥२३॥ सोमोधेन्वेतिय
रुत्ताइमंमेतिचहोमयेत्॥ सोमेधेन्वेतियरुत्ताइमंमेतिचहोमयेत्॥२४॥ आपोहिष्ठेतितिसृभिःइमारुद्रेति
होमयेत्॥ दशदिक्षुबलिंदद्यात्गंधपुष्पादिनार्चयेत्॥२५॥ प्रतिमांतुसमुत्थाप्यमंडलेविन्यसेद्बुधः॥ पज

अ०पु०
६६

यजेद्गंधपुष्पाद्यैर्हेमपुष्पादिभिः क्रमात्॥२५॥जलाशयांस्तु दिग्भागे वितस्तिद्वयसंमितान्॥कृत्वा प्रोक्ष्य स्थंडिले प्रेष्या
त्सैकतान्देशिकोत्तमः॥२६॥वरुणस्येति मंत्रेण आज्यमष्टशतं ततः॥चरुं पक्वमयं हुत्वा शांतितोयं समाहरेत्॥२७
सिंचयेन्मूर्ध्नि देवस्य सजीवीकरणं चरेत्॥ध्यायेत्तं वरुणं युक्तं गौर्यानदनदीगणैः॥२८॥ॐ वरुणाय नमोऽभ्यर्च्यत
तः सांनिध्यमाचरेत्॥उत्थाप्य नागपृष्ठाद्यैर्भ्रामयेत्त्रिषु मंगलैः॥२९॥आपो हि ष्ठेति च क्षेपात्त्रिमध्वाक्तघटे जले।
जलाशये मध्यगतं सुप्तं विनिवेशयेत्॥३०॥स्नात्वा ध्यायेच्च वरुणं सृष्टिं ब्रह्मांडसंज्ञिकीं॥अग्निबीजेन संदग्धां तद्भ
स्म प्लावयेदिमां॥३१॥सर्वमापोमयं लोकं ध्यायेत्तत्र जलेश्वरं॥तोयमध्यस्थितं देवं ततो यूपं निवेशयेत्॥३२॥चतु
रस्रमथाष्टास्रं वर्तुलं वा सुवर्णितं॥आराध्य देवतालिंगं दशहस्तं तु कूपके॥३३॥यूपं यज्ञीयवृक्षोत्थं मूले हैमं
फणिं न्यसेत्॥वाप्यां पंचदशाकरं पुष्करिण्यां च विंशकं॥३४॥तडागे पंचविंशाख्यं जलमध्ये निवेशयेत्॥स्था
प्य तद्वेष्टयेद्वस्त्रैर्यूपोपरि पताकिकां॥३५॥तदभ्यर्च्य च गंधाद्यैर्जगच्छांतिं समाचरेत्॥दक्षिणां गुरवे दद्यात्क्ष्मां गो
हेमाज्यपातकं॥३६॥द्विजेभ्यो दक्षिणा देया आगतान्भोजयेत्तथा॥आब्रह्मस्तंबपर्यंता ये केचित्सलिलार्थिनः॥
३७॥ते तृप्तिमुपगच्छंतु तडागस्थेन वारिणा॥तोयमुत्सर्जयेद्देवं पंचगव्यं विनिक्षिपेत्॥३८॥आपो हि ष्ठेति तिसृभिः
शांतितोयं द्विजैः कृतं॥तीर्थतोयं क्षिपेत्पुण्यं गोकुलं पाययेद्द्विजान्॥३९॥अनिवारितमन्नाद्यं सर्वजन्यं च

राम
६६

२

कारयेत्॥अश्वमेधसहस्राणां सहस्रं यः समाचरेत्॥४०॥एकाहं स्थापयेत्तोयं तत्पुण्यमयुतायुतं॥विमाने मो
दते स्वर्गे नरकं न स गच्छति॥४१॥गवादि पिबते यस्मात्तस्मात्कर्तुर्न पातकं॥तोयदानात्सर्वदानफलं प्राप्य दि
वं व्रजेत्॥४२॥आग्नेये महापुराणे वापिकूपतडागप्रतिष्ठा नाम द्विपंचाशत्तमोऽध्यायः॥५२॥श्रीभगवा
नुवाच॥सभायाः स्थापनं वक्ष्ये तथैतेषां प्रवर्तनं॥भूमौ परिगृहीतायां च वास्तुयागं समाचरेत्॥१॥स्वेच्छया
तु सभां कृत्वा स्वेच्छया स्थापयेत्सुरान्॥एकं तत्स्थापयेद्ग्रामादौ न शून्यां कारयेत्सभां॥२॥निर्मलं कुलमुद्धृत्य
कर्ता स्वर्गेति मोदते॥अनेन विधिना कुर्यात्सप्तभौमं हरेर्गृहं॥३॥यथा राज्ञां तथान्येषां पूर्वद्वाराश्च ध्वजादयः॥
कोणगान्वर्जयित्वा तु चतुःशालं तु वर्जयेत्॥४॥त्रिशालं वा द्विशालं वा एकशालमथापि वा॥व्ययाधिकं न
कुर्वीत व्ययदोषकरं हि तत्॥५॥आयाधिके भवेत्पीडा तस्मात्कुर्यात्समं द्वयं॥करराशिं समस्तं तु कुर्यात्सु
गुणं गुरुः॥६॥सप्तार्चिषाहृते भागे रक्षविद्या विचक्षणः॥अष्टधा भाजिते तस्मिन्यच्छेषं स व्ययो गतः॥७॥
अथवा करराशिं तु हन्यात्सप्तार्चिषा बुधः॥वसुभिः संहृते भागे ध्वजादि परिकल्पयेत्॥८॥त्रिशालकत्रयं श
स्तमुदक्पूर्वविवर्जितं॥याम्यापरगृहापेतं द्विशालं शस्यते सदा॥९॥याम्ये शालैकशालं तु प्रत्यक्शालमथा
पि वा॥एकशालद्वयं शस्तं शेषास्तत्त्वे भयावहाः॥१०॥चतुःशालं सदा शस्तं सर्वदोषविवर्जितं॥याम्यभौमा

अ०पु०
६७

कुर्वीत भवने सप्तभौमकं ॥ ११ ॥ द्वारवेधादिरहितं पुराणे न च वर्जितं ॥ देवस्य हं देवतायाः प्रतिष्ठा विधिना स
दा ॥ १२ ॥ संस्थाप्य मनुजानां च सप्तदायोक्तकर्मणा ॥ प्रातः सर्वौषधी स्नानं कृत्वा गुरुरतंद्रितः ॥ १३ ॥ मधुरैस्तु द्वि
जान् भोज्य पूर्णकुंभादिशोभितं ॥ स्वतोरणं स्वस्ति वाच्य द्विजानगीः एह हस्तकः ॥ १४ ॥ गृहीत्वा गृहं प्रवेशे च देवता
न् आर्च्य संविशेत् ॥ गृहे पुष्टिकरं मंत्रं पठेत् क्षेमं समाहिता ॥ १५ ॥ नंदे नंद पत्नीशे च वसुभिः प्रजया सह ॥ जये भार्गव दा
यादे प्रजानां विजयावह ॥ पूर्णे गिरस दायादे पूर्णकामं कुरुष्व मां ॥ भद्रे काश्यप दायादे कुरु भद्रां मतिर्मम ॥ १६ ॥
सर्वबीजौषधी युक्ते सर्वरत्नौषधी वृते ॥ रुचिरे नंदने नंदे वासिष्ठे रम्यतामिह ॥ १७ ॥ प्रजापति सुते देवि चतुरस्रे म
हीयसे ॥ सुभगे सुव्रते देवि गृहे काश्यपि रम्यतां ॥ १८ ॥ पूजिते परमाचार्यैर्गंधमाल्यैरलंकृते ॥ भवभूतिकरी
देवी गृहे भार्गवि रम्यतां ॥ १९ ॥ अव्यक्ते व्याकृते पूर्णे मुने रंगिरसः क्रमात् ॥ इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां काम
याम्यहं ॥ २० ॥ देशस्वामि पुरस्वामि गृहस्वामि परिग्रहे ॥ मनुष्य धन हस्त्यश्व पशु वृद्धिकरी भव ॥ २१ ॥ ॥ इत्याग्ने
ये महापुराणे सभाग्रह स्थापनं नाम त्रिपंचाशत्तमो ऽध्यायः ॥ ५३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ सप्तदाय प्रतिष्ठां
च वक्ष्ये साधारणं देववत् ॥ आदित्या वसवो रुद्राः साध्या विश्वेऽश्विनौ तथा ॥ १ ॥ ऋषयश्च तथा सर्वे वक्ष्ये तेषां विशेषकं ॥
यस्य देवस्य यन्नाम तस्याद्यं ग्रह भास्करं ॥ २ ॥ मात्राभिर्भेदयित्वा तु दीर्घाण्यंगानि कल्पयेत् ॥ प्रथमं कल्पयेद्बीजं

राम०
६७

सबिंदु प्रणवं गतिं ॥ ३ ॥ सर्वेषां मूलमंत्रेण पूजनं स्थापनं तथा ॥ नियमं तत्र कृच्छ्राणां संगमं संक्रमं क्रमेनां ॥ ४ ॥
मासोपवासं द्वादश्यां इत्यादि स्थापने वदेत् ॥ त्रिलौहं पूर्णघटं कांश्यं संभारं स्थापयेत्ततः ॥ ५ ॥ ब्रह्मकूर्चे समाह
त्य श्रपेद्यावमयं चरुं ॥ क्षीरेण कपिलायास्तु तं विद्वानिति साधकः ॥ ६ ॥ प्रणवेनाभिघार्यैव दर्व्यासंघट्टयेत्ततः ॥
साधयित्वावतार्याथ विष्णुमभ्यर्च्य होमयेत् ॥ ७ ॥ व्याहृत्या चैव गायत्र्या तद्विप्रासेति होमयेत् ॥ विश्वतश्चक्षुर्भि
दा द्यौ भूरग्रये तथैव च ॥ सप्ताय प्रजापतये च अंतरीक्षतद्धोमयेत् ॥ द्यौः स्वाहा ब्रह्मणे स्वाहा पृथ्वी महाराजकः ॥
तस्मै सोमं च राजे वै इन्द्राद्यैर्होममाचरेत् ॥ ८ ॥ एवं दत्वा चरोर्भागान् दद्याद्दिग्बलिमादरात् ॥ समिधा नामष्टातं कृत्वा
पालाशानां तु होमकं ॥ ९ ॥ कुर्यात्पुरुषसूक्तेन इरावतीति चाष्टकं ॥ हुत्वा तु ब्रह्मविष्णीशादेवानामनुयायिनां ॥
१० ॥ ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः ॥ पर्वतानां नदीनां च समुद्राणां तथाहुतीः ॥ ११ ॥ हुत्वा च म
हती र्दद्यात् स्रुक्त्वा पूर्णाहुतीत्रयं ॥ वौषडंते न मंत्रेण वैष्णवेन पितामहं ॥ १२ ॥ पंचगव्यं चरुं प्राश्य दद्यादाचा
र्यदक्षिणां ॥ तिलपात्रं हेममधुकं सवस्त्रां गामलंकृतां ॥ १३ ॥ प्रीयतां भगवान्विष्णुरित्युत्सृज्येद्व्रतं बुधः ॥ मासो
पवासदेवस्यां प्रतिष्ठां वच्मि पूर्ववत् ॥ १४ ॥ यजेन्नतो प्यदेवेशं श्रपयेत् वैष्णवं चरुं ॥ तिलतंदुलनीवारैः श्यामा
कैरथवा यवैः ॥ १५ ॥ आज्येनाघारघ्यंचित्वा घ्यहोमयेन्मूर्तिमंत्रकैः ॥ विष्ण्वादीनां मासपानां तदंते होमयेत्पु

अ०पु०
६८

नः॥१६॥ ॐ विष्णवे स्वाहा॥ ॐ विष्णवे निभूयाय स्वाहा॥ ॐ नृसिंहाय स्वाहा॥ ॐ पुरुषोत्तमाय स्वाहा॥ द्वादशाश्वत्थ
समिधो होमाय घृतप्लुताः॥ विष्णो रराटमंत्रेण ततो द्वादशचाहुती॥१७॥ इदं विष्णोरराती चरोर्द्वादश आहुतीः॥
हुत्वा चाज्याहुती स्तावत्तद्विप्रासेति होमयेत्॥१८॥ शेषहोमं ततः कृत्वा दद्यात् पूर्णाहुतित्रयं॥ प्रणवेन सुत्राब्धंते
कृत्वा पत्रे तपे म्पले॥१९॥ ततो मासाधिपानां तु विप्रान् द्वादश भोजयेत्॥ त्रयोदश गुरुस्तत्र तेभ्यो दद्यात्त्रयो
दश॥२०॥ कुंभान्नस्वाद्वन्नसंयुक्तान् सच्छत्रोपानहान्वितान्॥ गृहेषु होममेवं तु कृत्वा सर्वं यथाविधि॥२१॥
सुवर्णमाल्यहोमाद्यान् त्रतेपूर्व्वत्र योदश॥ गावः प्रीतिसमायांतु प्रवरं तु प्रहर्षिताः॥ इति गोपथमुत्सृज्य पूर्यंत
त्रनिवेशयेत्॥ दश हस्तं प्रपारामम संक्रमणादिषु॥ पूर्वोक्तेन विधानेन प्रविशेच्च गृहं गृही॥ अनिवारि
तमन्नाद्यैः सर्वेषितेषु कारयेत्॥२२॥ द्विजेभ्यो दक्षिणा देया यथाशक्त्या विचक्षणैः॥ आरामं कारयेद्यस्तु
नंदने पुचिरं वसेत्॥२३॥ मठदानाच्च स्वर्लोके शक्रलोके वसेत्तु यः॥ प्रपादानात्तु वारुणे च संक्रमे च वसेद्दि
वि॥२४॥ इष्टकामेतु कारी च गोलोके मार्गकृद्भवां॥ नियमकृतकृद्विष्णु कृच्छ्रकृत्सर्वपापकाः॥२५॥ गृहं दत्वा
वसेत्स्वर्गे यावदाहूतसंप्लवं॥ समुदायप्रतिष्ठा घाश्रकादीनां महात्मनां॥२६॥ इत्याग्नेये महापुराणे स
मुदायप्रतिष्ठानाम चतुःपंचाशत्तमोऽध्यायः॥५४॥॥ भगवानुवाच॥॥ जीर्णोद्धारविधिं वक्ष्ये भूषितं स्नपयेद्गु

राम
६८

रुः॥ अचलं विन्यसेद्देहे अतिजीर्णं परित्यजेत्॥१॥ संहारविधिना तत्र तत्वान्संहृत्य देशिकः॥ सहस्रं नारसिंहे
न हुत्वा तामुद्धरेद्गुरुः॥२॥ धातुजं रत्नजं वापि अगाधे वा जले बुधो यानमारोप्य तीर्णं पिच्छाद्य वस्त्रादिना नयेत्
॥३॥ वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत्॥ यत्प्रमाणा च यद्द्रव्या तन्मात्रां स्थापयेद्दिने॥४॥ कूपवापितडाग
देर्जीर्णोद्धारे पंच पंचाशत्तमोऽध्यायः॥५५॥॥ श्रीभगवानुवाच॥॥ वक्ष्ये विधिं चोत्सवस्य स्थापिते तु सुरे त॥ त
स्मिन्नब्दे चैकरात्रे त्रिरात्रे चांतराष्टकं॥१॥ उत्सवेन विना यस्मात्स्थापनं निःफलं भवेत्॥ अयने विषुवे चापि शय
स्यानुकूले वा यात्रां देवस्य कारयेत्॥ मंगलांकुरगेपैं सुनृत्यगीतादिवाद्यकैः॥३॥ संवेद्य घटिकापालीस्वंकुरा
रोहणे हिता॥ यवान् शालीन् तिलान्मुद्गान्गोधूमान् सितसर्षपान्॥४॥ कुलत्थमाषनिष्पावान्क्षालयित्वा व
मापयेत्॥ पूर्वादौ च बलिं दद्यात्त्रमन्दी पुः पुरं निशि॥५॥ इंद्रादेः कुमुदादेश्च सर्वभूतेभ्य एव च॥ अनुग
च्छंति ये तत्र प्रतिरूपधराः पुनः॥६॥ पदे पदेऽश्वमेधस्य फलं तेषां न संशयः॥ आगत्य देवतागारं देवं विज्ञापये
द्गुरुः॥७॥ तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरोत्तम॥ तस्यारंभमनुज्ञातुमर्हं सर्वज्ञ सर्वदा॥८॥ देवदेवं तु वि
ज्ञाप्य ततः कर्म समाचरेत्॥ पुरोहघटिकायां तु वेदिकां भूषितां व्रजेत्॥९॥ चतुःस्तंभे तु तन्मध्ये स्वस्तिकां प्रति
मान्यसेत्॥ कर्म्मार्घ्यो लेप्यचित्रेषु स्थाप्य तत्राधिवासयेत्॥१०॥ वैष्णवैः सह कुर्वीत घृतास्यांगं तु मन्त्रतः॥ घृत

धाराभिषेकं वासफलांश्च दरीं बुधः ॥११॥ दर्पणं दर्पनीराजगीतवाद्यैश्च मंडलं ॥ बीजनं पूजनं दीपं गंधपुष्पादिभि
र्यजेत् ॥१२॥ हरिद्राकुंकुमं काश्मीरं श्रीखंडचूर्णानि मूर्द्धनि ॥ प्रतिमायाश्च भक्तानां सर्वतीर्थफलं हि ते ॥१३॥ स्नापयि
त्वा समभ्यर्च्य यात्राबिंबं रथे स्थितं ॥ नयेद्गुरुर्नदीं नादैश्छत्राद्यै राष्ट्रपालिकां ॥१४॥ निम्नगायां जनाद्वा कृतत्र वे
दीं तु कारयेत् ॥ वादनादं कृतार्थैवं तस्यां वेद्यं निवेशयेत् ॥१५॥ चरुं च स्नपयेत्तत्र पायसं होमयेत्ततः ॥ आपो हिष्ठे
पनिषदैः पूजयेदर्घ्यमुरस्तके ॥१६॥ पुनर्देवं समादाय ततो पेक्ष्य चाघमर्षणं ॥ स्नायान्महाजलैर्विप्रैर्वेद्यामुत्थाप
तेन्यसेत् ॥१७॥ पूजयित्वा तदंगं च प्रासादं च नयेत्पुनः ॥ पूजयेत्स्नापकं स्वं तु गुरुः स्याद्भुक्तिमुक्तिकृत ॥१८॥ ॥
आग्नेये महापुराणे देवयात्रोत्सवे षट्पंचाशत्तमोऽध्यायः ॥५६॥ ॥अग्निरुवाच ॥ ॥ ब्रह्मन् शृणु प्रवक्ष्यामि स्ना
पनोत्सवविस्तरं ॥ प्रासादस्याग्रतः कुंभान् मंडपे न्यसेत् ॥१॥ कुर्यात्ध्यानार्चनं होमं हरेरादौ च कर्मसु ॥ सह
स्रं वा शतं वापि होमयेत्पूर्णया सह ॥२॥ स्नानद्रव्याण्युपाहृत्य कलशांश्चाधिविन्यसेत् ॥ अधिवास्य सूत्रकं
ठान् धारयेन्मंडले पुटान् ॥३॥ चतुरस्रं पुरं कृत्वा रुद्रे स्वं प्रविभाजयेत् ॥ मध्ये तु नवकं स्थाप्य पार्श्वपंक्तीः प्रस | राम
र्जयेत् ॥४॥ शालिचूर्णादिना पूर्व्यं पूर्वादिनवकेषु च ॥ कुंभमुद्रां ततो बध्वा घटं तत्र नयेद्बुधः ॥५॥ पुंडरीकाक्ष | ६९
मंत्रेण दर्भान्निःक्षिप्तां तु विसर्जयेत् ॥ अद्भिः पूर्णं सर्वरत्नयुतं मध्ये न्यसेद्घटं ॥६॥ यवव्रीहितिलांश्चैव नीवाराः श्या

मकाः क्रमात् ॥ कुलत्था मुद्गसिद्धार्थास्तिकक्रान पूर्वादिषु च ॥७॥ ऐंद्रे तु नवके मध्ये घृतपूर्णं घटं न्यसेत् ॥
पलाशाश्वत्थन्यग्रोधा बिल्वोदुंबरशीरिणा ॥८॥ जंबूशमीकपित्थानां त्वक्कषायैर्घटाष्टकं ॥ आग्नेये नवके
मध्ये माप्य चूर्णं घटे न्यसेत् ॥९॥ गोशृंगनगगंगासु गजेंद्रदशनेषु च ॥ तीर्थक्षेत्रखुरेषु शोमृत्तिकाश्च घटेन्य
सेत् ॥१०॥ याम्ये तु नवके मध्ये तिलतैलं घटे न्यसेत् ॥ नारंगमप्यजंबीरखर्जूरपूपिकाः क्रमात् ॥ नालिकेरं न्य
सेत्पूर्वं दाडिमं पनसं फलं ॥ नैर्ऋते नवके मध्ये क्षीरपूर्णं घटं न्यसेत् च ॥ वर्षजं हैमतो पंचनैर्झरं गांगमेव च ॥
१३॥ उदकान्यथ वाम मध्ये नवके कदलीजलं ॥ सहदेवं कुमारी च सिंही व्याघ्री तथामृता ॥१४॥ विष्णुपत्नी शत
निर्मां वचा दिव्यौषधीर्न्यसेत् ॥ पूर्वादौ सौम्यनवके मध्ये देवि घटे न्यसेत् ॥१५॥ पत्रमेलात्वचं कुष्ठं बालकं चं
दनद्वयं ॥ लता कस्तुरी कां चैव कृष्णागरुमथ क्रमात् ॥१६॥ सिद्धद्रव्याणि पूर्व्यादौ शांतितो यमथे कृतः ॥ चंद्र
तारं क्रमात् शुल्कं गिरिसारं त्रपुं न्यसेत् ॥१७॥ घोससारं तथा सीसं पूर्वादौ रत्नमेव च ॥ घृतनासत्यचोध्वर्षं स्नप
येन्मूलमंत्रतः ॥१८॥ गंधाद्यैः पूजयेत्पञ्चकोटूलाष्टपूर्णाहुतिं चरेत् ॥ बलिं च सर्वभूतेभ्यो भोजयेद्दत्तदक्षिणः ॥१९॥
देवैश्च मुनिभिर्भूपैर्देवं संस्थाप्य चेश्वरः ॥ बभुवुः स्थापयित्वाथ स्नपनोत्सवकं चरेत् ॥२०॥ अष्टोत्तरसहस्रेणाथ
दानां सर्वभाग्भवेत् ॥ यज्ञावभृथसंस्नाने पूर्णासंस्थापने कृते ॥२१॥ गौरीलक्ष्मीविवाहादि चोत्सवं स्नानपूर्वकं ॥

अ०पु.
७०

इत्याग्नेये महापुराणे यत्तावन्त्यस्नानं नाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ श्रीभगवानुवाच ॥ प्रतिष्ठां पाद
पानां च वक्ष्येहं भुक्तिमुक्तिदां ॥ सर्वौषध्योदकैर्दीप्तान् विशतकविभूषितान् ॥ १ ॥ वृक्षान् माल्यैरलंकृत्य वासोभिः
परिवेष्टयेत् ॥ सूच्या सौवर्णया कार्यं सर्वेषां कर्णवेधनं ॥ २ ॥ हेमशलाकया कार्यं वेद्यान्तु फलसप्तकं ॥ अधिवा
सये च प्रत्येकं कुंभान् बलिं निवेदयेत् ॥ ३ ॥ इंद्रादेरधिवासो यहोमः कार्यो वनस्पते ॥ रुग्यजुः साममंत्रैश्च वारु
णैर्मंत्रैरेवैः ॥ ४ ॥ वृक्षाद्वेदिवकुंभैस्तु स्नपनं द्विजपुंगवाः ॥ तरुणायजमानस्य कुर्याच्च यजमानकः ॥ ५ ॥ भूषि
तो दक्षिणां दद्यात् गोभूभूषणवस्त्रकं ॥ क्षीरेण भोजनं दद्यात् यावद्दिवसचतुष्टयं ॥ ६ ॥ होमस्तिलाज्यैः कार्यस्तु पला
शसमिधस्तथा ॥ आचार्ये द्विगुणं दद्यात् पूर्ववद्दिनचतुष्टयं मंडपादिकं पापनाशः परासिद्धिर्वृक्षारामप्रति
ष्टया ॥ स्कंदाय ये शिवो यथा प्राह प्रतिष्ठाद्यं तथा शृणु ॥ आसूर्येशगणेशाद्याः कन्यादेः परिधारस्य वै हरेः ॥ ॥ इत्या
ग्नेये महापुराणे आरामप्रतिष्ठानाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ईश्वर उवाच ॥ ॥ गणपूजां प्रवक्ष्यामि
निर्विघ्नायाखिलास्पदां ॥ गणाय स्वाहा हृदयमेकदंष्ट्राय वै शिरः ॥ १ ॥ बलुकर्णिने च शिखा गजवक्त्राय च
र्म च ॥ महोदराय च दंडहस्ताया क्षितषं घास्त्रकं ॥ २ ॥ गणो गुरुः पादुका च शक्त्यानंतौ च धर्मकं ॥ मुख्यास्थिमं
डलं चाधश्चौर्ध्वच्छदनमर्चयेत् ॥ ३ ॥ पद्मकर्णिकबीजांश्च ज्वालिनीं नंदयार्चयेत् ॥ सर्वेशा कामरूपा च उ

रो

राम.
७०

दगाकामदा तथा ॥ ४ ॥ सत्या च विघ्ननाशा च आसनं गंधमृत्तिका ॥ यं शोषणं वद हनं न ष्टचो चितया मतं ॥ ५ ॥
अथ गणेश गायत्री ॥ लंबोदराय विद्महे महोदराय धीमहि ॥ तन्नो दंती प्रचोदयात् ॥ ६ ॥ गणपतिर्गणाधि
पो गणेशो गणनायकः ॥ गणवक्त्रो वक्रतुंड एकदंतो महोदरः ॥ ७ ॥ गजवक्त्रो लंबकुक्षिर्विकटो विघ्नना
शकः ॥ धूम्रवर्णो महेंद्राद्याः पूज्या गणपिके स्मृताः ॥ ८ ॥ ॥ इत्याग्नेये महापुराणे विनायकपूजा यामष्टपंचाश
त्तमोऽध्यायः ॥ ५८ ॥ ॥ ईश्वर उवाच ॥ ॥ वक्ष्यामि स्कंद नित्याद्यं स्नानं पूजां प्रतिष्ठया ॥ खात्वा त्रिलां समुद्धृत्य मृद
मष्टांगुलं ततः ॥ १ ॥ सर्वात्मना समाहृत्य प्रत्यहं तेन वर्जयेत् ॥ सरासां पय स्तीरे निधायास्त्रेण शोधयेत् ॥ २ ॥ तृणा
दिशिखयोरुत्य चर्मणा विभजेद्द्विधा ॥ एकया नाभिपादांतं प्रक्षाल्य पुरमस्त्रया ॥ ३ ॥ अस्त्राभिलब्धया लक्ष्मीदी
प्तया सर्वविग्रहं ॥ विरूध्य तस्याक्षपाणिभ्यां प्राणानसंयम्य वारिणि ॥ निमज्यासीनिर्तुद्यं सूत्रं स्मरन् कालानलप्र
भं ॥ मनस्नानं विधायेत्यं समुत्थाय जलांतरात् ॥ ५ ॥ प्रातः संध्यामुपास्याद्य विधिस्नानं समाचरेत् ॥ सारस्वत्या
दितीर्थानामेकमंकुशमुद्रया ॥ ६ ॥ हृदाकृष्य तथा स्वाप्य पुनः संहारमुद्रया ॥ शेषमृद्भागमादाय प्रविश्य
नाभिवारिणी ॥ ७ ॥ सम्यपाणितले कुर्यात् भागत्रयमुदङ्मुखः ॥ अंगे दक्षिणमेकांशं पूर्वमस्त्रेण सप्तधा ॥ ८ ॥
त्रिशेन दशधा वामं स्वं पजेद्भाग त्रयंकमात् ॥ सर्वदिक्षु जपेत्सर्वं हूं फडंतं गवाणुना ॥ १० ॥ कुर्याच्छिवेन सौम्येन शिखा

र्थं कुर्यात् क्रमात् ॥ सर्वांगमंगजप्तेन मूर्धादि चरणावधि ॥११॥ दक्षिणेन समारभ्य पश्चांगचतुष्टयं ॥ पिबाय स्वानि
सर्वाणि पाणमुद्राकरणेन च ॥१२॥ शिवं स्मरंति मज्जेत हरिं गंगेति वा स्मरन् ॥ वौषडंतं गपतं गेनकः कुर्यादभिषे
चनं ॥१३॥ कुंभपात्रेण रक्षार्थं हृदयादौ विक्षिपेज्जलं ॥ स्नात्वा राजोपचारेण सुगंधामलकादिभिः ॥१४॥ स्नात्वा
चोत्तीर्य तत्तीर्थं संहारिण्योपसंहरेत् ॥ अस्नातो विधिवद्बद्धेन संहितामंत्रितेन च ॥१५॥ निवृत्य दिविष्ठ्वेन न
स्नानात्स्नानमाचरेत् ॥ शिरसः पादपर्यंतं फडंतेन गवाननम् ॥१६॥ तेन कृत्वा मतं स्नानं विधिस्नानं समाचरेत् ॥ ऋष
तत्पुरुषाघोर गुह्यकाजातसस्वरैः ॥१७॥ क्रमेणोद्धूलयेन्मूर्ध्नि वक्त्रहृद्गुह्यविग्रहात् ॥ सत्या त्रायनिशीथे च
चर्याप्युर्वाविसानयोः ॥१८॥ सुस्नातुरुषयः पीत्वा हुताभ्यां वृषकादिकं ॥ स्त्रियं न पुंसके शूद्रं विना नशिवमूर्ति
कां ॥१९॥ स्नानमाग्नेयकं स्पृष्ट्वा सुचा वुद्धुतनं चरेत् ॥ सूर्यांशुवर्षसंपर्कैः प्राङ्मुखेनार्द्रबाहुना ॥२०॥ माहेंद्र
स्नानमैशानं कार्यं सम्यक् सदा विधिः ॥ गोसहस्रध्वगः कुर्यात् तत्खुरोत्खातरेणुभिः ॥२१॥ पावनं नूतनं मंत्रेणास्ना
नेत कर्मणाथवा ॥ सद्योजातादिभिर्मंत्रैरस्त्रोभिरभिषेचनं ॥२२॥ मंत्रस्नानेन वेदेवं वारुणाग्नेययोरपि ॥ मन
सा मूलमंत्रेण प्राणायामपुरःसरं ॥२३॥ कुर्वीत मानसं स्नानं सर्वत्र विहितं च यत् ॥ वैष्णवादौ च तन्मंत्रैरेवं
स्नानादि कारयेत् ॥२४॥ संध्याविधिं प्रवक्ष्यामि मंत्रतः ॥ संविक्ष्य त्रिःपिबेदंबु ब्रह्मतीर्थेन संवरैः ॥२५॥ स्वहांते

रात्मतत्त्वाद्यैः स्वतःस्वानिस्पृशेत्तदा ॥ सकलीकरणं कृत्वा प्राणायामेन संस्थितः ॥२६॥ त्रिः समावर्तयेन्मंत्री मनसा
शिवसंमितं ॥ आचम्य ब्रह्मसंध्यां च प्रातः ब्राह्मीं स्मरेन्नरः ॥२७॥ हंसपद्मासनो रक्तां चतुर्वक्त्रां चतुर्भुजां ॥ अगास्
मालिनीं दक्षे वामे दंडकमंडलुः ॥ तार्क्ष्यपद्मासनां ध्यायेत् मध्याह्ने वैष्णवीं सितां ॥ शंखचक्रगदां वामे दक्षिणे
स गदाभयां ॥२७॥ रौद्रीं ध्यायेद्वृषारूढां त्रिनेत्रां शशिभूषितां ॥ त्रिशूलाक्षधरां दक्षे वामे शाभयशक्तिकां ॥२८॥
साक्षिणः कर्मणां संध्या आत्मानं तन्मयात्मकं ॥ चतुर्थी ज्ञानिनः संध्या निशीथादौ विभाव्यते ॥२९॥ हृदि बिंदुब्रह्म
रंध्रे आरूपां तत्परे स्थिता ॥ शिवं चैव परं वस्तु सा मध्यापि नमोस्तुते ॥३०॥ मंत्रमूलप्रदेशिन्याः कनिष्ठायाः प्रजा
पतेः ॥ ब्राह्ममंगुष्ठमूलस्थं तीर्थं दैवं करायतः ॥३१॥ सव्यपाणितले वह्नेस्तीर्थं सोमस्य वामतः ॥ त्रयीणां तु स
मग्रे षु अंगुलीपर्वसंधिषु ॥३२॥ ततः शिवात्मकैर्मंत्रैः कृत्वा तीर्थं शिवात्मकं ॥ मार्जनं संहितामंत्रैस्तत्तोयेन स
माचरेत् ॥३३॥ वामपाणिषु तत्तोयं योजनं सव्यपाणिना ॥ उत्तमांगे क्रमात् मंत्रैर्मार्जनं समुदाहृतं ॥३४॥ नीत्वा
तत्पयनासाग्रं दक्षपाणिपुटे स्थितं ॥ बोधरूपं शिवं तोयं वामया कृष्णकुंभयेत् ॥३५॥ तत्तोपं कज्जलाभासंप्र
गपादिव्यमुष्टिना ॥ क्षिपेद्वज्रशिलायां पापं तत्तत्र वेदघमर्षणं ॥३६॥ स्वाहांतशिवमंत्रेण कुशपुष्पाक्षतान्वितं ॥
शिवायार्घांजलिं दत्त्वा गायत्रीं शक्तितो जपेत् ॥३७॥ तर्पणं संप्रवक्ष्यामि देवतीर्थेन मंत्रकान् ॥ तर्पयेद्दे शिवाये

तिस्वाहास्वात्स्वाहस्वापुत्रान्॥३७॥हांहृदयायत्वांशिरसेहूंशीखायैहैंकवचायफ्॥अस्त्रायणोदेवगणान्दृ
दादित्येभ्यएवच॥३९॥हांवसुरुद्रेभ्योविश्वेभ्यश्चैवमरुद्भ्य॥भृगुभ्योहामंगिरोभ्यऋषीनकंगोपवंन्यथ॥४०॥
अत्रयेथवशिष्ठायनमश्चाघप्रसृष्टये॥क्रतवेनारदाजायविश्वामित्रायवैनमः॥४१॥प्रचेतसेसनुष्यं श्वसन
कायवषट्तथा॥हांसनंदायाघवषट्सनातनायवैवषट्॥४४॥सनत्कुमारायवषट्॥कपिलायतथावषट्
पंचशिखायत्यम वेसंलग्नक्रममूलत॥४५॥सर्वेभ्योन्तेभ्योवैवषट्न्तान्देवर्षीत्रनथ॥दक्षस्कंधोपवीतीचक्रु
ग्रामूलाग्रतास्तिलैः॥४६॥कव्यवालनलायापसोमायचयमायच॥अर्यमोचाग्निसोमायबर्हिषद्भ्यसुचायु
तान्॥४७॥अव्ययायचसोमायविशेषसुरसन्पितृन्॥हांशाईशायपित्रेचप्रषदाप्यपितामहे॥४८॥
ज्ञांतप्रपितामहायअपप्रेतपितृन्तथा॥पितृभ्यःपितामहेभ्यःसुवाप्यप्रपितामह॥४९॥मेहृद्धप्रपितामहे
भ्योमातृभ्यस्वसु धातथा॥हांमातामहेभ्यश्चस्वधाइांप्रमातामहेभ्यःसर्वेभ्यश्चपितृभ्यस्वधान्नातिभ्यसर्वाचा
र्यभ्यएवच॥दिशांदिक्पतिसिद्धानांमातृभ्योग्रहरक्षसां॥॥इत्याग्नेयेमाहापुराणेस्नानादिविधिर्नामैकोनषष्टित
मोध्यायः॥५९॥॥ईश्वरउवाच॥॥वक्ष्येस्यार्चनंस्कंधकरांगन्यासपूर्वकं॥अहंतेजोमयःसूर्यइतिध्यात्वार्घमर्च
येत्॥परस्येजकवर्णेनललाटाकृष्टबिंदुना॥तेसइत्परवेरंगोकृत्वारक्षावगुंठनो॥२॥संप्रोक्ष्यतज्जलैर्द्रव्यंपूर्व

सोमांनमर्चयेत॥ॐअंतंबीजादिसर्वत्रपूजनंदपडिंगतो॥३॥द्वारिदक्षेवामपार्श्वेइत्राने अंगणायच॥अग्नेयु
रुमतमध्येप्रभुतेचासनंयजेत॥४॥अग्न्यादौविमलंसारसाराध्यपनंसमुखं॥शितरक्तपीतनीलवर्णान्सिं
हनिभान्यजेत॥५॥पद्ममध्येरविदीप्तावीसूत्रारंजपाकमात॥सूत्राज्ञावैविन्दुतिश्चविमलारैरसोघया॥६॥
रोरोचविमलाशक्तिःपूर्वाद्याःसर्वतोमुखी॥ॐहंखंखखोल्कायेहृंकवचायक्षेमांनेत्रायेतिमध्यत॥र
अस्त्रायेतिपूर्वादौततोमुद्राःप्रदर्शयेत्॥तियजेदावात्यभास्करं॥७॥ललाटाकृष्टसंजप्यांध्यात्वारक्तंस
सेवविं॥कांक्रींसःसूर्यायनमोमूलपावाहनादिकं॥८॥विधायपीतयेविभ्रस्तुशांगंधादिकंददत्॥पद्ममु
द्राबिंबमुद्रांदत्वामुद्रांप्रदर्शयेत्तदीरितं॥९॥ॐहृदयायनमः॥अर्कायशिरसेतथा॥भूर्भुवःस्वरैंलि
निशिखायैनैकृतिंयजेत॥१०॥हंकवचायस्पेमांनेत्रायेतिमध्यत॥रअस्त्रायेतिपूर्वादौततोमुद्राःप्रदर्श
येत॥धेनुमुद्राकृदादीनांगोविषाणाचनेत्रयोः॥अस्त्रास्त्रामणीज्योस्नाग्रहाणांचनमस्क्रिया॥१०
सासोमःबुंबुधःहंपजीवंजः भार्गवंजयेत॥दलेपूर्वादिकेग्रादौअस्त्रोमंत्राज्ञानेश्वरं॥११॥रंराहुंकुंके
तवेचगंधाद्यैःखम्युषोक्तिना॥मूलंजप्त्वार्घपात्रंनुदत्वासूर्यायसंस्तुति॥१२॥नत्वापराङ्मुखंचार्घंक्षम
स्वेतिततोवदेत॥श्राराणुनाफडंतेनसमाहत्यांडुसंस्थितं॥१३॥तस्मिन्नेशिवसूर्येततसंहारिणोपमंकृतं।

योजयेत्तेजसश्चंडाविनिर्माल्येसमर्पयेत्॥१४॥अप्यर्चनेशजपाध्यानाद्धोमात्सर्वंरवेर्भवेत्॥इत्याग्नेयेमहापु
राणेसूर्यपूजानामषष्टीतमोध्यायः॥६०॥ ॥ईश्वरउवाच॥॥शिवपूजांप्रवक्ष्यामिआचम्यप्रणवार्घ्यवान्॥
द्वारमंत्राम्बुनाप्रोक्ष्यहांमादिद्वारपान्यजेत्॥१॥गणेसरस्वतीलक्ष्मीमूर्ध्वोदुंबरकेयजेत्॥नंदिगंगेद
क्षशाखेस्थितेवामेशातेयजेत्॥२॥महाकालंचयमुनांदिव्यदृष्टिनिपातितः॥उत्सार्यदिव्यान्विघ्नांश्चपु
ष्पक्षेपांतरिक्षगान्॥३॥दक्षपार्ष्णित्रिभिर्घातैर्भूमिस्थान्यागमंदिरं॥देहलींलंघयन्वामशाखामाश्रि
त्यवैव्रजेत्॥४॥प्रविशेद्दक्षपादेनविन्यस्यास्त्रमुदुंबरे॥ईहांवास्त्वधिपतयेब्रह्मणेमध्यतोयजेत्॥५॥नि
रीक्षणादिभिःशस्त्रैश्शुद्धानागायशस्त्रानुगान्॥लब्धानुज्ञःशिवान्मौजीगंगादिकमनुव्रजेत्॥६॥पवि
त्रांगप्रजप्तेनवस्त्रपूतेनवारिणा॥पूरयेदस्त्रधौतांतास्तान्गायत्र्याहृदयेनवा॥७॥लड्डुकाक्षतपुष्पा
दिसर्वद्रव्यसमुच्चयं॥संनिधिकृत्यपूजार्थंभूतशुद्ध्यादिकारयेत्॥८॥देवदक्षस्थितोन्यस्यशुद्धिंकृ
त्वाशरीरतः॥संहारमुद्रयादायमूर्त्तिमंत्रेणवारयेत्॥९॥भोग्यकर्मोपभोगार्थंयानेकछायकारव्यया
हृदयेपुनिजार्धानांद्वादशांतपदेथवा॥शोधयेत्पंचभूतानिसंचिंत्यशुषिरंतनौ॥चरणाग्रष्टयोर्युग्म
नुशुषिरांतबहिःस्मरन्॥११॥शक्तिहृद्व्यापिनीपश्चात्हूंकारेयावककन्ने॥चंद्रमध्यस्थितेकृत्वाप्रणवोच् राम.
७३

क्तिचिंतकं॥१२॥निवेशयेच्चकांतेफट्तंततोपतेनच॥हृत्कंठतालुमध्येचकक्षरंध्रेविभिद्यवा॥१३॥ग्रंथित्रिव
न्हिंहुंकारंमूर्ध्निविन्यस्यजीवकं॥संपुटंहृदयेनाथपूरकाहितचेतनं॥१४॥हूंत्रिरेवापुरिन्यस्यशुद्धंविध्या
त्मकंस्मरेत्॥कृत्वाथकुंडकंशास्त्रोएकाघातेनयोपजेत्॥१५॥रेचकेनचविध्वंसाशिवानीलोयशोधयेत्॥
नयेन्नीलामहीधातौजलवन्हिपरस्परं॥१६॥ह्रौंह्रौंशोचौतथाकाशविरोधेनचतद्बृणु॥पार्थिवंमंडलं
पीतंकंठिनंवज्रलांछितं॥१७॥हौमित्यार्थीयबीजेनतंनिवृत्तिकलामयं॥पादांतरसमृद्धानांविचिंत्य
चतुरस्त्रकं॥१८॥उद्घातपंचकेनैववाधमूर्तंविचिंतयेत्॥अर्धचंद्रद्रवंसोम्यंशुभ्रंमंभोजलांछितं॥१९
कृष्णालेमितिबीजेनजातंशांतिकलामयं॥संचिंत्योघातयुग्मेनपृथ्वीमूर्तंविशोधयेत्॥२०॥नमोविंदुम
यंवन्हिंबिंदुशक्तिविभूषितं॥व्योमाकारंसुवन्हिंचशुद्धस्फटिकनिर्मलं॥२१॥हौंकारेणफटंतेनशांत्यती
तकलामयं॥ध्यात्वैकोघातयोगेनसुविशुद्धंविभावयेत्॥२२॥आप्लावयेत्ततःसर्वम्लेनामृतवर्षिणा॥आ
धाराख्यामनंतंचधर्मज्ञानादिपंकजं॥२३॥हृदासनमिदंध्यात्वामूर्त्तिमावाहयेत्ततः॥२४॥स्तद्वाशारम
यंतस्यमाधानंद्वादशांशतः॥२४॥अथतांशक्तिमंत्रेणवौषडंतेनसत्वतः॥दिव्यास्तेतेनसंप्रच्छेत्कुर्वी
तसकलीकृतां॥२५॥हृदयादिकगंतेषुकनिष्ठाद्यंगुलीषुच॥हृदादिमंत्रविद्यासंसकलीकरणंमतं

२६॥ अस्त्रेण रक्षां प्रकारं तन्त्रेणावगुण्ठनं बहिः॥ शक्तिजालमधश्चोर्ध्वं महामुद्रां प्रदर्शयेत्॥२७॥ आपादमस्तकं या
वत्तान पुष्पैः शिवं हृदि॥ पद्मे यजेत्पूरकेण आकृष्टामृतसंहतैः॥२८॥ शिवमन्त्रैर्नाभिभिः कुण्डे तर्पयेत शिवानलं॥
ललाटे बिन्दुरूपं च चिन्तयेत्स्वप्नविग्रहं॥२९॥ एकं स्वर्णादिपात्राणां पात्रमस्त्राम्बुशोधितं॥ बिंदुप्रश्रुतपीयूषरू
पतोयादितादिना॥३०॥ हृदा पूर्णं षडङ्गेन पूजयित्वाभिमन्त्रयेत्॥ संरक्ष्य हेतिमन्त्रेण कवचेनावकुण्ठयेत्॥३१॥ व
र्द्धयित्वार्घ्यमष्टाङ्गमारोपयेद्धेनुमुद्रया॥ अभिषिंचेद्यथात्मानं मूर्द्धितत्तोयबिंदुना॥३२॥ तत्रस्थं यागसंस्कारं प्रोक्ष
येदस्त्रवारिणा॥ अभिमन्त्र्य हृदा पिंडैस्तनुत्राणेन वेष्टयेत्॥३३॥ दर्शयित्वामृतिमुद्रां पुष्पं दत्वा निजासने॥ विधा
यतिलकं मूर्द्ध्नि पुष्पमूलेन योजयेत्॥३४॥ स्नाने देवार्चने होमे भोजने योगयोगयोः॥ आवश्यके जपे धीरः सदा वा
चंयमी भवेत्॥३५॥ नादान्तोच्चारणान्मन्त्रं शोधयित्वा पुराकृते॥ पूजा समर्घ्यगा पत्रा सामान्यार्घ्यमुपाहरेत्॥३६॥
ब्रह्म पंचकलावत्तस्मान्यमादाय लिंगतः॥ ऐं शान्त्यादि शिवं डायहृदयेन निवेदयेत्॥३७॥ प्रक्षाल्य पिंडिकालिंगे
अस्त्रतोयेन तोहृदा॥ अर्घपात्रं तु नाशं चदितिलिंगविशोधनं॥३८॥ आत्मद्रव्यमन्त्रलिंगशुद्धौ सर्वान्सुरान्
यजेत॥ वायव्ये गणपतये हां गुरुं सौम्ये यजेच्छिवे॥३९॥ आधारशक्तिं कूर्मं निर्मायां कूर्मं शिलास्थितं॥ यजेद्ब्रह्मशिला
रूढं शिवस्यात्र तु मासनं॥४०॥ विचित्रकसरिप्रख्यानन्योन्यं पृष्ठदर्शिनः॥ कृतत्रेतादिरूपेण शिवस्यासनपादु

कान्॥४१॥ धर्मज्ञानं च वैराग्यमैश्वर्यं चाग्निदिक्मुखान्॥ कर्पूरकुंकुमच्छं तु कज्जलाभान्यजेत्क्रमात्॥४२
पद्मं च कर्णिकामध्ये पूर्वादौ मध्यतो नव॥ वरदाभयहस्ताश्च शक्तयो धृतचामराः॥४३॥ वामा ज्येष्ठा च रौद्री
च काली कलविका तथा॥ बलविकारणी पूज्या बलप्रमथनी क्रमात्॥४४॥ हां सर्वभूतदमनी कमवाग्रे
मनोन्मनी॥ क्षित्यादिशुद्धवेदान्ते तत्त्वव्यापकमासनं॥४५॥ न्यसेत्सिंहासने देवं शुद्धं पंचमुखं विभुं॥ दशबा
हुं च खंडेन्दुं दत्वानं दक्षिणैः करैः॥४६॥ डमरूं बीजपूरं च नीलाक्षं सूत्रकोत्पलं॥ द्वात्रिंशल्लक्षणोपेतं गौरी
मूर्त्तिं तु मध्यतः॥४७॥ हां हैं हां शिवमूर्त्तये स्वप्रकाशं शिवं स्मरेत्॥ ब्रह्मादिकारणत्यागान्मन्त्रं नीत्वा शिवास्पदं॥
४८॥ ततो ललाटमध्यस्थं स्फुरत्तारापतिप्रभं॥ पतंगेनसमाकीर्णं बिंदुरूपं परं शिवं॥४९॥ पुष्पांजलिगतं ध्या
त्वा लक्ष्यमूर्त्तिं निवेशयेत्॥ ॐ हां हौं शिवाय नमः आवाहन्या हृदा ततः॥५०॥ आवाह्ये स्थापयत्या संनिधानं
तिकं शिवं॥ निरोधयेन्निष्ठुरया कालकण्यापि फलं ततः॥५१॥ बिम्बानुत्सार्य्य षष्ठ्या ष्ठा लिंगमूर्ध्नि नमस्कृतिं॥ हृ
दयावाहात्सुमुखी कृताः॥५२॥ निवेशस्थापनं तत्स्यात्संनिधानं ततः परं॥ आकर्णकांडपर्यंतं संनिधेये
परिश्रय॥५३॥ अवकेश प्रकेशो पस्ताद्वेदवगुण्ठनं॥ सकलीकरणं कृत्वा मन्त्रैः षड्भिरथैकतां॥५४॥ अंगानां
मंगिरासार्द्धं चिदंस्यादमृतीकृतं॥ चिच्छक्तिहृदयं चांशो शिरस्त्वैश्वर्यमष्टधा॥५५॥ शिखा वशित्वं चाप्यमन्तेजः क

त्वचमेश्वरं॥ प्रचापोडुस्महश्चात्रं तराणामहारकं॥ ५६॥ नमस्वधाचस्वाहा चवौषडेतियथाक्रमं॥ हृत्सुरः स
चस्तुच्चार्यजात्याहीनि निवेदयेत्॥ ५७॥ पाद्यंपादांबुजद्वंद्वे चकेवांचिमनीयकं॥ आर्घ्यंशिरसिदेवस्य दूर्वापु
ष्पाक्षतानिच॥ ५८॥ एवंसंस्कृत्यसंस्कारैर्दशभिः परमेश्वरं॥ पूजेत्पंचोपचारेण विधिनाकुसुमादिभिः॥ प
योदधिघृतक्षौद्रशर्कराद्येरनुक्रमात्॥ दशादिमंत्रितैर्नेत्रैः मुक्तैतेषांविपर्ययः॥ तोयधूपांतरैः सर्वैः
मूलेनस्नापयेच्छिवं॥ विरूक्ष्यपंचचूर्णेनयथेष्टंशीतलैर्जलैः॥ ५९॥ स्वशक्त्यागंधतोयेनसंस्नाप्यशुचिवा
ससा॥ नमुन्नमस्तकंलिंगंपुष्पैकुर्यान्नतोदद्देत्॥ ६०॥ बकुनादोसमालभ्यपुष्पैः प्रार्च्यशिवाणुना॥ धू
पंराजनमस्त्रेणप्रोक्ष्यार्च्यशिवाणुना॥ ६१॥ अस्त्रेणपूजितांमध्येवादयेत्तद्गुगुलं ददेत्॥ दद्यादाचम
नंपश्चात्देवतोहृदयाणुना॥ ६२॥ आत्रिकंसमुच्चार्यतद्वदाचमयेत्पुनः॥ प्रणम्यादायदेवानांभोगांगा
निप्रपूजयेत्॥ ६३॥ हृदग्नौचंद्रमवेशपशिरस्यामीकरप्रभं॥ शिखारक्ताचनैर्ऋत्येकृष्णंचमयिवायवे॥ ६४॥
चतुर्वक्त्रास्त्रतुर्बाहून्दर्नस्थान्पूजयेदिमान्॥ दंष्ट्राकरालमप्यग्रेवज्रसंनिभं॥ ६५॥ मूलंहोशिवायनमः
हांहृन्वांशिवम्रूंशिखाहेअमाश्वास्त्रपरिकरयुतायवा॥ शिवायदद्यात्साद्यंचआचमनंस्वाघमेवच॥
गंधपुष्पेधूपदीपंनैवेद्याचमनीयकं॥ करोद्वर्त्तनतांबूलंमुखवासंचदर्पणं॥ शिरस्यारोप्यदेवस्यदूर्वाक्षतप

त्रकं॥ मूलमष्टशतंजप्त्वाहृदयेनाभिमंत्रितं॥ ६६॥ चर्मणाविष्टितंखड्गं रक्षितंकुशपुष्पकैः॥ अक्षतैर्मुद्रया
युक्तंशिवमुद्भवसंज्ञया॥ ६९॥ गुह्यातिगुह्यगुप्त्यर्थंगृहाणास्मत्कृतंजपं॥ सिद्धिर्भवतिमेदेवत्वत्प्रसादात्
त्वयिस्थिते॥ ७०॥ भोगेंद्रकपमिल्लाधंदक्षहस्तेनसंभवेत्॥ मूलाणुनाघतोयेनदेवहस्तेनिवेदयेत्॥ ७१॥ य
त्किंचित्कर्महेदेवसदासुकृतदुःकृतं॥ तन्मेशिवपदस्थस्यहुंक्षःक्षपयशंकर॥ ७२॥ शिवोदाताशिवो
भोक्ताशिवःसर्वमिदंजगत्॥ शिवोजयतिसर्वत्रयःशिवःसोहमेवच॥ ७३॥ स्रोकद्वयमधीत्येवंजपन्देवाय
चार्पयेत्॥ शिवंगानांदद्याद्वांचदत्वाघस्तुतिमाचरेत्॥ ७४॥ प्रदक्षिणीकृत्यनमेतत्त्वाष्टांगमष्टमूर्त्तये॥ नत्वा
स्नानानिभिक्षैवयजेच्चित्रेलजादिषु॥ ७५॥॥ इत्याग्नेयेमहापुराणेशिवपूजाविधि॥॥ ईश्वरउवाच॥॥ अर्घ
पात्रकरोपायादस्माशासुचसंस्कृते॥ यागोपकरणंसर्वंदिवादृष्ट्यावलोकयेत्॥ १॥ उदङ्मुखःकुदुमीक्षे
त्प्रोक्षणंताडनंकुर्यात्॥ विदध्यादस्त्रमंत्रेणवर्मणाभ्युक्षणंमतं॥ २॥ खनरवातमुद्धारंपूरणंसमतामपि
कुर्वीतवर्मणासेककुट्टनंतुशराणुना॥ ३॥ सन्मार्जनंसमालेपंकल्परूपंप्रकल्पनं॥ त्रिमूर्तिपरिवारं
चवर्मणासावलिंकृदा॥ ४॥ रेखात्रयमुद्दुरःकुर्यादिकांष्टवलामयः॥ कुशेनचशिवास्त्रेणायेत्तासांविप
र्ययः॥ ५॥ वज्राकरणमस्त्रेणहृदादर्स्वैश्चतुष्पकं॥ अक्षिपाटंतनुत्रेणविन्यसेत्तद्विष्टरंरूप॥ ६॥ तदाव

स्वरीतत्र ईशामाराध्य पूर्ववज्जपेत्॥ वह्निं तदाग्रपतितं स्रुक्पात्रोपरिस्थितं॥७॥ क्रव्यादांसं परित्यज्य वीक्षणा
दिविशोधितं॥ ओदर्यं चैंद्वीभूतमेकीकृतानमत्रयं॥८॥ ॐ हूं वह्निचैतन्याय वह्निबीजेन विन्यसेत्॥ संहितामंत्रि
तं वह्निं धेनुमुद्रामृतीकृतं॥ ९॥ रक्षितं हेतिमंत्रेण्यकवचेनावगुंठितं॥ पूजितं त्रिःपवित्रार्थं कुंडस्योर्ध्वमदक्षि
णं॥१०॥ शिवबीजमिति ध्यात्वा वागीशीगर्भगोचरे॥ वागीश्वरेण देवेन क्षिप्यमाणं विभावयेत्॥११॥ भूमिस्थ
जानुको मंत्री कुर्वन्मेसन्मुखं क्षिपेत्॥ ततो तच्छिवबीजस्य नाभिदेशे समूहनं॥१२॥ संहतिं परिधानस्य शो
चमाचमनं तदा॥ गर्भाधाने पूजनं कृत्वा तत्क्षणे शरागुना॥१३॥ बध्नीयात्तगर्भजो देव्याः कंकणं पाणिप
ल्लवे॥ गर्भाधानाय संपूज्य सद्योजातेन पावकं॥१४॥ ततो हृदयमंत्रेण जुहुयादाहुतित्रयं॥ पुंसवनाय वा
मेन तृतीये मासि पूजयेत्॥१५॥ आकृतिमितियद्ध्याच्छिरसांतु वर्णान्वितं॥ सीमंतोन्नयनं षष्ठे मासि संपूज्यदा
रुणा॥१६॥ जुहुयादाहुतिस्तिस्रः शिखया शिखयैवतु वक्त्रांगकल्पना कुर्याद्वक्त्रोद्घाटननिःकृतिं॥१७॥ जा
तकर्मन्नचर्मासांदशमेमासि पूर्ववत्॥ वह्निं संवीक्ष्य दर्भाद्यैः स्नानं गर्भमलापहं॥१८॥ सुवर्णबिंधनं देआः
कृतं ध्यात्वा हृदार्चयेत्॥ सद्यः सूतकनाशाय प्रोक्षयेदस्त्रवारिणा॥१९॥ कुंडं तु बहिरस्त्रेण ताडयेत्समर्पणा
क्षिपेत्॥ अस्त्रेणोकाश्च पूर्वाग्रान्मेखलासु बहिः कुशान्॥२०॥ आस्तीर्य स्थापयेत्तेषु हृदा परिधिविस्तरं॥ व

क्त्राणामस्त्रमंत्रेण ततो नीलोपनुत्तये॥२१॥ समीधः पंचहोतव्याः प्रांते रूपे घृतप्लुताः॥ ब्राह्मणं शंकरं विष्णु
मनंतं च हृदार्चयेत्॥२२॥ पूर्वाभ्यां परपर्यंतं परिधिस्थाननुक्रमात्॥ ईशादीशानपर्यंतान् विष्टरस्थाननुक्रमा
त्॥२३॥ अग्रेरभिरमुखीभूतान्पदीक्षुहृदार्चयेत्॥ निवार्घ्ये विवस्वंहानं बालकं पालपिप्पल॥२४॥ गौरी
मात्रामिसांस्तेषां प्रावयेत्तदनंतरं॥ गृहीत्वा स्रुक्स्रुवौ दुर्विद्वनाधोमुखौक्रमात्॥२५॥ प्रताप्याग्नौ त्रिधादर्भ
मूलमध्याग्रगैः स्पृशेत्॥ कुशस्पृष्टप्रदेशे षु आविद्या च शिवात्मकं॥२६॥ क्रमान्न्यस्य मं यं न्यस्य क्रां क्रीं क्रूं स
वै त्रिः क्रमात्॥ स्रुचि शक्तिं स्रुवे शंभुं विन्यस्य हृदयाणुना॥२७॥ त्रिसूत्री वेष्टितग्रीवौ पूजितौ कुसुमादिभिः
कुशानामुपरिष्टान्नौ स्थापयित्वा सुदक्षिणे॥२८॥ गं धमाष्यं समादाय वीक्षणादिविशोधितं॥ सुब्राह्मणम
यां मूर्त्तिं सिंचित्वादायतद्धृतं॥२९॥ कुंडस्योर्ध्वं कृत्वा वह्निं तापयित्वाग्निगोचरे॥ पुनर्विष्णुमयीं ध्यात्वा घृतमा
न्नागनगोचरे॥३०॥ नदादाय कुशाग्रेण स्वाहांतशिरदाणुना॥ जुहुयाद्विष्णवे बिंदुं रुद्ररूपमनंतरं॥३१॥ तावं
तिजयमात्मानं नाशो हृदायवै कृतः॥ प्रादेशमात्रदर्भसांगुष्ठानामिकाग्रकैः॥३२॥ घृतांसं सम्मुखं वाकु
वक्त्रेणोद्भवमाचरेत्॥ हृदामसन्मुखे तदृत्कुर्यात्स्यंदवंततः॥३३॥ तदालब्ध्य दग्धदर्भशस्त्रक्षेपाय विकृ
येत्॥ दीप्तेनापनदर्भेण नीराज्यारक्ष्येन दीपयेत्॥३४॥ अस्त्रमंत्रेण निर्दग्धं वह्नौ दर्भं पुनः क्षिपेत्॥ क्षिप्ता घृते

अ॰पु॰
७८

कृतिं यस्मिं कुंडं मादेश संमितं ॥ ३५ ॥ पक्षघ्न यमिता दीनां त्रयं बात्ये विनाव येत् ॥ क्रमाज्जागत्रया दाज्यं स्रुवेणा
दाय होम येत् ॥ ३६ ॥ स्तुत्यग्नौ हा घृते नागंग्रो षमाज्यं क्षिपेत् क्रमात् ॥ ॐ हां अग्नये स्वाहा ॥ ॐ ह्रीं सोमाय स्वा
हा ॥ ॐ हीं अग्नि षोमाभ्यां स्वाहा ॥ उद्घाटनाय नेत्राणां अग्नेर्नेत्र त्रयेमुखे ॥ स्रुवेण घृतपूर्णेन चतुर्थीमा
कृतीं यजेत् ॥ ३० ॥ ॐ हां अग्नये स्विष्टिकृते स्वाहा ॥ अभिमंत्र्य षडंगेन रोचयेथे नुमुनया ॥ अवगुंठ्य तनूत्रे
ण रक्षेदाङ्युंशराणुना ॥ ३९ ॥ कृदाज्यबिंदु विक्षेपान् कुर्यादित्योत्पवो धनं ॥ वक्त्राभिघारसंधानं वक्रैकीकरणं
तथा ॥ ३९ ॥ ॐ हां सद्योजाताय स्वाहा ॥ ॐ वामदेवाय स्वाहा ॥ ॐ हां अघोराय स्वाहा ॥ ॐ हां तत्पुरुषाय स्वाहा
४० ॥ ॐ हां ईशानाय स्वाहा ॥ एकैकया घृताहुत्या कुर्याद्वक्त्राभिघारणं ॥ ॐ हां सद्योजात वामदेवाभ्यां स्वाहा ।
स्वाहा ॥ ॐ हां वामघोराभ्यां स्वाहा ॥ ॐ हां अघोरतत्पुरुषाभ्यां स्वाहा ॥ ॐ हां तत्पुरुषेशानाभ्यां स्वाहा ॥ ॥ इतिव
क्त्रानुसंधानं मंत्रैरेभिः क्रमाच्चरेत् ॥ अग्नितो गतयावायुं नैऋतादिशवांतया ॥ ४१ ॥ वक्त्राणामेकतां कुर्यात्
स्रुवाव्युत धारया ॥ ॐ हां सद्योजात वामघोरतत्पुरुषेशानेभ्यः स्वाहा ॥ इष्टस्पष्टवक्त्रैकवक्त्राणां मंत्रभविसदार्के राम
तिः ॥ ४२ ॥ इशान वह्निमभ्यर्च्य दत्वा स्रुवेणाहुतित्रयं ॥ कुर्यात्संवलिनाना मशिवाग्निष्कंकृता सने ॥ ४३ ॥ कृदा ७९
स्रुतौ विसर्ज्याग्नेपितरौ वधिपूरणौ ॥ मूलेन वौषडंतेन दद्यात्पूर्णां यथाविधि ॥ ४४ ॥ ततो हृदयमंत्र जप्तसीग

मासनं भास्करं यजेत् ॥ पूर्ववद्वा वात्य प्राप्यर्ज्ज्यां तर्पयेच्छिवं ॥ ४५ ॥ यामाग्निशिवयोः कृत्वा नाति संधानमात्म
ना ॥ शक्त्या मूल्या गुना होमं कुर्याद्दिंगैरीशांशतः ॥ ४६ ॥ घृतस्य कार्षिको होमः क्षीरस्य मधुनास्तथा ॥ शक्तिमात्रा
हुतिर्देष्टुः प्रसृतिः पायसस्य तु ॥ ४७ ॥ पूर्ववत् सर्वभक्षाणां जातानां मुष्टि संमितं ॥ खंडत्रयं तु मूलानां मन्नानां
स्वप्रमाणतः ॥ ४८ ॥ ग्रासार्द्धमात्रमन्नानां सक्षाशिपेच्च होमयेत् ॥ ततक्षरोयविकमासलतानामंगुल द्वयं ॥ ४९
पुष्पं पत्रं स्वमानेन समिधां तु दशांगुलं ॥ चित्रचंदन काश्मीर कस्तूरी यक्षकर्दमान् ॥ ५० ॥ कलामिसंमितानेता
गुग्गुलं बदरास्थिवत् ॥ कंदानामष्टमं भागं जुहुयाद्विधिवत्परं ॥ ५१ ॥ होमं निवर्त्तिदेवं ब्रह्म बीजपदैस्ततः ॥ ए
तेन स्रुचिपूर्णांपांनि धायाभ्योगु स्वाक्त्रचं ॥ ५२ ॥ स्रुगग्रे पुष्पमारोप्य पश्चाद्वामेन पाणिना ॥ पुनः सव्ये च तो
हृन्नाशंखसंनिभमुद्रया ॥ ५३ ॥ समुत्थितोथ कायश्च समपादसमुत्थितः ॥ नाभौ तत्मूलमादाय स्रुगग्य
कग्रलोचनः ॥ ५४ ॥ ब्रह्मादिकारणात्यागान् विनिःसत्य सुक्ष्मया ॥ वामस्तनांतमानीय पश्चेतीमूल मन्त्रं त्रितः ॥ ५५ ॥
मूलमंत्रमतिस्पष्टं वौषडंतं समुच्चरेत् ॥ तदाग्नौ जुहुयादाज्यं यवसमिता धारया ॥ ५६ ॥ अपामनं दत्तं कृत्वा त
न्मूलप्रभृतिनपि ॥ मक्षातदंति मावत्स्यविद ध्यात्प्राणपतिं परं ॥ ५७ ॥ ततो वह्निं समभ्यर्च्य फडंता स्रवेण सं
चराते ॥ संहारमुद्रयाकृत्य क्षमस्वेत्यभिधाय च ॥ ५८ ॥ असुरान् परिधिस्थांश्च पूरकेण तदाणुना ॥ स्र

अ॰पु॰ ७९

ह्रयापरमात्मीयेस्वापयेत्सूक्ष्मरूपध्वजे ॥५९॥ सर्वपापात्मकमादाय कृत्वा मंडलकद्वयं ॥ अंतर्बहिर्बलिं दद्याद्याग्ये
प्या कुंडसंनिधौ ॥६०॥ ॐ हां रुद्रेभ्यः स्वाहा ॥ पूर्वे मातृभ्यो दक्षिणे तथा ॥ वारुणे हां गणेभ्यश्च स्वाहांते सन्नं
बलिः ॥६१॥ उत्तरे हां च यक्षेभ्यः ईशाने हां ग्रहेभ्यः स्वाहा ॥ अग्नौ हां मसुरेभ्यश्च रक्षोभ्यो नैर्ऋते बलिः ॥६२॥ वायव्ये
हां स्वनागेभ्यो नक्षत्रेभ्यश्च मध्यतः ॥ ॐ हां राशिभ्यः स्वाहा वह्नौ विश्वेभ्यो नैर्ऋते तथा ॥६३॥ वारुण्यां क्षे
त्रपालाय अंतर्बलिरुदाहृतः ॥ द्वितीये मंडले वाह्ये इंद्रायाग्नेयमाय च ॥ नैर्ऋताय जलेशाय वायवेप्यथैव
र दक्षिणे ॥ ईशानाय च पूर्वादौ ईशाने ब्रह्मणे नमः ॥६५॥ नैर्ऋते विष्णवे स्वाहा वायसादे बलिं बलिः ॥ बलि
हृद्गतान् मंत्रान् संहारमुद्रयात्मनि ॥६६॥ ॥इत्याग्नेये महापुराणे अग्निकार्यं ॥ ॥ईश्वर उवाच ॥ ॥
ततः शिवांतिकं गत्वा पूजाहोमादिकं मम ॥ गृहाण भगवन् पुण्यफलं वत्स निधाय च ॥१॥ अर्घोदकेन देवाय
मुद्रयोद्भवसंज्ञया ॥ तद्बीजं पूर्वमूलेन स्थिरचित्तो निवेदयेत् ॥२॥ ततः पूर्ववदभ्यर्च्य स्तुत्वा स्तोत्रैः प्रणम्य
च ॥ अयं पराङ्मुखो दत्वा क्षमस्वेत्यभिधाय च ॥३॥ नाराचमुद्रयास्त्रेण फडंतेनात्मसंचयं ॥ संहृत्य दि
व्ययालिंग्य मूर्त्तिमंत्रेण योजयेत् ॥४॥ चंडं हृदयाय हूं फट् ॐ चंडशिरसे तथा ॥ ॐ चंडशिखायै हूं फट् चंडा
स्त्रकवचाय च ॥५॥ चंडास्त्राय तथा हूं फट् चंडरूपाग्निजं स्मरेत् ॥ शूलटंकधरं कृष्णसाक्षसूत्रकमं

राम॰ ७९

डलुं ॥६॥ इत्याकारेंद्रचंद्रे वा चतुर्वक्त्रं प्रपूजयेत् ॥ तथा शक्तिजपं कुर्यात् अंगानां तद्दशांशतः ॥७॥ गोभूहि
रण्य वस्त्रादिमणिहेमादिभूषणं ॥ विहाय शेषनिर्माल्यं चंडेशाय निवेदयेत् ॥८॥ निर्माल्यभोजनं तस्मै
प्रदत्तं तु शिवाज्ञया ॥ सर्वमेवं क्रियाकांडं मया चंडं तवाज्ञया ॥९॥ न्यूनाधिकं कृतं होमात् परिपूर्णं मदंबुजे ॥ इ
ति विज्ञाप्य देवेशं दत्वार्घं तस्य संचरात् ॥१०॥ संहारमूर्त्तिमंत्रेणाशनैः संहारमुद्रया ॥ पूरकान्वितमूलेन मंत्रा
नात्मनि योजयेत् ॥११॥ निर्माल्यायनयात् स्थानं लेप्यो गोमयवारिणा ॥ प्रोक्ष्याज्यादि विसृज्याथ आचान्य त
समाचरेत् ॥१२॥ ॥इत्याग्नेये महापुराणे चंडपूजा ॥ ॥ईश्वर उवाच ॥ ॥ कपिलापूजनं वक्ष्ये गोमंत्रैर्य
जेद्गां ॥ ॐ कपिले नंदे नमः कपिले भद्रिके नमः ॥१॥ कपिले सुशीले नमः कपिले सुरभिप्रभे ॥ ॐ कपिले सु
मनसे भुक्तिमुक्तिप्रदे नमः ॥२॥ सौरभेयि जगन्मातर्देवानाममृतप्रदे ॥ गृहाण वरदे ग्रासमीप्सितार्थं च दे
हि मे ॥३॥ वंदितासि वसिष्ठेन विश्वामित्रेण जंतुना ॥ कपिले यम मे पापं यन्मया दुःकृतं कृतं ॥४॥ गावो मम
ग्रतो नित्यं गावो मे पृष्ठ एव च ॥ गावो मे हृदये चापि गवां मध्ये वसाम्यहं ॥५॥ दत्तं गृह्णंतु मे ग्रासं जप्त्वा स्या
न्निर्मलः शिवः ॥ प्राच्यविद्या पुस्तकानि गुरोः पादौ समेन्नरः ॥६॥ यजेत् स्नात्वा तु मध्याह्ने अष्टपुष्पैकया
शिवं ॥ पीडमूर्त्तिशिवांगानां पूजा स्यादष्टपुष्पिका ॥७॥ मध्याह्ने भोजनागारे स्थालिप्रेपाकमानयेत् ॥ ततो

म्लसुंजपेन्नैव वौषडंतेन सप्तधा॥८॥ जप्तैः संदर्भसंगच्छेः सिंचेत्तं वारिबिंदुभिः॥ सर्वपाकाग्रमुद्धृत्य शिवा
यविनिवेदयेत्॥९॥ अन्याईचुल्लिकाहोमविधानायेचकल्पयेत॥ विन्योध्यविधिना चुल्हीं तद्वह्निं पूर्वका
हुतिं॥१०॥ हुत्वा तां साग्निना चैकं ततो रेचकवायुना॥ वान्हीबीजं समादाय कादिस्वात्लगतिक्रमात्॥११॥ शि
वाग्निं स्कमितिध्यात्वा चुल्लिकाग्नौ निवेदयेत्॥ ॐ ह्रां अग्नयेनमो वैह्रां सोमाय वैनमः॥१२॥ सूर्याय बृहस्पतये
प्रजानां पतयेनमः॥ सर्वेन्द्राश्चैव देवेभ्यः सर्वविश्वेभ्य एव च॥१३॥ होमाग्रयेप्रिषुक्तेसर्वदाप्यचयेदिमा
त्॥ स्वाहानामाहुतिं दत्वा क्षमयित्वा विसर्जयेत्॥१४॥ चुल्लादक्षिणबाहू च यजेद्धर्माय वैनमः॥ वामबाहा
च धर्मा च -- कांदिकमोंडके॥१५॥ रसपरिवर्त्तनाय वरुणाय जलाश्रये॥ बलप्रियायस्वधाय नमस्ते मुख
लेयजेत्॥१६॥ संमार्जन्यां देवतोक्तेकायर-- पनीयके॥ कव्यस्कामयस्कंदाय दत्वा वास्तुबलिं ततः॥१७॥
भुंजीत पात्रे सौवर्णे पद्मिन्यादिजलादिके॥ आचार्यः साधकः पुत्रः समयी मौनमास्थितः॥१८॥ वदास्थत्या
क्रधाताऽरिसर्वमहन्नास्तकांत्यजेत्॥ अपोशानं पुनरादाय प्राणदैः प्रणवान्वितैः॥१९॥ स्वाहांतेनाहुतिं पंच
दत्वादीप्योदरानलं॥ नागः कूर्मोथ कृकरो देवदत्तो धनंजयः॥२०॥ नक्कादिकं निवेद्याथ पिबिछेषोदकं नरः॥
अमृतोपस्तरणामसि प्राण्याहुतीस्ततो वदेत्॥२१॥ प्राणाय स्वाहापानाय समानाय ततस्तथा॥ उदानाय च व्या

नायप्रुक्काचनकमारेत्॥२२॥ ॥इत्याग्नेये महापुराणे वासुदेवपूजा॥ ॥ ईश्वर उवाच॥ ॥ पवित्रारोपणं व
क्ष्येक्रियायादिषुपूरणं॥ नित्यं तं नित्यमुद्दिष्टं नैमित्तिकमथापरं॥१॥ आषाढादि चतुर्दश्यामथश्रावणमा
स्यो॥ सितासितासु कर्त्तव्यं चतुर्दश्यष्टमीषु तत्॥२॥ कुर्याद्वा कार्तिकीयावत्तिथ्यो प्रतिपदादिके॥ वह्नि
ब्रह्मांबिके भाग्नागस्कंदार्कश्रूलिनां॥३॥ दुर्याचि मैत्रगोविंदस्मार रगस्तत्र वानुजां॥ सोवर्णं राजतं ताम्रं कृ
तादिषु यथाक्रमं॥४॥ कलौ कर्पासजं वापिपवपुम्रादिसूत्रकं॥ प्रणवश्चंद्रमा वह्नि ब्रह्मा नागो गुहो ह्य
रविः॥५॥ सद्देशः सर्वदेवास्फः क्रमेण नवतंतुषु॥ अष्टोत्तरशतात्वर्त्तं तदर्द्धं चोत्तमादिकं॥६॥ एकाशी
त्यथवास्तैस्त्रिंशताचाष्टमुक्तयाः॥ पंचाशता वा कर्त्तव्यं अस्म्यंपांतरालकं॥७॥ द्वादशामुत्तमानानि
प्रासारत्यंगुलानि वा॥ लिंगाधिस्थापनामानि चतुरंगुलकानि वा॥८॥ तथैव पिंडिका स्नोचितुर्यसर्वदे
वत्॥ गंगावतारकं कार्यं अजातेन स्वधे तद्धृतं॥९॥ ग्रंथिं कुर्याच्च वामेन अघोरेणाथ शोधयेत्॥ रंज
येत्पुरुषेण वरक्तचंदनकुंकुमैः॥१०॥ कस्तूरीरोचना तंत्रे हरिद्रागैरिकादिभिः॥ ग्रुरवोदग्राकर्त्तव्या अथ
वांतनुसंख्यया॥११॥ अंतरं वा यथा शोभमेव द्विचतुरंगुलं॥ पुष्टाभिपोरुषी वीरा चतुर्था त्व पराजिता।
जपाव्याविजया पक्षी अजिता च सदाशिवा॥ मनोन्मनी सर्वमुखी ग्रंथयो रधिकाशुभाः॥१३॥ काःपवित्रं

उवस्त्रं वपवित्रं च शिववत्त्वयि॥ एकैकं निजमूर्त्तेर्वा पुस्तके गुरवे गणे॥१४॥ स्यादेकैकं तथा द्वारदिक्
लज्ञादिषु॥ हास्तादिनवहस्तांतं लिंगानां स्यात्पवित्रकं॥१५॥ अष्टाविंशतितो हस्तं दलानि दृष्ट्वाभिः क्रमात्॥ षु
मुलाद्यंतरास्तत्र क्रमादेकांगुलांतरा॥१६॥ ग्रंथयो मानमप्येषां लिंगविस्तारसंमितं॥ सप्तम्यां वा त्रयोद
श्यां कृतनित्यक्रियाः शुचिः॥१७॥ भूषयेत् पुष्पवस्त्राद्यैः सायाह्ने यागमंदिरं॥ कृत्वा नैमित्तिकीं सायंसंध्यां वि
शेषेसायतर्पणं॥१८॥ परिगृहीतभूभागे स्वर्ग्वितेस्वर्यमर्चयेत्॥ आचम्य सकलीकृत्य प्रणवार्द्धकरोगु
रुः॥१९॥ द्वाराण्यस्त्रेण संप्रोक्ष्य पूर्वादिक्रमतोर्चयेत्॥ हां शांतिकला द्वाराय तथा विद्याकलात्मने॥२०॥
निवृत्तिकला द्वाराय प्रतिष्ठाख्यकलात्मने॥ तच्छाकयोः प्रतिद्वारं द्वौ द्वौ द्वाराधिपौ यजेत्॥२१॥ नंदिने
महाकालाय भृंगिणे च गणाय च॥ वृषभाय च स्कंदाय देव्यै चंडाय च क्रमात्॥२२॥ नित्येव द्वारपालादीन्
प्रविश्य द्वारि पश्चिमे॥ इष्टावास्तिं न्यसेद्ब्रह्मविशेषाद्यकरः शिवः॥२३॥ प्रोक्षणाधनिरोधाय यज्ञसंस्कार
कृन्नरः॥ मंडलेन भक्तिद्वाब्यैः पुष्पाद्यैः स्रक्कृदादिभिः॥ शिवहस्तं निधाय स्वे स्वशिरस्याधिरोपणं तु॥ शिर
हमादिः सर्वज्ञो मम यज्ञे प्रधानता॥२५॥ अस्यर्थं न्यावयेदेवं ज्ञानखड्गकृतो गुरुः॥ नैर्ऋतीं दिशि सासाध्य प्रक्षि
अ०पु० त्वदत्तंनन्रपति॥पतनेजायतेयस्मात्तस्मात्पौत्रंजनार्दनः॥५॥पततोभुक्तिमुक्तिहिपदमेकोहरिर्ध्रुवं॥दृष्ट्वालोकांनीय
१५८ मानान्सहायंधर्ममाचरेत॥६॥मृतोपिबांधवाःशक्तोनानुगंतुनरंमृतं॥जायावर्ज्जंहिसर्वस्ययाम्यपंथाविभिद्यते॥धर्म
एकोनुयात्येनंयत्रक्वचनगामिनं॥श्वःकार्यमद्यकुर्वीतपूर्वाह्णेचापराह्णिकं॥८॥नहिप्रतीक्षतेमृत्युःकृतंवास्यनवाकृ
तं॥क्षेत्रापणगृहासक्तमन्यत्रगतमानसं॥९॥वृकीवोरणमासाद्यमृत्युरादायगच्छति॥नकालस्यप्रियःकश्चिद्द्वे
ष्यश्चास्यनविद्यते॥१०॥आयुष्येकर्मणिक्षीणेप्रसह्यहरतेजनं॥नाप्राप्तकालोम्रियतेविद्धःशरशतैरपि॥११॥कुशा
ग्रेणापिसंस्पृष्टःप्राप्तकालेनजीवति॥औषधानिनमंत्राश्चत्रायंतेमृत्युनान्वितं॥१२॥वत्सवत्प्राक्तनंकर्मकर्तारंवि
दतेध्रुवं॥अव्यक्तादिव्यक्तमध्यमव्यक्तनिधनंजगत्॥१३॥कौमारादिर्यथादेहांतरागमः॥नवमन्यद्यथावस्त्रंगृ देहेतया
ह्णातेनंशरीरकं॥१४॥इत्याग्नेयेशौचं॥ ॥पुष्कर उवाच॥ ॥वानप्रस्थयतीनांचधर्मंवक्षेधुनाशृणु॥जटित्वमग्नि
होत्रत्वंभूशय्याजिनधारणं॥वनेवासःपयोमूलनीवारफलवृत्तिता॥प्रतिग्रहनिवृत्तिश्चत्रिस्नानंब्रह्मचारिता॥२॥
देवातिथीनांपूजाचधर्मोयंवनवासिनः॥गृहीत्वपत्यापत्यंचदृष्ट्वारण्यंसमाश्रयेत्॥३॥तृतीयमायुषोभागमेका
कीवासभार्यकः॥ग्रीष्मेपंचतपानित्यंवर्षास्वभ्रावकाशिकः॥४॥आर्द्रवासाश्चहेमंतेयश्चोग्रंचरतेवनी॥अपराजि राम०
तांवास्थायव्रजेदिशमजिह्मगः॥५॥ ॥इत्याग्नेयेवानप्रस्थाश्रमः॥ ॥पुष्कर उवाच॥ ॥यतिधर्मंप्रवक्ष्यामिज्ञानमोक्षा १५८

दिदर्शकं॥चतुर्थमायुषोभागंसंगात्संगान्परिव्रजेत्॥१॥यदह्निविरजेद्धीरस्तदह्नैवपरिव्रजेत॥प्राजापत्यांनि
रूप्येष्टिंसर्ववेदसदक्षिणां॥२॥आत्मन्यग्नीन्समारोप्यप्रव्रजेद्ब्राह्मणोगृहात्॥एकएवचरेन्नित्यंग्राममन्नार्थमाश्र
येत॥३॥अपेक्षकोमुनिर्ज्ञानंतथाचैवसमन्वितः॥कपालंवृक्षमूलानिकुचेलमसहायता॥४॥समताचैवसर्वस्मि
न्नेतन्मुक्तस्यलक्षणं॥नाभिनंदेतमरणंनाभिनंदेतजीवितं॥५॥कालमेवप्रतीक्षेतनिदेशंभृतकोयथा॥दृष्टिपूतंन्य
सेत्पादंवस्त्रपूतंजलंपिबेत्॥६॥सत्यपूतंवदेद्वाक्यंमनःपूतंसमाचरेत्॥अलाबुदारुपात्राणिमृन्मयंवैणवंयजेत्॥
७॥विधूमेन्यस्तमुसलेव्यंगारेभुक्तवज्जने॥वृत्तेशरावसंपातेभिक्षांनित्यंयतिश्चरेत्॥८॥मधूकरमसंक्लृप्तंप्राक्
प्रणीतमयाचितं॥कालिकंचोपपन्नंचभैक्ष्यंपंचविधंस्मृतं॥९॥पाणिपात्रीभवेद्वापीयात्रामात्रान्नमाचरेत्॥भवेत्
क्षेत्रगतिर्नृणांकर्मदोषसमुद्भवा॥१०॥शुभावस्थेदमंयत्रतत्राश्रमेरतः॥समःसर्वेषुभूतेषुनलिंगंधर्मकारणं॥
फलंकतकवृक्षस्ययद्यप्यंबुप्रसादकं॥ननामग्रहणादेवतस्यवारिप्रसीदति॥१२॥अजिह्मःखंडकःपंगुरंधोबधि
रएवच॥अभिमुच्यतेभिक्षुरज्ञातीतसंश्रयेतद्विजः॥१३॥तेषांस्नात्वाविशुद्ध्यर्थंप्राणायामान्षडाचरेत्॥अ
स्थिन्यूर्णास्नायुसंतमांसशोणितलेपनं॥चर्मावनद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः॥जराशोकसमाविष्टंरोगायतन
मातुरं॥१५॥रजस्वलमनित्यंचभूतावासमिमंत्यजेत्॥धृतिःक्षमादमोस्तेयंशौचमिंद्रियनिग्रहः॥१६॥धीर्विद्या

अ०पु० सप्तमक्षोधो दशकं धर्मलक्षणं ॥ चतुर्विधा भोक्षवस्तु कुटीचकबहूदकौ ॥१७॥ हंसः परमहंसश्च यो यः पश्चात्स
१५९ उत्तमः ॥ एकदंडी त्रिदंडी वा योगी मुच्येत बंधनात् ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ यमाः पंचाथ नि-
यमाः शौचं संतोषणं तपः ॥१९॥ स्वाध्यायेश्वरपूजा च पद्मकाद्यासनं यतेः ॥ प्राणायामस्तु द्विविधः सगर्भोगर्भ एव
च ॥२०॥ जपध्यानयुतो गर्भो विपरीतस्त्वगर्भकः ॥ प्रत्येकं त्रिविधः सोपि पूरकुंभकरेचकैः ॥२१॥ पूरणात्पूरको
वायोर्निश्चलात्कुंभकः ॥ रेचनाद्रेचकः प्रोक्तो मात्राभेदेन च त्रिधा ॥२२॥ स्वादशात्तश्चतुर्विंशात् षट्त्रिंशन्मात
कोधरः ॥ तालो लघ्वक्षरो मात्रा प्रणवादिं स्मरेच्छनैः ॥२३॥ प्रत्याहारो जपकानां ध्यानमीश्वरचिंतनं ॥ मनोधृतिर्धारणा
स्यात्समाधिर्ब्रह्मणि स्थितिः ॥२४॥ अयमात्मा परं ब्रह्म सत्यं ज्ञानमनंतकं ॥ ज्ञानमानंदकं ब्रह्म तत्त्वमस्यहमस्मि स
न् ॥२५॥ परब्रह्म ज्योतिरात्मा वासुदेवो विमुक्तये ॥ देहेंद्रियमनोबुद्धिः प्राणाहंकारवर्जितः ॥२६॥ जाग्रत्स्वप्न
सुषुप्त्यादिमुक्तं ब्रह्म तुरीयकं ॥ नित्यशुद्धबुद्धयुक्तसत्यमानंदमद्वयं ॥२७॥ अहं ब्रह्म परं ज्योतिरक्षरं सह हंसं हरिः ॥
सोवादित्ये च पुरुषः सोसावहममृतखंडयो ॥२८॥ सर्वारंभपरित्यागी समदुःखसुखक्षमी ॥ भावशुद्धश्च ब्रह्मांडं भि राम॰
त्वा ब्रह्म भवेन्नरः ॥२९॥ आषाढ्यां पौर्णिमास्यां च चातुर्मास्यव्रतं चरेत् ॥ ततो व्रजे नवम्यादौ संधिषु वापरां जपेत् ॥ १५९
३०॥ प्रायश्चित्तं यतीनां च ध्यानं वासुयमस्तथा ॥ ॥ इत्याग्नेये यतिधर्मः ॥ ॥ पुष्कर उवाच ॥ मनुर्विष्णुर्याज्ञवल्क्यो हा

रीतोऽग्निर्यमोंऽगिराः ॥ वशिष्ठदक्षसंवर्त्तशातातपपराशराः ॥१॥ आपस्तंबोशनोव्यासाः कात्यायनबृहस्पती ॥
गौतमः शंखलिखितौ धर्ममेते यथाब्रुवन् ॥२॥ तथा वक्ष्ये समासेन भुक्तिमुक्तिप्रदं शृणु ॥ प्रवृत्तं च निवृत्तं च द्विवि
धं कर्म वैदिकं ॥३॥ काम्यं कर्म प्रवृत्तं स्यान्निवृत्तं ज्ञानपूर्वकं ॥ वेदाभ्यासस्तपो ज्ञानमिंद्रियाणां च संयमः ॥४॥ अहिं
सा गुरुसेवा च निःश्रेयसकरं परं ॥ सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतं ॥ तच्चाग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं त
तः ॥५॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥६॥ आत्मज्ञाने स
मे च स्यात् वेदाभ्यासे च यत्नवान् ॥ एतद्विजन्मसामर्थ्यं ब्राह्मणस्य विशेषतः ॥७॥ वेदशास्त्रार्थतत्त्वज्ञो यत्र त
त्राश्रमे वसन् ॥ इहैव लोके तिष्ठन्हि ब्रह्मभूयाय कल्पते ॥८॥ स्वाध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ॥
हस्ते नौषधिभावे वा पंचम्यां श्रावणे थवा ॥९॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा ॥ जलांते छंदसां कु
र्यादुत्सर्गं विधिवद्बहिः ॥१०॥ त्र्यहं ज्योतिरनाध्यायः प्रेतेष्वस्त्रकृतेषु च ॥ उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रि
ये मृते ॥११॥ संध्यागर्जितनिर्घातेभूकंपोल्कानिपातने ॥ समाप्य वेदं ह्यनिशमारण्यकमधीत्य च ॥१२॥ पंच
दश्यां चतुर्दश्यामष्टम्यां राहुसूतके ॥ ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥१३॥ पशुमंडूकनकुल
श्वाहिमार्जारशूकरैः ॥ कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥१४॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिस्व

अ०पु.
१६०

ते॥ अमेध्यरजस्वलास्पृष्टं श्वभ्यन्नानपतितांतिके॥१५॥ भुक्त्वार्द्रपाणिरंभोंतरदुरात्रेतिमारुते॥ पांशुवर्षे दिग्गे
दाहे संध्यानीहारभीतिषु॥१६॥ धावतः प्राणबाधे च शिष्टे च गृहमागते॥ खरोष्ट्रयानहस्त्यश्वनौकावृक्षा
दिरोहणे॥१७॥ सप्तत्रिंशोदिता ध्यायानैतांस्तात्कालिकान् विदुः॥ ॥इत्याग्नेये धर्मशास्त्रे॥ ॥पुष्कर उ०॥॥श्रा
द्धकल्पं प्रवक्ष्यामि भुक्तिमुक्तिप्रदं शृणु॥ निमंत्र्य विप्रान्पूर्वेद्युः स्वागतेनापराह्णतः॥१॥ प्राप्यौपवेशयेत् वृषु
ण्यान् दैवे च पित्र्यके॥ अयुग्मान्प्राग्द्वयं दैवे त्रीन्पित्र्ये चैकमेव वा॥२॥ मातामहानामप्येवं तंत्रं वा वैश्व
देविकं॥ पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि॥ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा॥ यवैरन्ववकीर्याथ
भाजने सपवित्रके॥ शन्नो देव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा॥ या दिव्या इति मंत्रेण हस्तेत्वर्घ्यं विनिक्षिपेत्॥
५॥ दत्वोदकं गंधमाल्यं धूपदानं सदीपकं॥ अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणं॥६॥ द्विगुणांस्तु कुशा
न्कृत्वा ह्युशंतस्त्वेत्यृचा पितॄन्॥ आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः॥७॥ यवार्थास्तु तिलैः कार्याः कुर्या
दर्घ्यादि पूर्ववत्॥ दत्वार्घ्यं संश्रवांस्तेषां पात्रे कृत्वा विधानतः॥८॥ पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥ राम
अग्नौ करिष्य आदाय पृच्छत्यन्नं घृतप्लुतं॥९॥ कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्॥ हुतशेषं च दद्यात्तु भाज १६०
नेषु समाहितः॥१०॥ यथालाभोपपन्नेषु रौप्येषु तु विशेषतः॥ दत्वान्नं पृथिवी पात्रमिति पात्राभिमंत्रणं॥११॥ कृत्वे

त्र२

दं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत्॥ सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं॥१२॥ जप्त्वा यथासुखं वाच्यं भुं
जानास्तेपि वाग्यताः॥ अन्नमिष्टं हविष्यं च दद्यादक्रोधनोत्वरः॥१३॥ अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य
च॥ तदन्नं प्रकिरेत् भूमौ दद्याच्चापः सकृत् सकृत्॥१४॥ सर्वमन्नमुपादाय सतिलं दक्षिणामुखः॥ उच्छिष्टस
न्निधौ पिंडान् प्रदद्यात्पितृयज्ञवत्॥१५॥ क्षिपेद्यस्तु स्वधेत्युक्त्वा भूमौ सिंचेत्ततो जलं॥ प्रीयंतामिति वा दैवे विश्वेदे
वा जलं ददत्॥१६॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव च॥ श्रद्धा च नो मा व्यगमत् बहुदेयं च नोस्त्विति॥१७॥
इत्युक्त्वा तु प्रिया वाचः प्रणिपत्य विसर्जयेत्॥ वाजेवाजे इति प्रीतिः पितृपूर्वं विसर्जयेत्॥१८॥ यस्मिंस्तु संश्रवाः
पूर्वमर्घ्यपात्रे निपातिताः॥ पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत्॥१९॥ प्रदक्षिणमनुव्रज्य भुक्त्वा पितृसेवितं॥
ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह॥२०॥ एवं प्रदक्षिणं कृत्वा वृद्धौ नांदीमुखान्पितॄन्॥ यजेत दधिकर्कंधु
मिश्रान् पिंडान्यवैः क्रिया॥ एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकं॥ आवाहनाग्नौकरणरहितं त्वपसव्यवत्॥
उपतिष्ठतामित्युक्त्वा स्थाने पितृविसर्जने॥ अभिरम्यतामिति वदेत् ब्रूयुस्ते हि रताः स्म ह॥ गंधोदकतिलैर्युक्तं कुर्या
त्पात्रचतुष्टयं॥ अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं विमोचयेत्॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्॥ एतत्सपिं
डीकरणमेकोद्दिष्टं स्त्रिया सह॥२५॥ अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत्॥ तस्याप्यन्नं सोदकुंभं दद्या

त्संवत्सरं द्विजे॥२६॥मृताहनि च कर्त्तव्यं प्रतिमासं च वत्सरं॥प्रतिसंवत्सरं चैव श्राद्धं वै मासिकंनवत॥हविष्या
न्नेन वै मासं पायसेन तु वत्सरं॥मत्स्यहारिणकौरभ्रशाकुनछागपार्षतैः॥२८॥ऐणरौरववाराहशाशैर्मांसै
र्यथाक्रमं॥खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च॥२९॥लोहामिषं कालशाकं मांसं वाध्रीणसस्य च॥यद्ददा
ति गयास्थश्च सर्वमानंत्यमुच्यते॥तथा वर्षात्रयोदश्यां मघासु च न संशयः॥कन्यां कन्यावेदिनश्च पशून्मुख्या
न्सुतानपि॥३१॥द्यूतं कृषिं च वाणिज्यं द्विशफैकशफं तथा॥ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके॥३२
ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा॥प्रतिपत्प्रभृतिष्वेतां वर्जयित्वा चतुर्द्दशीं॥३३॥शस्त्रेण तु हता ए
वै तेषां तत्र प्रदापयेत्॥स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा॥३४॥पुत्रान् श्रेष्ठान् ससौभाग्यमपत्यं मुख्य
तां सुतान्॥प्रवृत्तचक्रतां पुत्रान्वाणिज्यप्रकृतिं तथा॥३५॥आरोग्यत्वं यशो वीतशोकतां परमां गतिं॥धनं वि
द्यां भिषक्सिद्धिं कुप्यं गाश्चाप्यजाविकं॥३६॥अश्वानायुश्च विधिवत्यः श्राद्धं संप्रयछति॥कृत्तिकादिभरण्यं
ते स कामानाप्नुयादिमान्॥३७॥वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः॥प्रीणयंति मनुष्याणां पितॄन्श्राद्धेन
तर्पिताः॥३८॥आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च॥प्रयछंतु तथा राज्यं प्रीता नॄणां पितामहः॥३९॥इत्याग्ने
ये श्राद्धकल्पः॥॥पुष्कर उवाच॥॥श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरे॥वृष्ट्यायुःपुत्रकामो वा तथैवाभि

चरन्पुनः॥१॥सूर्यः सोमो मंगलश्च बुधश्चाथ बृहस्पतिः॥शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः॥२॥ताम्र
कात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ॥रजतादयसः सीसात्ग्रहाः कार्याः क्रमादिमे॥३॥स्ववर्णैर्वा यजेद्ग्रंग
धं मंडलकेषु वा॥यथावर्णं प्रदेया निवासांसि कुसुमानि च॥४॥गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः॥कर्त्त
व्यमंत्रवंतश्च चरवः प्रतिदैवतं॥५॥आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत॥उद्बुध्यस्वेति च ऋचो यथासंख्य
प्रकीर्त्तिताः॥६॥बृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः॥शन्नो देवीस्तथा कांडात्केतुं कृण्वंतिमास्तथा॥७॥अ
र्कः पालाशखदिरावपामार्गोथ पिप्पलः॥उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥८॥एकैकस्यात्राष्टशतं
अष्टाविंशतिरेव वा॥होतव्या मधुसर्पिभ्यां दध्ना चैव समन्विताः॥९॥गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं॥दध्यो
दनं हविः पूपान्मांसं चित्रान्नमेव च॥१०॥दद्याद्ग्रहक्रमादेतान्द्विजेभ्यो भोजनं बुधः॥शक्तितो वा यथालाभं
सत्कृत्य विधिपूर्वकं॥११॥धेनुः शंखस्तथानड्वान्हेम वासो हयः क्रमात्॥कृष्णा गौरायसं छाग एते वै दक्षिणाः
क्रमात्॥१२॥यस्य यश्च यदा दुस्थः स तं यत्नेन पूजयेत्॥ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ॥१३॥ग्रहाधीना न
रेंद्राणामुच्छ्रयाः पतनानि च॥भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः॥१४॥॥इत्याग्नेये नवग्रहपूजा॥॥अग्नि
रुवाच॥॥ध्येय आत्मा स्थितो योसौ हृदये दीपवत्प्रभुः॥अनन्यविषयं कृत्वा मनोबुद्धिस्मृतींद्रियं॥१॥ध्यातुध्या

पिनेदेवंगव्यंदधिधृतंपयः॥प्रियंगवोमसूराश्चवार्त्ताकिःकोद्रवान्हि॥२॥केयोयदास्वयंग्रसतेपर्वसंधिषु।
हस्तेछायातुसाज्ञेयाश्राद्धदानादिकेक्षया॥३॥पित्र्येचैवयदासोमोहंसेचैवकरेस्थिते।तिथिर्वैवस्वताप्रोक्तासा
छायाकुंजरस्यतु॥४॥अग्नौकरणशेषंतुनदद्याद्वैश्वदेविके।अग्न्यभावेतुविप्रस्यहस्तेदद्यात्तुदक्षिणे॥५॥न
स्त्रीदुष्प्रतिग्राहेणनविप्रोवेदकर्मणा॥बलात्कारेणभुक्ताचेतचौरइत्यागतेपिवा॥६॥मत्यजेद्दूषितांनारींऋतुका
लेनशुध्यति॥यात्रात्मव्यतिरेकेणद्वितीयंनात्रपश्यति॥७॥ब्रह्मभूतःसएवेहयोगीवासुरतोमम॥विषयेंद्रियसं
योगात्केचिद्योगंवदंतिवै॥८॥अधर्मेधर्मबुद्धिस्तुगृहीतस्तेनपंडितैः॥आत्मनोमनसश्चैवसंयोगेचततयापरे॥९॥
वृत्तिहीनंमनःकृत्वाक्षेत्रज्ञंपरमात्मनि॥एकीकृत्यविमुच्येतदह्यातयोगोयमुत्तमः॥१०॥कुटुंबैःपंचभिर्ग्रामःषष्ठ
स्तस्यमहत्तरः॥देवासुरमनुष्यैश्चसिजेतुंचैवनशोपगृ॥बहिर्मुखानिसर्वाणिकृत्वाचाभिमुखानिवै॥मनसेवेंद्रियग्रा
ममनश्चात्मनियोजयेत्॥सर्वभावविनिर्मुक्तंक्षेत्रज्ञंपरमेंन्यसेत्॥एतज्ज्ञानंचध्यानंचशेषानेगुरुविस्तराः।
यत्रास्तिसर्वलोकस्यतदस्तीतिविरुध्यते॥कथ्यमानेतथान्यस्मिन्हृदयेनावतिष्ठते॥स्वयंवेद्यंहितद्ब्रह्मकुमारीस्त्री
सुखंयथा॥अयोगीनैवजानातिजात्यंधोहिघटंयथा॥१५॥संन्यसंतंद्विजंदृष्ट्वास्थानाच्चलतिभास्करः॥एषमेमं
डलंभित्त्वापरंब्रह्माधिगच्छति॥१६॥उपवासव्रतंचैवस्नानतीर्थफलंतपः॥द्विजःसंपातनंचैवसंपन्नंतस्यतत्फ

नम्रस्थायतिर्दद्य॥१४॥उक्तआश्रमधर्मस्तुधर्मस्यास्यंचहापनः॥षाड्गुण्यस्यामिमिलानायोद्दृष्टास्वःस्वद
कृतः॥१५॥सत्रेधामंत्रपात्रात्यहष्ट्वायज्ञतिमानवा॥ग्रमयोर्थोयवहारीतुदंडवारणमेवच॥१६॥तुल्यार्था
नांविकल्पःस्यात्स्यागमूलःप्रकीर्तितः॥वेदेतुविहितोधर्मःस्मृतौताहृशएवतु॥१८॥अनुवादःस्मृतिःस्वक्त
पापायमितिमानवाः॥स्यादष्टचत्वारिंशद्भिःसंस्कारैर्ब्रह्मलोकगः॥१९॥गर्भाधानंपुंसवनंसीमंतोन्नय
नंततः॥जातकर्मनामकृतिरन्नप्राशनचूडकं॥२०॥संस्कारश्चोपनयनंवेदव्रतचतुष्टयं॥स्नानंसधर्मचा
रिण्यायोगःस्याद्यज्ञपंचकं॥२१॥देवयज्ञपितृयज्ञोमनुष्यभूतपंचकौ॥ब्रह्मयज्ञःसप्तपाकःयज्ञसंस्था
पुरोष्टकः॥२२॥पार्वणश्राद्धश्रावण्याग्रहायणीवचैत्र्यपि॥आश्वयुजीसप्तहविर्यज्ञसंख्यास्ततःस्मृता॥
२३॥अग्न्याधेयमग्निहोत्रंदर्शःस्यात्पौर्णमासकः॥सौत्रामणिसप्तसोमसंस्थाग्निष्टोमआदितः॥२४॥द
याक्षमानसूयायुश्रमानायासोथमंगलं॥अकार्पण्यास्पृहासौचंयस्यैतेपरमंव्रजेत्॥२५॥प्रचारेमैथुनेचैव
प्रस्रावेदंतधावने॥स्नानेभोजनमुष्टेचसप्तमंकुष्ठवर्जयेत्॥२७॥स्वाडुप्रेष्यनरक्रीयात्तद्देवयोग्यंतदी
रितं॥अन्यगोत्रान्यसंबंधप्रेतस्याग्निंददातियः॥२८॥पिंडंचोदकदानंचसदशाहंसमापयेत्॥उदकंचर
णंभस्मद्वारपणीस्तथैवच॥२९॥एभिरंतरितंकृत्वापंक्तिदोषोनविद्यते॥पंचप्राणाहुतीर्दद्यादनामांगुष्ठ्ये

१७॥एकाक्षरंपरंब्रह्मप्राणायामःपरंतपः॥सावित्र्यास्तुपरंनास्तिपावनंपरमंस्मृतं॥१८॥पूर्वंस्त्रियःसुरैर्भुक्ताः
सोमगंधर्ववह्निभिः॥भुंजतेमानवाःपश्चान्नैतादुष्यंतिकेनचित्॥१९॥असवर्णैस्तुयोगर्भःस्त्रीणांयोनौनिषिच्य
ते॥अशुद्धातुनवेन्नारीयावच्छल्यंनमुंचति॥२०॥निःसृतेतुततःशल्येरजसाशुध्यतेततः॥ध्यानेनसदृशंनास्ति
शोधनंपापकर्मणां॥श्वपाकेष्वपिभुंजानोध्यानेनेहविशुध्यति॥आत्माध्यातामनोध्यानंध्येयोविष्णुःफलंहरिः॥२२॥
५ अक्षय्यायतिःश्राद्धेपंक्तिपावनः॥आरूढोनैष्ठिकंधर्मंयस्तुप्रच्यवतेद्विजः॥२३॥प्रायश्चित्तंनपश्यामियेनशुध्ये
त्स्वात्मनः॥विकलानामचांडालाजायंतेनात्रसंशयः॥२४॥ज्ञातिकोम्रियतेगृध्रःश्वासौद्वादशिकस्तथा॥मासो
विंशतिवर्षाणिशूकरोदशभिस्तथा॥२५॥अपुष्पोविफलोवृक्षोजायतेकंटकावृतः॥ततोदावाग्निदग्धस्तुस्था
णुर्भवतिसानुगः॥२६॥ततोवर्षशतान्यष्टौदेहतितिष्ठत्यचेतनः॥पूर्णेवर्षसहस्रेतुजायतेब्रह्मराक्षसः॥२७॥पूर्णे
नलभतेमोक्षंकुलस्याच्छादनेनवा॥योगमेवनिषेवेतनान्यस्मात्तमघापहं॥२८॥इत्याग्नेयेनानाधर्मा॥॥पुष्कर
उवाच॥॥वेदस्यानुप्रवक्ष्यामिधर्मंवैपंचधास्मृतं॥वर्णत्वमेकमाश्रित्ययोधिकारःप्रवर्तते॥१॥वर्णधर्मःसविज्ञे
यःयथोपनयनंनृपु॥यस्त्वाश्रमंसमाश्रित्यपदार्थःसविधीयते॥२॥युक्तआश्रमधर्मस्तुभिन्नपिंडादिकोयथा॥
उभयेननिमित्तेनयोविधिःसंप्रवर्तते॥३॥नैमित्तिकःसविज्ञेयप्रायश्चित्तविधिर्यथा॥ब्रह्मचारीगृहीवापिवा

गतः॥३०॥इत्याग्नेयेनानाधर्मेषु॥॥अग्निरुवाच॥॥श्रीशांतिविजयार्थंचग्रहयज्ञंपुनर्वदे॥ग्रहयज्ञोयु
तहोमलक्ष्यकोट्यात्मकस्त्रिधा॥१॥वेद्यग्नेश्चोत्थाग्निकुंडात्प्रहाणावाद्यमंडले॥सौम्येगुरुर्बुधश्चैवशुक्रःपूर्व
दलेशशी॥२॥आग्नेयेशनैश्चरोराहुःकेतुश्चवायवे॥ईशानमोम्यपुरुविसुश्चब्रह्मेशौगुरुकालकौ॥३॥चि
त्रगुप्तश्चाधिदेवाश्चप्रेराप्यक्षितिर्हरिः॥इंद्रऐंद्रिदेवताश्चप्रजेनोहिरजःक्रमात्॥४॥एतेप्रत्यधिदेवाश्चगणेशो
दुर्गपाणिनः॥रवमश्विनौचसंपूज्ययजेद्बीजैश्चवेदजैः॥५॥अर्कःपालाशखदिरोप्यपामार्गोथपिप्पलः॥उ
दुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमात्॥६॥मध्वाज्यदधिसंमिश्राहोतव्याश्चाष्टधाशतं॥एकाष्टचतुरःकुं
भान्पूर्णान्पूर्णाहुतिंददेत्॥७॥यजमानंचतुर्वेदैरभिषिंचेत्समर्थकैः॥सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्व
राः॥८॥वासुदेवोजगन्नाथस्तथासंकर्षणःप्रभुः॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥९॥आखंडलो
ग्निर्भगवान्यमोवैनैऋतस्तथा॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥१०॥ब्रह्मणासहितःशेषोदिक्पा
लाःपांतुवोसदा॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥११॥बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमा
तरः॥एतास्त्वामभिषिंचंतुधर्मपत्न्यःसमागताः॥आदित्यश्चंद्रमाभौमबुधजीवसितार्कजाः॥ग्रहास्त्वाम
भिषिंचंतुराहुःकेतुश्चतर्पिताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएव

च॥ देवपत्न्यो ध्रुवो नागा दैत्या अप्सरसां गणाः॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि
कालस्यावयवाश्च ये॥ सरितः सागरा शैलास्तीर्थानि जलदा नदाः॥ १६॥ ते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥
अलंकृमस्ततो दद्यात् हेमगोनिर्भुवादिकं॥ १७॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि॥ तीर्थदेवमयी यस्मा
त्ततः शांतिं प्रयच्छ मे॥ १८॥ पुण्यस्त्वं शंखवाद्यानां मंगलानां च मंगले॥ विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छ मे॥
१९॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः॥ अष्टमूर्तेरधिष्ठानमतः शांतिं प्रयच्छ मे॥ २०॥ हिरण्यगर्भगर्भस्त्वं हेमहे
मबीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ २१॥ पीतवस्त्रयुगं तस्मात् वासुदेवस्य वल्लभं॥ प्रदा
नात्तुष्यते विष्णुरतः शांतिं प्रयच्छ मे॥ २२॥ विष्णुस्त्वं मत्स्यरूपेण यस्मादमृतसंभवः॥ सर्वपापहरो नित्यमतः शांतिं
प्रयच्छ मे॥ चंद्रार्कवाहनो नित्यमतः शांतिं प्रयच्छ मे॥ २३॥ यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा॥ सर्वपापहरा
नित्यमतः शांतिं प्रयच्छ मे॥ २४॥ यस्मादायसकर्माणि तवाधीनानि सर्वदा॥ यस्य लक्षायुधादीनि अतः शांतिं प्र
यच्छ मे॥ २५॥ यस्मात्त्वं सर्वयज्ञानां मंगलत्वेन संस्थितः॥ योतिर्विभावसो नित्यमतः शांतिं प्रयच्छ मे॥ २६॥ गवामंगे
षु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ २७॥ यस्मादशून्यं शयनं केशवस्य शि
वस्य च॥ शय्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि॥ २८॥ यथा रत्नेषु सर्वेषु सर्वदेवाः प्रतिष्ठिताः॥ तथा शांतिं प्र

यच्छंतु रत्नदानेन मे सुराः॥ २९॥ यथा भूमिप्रदानस्य कलां नार्हंति षोडशीं॥ दानान्यन्यानि मे शांतिर्भूमिदानाद्भ
वत्विह॥ ३०॥ ग्रहयज्ञयुतं होमो दक्षिणाभीरणे चितिः॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु॥ ३१॥ सर्वकामा
प्तये लक्षकोटिहोमद्वयं मतं॥ गृहदेशे मंडपे पद्मयुतं हस्तमात्रकं॥ ३२॥ मेखलायोनिसंयुक्तं कुंडं वक्त्रारत्नि सि
द्धिदे॥ द्वयमेवाधिवालक्षे सर्वदत्वा गुणालितः॥ ३३॥ चतुर्दश द्विहस्तं वा ताक्ष्ये चात्राधिकं यजेत्॥ सामध्वनिशरीर
स्त्वं वाहनं परमेष्ठिनः॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे॥ पूर्ववत्कुंडमामंत्र्य लक्षहोमं समाचरेत्॥ ३५॥
वसोर्धारां ततो दद्यात् तत्र शय्यां नृपादिकं ददेत्॥ तत्रापि दश चाष्टौ च लक्षहोमे तथा द्विज॥ ३६॥ पुत्रार्थी राज्यविजय
भुक्तिमुक्त्याद्यभुतान्॥ दक्षिणाभिः फलेनाप्यातः घ्नः कोटिहोमकः॥ ३७॥ पंचविंशति षोडश्यो वापबेदारेत्
वृष्यं॥ कोटिहोमी सर्वकामो विष्णुलोकं च गच्छति॥ ३८॥ होमस्तु ग्रहमंत्रैर्वा गायत्र्या वैष्णवैरपि॥ जातवेदो मुखे
ः शैवैर्वैदिकैः प्रथितैरपि॥ ३९॥ तिलैर्घृतैः पवैर्धान्यैरश्वमेधफलादि नाक॥ विद्वेषणाभिचारे तु त्रिकोणं कुंड
मिष्यते॥ ४०॥ समिधो वामहस्तेन श्यनाखिललक्षसंयुताः॥ रक्तमूर्षेर्मुक्तिकोशो ध्यायेच्छिवं त्रिवं रिपोः॥ ४१
छिंद्या तत्क्षुरेण प्रतिमां प्रतिरूपां रिपुं हरेत्॥ ये जने दकं पीडकः पठेत् सद्दिवं व्रजेत्॥ ॥ इत्याग्नेये अयुतलक्ष
कोटिहोमाः॥ ॥पुष्कर उवाच॥ दंडं कुर्यान्नृपो नॄणां प्रायश्चित्तमकुर्वतां॥ कामतोकामतो वापि प्रायश्चित्तं
कृते चरेत्॥ [illegible] कुद्धातुराणां च न भुंजीत कदाचन॥ मत्तापीतकिं नास्रदृष्टमनं दृष्टमुदक्या॥ २॥ गणान्न

गणिकान्नंचवार्धुषिगायनस्य च ॥ अभिशस्तस्य षंढस्य यस्याश्चोपपतिर्गृहे ॥३॥ रजकस्य नृशंसस्य वंदिनः कि
तवस्य च ॥ मिथ्यातपस्विनश्चैव चौरदांडिकयोस्तथा ॥४॥ कुंडगोलस्त्रीजितानां वेदविक्रयिणस्तथा ॥ शैलू
षतंतुवायान्नं कृतघ्नस्यान्नमेव च ॥५॥ कर्मारस्य निषादस्य चेलनिर्णेजकस्य च ॥ मिथ्याप्रव्रजितस्यान्नं पुंश्चल्या
स्तैलिकस्य च ॥६॥ आरूढपतितस्यान्नं विद्विष्टान्नं च वर्जयेत् ॥ तथैव ब्राह्मणस्यान्नं ब्राह्मणेनानिमंत्रितः ॥ ब्राह्मण
नां च शूद्रेण नाद्याच्चैव निमंत्रितः ॥ एषामस्यान्नममत्या ममता भुत्र्यहं क्षिपेत् ॥ मत्या भुक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्र
मेव च ॥ चांडालश्वपचान्नं तु भुक्त्वा चांद्रायणं चरेत् ॥९॥ अनिर्दशं च प्रेतान्नं गवाघ्रातं तथैव च ॥ शूद्रोच्छिष्टं शुनो
च्छिष्टं पतितान्नं तथैव च ॥१०॥ तप्तकृच्छ्रं प्रकुर्वीत अशौचे कृच्छ्रमाचरेत् ॥ अशौचे यस्य यो भुंक्ते सोप्यशुद्धस्तथा
भवेत् ॥११॥ मृतपंचनखात्कूपादमेध्येन कृतघ्नतात् ॥ आपः पीत्वा त्र्यहं तिष्ठेत्सोपवासो द्विजोत्तमः ॥१२॥ स
र्वत्र मूत्रपादस्यात् द्वितयं वैश्यशूद्रयोः ॥ विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ॥१३॥ प्राश्य मूत्रपुरीषाणि
द्विजश्चांद्रायणं चरेत् ॥ शुष्काणि जग्ध्वा मांसानि प्रेतचक्रवलानि च ॥१४॥ क्रव्यादसूकरोष्ट्राणां गोमयोः कपि
काकयोः ॥ गोमयोश्वखरोष्ट्राणां छत्राकं ग्रामकुक्कुटं ॥ मांसं सरयं कुंजरस्य तप्तकृच्छ्रेण शुध्यति ॥ आमश्राद्धे
तथा भुक्त्वा ब्रह्मचारी मधु त्वहन् ॥ लशुनं गृंजनं वा घ्रात प्राजापत्यादिना शुचिः ॥ भुक्त्वा चांद्रायणं कुर्यात् मांसं
क्रव्यभुजस्तथा ॥१७॥ शेलुं गव्यं च पीयूषं विषं श्लेष्मात्मकं मदनं ॥ तथा कुशरमांसानि पायसापूपशष्कुली

राम०
१६५

१८॥ अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ गवां च महिषीणां च वर्जयित्वा तथाप्यजां ॥१९॥ सर्वक्षीराणि
वर्ज्यानि तासां चैवाप्यनिर्दशान् ॥ शशकः शल्लकी गोधा खड्गः कूर्मस्तथैव च ॥२०॥ भक्ष्याः पंचनखाः प्रोक्ताः परि
शेषाश्च वर्जिताः ॥ पाठीनान्रोहितान्मत्स्यान् सिंहतुंडांश्च भक्षयेत् ॥ यवगोधूमजं सर्वं पयसश्चैव विक्रियाः ॥
रागषाडवचक्रादीन् सस्नेहमुषितं तथा ॥२२॥ अग्निहोत्रपविध्याग्निब्राह्मणः कामकारतः ॥ चांद्रायणं चरेन्मा
सं वीरहत्यासमं हि तत् ॥२३॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ महांति पातकान्याहुः संयोगश्चैव तैः स
ह ॥२४॥ अनृतं च समुत्कर्षे राजगामि च पैशुनं ॥ गुरोश्चालीकनिर्बंधः समानि ब्रह्महत्यया ॥२५॥ ब्रह्मोज्झवेद
निंदा कूटसाक्ष्यं सुहृद्वधः ॥ गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट् ॥ निक्षेपस्यापहरणं नराश्वरजतस्य
च ॥ भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतं ॥२७॥ रजकांत्यकन्यानिषुकुमारीषु त्यजासु च ॥ सख्युः पुत्रस्य
च स्त्रीषु गुरुतल्पसमं विदुः ॥२८॥ गोवधो यान्यसंयाज्यपारदार्यात्मविक्रयः ॥ गुरुमातृपितृत्यागस्वाध्यायाग्नि
ःसुतस्य च ॥२९॥ परिवित्ताऽनुजेन परिवेदनमेव च ॥ तयोर्दानं च कन्यायास्तयोरेव च याजनं ॥३०॥ कन्याया दूष
णं चैव वार्धुष्यं व्रतलोपनं ॥ तडागारामदारापत्यानां च विक्रयः ॥ गुरुव्रात्यं बांधवत्यागो भृताध्यापनमेव
च ॥ भृताध्ययनं दानविक्रेयस्य च विक्रयः ॥३२॥ सर्वाकारेष्वधीकारो महायंत्रप्रवर्तनं ॥ हिंसौषधीनां स्त्री

अ० पु० जीवः क्रियालंघनमेव च॥ इंधनार्थमशुष्काणां द्रुमाणां चैव पातनं॥ योषितां ग्रहणं चैव स्त्रीनिंदकसमागमः।
१६६ आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा॥ अनाहिताग्निता स्तेयमृणानां चानपक्रिया॥ असच्छास्त्राधि
गमनं कौशणव्यं वामनक्रिया॥ धान्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणं॥ स्त्रीविट्शूद्रक्षत्रवधो नास्तिक्यं
चोपपातकं॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः॥ ब्राह्मं पुंसि च मैथुन्यं जातिभ्रंशकरं परं॥ श्वखरो
ष्ट्रमृगेभाणामजाद्याश्चैव मारणं॥ संकीर्णकरणं ज्ञेयं मीनाहीनकुलस्य च॥ निंदितेभ्यो धनादानं वाणिज्यं
शूद्रसेवनं॥ अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं॥ कृमिकीटवयोहत्या मद्यानुगतभोजनं॥ फलैधःकुसुम
स्तेयमधैर्यं च मलात्मना॥ इत्याग्नेये महापुराणे महापातकउपपातकानि॥ ॥पुष्कर उवाच॥ ॥एतासामतिपा
पानां प्रायश्चित्तं वदामि ते॥ ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्॥ भिक्षेतात्मविशुद्ध्यर्थं कृत्वा शवशि
रोध्वजं॥ प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः॥ यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा॥ जपन्वान्य
तमं वेदं योजनानां शतं व्रजेत्॥ सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्॥ व्रतैरेतैर्व्यपोहंति महापातकि राम
नो मलं॥ उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्॥ कृतवापनो ताविवसेच्चर्मणार्द्रेण संवृतः॥ चतुर्थकाल ६६
मश्नीयादक्षारलवणं मितं॥ गोमूत्रेण चरेत्स्नानं द्वौ मासौ नियतेंद्रियः॥ दिवानुगच्छेद्गास्ताश्च तिष्ठन्नूर्ध्वं रजः

पिबेत्॥ वेदविदे ब्राह्मणाय सर्वस्वं च प्रदापयेत्॥ पादमेकं चरेद्रोधौ द्वौ पादौ बंधने चरेत्॥ योजने पादहीनं स्यात्
चरेत्सर्वं निपातयेत्॥ कांतारेषु च दुर्गेषु विषमेषु भयेषु च॥ यदि तत्रापि पत्तिः स्यादेकपादो विधीयते॥ घटाभ
रणदोषेण तथैवार्द्धं विनिर्दिशेत्॥ दमने वामने वा ह्यानिरोधेष्व कटस्य च॥ स्तब्धे शृंखलपादेषु मृते पादो
नमाचरेत्॥ पावकं तु पिबेन्नावद्यावद्धानुगो मीवेत्॥ गोमतीं च जपेद्विद्यां गाः स्तुतिं गोमतीं स्मरेत्॥ एकाचे
द्बहुभिर्दैवाद्यत्रव्यापादिता भवेत्॥ पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक्॥ उपकारे क्रियमाणे विपत्तौ थ
नास्ति पातकं॥ एतदेव व्रतं च कुर्युरुपपातकिनस्तथा॥ अवकीर्णी तु काणेन गर्दभेन चतुष्पथे॥ पाकयज्ञ
विधानेन यजेत निर्ऋतिं निशि॥ कृत्वाग्निं विधिवद्धोमांततश्च समभित्य च॥ वातेंद्रगुरुवह्नीनां जुहुयात्सर्पिषा
हुती॥ अथवा गार्दभं चर्म वसित्वाब्दं चरेन्महीं॥ हत्वा गर्भमविज्ञातं ब्रह्महत्याव्रतं चरेत्॥ सुरां पीत्वा द्विजो मोहा
दग्निवर्णां सुरां पिबेत्॥ गोमूत्रमग्निवर्णं च पिबेदुदकमेव वा॥ सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु॥ गृही
त्वा मुशलं राजा सकृद्धन्यात्स्वयं गतः॥ वधेन शुध्यते स्तेनो ब्राह्मणस्तपसैव वा॥ गुरुतल्पो निकृत्यैवं वशिश्न
च वृषणं स्वयं॥ निधाय चांजलौ गच्छेदा निपाताच्च नैरृती॥ चांद्रायणान्वा त्रीन्मासानभ्यस्य नियतेंद्रियः॥
जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया॥ चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया॥ संकरापात्रकृत्यासु मासं

अ॰पु॰ १६९ ग्रोधनमैंद्वं॥मलिनीकरणीयेषुतप्तंस्यादधिकत्र्यहं॥तुरीयंब्रह्महत्यायाःक्षत्रियस्यवधेस्मृतं॥वैश्येष्टमांशो
वृत्तस्थेशूद्रेपस्तुषोडशः॥मार्जारनकुलौहत्वाचाषंमंडूकमेवच॥श्वगोधोलूककाकांश्चशूद्रहत्याव्रतंचरेत्॥
चतुर्णामपिवर्णानांनारीर्हत्वानवस्थिताः॥अमत्यैवप्रमाप्यस्त्रीशूद्रहत्याव्रतंचरेत्॥सर्पादीनांवधेनक्तमन
स्थ्यावायुसंयुतंस्थ्यस्थानाममस्थिमतांप्राणांस्तेयंकृत्वाप्यवेश्मतः॥चरेत्सांतपनंकृच्छ्रंचरत्यात्मविशुद्धये॥अ
क्षभोज्यापहरणेयानशय्यासनस्यच॥पुष्पमूलफलानांचपंचगव्यंविशोधयेत्॥तृणकाष्ठद्रुमाणांचशुष्का
न्नस्यगुडस्यच॥चेलचर्मामिषाणांचत्रिरात्रंस्यादभोजनं॥मणिमुक्ताप्रवालानांताम्रस्यरजतस्यच॥अ
यःकांस्योपलानांचद्वादशाहंकणान्नभुक्॥कार्पासकीटजोर्णानांद्विशफैकशफस्यच॥पक्षिगंधौषधीनां
चरज्वाश्चैवत्र्यहंपयः॥गुरुतल्पव्रतंकुर्याद्रेतःसिक्त्वास्वयोनिषु॥सख्युःपुत्रस्यचस्त्रीषुकुमारीष्वंत्यजा
सुच॥पैतृष्वस्रेयींभगिनींस्वस्रीयांमातुरेवच॥मातुश्चभ्रातुराप्तस्यगत्वाचांद्रायणंचरेत्॥अमानुषीषु
पुरुषउदक्यायामयोनिषु॥रेतःसिक्त्वाजलेचैवकृच्छ्रंसांतपनंचरेत्॥मिथुनंतुसदासेव्यपुंसियोषित राम॰
वाद्विजः॥गोयानेप्सुदिवाचैवसवासास्स्नानमाचरेत्॥चांडालांत्यस्त्रियंगत्वाभुक्त्वाचप्रतिगृह्यच॥पत १६९
त्यज्ञानतोविप्रोज्ञानात्साम्यंतुगच्छति॥विप्रदुष्टांस्त्रियंभर्त्तानिरुंध्यादेकवेश्मनि॥यत्पुंसःपरदारेषुतच्चे

५९॥पक्वान्नेनगृहीतेनमंत्रोच्चारंकरोतिवै॥अनिवार्यंतुतत्कृत्यंअंगेकृत्वातुसंस्थितं॥६०॥शौचंकृत्वातमभ्युक्ष
वर्कस्यापिस्वदर्शयेत्॥स्वच्छेकृतानांचौरैर्वाकांतारेविप्रवासिनां॥६१॥भक्ष्यभोज्येविशुध्यर्थंतेषांवक्ष्यामिनिष्कृ
तिं॥पुनःप्राप्यस्वदेशंचवर्णानामनुपूर्वशः॥६२॥कृच्छ्रस्यांतेब्राह्मणस्तुपुनःसंस्कारमर्हति॥पादोनांतेक्षत्रिय
स्तुअर्द्धंतेवैश्यएवच॥पादंकृत्वातथाशूद्रोदानंदत्त्वाविशुध्यति॥उदक्यांतुसवर्णायास्पृष्टाचेत्स्यादुद
क्यया॥६४॥तस्मिन्नेवाहनिस्नातोशुद्धिमाप्नोत्यसंशयः॥रजस्वलातुनाश्नीयात्सवर्णाहीनवर्णया॥६५॥या
वच्छुद्धिमवाप्नोतिस्नातास्नानेनशुध्यति॥मूत्रंकृत्वाव्रजन्वर्त्मस्मृतिभ्रंशाज्जलंपिबेत्॥६६॥अहोरात्रोषितोभूत्वाप
चगव्येनशुध्यति॥॥इत्याग्नेयेप्रायश्चित्तानि॥ ॥पुष्करउवाच॥ ॥प्रायश्चित्तंरहस्यादिवक्ष्येशुद्धिकरंपरं॥यो
रूपेणतुसूक्तेनमासजप्यादिनाघहा॥१॥मुच्यतेपातकैःसर्वैर्जप्त्वात्रिरघमर्षणं॥मुंडनंसर्वकृच्छ्रेषुस्नानंहो
मोहरेयदि॥२॥उत्थितस्तुदिवातिष्ठेदुपविष्टस्तथानिशि॥एतद्वीरासनंप्रोक्तंकृच्छ्रकृत्तेनपापहा॥३॥अष्टभिः
प्रत्यहंग्रासैर्यतिचांद्रायणंस्मृतं॥प्रातश्चतुर्भिःसायंचशिशुचांद्रायणंस्मृतं॥४॥यथाकथंचित्पिंडानांचत्वा
रिंशच्छतद्वयं॥मासेनभक्षयेदेतत्सुरचांद्रायणंभवेत्॥५॥त्र्यहमुष्णंपिबेदापस्त्र्यहमुष्णंपयःपिबेत्॥त्र्यहमु
ष्णंघृतंपीत्वावायुभक्षस्त्र्यहंपिबेत्॥६॥तप्तकृच्छ्रमिदंप्रोक्तंशीतैःशीतंप्रकीर्तितं॥कृच्छ्रातिकृच्छ्रंपयसादिवसा

अ॰पु॰ १६९

नेकविंशतिः ॥७॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं ॥ एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं ॥८॥ एतच्च प्र
त्यहाभ्यस्तं महासांतपनं स्मृतं ॥ त्र्यहाभ्यस्तमथैकैकं अतिसांतपनं स्मृतं ॥९॥ कृच्छ्रं पराकसंज्ञं स्यात् द्वादशाहमभो
जनं ॥ एकभक्तं त्र्यहाभ्यस्तं क्रमाद्यक्रमयाचितं ॥१०॥ प्राजापत्यस्तु पोष्णं तेपादस्यात् कृच्छ्रपादकः ॥ यत्र कृच्छ्रस्तथा
प्यत्रैस्तोयकृच्छ्रं जलेन तु ॥११॥ मूलकृच्छ्रं तथा मूलैर्दध्ना क्षीरेण तक्रतः ॥ मासं वा पयसा कृच्छ्रं स्यात् पापापहरं तभो
जनात् ॥१२॥ तिलैर्द्वादशरात्रेण कृच्छ्रमाग्नेयमार्त्तिनुत् ॥ गव्यं प्रसृजवलाजानां ब्रह्मकृच्छ्रं तदाचरेत् ॥१३॥ उपो
षितश्चतुर्दश्यां पंचदश्यामनंतरं ॥ पंचगव्यं समश्नीयात् हविष्यान्नादनंतरं ॥१४॥ मासेन द्विजनरः कृत्वा सर्व
पापैः प्रमुच्यते ॥ श्रीकामः पुष्टिकामश्च स्वर्गकामोघनष्टये ॥१५॥ देवताराधनपरः कृच्छ्रकारी स सर्वभाक् ॥
इत्याग्नेये रहस्यादिप्रायश्चित्तं ॥ ॥ पुष्कर उवाच ॥ ॥ परदारपरद्रव्यजीवहिंसादिके यदा ॥ प्रवर्त्तते नृणां चि
त्तं प्रायश्चित्तं स्तुतिस्तया ॥१॥ विष्णवे विष्णवे नित्यं विष्णवे विष्णवे नमः ॥ नमामि विष्णुं चित्तस्थमहंकारगतिं हरिं
२॥ चित्तस्थमीशमव्यक्तमनंतमपराजितं ॥ विष्णुमीड्यमशेषेण मनादिनिधनं विभुं ॥३॥ विष्णुश्चित्तगतो यन्मे राम. १६९
विष्णुर्बुद्धिगतः स्वयं ॥ करोति कर्तृभूतोसौ स्थावरस्य चरस्य च ॥४॥ तत्पापं नाशमायातु तस्मिन्नेव हि चिंतिते ॥
ध्यातो हरति यत्पापं स्वप्ने दृष्टस्तु भावनात् ॥५॥ तमुपेन्द्रमहं विष्णुं प्रणतार्तिहरं हरिं ॥ जगत्यस्मिन्निराधा

चारयेद्व्रतं ॥ स चेत्पुनः प्रदुष्येत सदृशेनोपमंत्रिता ॥ कृच्छ्रं चांद्रायणं चैव तदस्याः पावनं स्मृतं ॥ या करोत्येकरा
त्रेण वृषलीसेविता द्विजः ॥ तद्भैक्ष्यभुक्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥ ॥ इत्याग्नेये प्रायश्चित्ते ॥ ॥ महापापोप
पापानां प्रायश्चित्तं वदामि ते ॥ संवत्सरेण पतति पतितेन सहाचरन् ॥ याजनाध्यापनादीनामनुयानासनात् ॥
यो येन पतितेनैषां संसर्गं याति मानवः ॥ स तस्यैव व्रतं कुर्यात् तत्संसर्गस्य शुद्धये ॥ पतितस्योदकं कार्यं सपिं
डैर्बांधवैः सह ॥ निंदितेहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ ॥ दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्सदा ॥ अहोरात्रमु
पासीनां नशौचं बांधवैः सह ॥ निवर्त्तयेयुस्तस्मात्तु संभाषणादिकं ॥ ज्येष्ठांशं प्राप्नुयात्तस्य यवीया
न्गुणतोधिकः ॥ प्रायश्चित्ते तु चरिते पूर्णं कुंभमपां नवं ॥ तेनैव सार्द्धं प्रास्येत्स्नात्वा पुण्यजलाशये ॥ एवमे
व विधिं कुर्यात् योषित्सु पतितास्वपि ॥ वस्त्रान्नपानं देयं तु वसेयुश्च गृहांतिके ॥ येषां द्विजानां सावित्री नानू
द्येत यथाविधि ॥ तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत् ॥ विकर्मस्थाः परित्यक्तास्तेषामप्येतदादिशे
त् ॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ॥ मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥ व्रात्यानां
यजनं कृत्वा परेषामंत्यकर्म च ॥ अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥ शरणागतं परित्यज्य वेदं विप्ला
व्य च द्विजः ॥ संवत्सरं यवाहारस्तत्पापमपसेधति ॥ श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च ॥ नराश्वोष्ट्रैर्व

प्रा०पु०
१६९

राद्दे श्वप्राणायामेन शुध्यति ॥ स्नातकव्रतलोपे च कर्मत्यागे ऽप्यभोजनं ॥ ४५ ॥ हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरी
यसः ॥ स्नात्वानश्नन्नहः शेषमभिवाद्य प्रसादयेत् ॥ ४६ ॥ अवगूर्य चरेत्कृच्छ्रं चरेत्कृच्छ्रं निपातने ॥ कृच्छ्रातिकृच्छ्रं
कुर्वीत विप्रस्योत्पाद्य शोणितं ॥ ४७ ॥ चंडालादिरविज्ञातो यस्य तिष्ठेत वेश्मनि ॥ सम्यग्ज्ञातस्तु कालेन त
स्य कुर्वीत शोधनं ॥ ४८ ॥ चांद्रायणं पराकं च द्विजानां तु विशोधनं ॥ प्राजापत्यं तु शूद्राणां शेषं तदनुसारतः ॥
४९ ॥ गुडं कुसुंभं लवणं तथा धान्यानि यानि च ॥ कृत्वा गृहे ततो द्वारि तेषां दद्याद्धुताशनं ॥ ५० ॥ मृन्मयानां तु भां
डानां त्याग एव विधीयते ॥ द्रव्याणां परिशेषाणां द्रव्यशुद्धिर्विधीयते ॥ ५१ ॥ कूपैकपानसक्ता ये स्पर्शसंकरदू
षिताः ॥ शुद्ध्येयुस्त्व उपवासेन पंचगव्येन चाप्यथ ॥ ५२ ॥ यस्तु संस्पृश्य चंडालमश्नीयाद्धि स कामतः ॥ द्विजश्चांद्रा
यणं कुर्यात्तप्तकृच्छ्रमथापि वा ॥ ५३ ॥ भांडसंकुलसंकीर्णश्चांडालादिजुगुप्सितैः ॥ भुक्त्वा पीत्वा तथा तेषां षडरात्रे
ण विशुध्यति ॥ अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ॥ व्रतं चांद्रायणं कुर्यात्त्रिरात्रं शूद्र एव तु ॥ ५५ ॥ चंडालकू
पभांडेषु अज्ञानात्पिबते जलं द्विजः ॥ सांतपनं कुर्यात् शुद्ध्या परमोदितं ॥ ५६ ॥ चंडालेन तु संस्पृष्टो यस्त्वपः पिब
ते द्विजः ॥ त्रिरात्रं तेन कर्तव्यं शूद्रश्चोपवसेद्दिनं ॥ ५७ ॥ उच्छिष्टे द्विपदस्पृष्टः शुनाश्वेन च द्विजः ॥ उपोष्य रजनीमेकां
पंचगव्येन शुध्यति ॥ ५८ ॥ वैश्ये न क्षत्रियेणैव स्नानेनैकं समाचरेत् ॥ अध्वाने प्रस्थितो विप्रः कांतारे यद्यनूदके ॥

राम
१६९

श्रु

सा जिगेसस्नाप्यस कुक्षितः ॥ गायत्र्या होमयेद्वैश्वर्धीं त्रिमधुराप्लुतां ॥ यस्मिन्नेव व्याधिमाप्नोति तस्मिन्नस्वानेव
लिंगे मानसानां निजादीनां विशेषोऽस्तीन्द्रहरं भवेत् ॥ वातपित्तकफदोषांतिवश्च तथा शृणु ॥ शुक्लं पंचदशाया दंतं द्विधाया
ति च सुकृता ॥ अंगानैकेतकिं हनं वरमता श्वापरेण वा ॥ किंच नागोमलस्तत्र विरम्यत्रास्वदकृषिकाः ॥ नाशमलं कु
र्ममिलं तथा देहमलं चयत् ॥ शारसमापो ग्रसस्तत्र समाछोणितं तां व्रजेत् ॥ मांसात्कृतं ततो मेदो मेदसोत्वपि स्थितिसंभ
वः ॥ अस्थीमज्जा ततः शुक्रं शुक्राद्गर्भस्तथौजसः ॥ देशमात्म्यं बलं शक्तिं कालं प्रकृतिमेव वा ॥ ज्ञात्वा किंचित्ततं कुर्या
द्भेषजस्तथा बलं ॥ तिथिरिक्तां त्यजेत्सौम्यं मंदत्वं दारुणोग्रकं ॥ हरिगोद्विजचंद्रार्कसुरायान्नमति पूज्य वा ॥ शृणु
मंत्रमिदं विद्वान् भेषजारंभमाचरेत् ॥ ब्रह्मदक्षाश्विरुद्रेंद्रभूचंद्रार्कानलानिलाः ॥ ऋषयः सौषधीग्रामा भूतसं
घाश्च पांतु ते ॥ रसायनमिवर्षीणां देवानाममृतं यथा ॥ सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥ वातश्लेष्मात्म
को देशो बहुवृक्षो बहूदकः ॥ अनूप इति विख्यातो जांगलस्तद्विवर्जितः ॥ किंचिद्वृक्षोदके देशो यथा साधारणः स्मृ
तः ॥ जांगलः पित्तबहुलो मध्यमः साधारणः स्मृतः ॥ रूक्षशीतलगो वायुः पीतमुष्णं कटुत्रयं ॥ स्थिराम्लस्निग्धमधु
रं बलासलं प्रवक्ष्यते ॥ वृद्धिः समानैरेतेषां विपरीतैर्विपर्ययः ॥ रसास्वाद्वम्ललवणाः श्लेष्मला वायुनाशनाः ॥ कटु
तिक्तकषायाश्च वातुलाः श्लेष्मनाशनाः ॥ कट्वम्ललवणास्तेयास्तथा पित्तविवर्धनाः ॥ सक्तस्वादुकषायाश्च तथापि

धा

अ०पु०
१६९
त्तविनाशनाः॥ रसस्यैतद्गुणं नास्ति विपाकस्यैतदिष्यते॥ वीर्यात्स्वाकफवातघ्ना शीतापित्तविनाशनाः॥ प्रभावतस्म
याकर्मतिच्चकुर्वंति सुश्रुतः॥ शिशिरे चनसंते च निदाघे च यथाक्रमात्॥ चयप्रकोपप्रशमानाः कफस्य तु प्रकीर्त्ति
ताः॥ मेघकाले च शरदि हेमंते च यथाक्रमात्॥ चयप्रकोपप्रशमास्तथा पित्तस्य कीर्त्तिताः॥ वर्षादियो विसर्गस्तु हेमं
ताद्यास्तु यात्रयः॥ शिशिराद्यास्तथादानं ग्रीष्मांताऋतवस्त्रयः॥ सौम्या विसर्ग आदानमाग्नेयं परिकीर्त्तितं॥ वर्षा
दीस्त्रीनृतून् सोमस्स्वरस्यर्पयसीरसान्॥ जनयत्यम्ललवणमधुरास्त्रीन्यथाक्रमं॥ शिशिरादीनृतून् पंकस्य
रत्यर्यपि सोरसान्॥ विवर्द्धयेत्तथा तिक्तकषायकटुकान् क्रमात्॥ यथा रजन्यो वर्द्धंते बलमेवं हि वर्द्धते॥ क्रम
शो थमनुष्याणां हीयमाना सु हीयते॥ रात्रिभुक्तदिनानां च वयस्स्वतथैव च॥ आदिमध्यरसानेषु कफपि
त्तसमीरणाः॥ प्रसमं यांति कोपादौ काले स्तेषां वयः स्मृतः॥ प्रकोपोत्तमके काले समं तेषां प्रकीर्त्तितः॥ अति
भोजनतो विप्र तथा चाभोजनेन च॥ रोगा हि सर्वे जायंते वेगोदीरणधारणैः॥ अन्नेन कुक्षेर्द्वावंशावेकं पाले
न पूरयेत्॥ आश्रयं पवनादीनां तथैवतमशेषयेत्॥ व्याधिं निदानस्य तथा विपरीतमथौषधं॥ कर्त्तव्यमेत राम
देवात्र मया सारं प्रकीर्त्तितं॥ नाभेरूर्द्धमधश्चैव गुदश्रोण्यौ तथैव च॥ बलाशायित्तु पानानां देहस्थानं प्रकीर्त्ति १६९
तं॥ तथापि सर्वगाश्चैते देहे वायुर्विशेषतः॥ देहस्य मध्ये हृदयस्थानं तन्मनसः स्मृतं॥ कृशाल्पकेशश्चपलो बहु

रेमज्जमानं तमसस्य च॥६॥ हस्तावलंबनं विष्णुं प्रणमामि परात्परं॥ सर्वेश्वरेश्वर विभो परमात्मन्नधोक्षज॥ हृ
षीकेश हृषीकेश हृषीकेश नमोस्तु ते॥ नृसिंहानंत गोविंद भूतभावन केशव॥८॥ दुरुक्तं दुःकृतं ध्यातं शम
पापं नमोस्तु ते॥ यन्मया चिंतितं दुष्टं स्वचित्तवशवर्त्तिना॥९॥ आकार्ष्यमहमत्युग्रं तच्छमं नय केशव॥ ब्रह्मण्यदेव
गोविंद परमार्थपरायण॥१०॥ जगन्नाथ जगद्धामः पापं प्रशमयाच्युत॥ यच्चापराह्णे सायाह्ने मध्याह्ने च तथा
निशि॥११॥ कायेन मनसा वाचा कृतं पापमजानता॥ जानता च हृषीकेश पुंडरीकाक्ष माधव॥१२॥ नामत्रयो
च्चारणतः स्वप्ने यातु मम क्षयं॥ शारीरं मे हृषीकेश पुंडरीकाक्ष माधव॥१३॥ पापं प्रशमयाद्य त्वं वाक्कृतं मे
म माधव॥ यद्भुंजन् यत्स्वपंस्तिष्ठन् गच्छन् जाग्रत् यदास्थितः॥ यद्भुंजन् यत्स्वपंस्तिष्ठन् गच्छन् जाग्रत्
यदास्थितः॥१४॥ कृतं वा पापमर्थार्थं कायेन मनसा गिरा॥ तत्स्मात् प्रशमं सर्वं वासुदेवानुकीर्त्तनात्॥
१५॥ परं ब्रह्म परं धाम पवित्रं परमं च यत्॥ अस्मिन् संकीर्त्तिते विष्णौ यत्पापं प्रणश्यतां॥ यत्प्राप्य न नि
वर्त्तते गंधस्पर्शादिवर्जितं॥ सूरयस्तत्पदं विष्णोस्तत्सर्वं गमयत्वघं॥१७॥ पापप्रणाशनं स्तोत्रं यः पठेत्श्र
णुयान्नरः॥ शारीरैर्मानसैर्वापि वाचिकैश्चापि मुच्यते॥१८॥ सच पापग्रहादिभ्यो याति विष्णोः परं पदं॥
तस्मात्पापे कृते जाप्यं स्तोत्रं सर्वाघमर्दनं॥१९॥ प्रायश्चित्तमघौघानां स्तोत्रं व्रतकलेवरं॥ प्रायश्चित्तैस्तोत्र

जपैर्व्रतैर्नश्यति पातकं॥ तत्कार्यं प्रणिसंसिध्यै तामि वै भुक्तिमुक्तये॥२०॥ ॥इत्याग्नेये सर्वपापप्रायश्चित्ते पापनाश
नस्तोत्रं॥ ॥अग्निरुवाच॥ ॥प्रायश्चित्तं ब्रह्मणोक्तं वक्ष्ये पापोपशान्तिदं॥ स्यात्प्राणवियोगफलो व्यापारो हन
नं स्मृतं॥१॥ रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव च॥ ब्राह्मणं घातयेद्यस्तु स भवेद्ब्रह्मघातकः॥२॥ बहू
नामेककार्याणां सर्वेषां शस्त्रधारिणां॥ यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः॥३॥ आक्रोशितस्ताडितो वा ध
नैर्वा परिपीडितः॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं॥४॥ औषधाद्युपकारे तु न पापं स्यात्कृते मृते॥
पुत्रः शिष्यस्तथा भार्या शासितो न मृतो ऽत्यगं॥५॥ देशं कालं च यः शक्तिं पापं चावेक्ष्य यत्नतः॥ प्रायश्चित्तं प्र
कल्प्यं स्यात् यत्र चोक्ता न निःकृतिः॥६॥ गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेत्॥ प्रास्येदात्मानमग्नौ
वा मुच्यते ब्रह्महत्यया॥७॥ शिरःकपाली ध्वजवान् भैक्षाशी कर्म वेदयन्॥ ब्रह्महा द्वादशाब्दानि मितभुक् शु
द्धिमाप्नुयात्॥८॥ षड्भिर्वर्षैः कृच्छ्रचारी ब्रह्महा पूयते नरः॥ विहिते यदकामानां कामात्तु द्विगुणं स्मृतं॥९॥ प्राय
श्चित्तं प्रवृत्तस्य वधे स्यात्तु त्रिवार्षिकं॥ ब्रह्मघ्न क्षत्रि द्विगुणं विट्शूद्रे त्रिगुणं त्रिधा॥१०॥ अन्यत्र विप्रे सकलं पादो
नः क्षत्रिये स्मृतं॥ वैश्येऽर्धपादः शूद्रे स्याद्वृद्धस्त्रीबालरोगिषु॥११॥ तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः॥ वैश्ये
ऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः॥१२॥ अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्॥ पंचगव्यं पिबेद्गोघ्नो मासमा

सीत संयतः॥१३॥ गोष्ठेशायी गोनुगामी गोप्रदानेन मुच्यते॥ कृच्छ्रं चैवातिकृच्छ्रं वा पादकासोनपादिषु॥१४॥ व्रति
हधामतिकृच्छ्रं त्रितिवाला चरेत्तिगणी॥ हत्वा पूर्वविधानेन चरेद्व्रतं द्विजः॥ ब्राह्मणान्भोजयेच्छक्त्या दद्याद्धेमतिलो
दकं॥१५॥ मुष्टिचपेटकीलेन तथा शृंगादिमोटने॥ लगुडादिप्रहारेण गोवधं तं विनिर्दिशेत्॥ दमने दामने चैव शक
टादौ च योक्त्रिते॥ स्तंभशृंखलपाशैर्वा मृते पादोनमाचरेत्॥१७॥ काष्ठे सांतपनं कुर्यात् प्राजापत्यं तु लोष्ठके॥ त
प्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकं॥१८॥ मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः॥ हत्वा त्र्यहं पिबेत्
क्षीरं कृच्छ्रं चान्द्रायणं चरेत्॥१९॥ व्रतं रहस्ये रहसि प्रकाशेघो प्रकाशकं॥ प्राणायामशतं कार्यं सर्वपा
पनुत्तये॥२०॥ पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं॥ माध्वीकं टंकमाध्वीकं मैरेयं नालिकेरजं॥२१॥ नमद्या
न्यपि मद्यानि पैष्टी मुख्या सुरा स्मृताः॥ त्रैवर्णस्य निषिद्धा स्यात्पीत्वा तप्तं पयः शुचिः॥२२॥ कालाधीन भक्षयेद्दग्धं पिण्य
ण्याकं वा सकृन्निशि॥ सुरापाणापनुत्यर्थं वासी जटी युजी॥२३॥ ज्ञानाज्ञविद्विन्मूत्रं सुरासंस्पृष्टमेव च॥ पुन
संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥२४॥ मद्यभांडस्थिता आपः पीत्वा सप्तदिनं व्रती॥ चंडालस्य तु पानीयं पा
त्वा स्याच्च षड्दिनं व्रती॥२५॥ चंडालकूपभांडेषु पीत्वा सांतपनं चरेत्॥ पंचगव्यं त्रिरात्रान्ते पीत्वान्त्यजजलं द्विजः॥२६
मद्यकेटकसंचूकरां रसमुक्तिकपर्दिकान्॥ पीतानावोदकं चैव पंचगव्येन शुद्ध्यति॥२७॥ शूद्रकूपोदकं पी

त्वा त्रिरात्रेण विशुध्यति ॥ अंत्यावसायिनामन्नं भुक्त्वा चांद्रायणं चरेत् ॥ २८ ॥ आपत्काले शूद्रगृहे मनस्तापेन शुध्य-
ति ॥ शूद्रभाजनभुग्विप्रः पंचगव्यादुपोषितः ॥ २९ ॥ शूद्रादनिंद्यान्येतानि शुक्तं क्षीररसादिकं ॥ भुक्त्वा चार्यश्चवि
मुत्वा त्रिरात्रेण विशुध्यति ॥ ३० ॥ केशकीटावपन्नं च पादस्पृष्टं च कामतः ॥ भ्रूणघ्नावेक्षितं चैव संस्पृष्टं वाप्युदक्यया ॥
३१ ॥ काकाद्यैरवलीढं च शुना संस्पृष्टमेव च ॥ गवाद्यैरन्नमाघ्रातं भुक्त्वा त्र्यहमुपावसेत् ॥ ३२ ॥ रेतोविण्मूत्रभक्षी
तु प्राजापत्यं समाचरेत् ॥ चांद्रायणं नवश्राद्धे पराको मासिके मतः ॥ ३३ ॥ पक्षत्रये तु कृच्छ्रं स्यात्षण्मासे कृच्छ्रमे-
व च ॥ आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके ॥ ३४ ॥ पूर्वेद्युर्वार्षिकं श्राद्धं परेद्युः पुनराब्दिकं ॥ निषिद्धभ-
क्षणे भुक्ते प्रायश्चित्तमुपोषणं ॥ ३५ ॥ भूस्तृणं लशुनं भुक्त्वा शिशुकं कृच्छ्रमाचरेत् ॥ अभोज्यानां तु भुक्त्वान्नं स
त्रीशूद्रोच्छिष्टमेव च ॥ ३६ ॥ जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं पयः पिबेत् ॥ मधु मांसं च यो श्नीयाच्छावं सूतकमेव च ॥
३७ ॥ प्राजापत्यं चरेत्कृच्छ्रं ब्रह्मचारी यतिव्रती ॥ अन्यायेन परस्वस्य हरणं स्तेयमुच्यते ॥ ३८ ॥ मुशलेन हतो रा-
ज्ञा स्वर्णस्तेयी विशुध्यति ॥ अधःशायी जटाधारी पर्णमूलफलाशनः ॥ ३९ ॥ एककालं समश्नानो द्वादशा-
ब्दे विशुध्यति ॥ रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ॥ ४० ॥ स्तेयं कृत्वा सुरां पीत्वा कृच्छ्रं चाब्दं चरेन्नरः ॥ मणिमु- राम १७१
क्ताप्रवालानां ताम्रस्य रजतस्य च ॥ ४१ ॥ अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥ मनुष्याणां तु हरणे स्त्री-

णां क्षेत्रगृहस्य च ॥ ४२ ॥ वापीकूपतडागानां शुद्धिश्चांद्रायणं स्मृतं ॥ भक्ष्यभोज्यापहरणे परिव्राण्यासनस्य च ॥ ४३ ॥
पुष्पमूलफलानां च पंचगव्यं विशोधनं ॥ तृणकाष्ठप्रमाणानां वस्त्रशुष्कांनस्य गुडस्य च ॥ ४४ ॥ चेलचर्मामिषाणां च
त्रिरात्रं स्यादभोजनं ॥ पितुः पत्नीं च भगिनीमाचार्यतनयां तथा ॥ ४५ ॥ एवमेव विधिं कुर्याद्योषित्सु पतिता-
स्वपि ॥ यस्तु सः परदारेषु तस्यैनां धारयेद्व्रति ॥ ४६ ॥ रेतः सिक्त्वा कुमारीषु चांडालीस्वसुतासु च ॥ सपिंडापत्य-
दारेषु प्राणत्यागो विधीयते ॥ ४७ ॥ पतत्कृरोरेकरात्रेण वृषलीसेवनाद्द्विजः ॥ तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षे-
र्व्यपोहति ॥ ४८ ॥ पितृव्यदारागमने भ्रातृभार्यागमे तथा ॥ चांडालीं पुल्कसीं व्याधीं सुतां च भगिनीं सखीं ॥
मातुः पितुः स्वसारं च निक्षिप्तां शरणागतां ॥ मातुलानीं स्वसारं च सगोत्रामनिच्छतीं ॥ ५१ ॥ शिष्यभार्यां गुरो-
र्भार्यां गत्वा चांद्रायणं चरेत् ॥ ॥ इत्याग्नेये प्रायश्चित्तानि ॥ ॥ अग्निरुवाच ॥ देवाश्रमार्चनादीनां प्रायश्चित्तं तु
लोपतः ॥ पूजालोपे चाष्टशतं जपेद्द्विगुणपूजनं ॥ १ ॥ पंचोपनिषदैर्मंत्रैः कृत्वा ब्राह्मणभोजनं ॥ सूतिकांत्य-
जकोदक्यास्पृष्टं देवं शतं जपेत् ॥ २ ॥ पंचोपनिषदैः पूजा द्विगुणा द्वारमेव च ॥ विप्रभोज्यं होमलोपे होमस्नानं
तथार्चनं ॥ ३ ॥ होमद्रव्ये मूषिकाद्यैर्भक्षिते कीटसंयुते ॥ तावन्मात्रं परित्यज्य प्रोक्ष्य देवादि पूजयेत् ॥ ४ ॥ अंकु-
रार्पणमात्रं तु छिन्नं भिन्नं परित्यजेत् ॥ स्पृष्टे चैव तु संस्पृष्टे अन्यपात्रे तदर्पणं ॥ ५ ॥ देवमानुषविप्रघ्ने पूजा का-

अ॰ पु॰
२७२

लेतथैवच॥मंत्रकन्यादिविन्यासमूलेजप्याघ्नजपैत्॥६॥कुंभेनष्टेज्ञातजपोदेवैतुपतितेकरात्॥मिनेनष्टेचोपवास
ज्ञातद्धोमान्निर्विघ्नावयेत्॥७॥कृतेपापेनुतापोवैयस्यपुंसप्रजायते॥प्रायश्चित्तंतुतस्यैकंहरिसंस्मरणंपरं॥८॥
चांद्रायणंपराकोवाप्राजापत्यमघौघनुत्॥गायत्रीप्रणवस्तोत्रमंत्रजप्यपघातकं॥९॥कावेरीरात्रीजसंयुक्ते
राघेराद्यैस्तदंतकैः॥सूर्येशाद्यान्त्किर्मन्त्रैपेदिमंत्राकोद्याधिकाष्टधक॥१०॥ॐह्रींमायाश्चतुर्थ्यंतानमोंताःसर्वका
मदाः॥नृसिंहद्वादशार्णत्रिमालामंत्राघघौघनुत्॥११॥आग्नेयस्यपुराणस्यपठनंश्रवणादिकं॥विद्यास्वारूप
कोविष्णुरग्निरूपस्त्रगीयते॥१२॥परमात्मादेवमुखंसर्ववेदेषुगीयते॥प्रवृत्तेसुनिवृत्तेसुभुज्यतेभुक्तिमुक्ति
दः॥१३॥अग्निरापश्चविष्णोर्हिहवनंध्यानमर्चनं॥जप्यस्तुतिंतुप्रतिमान्नारीरंचाप्यघौघनुत्॥१४॥यदिस्वर्ण
दिदानादिधानाद्वादशाभेवच॥तुलापुरुषमुख्यानिमहादानानिषोडश॥१५॥अन्नदानानिमुख्यानिसर्वा
एघहराणिच॥तिथिवारर्क्षसंक्रांतियोगमघादिकालके॥१६॥गंगागयाप्रयागेचकाश्ययोध्यात्यवंति
काः॥कुरुक्षेत्रंपुष्करंचनैमिषंपुरुषोत्तमं॥१७॥सालग्रामप्रभासाद्यंतीर्थंचाघौघघातकं॥अहंब्रह्मप राम.
रंज्योतिरितिध्यानमघौघनुत्॥१८॥पुराणंब्रह्मचाग्नेयंब्रह्मविष्णुमहेश्वरः॥अवताराःसर्वपूजाःप्रतिष्ठाप्र २७२
तिमादिकं॥१९॥ज्योतिशास्त्रपुराणानिस्मृतयश्चतपोव्रतं॥अर्थशास्त्रंचसर्गाद्यायुर्वेदोधनुर्मतिः॥२०॥शि

क्षाछंदोव्याकरणंनिरुक्तंचाभिधानकं॥कल्पोन्यायश्चमीमांसाद्यन्यत्सर्वंहरिःप्रभुः॥२१॥एकोद्वयोयतोय
स्मिन्यःसर्वमितिवेदयुः॥तंदृष्ट्वान्यस्यपापानिविनिश्यंतिहरिश्चसः॥२२॥विद्याष्टादशरूपाचसूक्ष्मस्थूलोनेप
ब्रह्मपरं रोहरिः॥ज्योतिःसदक्षरंविष्णुश्चनिर्मलः॥२३॥ ॥इत्याग्नेयेप्रायश्चित्तानि॥ ॥अग्निरुवाच॥ ॥तिथिवारर्क्षदिव
समासार्द्धचोत्रसंक्रमे॥तूलीव्रतानिवक्ष्यामिवशिष्टशृणुयथाक्रमात्॥१॥शास्त्रोदितोहिनियमोव्रतंतच्चतपोम
त॥नियमस्तुविशेषास्तुव्रतस्यैवदमादयः॥२॥व्रतंहिकर्तुसंतापात्तपइत्यभिधीयते॥इंद्रियग्रामनियम
मान्नियमश्चाभिधीयते॥३॥अनग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते॥व्रतोपवासनियमैर्नानादानैस्तथाद्वि
ज॥४॥तेसुदेवादयःप्रीताभुक्तिमुक्तिप्रदायकाः॥उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह॥५॥उपवास
सविज्ञेयःसर्वभोगविवर्जितः॥कांस्यंमांसंमसूरंचचणकंकोरदूषकं॥६॥शाकंमधुपरान्नंचत्यजेदुपवसन्
स्त्रियं॥पुष्पलंकारवस्त्राणिधूपगंधानुलेपनं॥७॥उपवासेनदुष्येतदंतधावनमंजनं॥असकृज्जलपानाच्चतां
बूलस्यचभक्षणात्॥८॥उपवासःप्रदुष्येतदिवास्वप्नाच्चमैथुनात्॥क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः॥
९॥देवपूजाग्निहवनंसंतोषोस्तेयमेवच॥सर्वव्रतेष्वयंधर्मःसमान्योदशधास्मृतः॥१०॥नित्यस्नायीमिताहारो
गुरुदेवद्विजार्चकः॥क्षारंक्षौद्रंचलवणंमधुमांसानिवर्जयेत्॥११॥तिलमुद्गादृतेमत्स्यांमत्स्यमांसानिकोद्रवा

न॥ नीवकंदेव धान्यं च समीधान्यं तथैव च॥१२॥शितधान्यं तथा पण्यं मूले सारगुणं स्मृतं॥ हृहत्यष्टिकमुद्गाश्चकलापाः
सतिलायवाः॥१३॥१३॥श्यामाकाश्चैवनीवारा गोधूमाद्या व्रते हिताः॥ चतुर्नै क्षेत्रकुकृष्णाश्याकंदधिघृतं पयः॥१४॥
श्यामाकुडुणलिनीवारायावकामूलतंडुला॥ हविष्यव्रतनक्तादौ अग्निकार्यादिके हितं॥१५॥मधुमांसं विहायान्यत
व्रते चाहितमीरितं॥अहं प्रातस्त्र्यहं सायं त्र्यहमयाचितं॥१६॥त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन्द्विजः॥ए
कैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्॥१७॥त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विजः॥गोमूत्रं गोमयं क्षी
रं दधि सर्पिः कुशोदकं॥१८॥एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं॥ पृथक्सांतपनं द्रव्यैः षडहः सोपवास
कः॥१९॥सप्ताहेन तु कृच्छ्रोयं महासांतपनोघहा॥ द्वादशाहोपवासेन पाराकः सर्वपापहा॥२०॥महापराकस्त्रि
गुणस्त्वयमेव प्रकीर्तितं॥ पौर्णमास्यां पंचदश ग्रासमाहैवासमोजनः॥२१॥एकापायेत तो ह्रासी चांद्रायण
मतोन्यथा॥ कपिलागोपरं मूत्रमर्धांगुष्ठं च गोमयं॥२२॥ क्षीरं सप्तपलं दद्यात् दुग्धं चैव पलत्रयं॥ घृतमेकपलं
दद्यात् पलमेकं कुशोदकं॥२३॥गायत्र्यागृह्य गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधिक्राव्णो
ति वै दधि॥२४॥तेजोसीति तथाचाज्यं देवस्य त्वा कुशोदकं॥ ब्रह्मकूर्चो भवत्येवं आपो हि ष्ठेत्यृचं च यजेत्॥२५॥अघ
मर्षणसूक्तेन संयोज्य प्रणवेन वा॥ पीत्वा सर्वाघनिर्मुक्तो विष्णुलोकी तु ह्युपोषितः॥२६॥उपवासी सायं भोजी यती

षष्ठांनकालभवान्॥ मांसवर्जी चाश्वमेधी सत्यवादी दिवं व्रजेत्॥ अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च॥ देवव्र
तवृषोत्सर्गचूडाकरणमेखलाः॥२८॥मंगलमभिषेकं च मलमासे विवर्जयेत्॥ दर्शादर्शस्तु चांद्रस्यात्रिंशा
हश्चैव सावनः॥२९॥मासः सौरस्तु संक्रांतिर्नाक्षत्रो भविवर्तनात्॥ सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृ
तः॥३०॥आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते॥ आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः॥३१॥कुर्या
च्छ्राद्धं तत्र रविः कन्यां गच्छतु वा न वा॥ मासि संवत्सरे चैव तिथिद्वैधं यथा भवेत्॥३२॥तत्रोत्तमोत्तरा ते या पूर्वेत
स्यान्मलिम्लुचः॥ उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः॥३३॥दिवा पुण्यास्तु तिथयो रात्रौ नक्तव्रते शु
भाः॥ युग्माग्नियुगभूतानि षण्मुन्योर्वसुरंध्रयोः॥३४॥रुद्रेण द्वादशीयुक्ता चतुर्दश्याथ पूर्णिमा॥ प्रतिपद
त्यमावास्या तिथ्योर्युग्मं महाफलं॥३५॥एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतं॥ नरैः कस्मिन्व्रतिनां विवाहो
पनयादिषु॥ सद्यः शौचं समाख्यातं कांतारापदि संपति॥ आरब्धदीर्घतपसां न रजो व्रतहा स्त्रियां गर्भिणी
सूतिका भक्तकुमारी च रजस्वला॥ यदाशुद्धा तदान्येन कारयेत क्रियां सदा॥३८॥क्रोधात्प्रमादाल्लोभाद्वा
व्रतभंगो भवेद्यदि॥ दिनत्रयं न भुंजीत मुंडनं शिरसोथवा॥३९॥असामर्थ्ये व्रतकृतौ पत्नीं वा कारयेत्सुतं॥ सू
तके मृतके कार्यं प्रारब्धं जननेप्सितं॥४०॥व्रतस्थं मूर्छितं दुग्धपानाद्यैरुद्धरेद्गुरुः॥ अष्टौ तानि व्रतघ्नानि आपो

मूलं फलं पयः ॥४१॥ इति ब्रह्मप्रियकाम्येव गुरोर्वचनमौषधं ॥ कीर्त्तिसंततिविद्यादिसौभाग्यारोग्यवृद्धये ॥४२॥ नै
र्मल्यभुक्तिमुक्त्यर्थं कुर्वे व्रतपते व्रतं ॥ इदं व्रतं मया श्रेष्ठं गृहीतं पुरतस्तव ॥४३॥ निर्विघ्नां सिद्धिमायातु त्वत्प्रसादा
ज्जगत्पते ॥ गृहीतेस्मिन् व्रते देव यद्यपूर्णे म्रियेत्यहं ॥४४॥ तत्सर्वं पूर्णमेवास्तु प्रसन्ने त्वयि सत्पतौ ॥ व्रतमूर्त्ति
जगद्भूतिं मंडले सर्वसिद्धये ॥ मनसा कल्पितैर्भक्त्या पंचगव्यैर्जलैः शुभैः ॥ पंचामृतैस्नापयित्वा त्वमेव नव पाप
हा ॥ गंधपुष्पोदकैर्युक्तः मयार्घमर्घ्यते स्तु नं ॥ गृहाण पाद्यमाचाम्य मर्घार्हं कुरु मां सदा ॥ वस्त्रं वस्त्रपते पुण्य
गृहाण कुरु मां सदा ॥ भूषणाद्यैः सुवस्त्राद्यैश्छादितं व्रतसत्पते ॥४८॥ सुगंधिगंधविमलं गंधं मूर्त्ते गृहा
ण वै ॥ पापगंधविहीनं मां कुरु त्वं हि सुगंधकं ॥४९॥ पुष्पं गृहाण पुष्पादिमूर्त्ते मां कुरु सर्वदा ॥ पुष्पगंधसु
विमलमायूरारोग्यवृद्धये ॥५०॥ सुधूपधूपितं मां त्वं कुरु धूपितसत्पते ॥ दीपमूर्ध्वशिखं मूर्त्ते गृहाणाखिलभा
स्कर ॥५१॥ दीपमूर्त्ते प्रकाशाद्य सर्वदोर्ध्वगतिं कुरु ॥ प्रसन्नादिकं नैवेद्यं गृहाणान्नादिसत्पते ॥५२॥ अन्नादि
पूर्णं कुरु मामन्नदं सर्वदायकं ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं मया प्रभो ॥५३॥ यत्पूजितो व्रतपदे परिपूर्णं तद
स्तु मे ॥ धर्मं देहि धनं देहि सौभाग्यं गुणसंतति ॥५४॥ कीर्त्तिं विद्यां देहि चायुः स्वर्गं मोक्षं च देहि मे ॥ इमां पूजां व्र
तपते गृहीत्वा व्रतरणंतये ॥५५॥ पुनरागमनायैव वरदानाय वै प्रभो ॥ यत्पूजितो व्रतपते व्रते सुव्रतमूर्त्तयः

५६॥ पूजा सुवर्णजा धाम्न्यत्राका वै भूमिशायिना ॥ जपो होमश्च सामान्यं व्रतांते दानमेव च ॥५७॥ चतुर्विंशद्वा
दश वा पंच वा त्रयमेककः ॥ विप्राः पूज्याः सगुरवो भोज्याः शक्त्या तु दक्षिणा ॥५८॥ देया गावः सुवर्णाद्याः पादुको
पानहौ एयकं ॥ जलपात्रं च मृद्भांडं च शुक्तिका कव मासनं ॥५९॥ शय्या वस्त्रयुगं कुंभाः परिभाषेयमीरिता ॥ ॥ इत्याग्नेये
व्रतपरिभाषा ॥ ॥ अग्निरुवाच ॥ ॥ वक्षे प्रतिपदादीति व्रतान्यखिलदानि ते ॥ कार्त्तिकाश्वयुजे चैत्रे प्रतिपद्ब्र
ह्मणीप्सिति ॥१॥ पंचदश्यां निराहारः प्रतिपद्यर्चयेदजं ॥ ॐ तत्सद्ब्रह्मणे नमो गायत्र्या चाब्दमेककं ॥२॥ द्वेमा
लाश्रुवं दक्षे वामे दंडकमंडलुं ॥ लंबकूर्चं च जटिलं हैमं ब्रह्माणमर्चयेत् ॥३॥ शक्त्या क्षीरं प्रदद्यात्तु ब्रह्मा मे प्री
यतामिति ॥ निर्मलो भोगभुक्त्वं देहं मोक्षी विप्रो व्रती भवेत् ॥ धन्यं व्रतं प्रवक्ष्यामि चाधन्यो धन्यतां व्रजेत् ॥ मार्गशीर्षे
प्रतिपदि नक्तं कृत्वा त्वुपोषितः ॥५॥ अग्नये नम इत्यग्निं प्राअब्दं सर्वभाग्भवेत् ॥ प्रतिपद्येकभक्ताशी समाप्ते क
पिलाप्रदः ॥६॥ वैश्वानरपदं याति शिखिव्रतमिदं स्मृतं ॥ ॥ इत्याग्नेये प्रतिपद्व्रतानि ॥ ॥ अग्निरुवाच ॥
द्वितीयाव्रतकं वक्षे भुक्तिमुक्तिप्रदायकं ॥ पुष्पाहारो द्वितीयायां अश्विनौ पूजयेत्सुरौ ॥१॥ ब्रह्मस्वरूपसौ
भाग्यं स्वर्गतां व्रजते व्रती ॥ कार्त्तिके शुक्लपक्षस्य सा द्वितीया यमं यजेत् ॥२॥ अब्दं तपोषितः स्वर्गं गच्छेत्तु नरकं
व्रती ॥ अशून्यशयनं वक्ष्ये च वैधव्यादिदीपनं ॥३॥ कृष्णपक्षे द्वितीयायां श्रावणस्य चरेरिदं ॥ श्रीवत्सधारिन्

श्रीकांतश्रीधामश्रीपते व्यपा॥४॥गार्हस्थ्यं मां प्राणस्नेहयातु धर्मार्थकामदं॥ च्च्रयो मा प्रणस्येम प्रणश्यतु देव
तां॥५॥ पितरो मा प्रणस्यं तु मंतो दामा तु न्नेदतः॥ लक्ष्म्या विमुच्यते देवो न कदाचिद्यथा भवान्॥ तथा कलत्र संबं
धो देव मा मे विनिद्य ते॥ लक्ष्म्या न शून्य वरदयथा ते शयनं तथा॥७॥ शय्या ममाप्यशून्यास्तु तथैव मधुसूदन॥ ल
क्ष्मीं विष्णुं यजेद्वृष्टं शय्यायां हि फलानि च॥८॥ प्रतिमासं च सोमाय दद्याद्दर्पसमं त्वकं॥ गगनांगण संदीपदुग्धा
ब्धिमंथनोद्भव॥९॥ भामासित दिशा भोग रमानुज नमोस्तु ते॥ ॐ सुश्रीवाय नमः सोमात्मा सोमात्मा नेह रिं यजेत्॥
१०॥ घंटं सहं श्रियै नमो दशरूपाय मूलात्मने॥ घृतेन होमो नक्तं च शय्यां दद्याद्द्विजातये॥११॥ दीपने भाजने युक्तं
छत्रोपानह मासनं॥ सोदकुंभं च प्रतिमां विप्राय य प्रधानकं॥१२॥ यथा इ एवं कुरुते भुक्तिमुक्तिमवाप्नुयात्॥
कांतिव्रतं प्रवक्ष्यामि कार्त्तिके न सिते चरेत्॥१३॥ नक्तभोजी द्वितीयायां पूजयेद्बलकेशवौ॥ वर्षं प्राप्नोति वै कां
तिमनो वांछितदायकं॥१४॥ पौषशुक्लद्वितीयादि कृत्वा दिन चतुष्टयं॥ सदीक स मुस्नाचस्नातास्तवौषधी॥
रिंये॥१५॥ नाम्नारुरुच्युतानंतरूपी केशोभिपूजयेत॥ पादेना भ्यं च च क्षं स्वे पिक्रमाच्छिरसि पुष्पके॥१६॥ शशिचं
द्रशशांके इंदुसंज्ञाभिश्चार्घ्य हिंदधि॥ नक्तं भुंजीत च न रोषा व निशि ति चंद्रमा॥१७॥ षण्मासपारयंचार्द्रं श्राप्नुयात
सकलं व्रती॥ एतद्व्रतं न पूर्वं हि भिः कृतं पूर्वं सुरादिभिः॥१८॥ इत्याग्नेये द्वितीयाव्रतानि॥ अग्निरुवाच॥ ॥ राम॰
१७५

तृतीयाव्रतमाख्यास्ये भुक्तिमुक्तिप्रदं च यत्॥ ललितानंसतृतीयामूलं गौरीव्रतं शृणु॥१॥ तृतीयायां चैत्रशुक्ले ऊढा गौरी हरेण हि॥ श्र
ति उस्मात्तोत्तंयेच्छं भुं गौर्या हैमफलवाप्तिभिः॥२॥ नमो स्तु पाटलायै वै पादौ देव्यै शिवस्य च॥ शिवायेति च संकीर्त्तयेत्
यभुक्तयेयजेत्॥३॥ त्रिपुरघ्नाय रुद्राय भवान्यै जन्मयोर्द्वयो॥ शिवं भद्राय च स्वराय विजयायै च जानुनी॥४॥ ई
शानेति कटिं देव्यै शंकरायेति शंकरं॥ कुक्षिद्वयं च कोटव्यै शूलिनं स्थूलपाणये॥ मंगलायै नमस्तुभ्यं उदरं चा
भिपूजयेत्॥ सर्वात्मने नमो रुद्रमैशान्यै च कुचद्वयं॥ शिवं वेदात्मने तद्वत्रुद्राण्यै कण्ठमर्चयेत्॥ महादे
वाय च शिवं च अनंतायै करद्वयं॥७॥ त्रिलोचनायेति हरं बाहुं कालानलप्रिये॥ सोमाग्राय सहेशाय भूषणानि
प्रपूजयेत्॥८॥ अशोकमधुवासिन्यै ईश्वरायेति चोष्ठकौ॥ चतुर्मुखप्रियेचा संहराय स्थाणवे नमः॥९॥ नमोर्द्धना
रीशरीरममितांगौ च नासिकां॥ नम उग्राय लोकेशं ललितेति पुनर्भ्रुवौ॥१०॥ शिवाय पुनर्हर्त्ता रिं वासंत्यै वतथा
त्मकं॥ नमः श्रीकंठनाथायै शिवकेशाय दोहयेत्॥ भीमोग्राय च रूपिण्यै शिवं स्व वल्लिने नमः॥ मल्लिकाशोककम
मल छ दंतगरमालती॥ कुंदं कनकवीरं च बाणमश्रातकं क्रमं॥ चैत्रे शृंगोदकं मासस्यदेवदेव्य अतः स्वपेत्॥ प्रात
स्नातासमभ्यर्च्य पूजयेद्वापिकुंभकं॥ तदष्टकं द्विजे दद्यात् ललिता प्रीयतां मम॥१४॥ कूपोदकं गोमयं च मंदारं बि
ल्वपत्रकं॥ दध्या कुशोदकं क्षीरं कार्त्तिके पृषदाज्यकं॥१५॥ गोमूत्राज्यं कुशप्तति लं पंचगव्यं क्रमासनं॥ ललिता विजया

भवान्यग्नानी कुमुदा शिवा ॥१६॥ वासुदेवी तथा गौरी मंगला कमला सती ॥ चैत्रादौ दानकाले च प्रीयतामिति वाचयेत् ॥
१७॥ फलमेकं परित्याज्यं व्रतांते शयनं ददेत् ॥ उमामहेश्वरं हैमं वृषभं च गवा सह ॥ १८॥ गुरुं च मिथुनान्यर्च्य वस्त्रा
द्यैः सर्वमाप्नुयात् ॥ सौभाग्यारोग्यरूपायुः सौभाग्यशयनव्रतात् ॥१९॥ नभसे वाथ वैशाखे कुर्यान्मार्गशिरस्य
च ॥ शुक्लपक्षे तृतीयायां ललितायै नमो यजेत् ॥२०॥ प्रतिपक्षं ततः स्नात्वा वर्धते मिथुनानि च ॥ चतुर्विंशतिमभ्यर्च्य
वस्त्राद्यैर्भुक्तिमुक्तिभाक् ॥२१॥ उक्तो मार्गो द्वितीयोयं सौभाग्यव्रतमावदेत् ॥ फाल्गुनादि तृतीयायां लवणं यस्तु वर्ज
येत् ॥२२॥ समाप्ते शयनं दद्यात् गृहं चोपस्करान्वितं ॥ अलंकाराणि सर्वाणि भवानी प्रीयतामिति ॥२३॥ सौभाग्यार्थं
तृतीयोक्ता गौरीलोकादिदायिनी ॥ माघे भाद्रे च वैशाखे तृतीयाव्रतकृत्तथा ॥२४॥ दमनकतृतीयास्ता चैत्रे दमन
केर्यजेत् ॥ आत्मतृतीयामन्नाशे प्रार्च्येष्टभोजनादिना ॥२५॥ गौरी काली उमा भद्रा दुर्गा कांतिः सरस्वती ॥ मार्गतृती
यामारभ्य सौभाग्यं स्वर्गमाप्नुयात् ॥२६॥ ॥ आग्नेये तृतीयाव्रतानि ॥ ॥ अग्निरुवाच ॥ ॥ चतुर्थीव्रतमाख्यास्ये
उ भुक्तिमुक्तिप्रदं हिते ॥ माघशुक्लचतुर्थ्यां तु उपवासी यजेत् गणं ॥१॥ पंचम्यां च तिलान्नादी वर्षैर्निर्विघ्नतः सुखी ॥ गं
स्वाहा मूलमंत्रेण गामाघ हृदयादिकं ॥२॥ आगच्छोल्काय च त्वा वा त्यगच्छोल्काय विसर्जनं ॥ उल्कांतैर्गादि दिग्धाद्यैः पू
जयेन्मोदकादिभिः ॥३॥ ओं महोल्काय विद्महे वक्रतुंडाय धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ मासि भाद्रपदे वापि चतु

र्थ्यां कृत्वैवं व्रजेत् ॥४॥ चतुर्थ्यंगारके भ्यर्च्य गणं सर्वमवाप्नुयात् ॥ चतुर्थ्यां फाल्गुने नक्तमविघ्नाख्या चतुर्थ्यपि ॥५॥ च
तुर्थ्यां दमनैः पूज्य चैत्रे प्राच्य गणं सुखी ॥ ॥ आग्नेये चतुर्थीव्रतानि ॥ ॥ अग्निरुवाच ॥ ॥ पंचमीव्रतकं वक्ष्ये आरो
ग्यस्वर्गमोक्षदं ॥ नभो नभस्याश्विने वा कार्त्तिके शुक्लपक्षिके ॥ वासुकिः तक्षकः पूज्यः सर्वसौख्यप्रदायकः ॥ षष्ठ्यां
फलाशिनो र्घ्यादौ भुक्तिमुक्तिमवाप्नुयात् ॥२॥ स्कंदषष्ठीव्रतं प्रोक्तं भाद्रे षष्ठ्यामयाक्षयं ॥ कृष्णषष्ठीव्रतं वक्ष्ये मार्ग
शीर्षे चरेद्व्रतं ॥३॥ अनाहारो वर्षमेकं स भुक्तिमुक्तिमाप्नुयात् ॥ ॥ आग्नेये षष्ठिव्रतानि ॥ ॥ अग्निरुवाच ॥ ॥ सप्तमी
व्रतकं वक्ष्ये सर्वथा भुक्तिमुक्तिदं ॥ माघमासेब्जके शुक्ले सूर्यं प्राप्य विशोकवान् ॥ सर्वावाप्तिस्तु सप्तम्यां मासि भा
द्रेर्कपूजनात् ॥ पौषे मासि सितेन स्नात्वा प्राश्यार्कं पापनाशनं ॥ कृष्णपक्षे तु माघस्य सर्वावाप्तिस्तु सप्तमी ॥ फाल्गु
ने तु सिते नंदा सप्तमी चार्कपूजनात् ॥ मार्गशीर्षे सिते चाब्दं प्रतिपत् सप्तमी स्त्रियाः ॥ ॥ आग्नेये सप्तमीव्रतानि ॥
अग्निरुवाच ॥ ॥ वक्ष्ये व्रतान्यष्टम्यां रोहिण्यां प्रथमं व्रतं ॥ मासि भाद्रपदेष्टम्यां रोहिण्यामर्धरात्रके ॥ कृष्णो जातो
यतस्तस्यां जयंती स्यात्ततोष्टमी ॥ सप्तजन्मकृतात्पापान्मुच्यते चोपवासतः ॥ कृष्णपक्षे भाद्रपदे अष्टम्यां रोहिणी
युते ॥ उपोषितोर्चयेत् कृष्णं भुक्तिमुक्तिप्रदायकं ॥ आवाहयाम्यहं कृष्णं बलभद्रं च देवकीं ॥ वसुदेवं यशोदां च गाः पूजया
मि नमोस्तु ते ॥ योगाय योगपतये योगेशाय नमो नमः ॥ योगादिसंभवायैव गोविंदाय नमो नमः ॥ स्नानं कृष्णाय

व्र॰पु॰ पयात्तुग्रर्घ्यं चानेन दापयेत्॥ यज्ञेश्वराय यज्ञाय यज्ञानांपतये नमः॥ यज्ञोपि संभवायैव गोविंदाय नमो नमः॥ गृहाण दे
१२५ वपुष्पाणि सुगंधीनि प्रियाणि ते॥ सर्वकामप्रदो देव नमो देव वंदितः॥ धूपधूपित धूपत्वं धूपितैस्त्वं गृहाण मे॥ सुगं
धं धूपगंधाढ्यं कुरुष्मा सर्वदा हरे॥ दीप दीप्त महादीप्तं दीपदीप्तिश्च सर्वदा॥ मया दत्तं गृहाण त्वं कुरु चोर्ध्वगतिं च
मां॥ विश्वाय विश्वपतये विश्वेशाय नमो नमः॥ विश्वादि संभवायैव गोविंदाय निवेदितं॥ धर्माय धर्मपतये धर्मेशा
य नमो नमः॥ धर्मादि संभवायैव गोविंद शमनं कुरु॥ सर्वाय सर्वपतये सर्वेशाय नमो नमः॥ सर्वादि संभवायैव
गोविंदाय च पारणं॥ क्षीरोदार्णव संभूत अत्रिनेत्र समुद्भव॥ गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम॥ स्थंडि
ले स्थापयेद्देवं सचंद्रां रोहिणीं यजेत्॥ देवकीं वसुदेवं च यशोदां नंदमेव च॥ अर्द्धरात्रे पयोधारां पातयेद्गुडसर्पिषं॥
वस्त्रहेमादिकं दद्यात् ब्राह्मणान् भोजयेद्व्रती॥ जन्माष्टमीव्रतकरः पुत्रवान् विष्णुलोकभाक्॥ वर्षे वर्षे तु यः कुर्या
त् पुत्रार्थी वेत्ति लोभयं॥ पुत्रान् देहि धनं देहि आयुरारोग्य संमतिं॥ कामं धर्मं च सौभाग्यं स्वर्गं मोक्षं च देहि मे॥
इत्याद्येपि जयंत्यष्टमीषु॥ ॥ अग्निरुवाच॥ ॥ ब्रह्मादिमातृयजनाजपेन्मातृगणाष्टमी॥ कृष्णाष्टम्यां चैत्रमासे पू राम॰
ज्या वृंदकृष्ण मर्ध्यमाकृ॥ १॥ कृष्णाष्टमीव्रतं वक्ष्ये मासे मार्गशिरे चरेत्॥ नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राशयेन्निशि १२५
॥ भूमिशयी शिवं पांचशंकरं पूजयेद्व्रती॥ पौषेयस्तं घृतं प्राश्य माघे क्षीरी महेश्वरं॥ ३॥ महादेवं फाल्गुने च ति

लाशी सम्पोषितः॥ चैत्रे स्थाणुं यवाशी वा वैशाखे यविषं यजेत्॥ ४॥ आषाढे गोमयाशी पुष्कराख्ये शर्वमर्च्य तु कृ
त्रियंबकं भाद्रपदे बिल्वपत्राशनो निशि॥ ५॥ श्रितं तंदुलं वा श्वयुजे ह्यंशरूपं च कार्त्तिके॥ दध्याशी होमकारी स्याद्वर्षे
तु मंडलं यजेत्॥ ६॥ गोवस्त्रं हेमगुरवे दद्याद्विप्रेभ्य ईदृशं॥ प्रार्थयित्वा द्विजान्भोज्य भुक्तिमुक्तिमवाप्नुयात्॥ ७॥ नक्ता
सी त्वष्टमीषु स्यात् वत्सरांते च धेनुदः॥ पौरंदरं पदं याति सुगति व्रतमुच्यते॥ ८॥ अष्टमी बुधवारेषु पक्षयोरुभयो
र्यदा॥ तदा व्रतं प्रकुर्वीत स्वयं वासयुडासितां॥ ९॥ तस्मान्नियमकर्त्तारो न स्युः खंडितसंपदः॥ तंडुलस्याष्टमु
ष्टीनां वर्जयित्वांगुलद्वयं॥ नक्तं कृत्वा ताम्रपुटे सगर्ग्रोषकलं बिकं॥ साम्बिकं पूजयित्वा च भुंजीत कथाश्रयात्॥
शक्तितो दक्षिणां दद्यात् गर्गरीं तंडुलान्वितां॥ वीरो द्विजोस्य भार्यास्ति रम्भा पुत्रोस्य कौशिकः॥ अजिता विजया तस्य
वीरस्य धनदो वृषः॥ कौशिकस्तं गृहीत्वा तु गोपालैश्चारयन् वृषं॥ गंगायां स्नातुं कुरुते घनीत चौरैर्वृषस्तया॥ यदा
वृषमपश्यन्स वृषं साक्षितुमागतः॥ विजया भगिनी मुक्तो सद दर्शसरोवरे॥ दिव्यस्त्रीयोषितो वृंदमब्रवीद्देहि
भोजनं॥ स्त्रीवृंदं सूचे व्रतकृत् भक्ष्यत्वमतिथिर्यतः॥ व्रतं कृत्वा शुभं भुजे प्राप्तवानूवनपालकं॥ गतो वीरं सवृ
षो विजयासहितस्तदा॥ वीरेण विजया दत्ता यमाय स्तरितः पिता॥ व्रतं तावत्कौशिकोपित्वयो ध्यायान्नृपो भ
वत्॥ पित्रोस्तु नरके दृष्ट्वा विजयां शायमागते॥ गयामागतं प्रोचे मुच्येत नरकात् कथं॥ व्रतं दयात्मनः प्रोचे प्राप्यत

अ०पु० व कौशिका नृपदौ॥ बुधाष्टमीव्रतफलं स्वर्गतोपि तरौ ततः॥ विजया तु पिता चक्रे व्रतं भुक्त्यादिसिद्धये॥ अशोकक
१७८ लिका त्वष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः॥ त्वामशोक हराभीष्ट मधुमाससमुद्भवं॥
पिबामि शोकसंतप्तो मामशोकं सदा कुरु॥ चैत्रादौ मातृपूजाकृत अष्टम्यां जयते रिपून्॥ ॥आग्नेये अष्टमीव्रता
नि॥॥ अग्निरुवाच॥॥ नवमीव्रतकं वक्ष्ये भुक्तिमुक्त्यादिसिद्धिदं॥ देवी पूज्याश्विने शुक्ले गौर्यरिष्टा नवमीव्रतं॥१॥
पिष्टकाख्या तु नवमी पिष्टाद्देवीं तु पूजयेत॥ अष्टम्यामाश्विने शुक्ले कन्यार्केमूलभेयदा॥ अघार्दिना सर्वदा सैव मह
ती नवमी स्मृता॥ दुर्गा तु नवगेहस्था एकागारस्थिताथवा॥३॥ पूजिताष्टादशभुजा शेषाः षोडशसंकराः॥ रुद्रचं
डा प्रचंडा च चंडोग्रा चंडनायका॥४॥ चंडा चंडवती पूज्या चंडरूपातिचंडिका॥ क्रमान्मध्ये चोग्रचंडा महिषमर्दिनी॥
५॥ ॐ दुर्गे दुर्गे रक्षिणि स्वाहा॥ दशाक्षरो मंत्रः॥ एवं जपति यो नित्यं नासौ केनापि बाध्यते॥ कपालं खेटकं घंटं दर्प
णं तर्जनी धनुः॥६॥ ध्वजं डमरुकं पाशं वाम हस्तेषु बिभ्रती॥ शक्तिमुद्गरशूलं च वज्रं खड्गं च खेटकं॥७॥ शंख
चक्र शलाकां च आयुधानि च पूजयेत्॥ पशुं च कालिका कालीति जप्त्वा खड्गेन घातयेत्॥८॥ कालि कालि वज्रेश्वरि राम
लोहदंडायै नमः॥ नंदे वै रुचिरं मांसं पूजनाय वनेकृते॥९॥ वायव्यां पापराक्षसेभ्यः रक्षे नमहेश्वरि॥ विदारिका १७८
यैचाग्नेय्यां महाकौशिकायजे ततस्मा यतोन्नपस्त्राया छाने पिष्टमयं हरेत॥ दद्यास्कंदविशाखाभ्यां ब्राह्मीप्राय

शितायजेत॥ जयंती मंगला काली भद्रकाली कपालिनी॥ दुर्गा शिवा क्षमा धात्री स्वधा स्वाहा नमोस्तुते॥ देवीं पंचा
मृतैः स्नाप्य पूजयेद्दर्पणादिना॥ ध्वजादिरथयात्रादिबलिदानं तथादिकृत॥ ॥इत्याग्नेये नवमीव्रतानि॥॥ अग्नि
रुवाच॥॥ दशमीव्रतकं वक्ष्ये धर्मकामादिदायकं॥ दशम्यामेकनक्ताशी समांते दश धेनुदः॥१॥ देशश्च कांचनीद
द्याद्ब्राह्मणाधिपतिर्भवेत्॥ दशमीव्रतानि॥ अग्निरुवाच॥॥ एकादशीव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकं॥ दशम्यां निय
ताहारो मांसमैथुनवर्जितः॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ द्वादश्येकादशी यत्र तत्र संनिहितो हरिः॥
तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे कृते॥ एकादशी कला यत्र परतो द्वादशी मता॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां
तु पारणं॥ दशम्येकादशीयुक्ता नोपोष्या नरकप्रदा॥ एकादश्यां निराहारो भूत्वा चैव परेहनि॥ भोक्ष्येहं पुंडरीका
क्ष शरणं मे भवाच्युत॥ एकादश्यां सिते पक्षे पुष्यर्क्षं तु यदा भवेत्॥ सोपोष्याक्षय्यफलदा प्रोक्ता सा पापनाश
नी॥ एकादशी द्वादशी या श्रवणेन च संयुता॥ विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा॥ एषैव फाल्गुने मासि
पुष्यर्क्षेण तु संयुता॥ विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा॥ एकादश्यां दृष्टिपूजा कार्या सर्वोपहारिणी
धनवान् पुत्रवान् सोपि विष्णुलोके महीयते॥ ॥इत्याग्नेये एकादशीव्रतानि॥ ॥अग्निरुवाच॥॥ द्वादशीव्रतकं
वक्ष्ये भुक्तिमुक्तिप्रदायकं॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन भैक्षेण नैव द्वादशिको भवेत्॥

चैत्रे मासि सिते पक्षे द्वादश्यां मदनं हरिं ॥२॥ पूजयेद्भुक्तिमुक्त्यर्थं मदनद्वादशीव्रतं ॥ माघशुक्ले तु द्वादश्यां भीम
द्वादशिकं व्रती ॥३॥ नमो नारायणायेति यजेद्विष्णुं च सर्वभाक् ॥ फाल्गुने च सिते पक्षे गोविंदद्वादशीव्रती ॥४॥ विशो
कद्वादशीकारी यजेदाश्वयुजे हरिं ॥ लवणं मार्गशीर्षे तु कृष्णमभ्यर्च्य यो नरः ॥५॥ ददाति शुक्लद्वादश्यां स सर्वरस
दायकः ॥ गोवत्सं पूजयेद्भाद्रे गोवत्सद्वादशीव्रती ॥ माघ्यां तु समतीतायां श्रवणेन संयुता ॥ द्वादशी या भवेत्कृ
ष्णा प्रोक्ता सा तिलद्वादशी ॥७॥ तिलैः स्नानं तिलैर्होमो नैवेद्यं तिलमोदकं ॥ दीपश्च तिलतैलेन तथा देयं तिलोदकं ॥
८॥ तिलाश्च देया विप्रेभ्यः फलं होमोपवासतः ॥ ॐ नमो भगवते वासुदेवाय च यजेत् ॥९॥ सकुलः स्वर्गमाप्नोति षट्ति
लद्वादशीव्रती ॥ मनोरथद्वादशीव्रती फाल्गुने तु सिते चयेत् ॥ नामद्वादशीव्रतकृत् केशवाद्यैश्च नामभिः कलवेना
रकीनिरः फाल्गुनस्य सिते त्वर्च्य मनोरथद्वादशीव्रती ॥१२॥ मासि भाद्रपदे शुक्ले त्वनंतद्वादशीव्रती ॥ आषाढर्क्षे
शुक्ले च माघे कृष्णाय वै नमः ॥१३॥ यजेत्तिलांश्च जुहुयात् तिलद्वादश्यसौ नरः ॥ स्वर्गी तु द्वादशीकारी फाल्गुने
तु सिते यजेत् ॥१४॥ जय कृष्ण नमस्तुभ्यं वर्षं स्याद्भुक्तिमुक्तिदः ॥ पौषे शुक्ले द्वादश्यां संप्राप्ती द्वादशीव्रती ॥१५
इत्याग्नेये द्वादशीव्रतानि ॥ ॥अग्निरुवाच ॥ ॥श्रवणद्वादशीं वक्ष्ये मासि भाद्रपदे सिता ॥ श्रवणेन समायुक्ता महती
सा त्वुपोषिता ॥ संगमे सरितां स्नाता च्छ्रवणद्वादशीफलं ॥ बुधश्रवणसंयुक्ता दानादौ सुमहाफला ॥२॥ निषिद्धमपि

कर्तव्यं त्रयोदश्यां तु पारणं ॥ द्वादश्यां तु निराहारो वामनं पूजयाम्यहं ॥३॥ उदकुंभे स्वर्णमयं त्रयोदश्यां तु पारणं ॥
आवाहयाम्यहं विष्णुं वामनं शंखचक्रिणं ॥४॥ सितवस्त्रयुगच्छन्नघटे सच्छत्रपादुके ॥ स्नापयाम्यमलैः शुद्धैर्विष्णुं
पंचामृतादिभिः ॥५॥ छत्रदंडधरं विष्णुं वामनाय नमो नमः ॥ अर्घ्यं ददामि देवेश अर्घ्यार्हैर्मुदार्चितः ॥६॥ भु
क्तिमुक्तिप्रदा कीर्तिः सर्वैश्वर्यप्रदं कुरु ॥ वामनाय नमो गंधं होमोमेनेनाष्टकं शतं ॥७॥ ॐ नमो वासुदेवाय शिरः संपूज
येद्धरेः ॥ श्रीधराय मुखं तद्वत् कंठं कृष्णाय वै नमः ॥८॥ नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे ॥ व्यापकाय न
मो नाभिं वामनाय नमः कटिं ॥९॥ त्रैलोक्यजननायेति मेढ्रं जंघे यजेद्धरेः ॥ सर्वाधिपतये पादौ विष्णोः सर्वात्मने
नमः ॥१०॥ घृतपक्वं च नैवेद्यं दद्याद्दध्योदनैर्युतान् ॥ रात्रौ तु जागरं कृत्वा प्रातः स्नात्वा तु संगमे ॥११॥ गंधपुष्पादि
भिः पूज्य वदेत्पुष्पांजलिस्त्विदं ॥ नमो नमस्ते गोविंद बुधश्रवणसंज्ञित ॥१२॥ अघौघसंक्षयं कृत्वा सर्वसौख्य
प्रदो भव ॥ प्रीयतां देवदेवेश मम नित्यं जनार्दनः ॥१३॥ वामनो बुद्धिदो दाता द्रव्यस्थो वामनः स्वयं ॥ वामनः प्र
तिगृह्णाति वामनाय नमो नमः ॥१४॥ वामनः प्रतिगृह्णीयात् वामनो मां ददाति च ॥ द्रव्यस्थो वामनो नित्यं वा
मनाय नमो नमः ॥ प्रयात् तु दक्षिणो विप्रान् संभोज्य स्वयं चरेत् ॥१५॥ ॥इत्याग्नेये श्रवणद्वादशीव्रतं ॥ ॥
अग्निरुवाच ॥ ॥त्रयोदशीव्रतानीह सर्वदानि वदामि ते ॥ त्रयोदश्यां मार्गशीर्षे कृत्स्नलक्षं हरिं यजेत् ॥१॥ नविंस

अ०पु० ञायेक्रात्रौ घृतहोमतिलाक्षतैः॥ पौषे योगेश्वरं प्रार्च्य चंदनाशी कृताकृतिः॥ कंकोलं प्राश्य चीनं च फाल्गुने पूजये
१८७ द्व्रती॥ कर्पूराशी स्वरूपं च चैत्रे सौभाग्यवान्भवेत्॥३॥ महारूपं तु वैशाखे पूजेजातीफलाशपि॥ लवंगाशी
ज्येष्ठमासे प्रद्युम्नं पूजयेद्व्रती॥४॥ तिलोदाशी तथाषाढे उमाभर्तारमर्चयेत्॥ श्रावणे गंधतोयाशी पूजयेत्शूल
पाणिनं॥५॥ सद्योजातं भाद्रपदे प्रणितां गुरुमर्चयेत्॥ सुवर्णधारी संप्राशी आश्विने त्रिदशाधिपं॥६॥ वि
देश्वरं कार्तिके तु मदनाशी यजेद्व्रती॥ शिवं हेमं तु वर्षांति संस्थाप्य दलेन तु॥७॥ वस्त्रेण पूजयित्वा तु दद्याद्वि
प्राय गां तथा॥ शयन छत्रकर्णानूपादुकारसभोजनं॥८॥ त्रयोदश्यां पासिते चैव रतिप्रीतियुतं स्मरं॥ अ
शोकारव्यनंगं लिख्य सिंदूररजनीमुखे:॥९॥ ॥इत्याग्नेये त्रयोदशीव्रतानि॥ ॥अग्निरुवाच॥ ॥व्रतं वक्ष्ये
चतुर्दश्यां भुक्तिमुक्तिप्रदं शृणु॥ कार्तिके तु चतुर्दश्यां निराहारो यजेच्छिवं॥१॥ ततश्शुक्ल चतुर्दश्यामनंतं
पूजयेद्धरिं॥ कृत्वा गर्भमयं चैव वारिधानीसमन्वितः॥२॥ शालिपिष्टस्य पृष्ठस्य प्रपनास्वः कृतस्य च॥
अर्द्धं विप्राय दातव्यं अर्धमात्मनि भोजनं॥३॥ कर्तव्यं सरितां चैके कथां श्रुत्वा हरेरिति॥ अनंतसंसारमहासमु राम·
द्रे मग्नान्समभ्युद्धर वासुदेव॥४॥ अनंतरूपी विनियोजयस्व अनंतसूत्राय नमो नमस्ते॥ अनेन पूजयित्वा तु १८७
सूत्रं बध्वा तु मंत्रितं॥५॥ स्वके कंठेऽथ करे वा बद्ध्वा अनंतव्रतकृत्सुखी॥॥ इत्याग्नेये अनंतचतुर्दशीव्रतं॥ ॥अग्निरुवा

च॥॥ शिवरात्रिव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकं॥ माघफाल्गुनयोर्मध्ये कृष्णा या तु चतुर्दशी॥ कामयुक्तापि सो
पोष्या कुर्वन्जागरणं व्रती॥ शिवरात्रिव्रतं कुर्वे चतुर्दश्यामभोजनं॥२॥ रात्रिजागरणेनैव पूजयामि शिवं व्र
ती॥ आवाहयाम्यहं शंभुं भुक्तिमुक्तिप्रदायकं॥३॥ नरकार्णवकोत्तारनावं शिव नमोस्तु ते॥ नमः शिवाय शां
ताय प्रजाराज्यादिदायिने॥ क्षेमक्षेमप्रदायिने कामाभोगादि देहि मे॥ गुणकीर्तिसुखं देहि स्वर्गं मोक्षं च दे
हि मे॥ लुब्धकः प्राप्तवान्पुण्यं पापी सुंदरसेनकः॥ ॥इत्याग्नेये शिवरात्रिव्रतं॥ ॥अग्निरुवाच॥ ॥अशोक
पूर्णिमां वक्ष्ये भूधरं तु च भवं यजेत्॥ फाल्गुण्यां सितपक्षायां वर्षं भुक्तिमुक्तिभाक्॥ कार्तिक्यां वृषोत्सर्गं कृ
त्वा नक्तं समाचरेत्॥ शैवं पदमवाप्नोति वृषव्रतमिदं परं॥ पित्र्या वा माघ्यतीतस्य पितृभ्यो दत्तमक्षयं॥ उपोष्याब्द
पितॄन्निष्ट्वा निःपापः स्वर्गमाप्नुयात्॥ पंचदश्यां च माघस्य पूजनात्सर्वमाप्नुयात्॥ वक्ष्ये सावित्र्यमावास्यां भु
क्तिमुक्तिकरीं शुभां॥ पंचदश्यां व्रती ज्येष्ठे वटमूले महासती॥ त्रिरात्रोपोषिता नारी सप्तधान्यैः प्रपूजयेत्॥
प्ररूढे मंत्रमाद्येश्वरजन्यां कुंकुमादिभिः॥ वटे बलिमतः कृत्वा नृत्यगीतैः प्रभातके॥ नमः सवित्रे सध्यं बं तेनैवे
द्यधायते द्विजे॥ विस्मगत्वा द्विजान्भोज्य स्वयं भुक्त्वा विसर्जयेत्॥ सावित्री प्रीयतां देवी सौभाग्यादिकमाप्नुया
त्॥ इत्याग्नेये तिथिव्रतानि॥॥ अग्निरुवाच॥॥ वारव्रतानि वक्ष्यामि भुक्तिमुक्तिप्रदानि हि॥ कुरः पुनर्वसुसूर्ये

अ०पु० १८१ स्नानेसर्वौषधिश्शुभा॥९॥आदित्यवारेहस्तेनजन्मस्वरोगनाशकृत्॥संक्रांतौसूर्यवारेयःशोकस्तदुदयःशुभः॥
२॥कृत्वाहस्तेसूर्यवारंनक्तेनाब्दंचसर्वभाक्॥चित्रामेसोमवाराणिसप्तकृत्वासुखीभवेत्॥३॥स्वात्यांग्रही
त्वाङ्गारेणसप्तमेवाविवर्जितः॥विशाखायांबुधंपूज्यसप्तनक्ताद्ग्रहार्तिनुत्॥४॥मूलेज्ञानेश्वरंगृह्यात्सप्तनक्तीग्र
हार्णकं॥॥इत्याग्नेयेवारव्रतानि॥॥अग्निरुवाच॥॥नक्षत्रव्रतकंवक्ष्येनेहरिःपूजितोर्थदः॥नक्षत्रंपुरुषंचा
जे दौचैत्रमासेहरिंयजेत्॥१॥मूलेपादेयजेज्जंघेरोहिणीमर्चयेद्यतः॥जानुनीचाश्विनीयोगेआषाढासुरुसंज्ञिते॥
२॥मेढ्रंपूर्वोत्तरास्वेवकटिंवैकृत्तिकासुच॥पार्श्वेभाद्रपदात्याकुक्षंवैरेवतीषुच॥स्तनौवैचोत्तरासुध
निष्ठास्वातपृष्ठकं॥भुजौपूज्योविशाखासुपुनर्वसुधंयुलीन्यजेत्॥४॥आश्लेषासुनखान्पूज्यकंठंज्येष्ठा
सुपूजयेत्॥श्रोत्रेविष्णोश्रवणेमुखंपुष्येहरेर्यजेत्॥५॥यजेत्स्वातीषुदंताग्रमास्यंवरुणेर्चयेत्॥म
घासुनासायतनेमृगशीर्षेललाटकं॥६॥चित्रास्वार्द्राचकचानस्त्रात्रैस्वर्णकंहरिं॥गुडपूर्णेघटेसमर्चदि
यागोदानदक्षिणां॥७॥नक्षत्रपुरुषोविष्णुःपूजनीयाशिवोदकः॥सस्तोरापणीव्रतकृतमासामेपूजयेद्वसि
हं॥कार्त्तिकेकृत्तिकायांचमृगशीर्षेमृगास्यके॥नाममंत्रैःकेशवाद्यैस्तत्रश्रुतायनमोपिवा॥९॥कार्त्तिकेकृत्ति राम
कामेहेमासेनक्षत्रगेहरिं॥याल्लाराणीव्रतकंकरिष्येभुक्तिमुक्तिदं॥१०॥केशवादिमहामूर्त्तिमिमुतसर्वदाय १८१

कं॥आवाहयाम्यहंदेवमायुरारोग्यवृद्धिदं॥११॥कार्त्तिकादौसदादेवंमंदमासचतुष्टयं॥फाल्गुनादौचकृशर
माषाढादौचपायसं॥देवायब्राह्मणेभ्यश्चनक्तंनैवेद्यमर्पयेत्॥पंचगव्यजलस्नातस्यस्यैवप्राशनाछतिः॥आश्वा
ग्निसर्वनोक्तंनैवेद्यंसर्वमुच्यते॥विसर्जितेजगन्नाथेनिर्माल्यंभवतिक्षणात्॥नमोनमस्तेच्युतमेक्षयोस्तु
पापस्यवृद्धिंसमुपैतिपुण्यं॥ऐश्वर्यवित्तादिमहोदयंमेक्षयंचमासंततिरभ्युपैतु॥यथाच्युतस्त्वंजननतःपुरस्ता
त्सद्भस्तभूतपुरतःपुरस्तात्॥तथाच्युतत्वंकुरुवांछितंमेमयाकृतंपापहराप्रमेयं॥अच्युतानंतगोविंदप्र
सीदपरमेश्वर॥अक्षयंमाममेयात्मन्कुरुष्वपुरुषोत्तम॥सप्तवर्षाणिवाभ्यर्च्यभुक्तिमवाप्नुयात्॥अनंतव्रत
मारव्यास्येनक्षत्रव्रतकेर्थदं॥मार्गशीर्षेमृगशीरेगोमूत्राशीयजेद्धरिं॥अनंतसर्वकामानांअनंतोभगवा
न्फलं॥ददद्देवंतंचपुनःकृतदेवानात्रवात्मनि॥अनंतपुण्योपचयंकरोत्येतन्महाव्रतं॥यथाभिलषितंप्रा
प्तिंकरोत्यक्षयमेवच॥पादादिनक्तपूज्येनभुंजीयात्तैलवर्जितं॥घृतेनानंतमुद्दिश्यहोमोमासचतुष्टयं॥
चैत्रादौशालिनाहोमःपयसाश्रावणादिषु॥मांधातानृपस्तबलादनंतव्रतकात्सुतः॥॥इत्याग्नेयेनक्षत्र
व्रतानि॥॥अग्निरुवाच॥॥दिवसव्रतकंवक्ष्येह्याद्दौधेनुव्रतंवदे॥पार्श्वाभयमुखीदद्यात्द्विभूतकनका
न्वितं॥१॥दिवंप्रयोव्रतंतिष्ठेत्सयातिपरमंपदं॥अहंप्रयोव्रतंकृत्वाकांचनंकल्पपादपं॥२॥दत्वाब्रह्मपदं

अ॰पु॰ १८२ यातिकल्पंब्रह्मव्रतंस्मृतं॥ दद्यात्त्रिंशत्पलादूर्ध्वंमहींकृत्वातुकांचनीं॥३॥ दिवंपयोव्रतीस्तिष्ठेरुद्रंगत्वादिवाव्रती॥
पक्षेपक्षेत्रिरात्रंतुभक्तेनैकेनयःक्षिपेत्॥४॥ विपुलंधनमाप्नोतित्रिरात्रव्रतकृद्दिवं॥ मासेमासेत्रिरात्राशीएक
भक्तिगणेशतां॥५॥ यस्त्रिरात्रशतंकुर्यात्सिद्धिरूपजनार्दनं॥ कुलानांशतमादायसयातिभवनंहरेः॥६॥ नव
म्यांचाद्विमेपक्षेनरोमार्गशिरस्यच॥ प्रारभेतत्रिरात्राणांशतंनचिदिवव्रती॥७॥ ॐनमोभगवतेवासुदेवायस
हस्रंवाशतंयजेत्तच्छ्मांमेकभक्ताशीदिनत्रयमुपावसेत्॥ द्वादश्यांपूजयेद्विष्णुंकार्तिक्यांपारयेद्व्रती॥ विप्रान्सं
भोज्यवस्त्राणिशयनान्यासनानिच॥ छत्रोपवीतपात्राणिदद्यात्संप्रार्थयेद्द्विजान्॥ व्रतेस्मिन्यस्यक्षरेवापिविक्ल
लंयद्भवेन्मम॥ भवद्भिस्तदनुज्ञातंपरिपूर्णंभवत्विति॥ मुक्तस्ततोव्रजेद्विष्णुंत्रिरात्रशतकव्रती॥ कार्तिकव्रत
कंवक्ष्येभुक्तिमुक्तिप्रदायकं॥ दशम्यांपंचगव्याशीएकादश्यामुपोषितः॥ कार्तिकस्यसितेभ्यर्च्यविष्णुंदेवोवि
मानगः॥ चैत्रेत्रिरात्रंनक्ताशीअजापंचप्रदःसुखी॥ त्रिरात्रंपयसःपानमुपवासपरंत्र्यहं॥ षष्ट्यापिकार्ति
केपक्षेस्त्रिलोकीमाहेंद्रउच्यते॥ पंचरात्रंपयःपीत्वादध्याहारोत्यपोषितः॥ एकादश्यांकार्तिकेतुकृच्छ्रोयंभा
स्करोत्तरः॥ यवागूयावकंशाकंदधिक्षीरंघृतंजलं॥ पंचगव्यादिशितोतीशःकृच्छ्रस्तमुनिस्मृतः॥ ॥इत्या राम॰ १८२
ग्नेयेदिवसव्रतानि॥ ॥अग्निरुवाच॥ ॥मासव्रतकमाख्यास्येभुक्तिमुक्तिप्रदायकं॥ आषाढादिचतुर्मासिमभ्यंग

वर्जयेत्तुसुधीः॥ वैशाखेपुष्पलवणंत्यक्त्वागोदोनृपोभवेत्॥ गोदोमासोपवासीचभीमव्रतकरोहरिः॥ आषाढादिचतु
र्मासिप्रातस्नायीविविक्तगः॥ माघमास्यथचैत्रेवागुडधेनुप्रदोभवेत्॥ गुडव्रतस्तृतीयायांगौरीशःस्यान्महाव्रती॥
मार्गशीर्षादिमासेषुनक्तकृद्विष्णुलोकभाक्॥ एकभक्तव्रतीतद्वत्द्वादश्यांव्रतकंपृथक्॥ फलव्रतीचतुर्मासे
फलंत्यक्त्वादापयेत्॥ श्रावणादिचतुर्मासिव्रतैःसर्वंलभेद्व्रती॥ आषाढस्यसितेपक्षेएकादश्यामुपोषितः॥ चतुर्मा
स्यव्रतानांतुकुर्वीतपरिकल्पनं॥ आषाढ्यांवृषसंक्रांत्यांककर्टेचहरिंयजेत्॥ इदंव्रतंमयादेवगृहीतंपुरतस्तव॥
निर्विघ्नांसिद्धिमायातुप्रसन्नेत्वयिकेशव॥ गृहीतेस्मिन्व्रतेदेवयद्यपूर्णंम्रियाम्यहं॥ तन्मेभवतुसंपूर्णंत्वत्प्र
सादाज्जनार्दन॥ माघादिचतिलान्विष्णुंतैलत्यागीहरिंयजेत्॥ एकांतरोपवासीचत्रिरात्रिविष्णुलोकभाक्॥
चांद्रायणीविष्णुलोकीमौनीस्यान्मुक्तिभाजनं॥ प्राजापत्यव्रतीस्वर्गसक्तुयावकभक्षकः॥ दुःखाखाहान्नवान्स्वर्गी
पंचगव्यांबुनुकृद्यथा॥ शाकमूलफलाहारोनारोविष्णुपुरींव्रजेत्॥ मांसवर्जीयवाहारीरसवर्जीहरिंयजेत्॥ कौमु
दव्रतमाख्यास्येआश्विनेसमुपोषितः॥ द्वादश्यांपूजयेद्विष्णुंपुलिप्याच्छोत्पलादिभिः॥ घृतेनतिलतैलेनदीपोनै
वेद्यमर्पयेत्॥ ॐनमोवासुदेवायमालत्यामालयायजेत्॥ धर्मकामार्थमोक्षांश्चप्राप्नुयात्कौमुदव्रती॥ सर्वल
भेद्धरिंप्रार्थ्यमासोपवासकव्रती॥ ॥इत्याग्नेयेमासव्रतानि॥ ॥अग्निरुवाच॥ ॥अनुहतान्यहंवक्ष्येमुक्तिमु

अ०पु०
१८३

प्रदानिते॥ इंधनानि तु यो दद्यात् वर्षादि चतुरो त्वृतून्॥ घृतधेनुं प्रदद्यात्तु ब्रह्म गोघ्नी व्रती भवेत्॥ कृत्वा च मौनेन संध्या
यां समांते घृतकुंभदः॥ तिलघंटां वस्त्रदाता सुधीः सारस्वत व्रती॥ पंचामृतेन स्नपनं कृत्वा हं धेनुदो नृप॥ एका
दश्यां तु नक्ताशी चैत्रे नक्तं निवेदयेत्॥ हेमं विष्णोः पदं याति समांते विष्णुभक्तिती॥ पायसाशी गोप्रदेच श्रीभाग्देवीव्र
ति भवेत्॥ निवेद्य पितृदेवेभ्यो यो भुंक्ते स भवेन्नृपः॥ सर्वव्रतानि चोक्तानी संक्रांति व्रतकं वदे॥ संक्रांतौ स्वर्गलो
की स्याद्रात्रिजागरणान्नरः॥ अमावास्यां तु संक्रांतौ शिवार्कयजनात्तथा॥ उद्वरे स्नपने वा त्यभस्य स्थानेन के
शवं॥ द्वाविंशत्यल्पमानेन सर्वपापैः प्रमुच्यते॥ घृतक्षीरादिना स्नाप्य प्राप्नोति विष्णुनादिषु॥ स्त्रीणां तु मात्र
तं श्रीदं तृतीयास्वष्टमीषु च॥ गौरीं महेश्वरं वापि यजेत्सौभाग्यमाप्नुयात्॥ उमामहेश्वरौ प्रार्च्य अपि योगादिना
ष्टयान्॥ मूलव्रतकरी स्त्री च उमेशं व्रतकारिणी॥ सूर्यभिक्तातु या नारी ध्रुवं सा पुरुषो भवेत्॥॥ इत्याग्नेयेना
नाव्रतानि॥॥ अग्निरुवाच॥॥ दीपदानव्रतं वक्ष्ये भुक्तिमुक्तिप्रदायकं॥ देवद्विजातिकगृहे दीपदः स्वर्गलोकभा
क्॥ चातुर्मासे विष्णुलोकी कार्त्तिके स्वर्गलोक्यपि॥ दीपदानात्परं नास्ति न भूतं न भविष्यति॥ दीपेनायुश्च चक्षुष्मा
न्दीपो लक्ष्मीस्वनादिकं॥ सौभाग्यं दीपदः प्राप्य स्वर्गलोके महीयते॥ विदर्भराजदुहिता ललिता दीपदार्थभाक्॥
चारुधर्मक्षिपपत्नी वा तभार्यांविका भवेत्॥ ददौ दीपसहस्रं सा विष्णोः सायतने सती॥ पृष्टा सा दीपमाहात्म्य

राम·
१८३

ससखीभ्य उवाच ह॥ ललितोवाच॥ सौवीरराजस्य पुरा मैत्रेयो भूत्पुरोहितः॥ तेन संदीपनं विष्णो कारिते देविकात
टे॥ कार्त्तिके दीपकं प्रेन दत्तस्मेरितो मया॥ रक्तप्रांतेन नस्यंता मार्जार स्वात दा भयात्॥ निर्वापयिवान् प्रदीपोत्रि दशा
मूषिका या तदा॥ मृतराजात्मजा जाता राजपत्नी शतादिका॥ वसुकस्मिन् तमसंस्य दीपस्य प्रेरणं मया॥ विष्णवायत
ने दीपस्य तस्येदं भुज्यते फलं॥ जातिस्मरं त्यतो दीपान् प्रयच्छामि न हर्न्निशं॥ एकादश्यां दीपदो वै विमाने पि विमोद
ते॥ जायते दीपहर्त्ता तु मूकस्को जड एव च॥ अंधे तमसि दुःपारे नरके पतिता किल॥ विक्रोशमानांश्च नरान्यम
किं करश्चाह तान्॥ विलापैरलमत्रापि किं वो नि ज्ञायते फलं॥ यदा प्रमादिभिः पूर्वमात्मा त्यंत मुपेक्षित॥ जंतुर्जन्म
सहस्रेभ्यो त्येकस्मिन्मानुषोयदि॥ तत्राया ति विमूढात्मा किं भोगो नाभिवाच्छति॥ हसितं विषयास्वादिकं दनं
तदिहागतं॥ भुज्यते चकृतं पूर्वमितत् किं वो न चिंतितं॥ परस्त्रीपुष्कचाभ्यंगं प्रीपते सुखदं हि तत्॥ सुत्दुन्नु विष
यास्वादेन कंकोद्यतं दुःखदः॥ परस्त्रीहारिप प्रीतं हा मातः किं विलते॥ कोभिमारो हरेर्नाम्निजिकयापरिकीर्त्तने॥
वार्त्तिलेन मूलेनयदग्निर्लतेमुवा॥ दानाशक्ते हरे र्द्दीपो कृत सुको स्ति दुःखदं॥ इदानीं किं विलापेन सह ध्वं यदुपाग
तं॥॥ अग्निरुवाच॥॥ ललितोक्तं च ताः श्रुत्वा दीपदानादिवं ययुः॥ तस्माद्दीपप्रदानेन व्रतानामधिकं फलं॥ ॥
अग्निरुवाच॥॥ नवव्यूहार्चनं वक्ष्ये नारदाय हरीरितं॥ मंडले अब्जेमध्ये च बीजं वासुदेवकं॥ आ बीजं संकर्षणं च

७

अंप्रद्युम्नं च दक्षिणे ॥ अनिरुद्धं च नैरृत्ये नारायणमप्सु च ॥ तद्वद्ब्रह्माणमनिले त्वं विष्णुक्षौन्नसिंहकं ॥ उत्तरे भूवरा
हं श्वहस्ते वामे च पश्चिमे ॥ कंठं च संगरुडं सतत्पूर्वं चक्रं च दक्षिणे ॥ जसेत्तद्दं फडिति ढंकं सगदाबुधं ॥ चंद्रपक्षं क्षौण
सुखं ल्लं टं नहं श्रियं यजेत् ॥ दक्षिणे चोत्तरे पुष्टिं गडं च वत्राच्च बीजकं ॥ पीठश्च पश्चिमे वं रं वनमालां च पश्चिमे ॥ श्री
वत्सं चैव सं दं लं तं यं कौस्तुभं जले ॥ दशमार्यक्रमो दिशेनामन्तानमधो र्चयेत् ॥ दशांगानि महेन्द्रादीनष्ट वा दीँ च
तुरो घटान् ॥ तोरणानि वितानं च अग्न्यानिलेन्द्रबीजकैः ॥ मंडलानि क्रमाध्यातातरुद्ध्यात तत्सवेत् ॥ अंबरस्थत
तो ध्यात्वा पूज्यारूपमथात्मनः ॥ सितामृतेन मस्तं च चंद्रविंबाच्युतेन च ॥ यथात्मनि तथा देवे शिष्यदेहे न्यसेत्त
था ॥ अनिर्माल्या स्मृता पूजा यच्च रे पूजनं हृदि ॥ सनिर्माल्यां मंडले दौ बद्धनेत्रश्च शिष्यकः ॥ पुष्पं क्षिपेत्तत्र यं
मूर्त्तं तस्य तन्नामकारयेत् ॥ निवेश्य वामतः शिष्यान्तिलव्रीहिघृतां तलेत् ॥ शातमष्टोत्तरं स्तुत्वा सहस्रं कार्य
मुद्धरेत् ॥ नवव्यूहस्य मूर्त्तिनामंगानां च शताधिकं ॥ पूर्णं दत्वा दीक्षयेत्तान् गुरुः पूज्यश्च तैर्धनैः ॥ ॥ इत्याग्नेये पन
वव्यूहार्चनं ॥ ॥ अग्निरुवाच ॥ ॥ पुष्पगंधधूपदीपनैवेद्यैस्तुष्यते हरिः ॥ पुष्पाणि देवयोग्यानि त्वयोग्यानि वदा
मि ते ॥ पुष्पाः श्रेष्टं मालतीव तद्दानात् भुक्तिमुक्तिमान् ॥ मल्लिका सर्वपापघ्नी यूथिका विष्णुलोकदा ॥ करवीरे
विष्णुलोके जपापुष्पैश्च पुण्यवान् ॥ पारतीकुब्जकाद्यैश्च तगरैर्विष्णुलोकभाक् ॥ कर्णिकारैर्विष्णुलोके कुरु

ण्टे पापनाशने ॥ पद्मैश्च केतकीभिश्च कुंदपुष्पैः परा गतिः ॥ वाणपुष्पैर्वर्बरीभिर्दशभिर्हरिलोकभाक् ॥ चशोकैस्ति
लकैस्तद्वत् अटरूपभवैस्तथा ॥ मुक्तिभागी बिल्वपत्रैः शमीपत्रैः परा गतिः ॥ विष्णुलोको भृंगराजैः स्तमलैः स्या
द्दरिस्तथा ॥ तुलशीकृष्णगौरारमा कक्षारोत्पलकानि च ॥ पद्मकोकरदं पुण्यं शताब्जमालया हरिः ॥ नीपार्जुन
कदंबैश्च वकुलैश्च सुगंधिभिः ॥ किंशुकैर्मुनिपुष्पैश्च गोकर्णैर्नागकरणकैः ॥ संध्यापुष्पैर्बिल्वतकैरंजनीकेतकी
भवैः ॥ कूष्मांडतिमिरोत्थैश्च कुशकाशशतोद्भवैः ॥ दर्वाभिश्चमरूरं केपामैरन्यैः सुरथकैः ॥ भुक्तिमुक्तिपापहारिभि
स्त्रपास वैस्तुतुष्यति ॥ स्वर्णलक्षाधिकं पुण्यं माला कोटिगुणाधिका ॥ स्ववरे न्यवरे पुष्पैस्त्रिगुणं च निजैः फलं ॥ विशी
र्णैर्नाचयेद्विष्णुं पाधिकांगैः नमूलकैः ॥ कंचणारिस्तथा मत्तो गिरिकर्णिकयातथा ॥ कुटजैः शाल्मलात्थैश्च शि
रीषैर्नरकादिकं ॥ सुगंधैर्वसपत्रैश्च पुष्पैर्न्नीलोत्पलैर्दलैः ॥ अर्कमंदारधुत्तूरकुसुमैरर्च्यते हरः ॥ कुटजं कर्कटी
पुष्पं केतकीं न शिवे ददेत् ॥ कूष्मांडनिंबसंभूतं पैशाचं गंधवर्जितं ॥ अहिंसा इंद्रियजयः क्षांतिर्ज्ञानंदया कृतं ॥
भावाष्टपुष्पैः संपूज्य केशवात्मा भुक्तिमुक्तिभाक् ॥ अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ॥ सर्वपुष्पं दया भूते पुष्पं शां
तिर्विशिष्यते ॥ शमः पुष्पं तपः पुष्पं ध्यानपुष्पं च सप्तमं ॥ सत्यं चैवाष्टमं पुष्पमेतैस्तुष्यति केशवः ॥ एतैरेवाष्टभिः पुष्पै
स्तुष्यत्येवार्चितो हरिः ॥ पुष्पांतराणि संत्येव बाह्यानि मनुजोत्तम ॥ भक्त्या दयान्वितैर्विष्णुः पूजितः परितुष्यति ॥ वारुणं स

अ०पु०
१८५

तिलंपुष्पंसोमंघृतपयोदधि॥प्राजापत्यंतथान्नादिह्याग्नेयंधूपदीपकं॥फलपुष्पादिकंचैववानस्पत्यंतुपंच
मं॥पार्थिवंमूलाद्यंवायव्यंगंधचंदनं॥अष्टाक्षंविष्णुयुग्मंचसर्वदाचाष्टपुष्पिका॥आसनंमूर्त्तिपंचांगंविष्णुर्धा
चाष्टपुष्पिका॥विष्णोर्वासुदेवाद्यैरीशानाद्यैश्शिवस्यच॥ ॥इत्याग्नेयेपुष्पाध्यायः॥ ॥अग्निरुवाच॥पुष्पा
द्यैःपूजनंविष्णोःसजातिनरकान्वदेत्॥अश्वेपान्नेतरःप्राणैरग्निच्छन्नापिमुच्यते॥जलमग्निविषंशास्त्रंक्षुधा
धिंपतनंगिरेः॥निमित्तंकिंचिदासाद्यदेहेःप्राणैर्विमुच्यते॥अन्यच्छरीरमादत्तेपचनीयस्वकर्मभिः॥दुःखेयपा
पहन्नृषंसुखंधर्मपिसंगतः॥नीयतेयमदूतैस्तुयमंप्राणीभयंकरैः॥रूपथेदक्षिणेद्वारिधार्मिकःपश्चिमादि
भिः॥यमाज्ञप्तैःकिंकरैश्चपात्यंतेनरकेजनाः॥स्वर्गेतुनीयतेधर्मविशिष्टयुक्तिसंश्रयात्॥गोघातीतुमहाव
र्षावर्षलक्षंतुपीड्यते॥ताम्रगास्वेमहादीप्तेब्रह्महान्नमिहारकः॥महापुत्तकरंपाररौरवेपीड्यतेग्निनैः॥स्त्री
बालवृद्धहंताचयावादिंत्राश्चतुर्दश॥महारौरवकेरौद्रेगृहक्षेत्रादिदीपकः॥दह्यतेकल्पमेकंसचौरस्तामिस्र
केपतेत्॥नैककल्पंचशूलाद्यैर्भिद्यतेयमकिंकरैः॥महातामिस्रकेसर्पजलौकाद्यैश्चपीड्यते॥यावद्भूमि
मातृहाद्याश्चासिपत्रवनेन्नभिः॥निकृकलंतुनरकेकरस्थैवातुकासुच॥येनदग्धोजनस्तत्रदह्यतेवालुका
भिभिः॥कोकोलेकृमिविष्टाशीएकाकीमिष्टभोजनः॥कुड्मलेमूत्ररक्ताशीपंचयज्ञक्रियोज्झितः॥स्वदुर्गं

राम
१८५

धरक्तभोजीमवेच्चारकःसोजकः॥तिलपाकेतुतिलवत्पीड्यतेपरपीडकः॥निरुच्छ्वासेशरणाग्नेरसविक्रयिके
धरे॥रास्ताचंक्रकपाटाख्येमहापात्रेतुवान्तती॥महाज्वालपापबुद्धिःक्रकचेगम्यगामकः॥सङ्क्रीगुडपाके
चप्रवृद्धेपरधर्मवित्॥क्षारहृदेप्राणहन्तादुखचारेचभूमित्हत्॥अंबरीषेगोवर्णकृत्ननलक्ष्मिवज्रश्राकके॥
मधुहन्तापरीतापेकालसूत्रेपरार्थकं॥कश्मलेसन्कुमांसाशीउग्रगंधेत्यपिंडदः॥दुर्द्धरेम्युतकेभक्षीवंदिग्रा
हवनाश्चमे॥मंजूषेनरकेलोहेप्रतिषेध्कृतनिंदकः॥स्मृतिहक्षेरूटसाक्षीपरिन्नम्येचरापहा॥बालस्त्रीवृद्ध
घातीचकरालेब्राह्मणार्त्तिकृत्॥विलोपमग्नयोविप्रोमहाप्रेतेतुमेदिनः॥यथाक्रमेपरेदारान्नुज्वलंतामाय
साःस्त्रिता॥ज्ञाल्मलान्यतमालिंग्येनारीचबुतरंगमाः॥आस्फोद्यजिकोतरणंस्त्रीक्षणांतेत्रवेदनं॥अंगाररा
शौक्षिप्यंतेमातृपुष्पादिगामिनः॥गैराःसुरैश्चछिद्यंतेशमोसाशीचमांसभुक्॥मासोपवासकर्त्तारोनया
तिनरकंनराः॥एकादशीव्रतकरोभीष्मपंचकसद्व्रती॥ ॥इत्याग्नेयेनरकस्वरूपवर्णनं॥अग्निरुवाच॥
व्रतंमासोपवासाख्यंसर्वोत्कृष्टंवदामिते॥कृत्वातुवैष्णवंयज्ञंगुरोराज्ञामवाप्यच॥कृच्छाद्यैःस्वबलंबुध्वा
कुर्यान्मासोपवासकं॥वानप्रस्थोयतिर्वापिनारीवाविधवामुनिः॥आश्विनस्यामलेपक्षेएकादश्यामुपोषितः
व्रतमेतत्तुगृह्णीयात्यावत्त्रिंशद्दिनानितु॥अद्यप्रभृत्यहंविष्णोयावदुत्थानकंतव॥अर्चयेत्वामनंश्रितपाव

त्रिंशद्दिनानि तु॥ कार्त्तिकाश्विनयोर्विष्णोर्यावत्स्यादारकं तव॥ म्रियेयद्यंतरालेहं व्रतभंगो न मे भवेत्॥ त्रिःकालं पू
जयद्विष्णुं त्रिःस्नातो गंधपुष्पकैः॥ विष्णोर्गीतादिकं जाप्यं ध्यानं कुर्याद्व्रती नरः॥ वृथावादं परिहरेदंतकार्यं च वर्
जयेत्॥ नाव्रतस्थं स्पृशेत्कश्चित् विकर्मस्थान्न चाचयेत्॥ देवतायतने तिष्ठेद्यावत्त्रिंशद्दिनानि तु॥ द्वादश्यां पूजयि
त्वा तु भोजयित्वा द्विजान् व्रती॥ समाप्य दक्षिणां दत्वा पारणं तु समाचरेत्॥ भुक्तिमुक्तिमवाप्नोति कर्मान्तांस्त्रयो
दश॥ कल्पयेद्वैष्णवं यज्ञं यजेद्विप्रांस्त्रयोदश॥ तावंति वस्त्रयुग्मानि भाजनान्यासनानि च॥ छत्राणि सपवित्राणि
थ्ययोपानत्क्रमाणि च॥ योगपट्टोपवीतानि दद्याद्विप्राय तैर्मतः॥ अन्यविप्राय शय्यां च हेमधिष्ट प्रपूज्य यः॥ आ
त्मानश्च तथा मूर्तिं वस्त्राद्यैश्च प्रपूजयेत्॥ सर्वपापविनिर्मुक्तो विष्णुविप्रप्रसादतः॥ विष्णुलोकं गमिष्यामि वि
ष्णुरेव भवाम्यहं॥ व्रज व्रज देवबुद्धे विष्णोः स्थानमनुत्तमं॥ विमानेनामनस्तत्र तिष्ठ विष्णुस्वरूपधृक्॥ द्विजोक्त
तो पतां शय्यां गुरवे च निवेदयेत्॥ कुलानां शतमुद्धृत्य विष्णुलोकं नयेद्व्रती॥ मासोपवासी यद्देशे स देशो नि
र्मलो भवेत्॥ किं पुनः तत्कुलं सर्वं यत्र मासोपवासकृत्॥ व्रतस्थं मूर्च्छितं दृष्ट्वा क्षीरं त्वेवं च पाययेत्॥ नैते व्रतं राम•
न विघ्नंति हविर्विप्रानुमोदितः॥ क्षीरं गुरोर्हितो पथ्यमापो मूलं फलानि च॥ विष्णोर्महौषधं कर्ता व्रतमस्मा १८६
न्समुद्धरेत्॥ इत्याग्नेये मासोपवासव्रतं॥ अग्निरुवाच॥ भीष्मपंचकमाख्यास्ये व्रतराजं तु सर्वदं॥

कार्त्तिकस्यामले पक्षे एकादश्यां समाचरेत्॥ दिनैश्च पंचभिः स्नायी यवव्रीहितिलैस्तथा॥ तर्प्पयेद्देवपित्रादीन्मौ
नी संपूजयेद्धरिं॥ पंचगव्येन संस्नाप्य देवं पंचामृतेन च॥ चंदनाद्यैः समालिप्य गुग्गुलं सघृतं दहेत्॥ दीपं
दद्याद्दिवारात्रौ नैवेद्यं परमान्नकं॥ ॐ नमो वासुदेवाय जपेदष्टोत्तरं शतं॥ जुहुयाच्च घृताभ्यक्तान् तिलव्री
हीस्ततो व्रती॥ षडक्षरेण मंत्रेण स्वाहाकारान्वितेन तु॥ कमलैः पूजयेत्पादौ द्वितीये बिल्वपत्रकैः॥ जानु
सक्थि तृतीये च चतुर्थे पंचमेहनि॥ मालत्या भूमिशायी स्यात् एकादश्यां तु गोमयं॥ गोमूत्रं सुखदं चैव पं
चमे पंचगव्यकं॥ पौर्णमास्यां चरेन्नक्तं भुक्तिमुक्तिं लभेद्व्रती॥ भीष्मः कृत्वा हरिं प्राप्तस्तेनैतद्भीष्मपंचकं॥
ब्रह्मणः पूजनाद्यं च उपवासादजव्रतं॥ इत्याग्नेये भीष्मपंचकव्रतं॥ अग्निरुवाच॥ अगस्त्यो भगवा
न्विष्णुः समभ्यर्च्यो मुपाधरं॥ अप्राप्ते भास्करे कन्यां सत्रिभागैस्त्रिभिर्दिनैः॥ अर्घं दद्यादगस्त्याय पूजा
येत्त्व्युपोषितः॥ काशपुष्पमयीं मूर्तिं प्रदोषे विन्यसेद्घटे॥ मूले यजेत्तां दवस्थां रात्रौ कुर्यात्प्रजागरं॥ अ
गस्त्य मुनिशार्दूल तेजोराशे महाद्युते॥ इमां मम कृतां पूजां गृह्णीष्व प्रियया सह॥ आवाह्यार्घ्यं च संमु
द्दिश्यार्घ्यपञ्चंदनादिभिः॥ जलाशयसमीपे तु प्रातर्नीत्वार्घमर्पयेत्॥ काशपुष्पप्रतीकाश वह्निमारुतसंभ
व॥ मित्रावरुणयोः पुत्र कुंभयोने नमोस्तु ते॥ वातापिर्भक्षितो येन समुद्रः शोषितः पुरा॥ विंध्यवृद्धिभय

अ०पु० करःसोऽगस्त्यः मध्वुषोऽस्तु मे॥ अगस्तिं प्रार्थयिष्यामि कर्मणा मनसा गिरा॥ अर्चयिष्याम्यहं मंत्रैः परलोकाभिकां
१८७ क्षया॥ द्वीपांतरसमुत्पन्नं देवानां परमं प्रियं॥ राजानं सर्ववृक्षाणां चंदनं मे प्रगृह्यतां॥ धर्मार्थकाममोक्षा
णां भाजनाऽगानी॥ सौभाग्यारोग्यलक्ष्मीदा पुष्पमाला प्रगृह्यतां॥ धूपोयं गृह्यतां देव भक्तिं मे ह्यचलां कुरु॥
ईप्सितं मे गुरुं देहि परत्र च शुभां गतिं॥ अगस्त्य वै मुनिश्रेष्ठ सर्वकामफलप्रदः॥ वस्त्रव्रीहिफलैर्हेतुरैतुस्व
गीर्ह्यं पुरा॥ अगस्त्यवाचयिष्यामि यन्मया मनसेप्सितं॥ फलैरर्घ्यं प्रदास्यामि गृहाणार्घ्यं महामते॥ अगस्त्य
एवं खननात्परित्रीहि जामतं स्वजमिक्षमानः॥ उभौ वर्णौ ऋषिरुग्रः पुपोष सत्या विवेष्वाशिषो जगाम॥ राजपु
त्रि नमस्तुभ्यं मुनिपत्नि महाव्रते॥ अर्घ्यं गृह्णीष्व देवेशि लोपामुद्रे यशस्विनी॥ पंचरत्नसमायुक्तं हेमरूप्य
समन्वितं॥ सप्तधान्यं घृतपात्रं दधिचंदनसंयुतं॥ अर्घ्यं दद्यादगस्त्याय स्त्रीशूद्राणां नवैदिकं॥ अगस्त्यमु
निशार्दूल तेजोराशे च सर्वदा॥ इमां मया कृतां पूजां गृहीत्वा मम शांतये॥ त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फ
लं रसं॥ ततोऽश्च भोजयेद्विप्रान्घृतपायसमोदकैः॥ गां सुवर्णं च वासांसि सितेन्यो दद्यात्तु दक्षिणां॥ घृतपायससु
क्तेन पात्रेण स्थगितानलं॥ सहिरण्यं चतं कुंभं ब्राह्मणायोपपादयेत्॥ सप्त वर्षाणि दत्वार्घ्यं सर्वे सर्वमवाप्नु राम.
यः॥ नारी पुत्रान्यसौभाग्यपतिं कन्या न पोनुवं॥ ॥इत्याग्नेयेऽगस्त्यार्घव्रतं॥ ॥अग्निरुवाच॥ ॥ कौमुद १८७

स्वमभोक्तं चवरदा स्वपुजेप्सिते॥ हरियजेन्मासमेकमेकादश्यामुपोषितः॥ आश्विने शुक्लपक्षे च एकाहारो हरिं यि
जेत्॥ मासमेकं भुक्तिमुक्त्यौ करिष्ये कौमुद्व्रतं॥ उपोष्य विष्णुं द्वादश्यां पूजयेदुपलिप्य च॥ चंदनागुरुकाश्मी
रैः कमलोत्पलपुष्पकैः॥ कल्हारैर्वाथ मालत्या दीपं तैलेन वाग्यतः॥ अहोरात्रं च नैवेद्यं पायसापूपमोदकैः॥
ॐ नमो वासुदेवाय विज्ञाप्य क्षमापयेत्॥ भोजनादि द्विजेभ्यो हि देवदेव प्रबुध्यते॥ तावन्मासोपवासस्याद्धि
कं फलमवाप्यते॥ ॥इत्याग्नेये कौमुदव्रतं॥ ॥अग्निरुवाच॥ ॥व्रतं तदानादिसामान्यं प्रवदामि समासतः॥ ति
थ्यो प्रतिपदाद्ये च सप्रदीपे रुन्तिकासु च॥ विषुवे आदौ च मेषादौ काले च ग्रहणादिकं॥ यत्काले यद्व्रतं दानं यद्
द्यमनियमादिषु तत्॥ यद्व्यारण्यं च कालाख्यं सर्वस्वौर्विष्णुदैवतं॥ शरीरब्रह्मलोकाद्याः सर्वे विष्णोर्विभूतयः॥
तदादिसव्रतदाने पूजादि स्यात्तु सर्वदं॥ जगत्पते समागच्छ आसनं पाद्यमर्घकं॥ मधुपर्कं तथाचामं स्नानं व
स्त्रं च गंधकं॥ पुष्पं धूपं च नैवेद्यादि नमोऽस्तु ते॥ इति प्रजाव्रते दाने दानवाक्यं समं शृणु॥ अद्यामुकसगोत्रा
य विप्रायामुकशर्मणे॥ एतद्द्रव्यं विष्णुदैवं सर्वपापोपशांतये॥ आयुरारोग्यवृद्धये॥ गोत्रसंततिवृद्ध्यर्थं
विजयाय धनाय च॥ धर्माय स्वर्गकामाय उत्थापवनाय च॥ संसारक्षयाय दानं कुर्यात्संप्रददे त्वहं॥ एतेन
प्रीयतां नित्यं सर्वलोकपतिः प्रभुः॥ यत्तद्दानव्रतपते विद्याकीर्त्यादि देहि मे॥ धर्मकामार्थमोक्षांश्च देहि मे मन

अ॰पु॰ १८५ सेप्सितं॥ यः पठेच्छृणुयान्नित्यं व्रतदानसमुच्चयं॥ संप्राप्तकामो विमलो भुक्तिमुक्तिमवाप्नुयात्॥ तिथिवारर्क्षसंक्रा
तियोगमात्राधिकं व्रतं॥ नैकधा वासुदेवादिर्नियमात्तत्प्रजनान्भवेत्॥ ॥इत्याग्नेये व्रतदानसमुच्चय॥ ॥अग्निरु
वाच॥ ॥दानधर्मान्प्रवक्ष्यामि भुक्तिमुक्तिप्रदान्शृणु॥ दानमिष्टं तथा पूर्तं कुर्म्मं कुर्वन्हि सर्वभाक्॥ वापीकूपत
डागादि देवतायतनानि च॥ अन्नप्रदानमारामाः पूर्तं धर्मं च मुक्तिदं॥ अग्निहोत्रं तपः सत्यं वेदानां चानुपालनं॥ आ
तिथ्यं वैश्वदेवं च प्राहुरिष्टं च नाकदं॥ ग्रहोपरागे यद्दानं सूर्यसंक्रमणेन च॥ द्वादश्यादौ च यद्दानं पूर्तं तदपि नाक
दं॥ देशे पात्रे च काले च दानं कोटिगुणं भवेत्॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये॥ युगादिषु च संक्रांतौ
चतुर्दश्यष्टमीषु च॥ सितपंचदशी सर्वद्वादशीष्वष्टकासु च॥ यज्ञोत्सवविवाहेषु तथा मन्वंतरादिषु॥ वैधृते दृ
ष्टदुःस्वप्ने द्रव्यब्राह्मणलाभतः॥ श्रद्धा वा यद्दिने तत्र सदा नमिष्यते॥ अयने द्वे विषुवे द्वे चतस्रः षडशीतयः॥
चतस्रो विष्णुपद्यश्च संक्रांतौ द्वादशोत्तमाः॥ कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः॥ षडशीतिमुखाः प्रोक्ताः ष
डशीतिगुण्याः फलैः॥ अतीतानागते पुण्ये द्वे न राग्दक्षिणापरे॥ त्रिंशत्कर्कटिके नाड्यो मकरे विंशतिस्थिताः॥
वर्तमाने तुलामेषे नाड्यस्तूभयतो दश॥ षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः॥ पुण्याख्या विष्णुपद्यां च राम
प्राक् पश्चादपि षोडश॥ श्रवणाश्विधनिष्ठासु नागदैवतमस्तके॥ यद्यमारविवारेण व्यतीपातः समुच्यते॥ नवम्यां १८५

शुक्लपक्षस्य कार्त्तिके निरगात्कृतं॥ त्रेतासिततृतीयायां वैशाखे द्वापरं युगं॥ दर्शे तु माघमासस्य त्रयोदश्यां तु दक्षिणे
कृष्णे कलिर्विद्धि सप्तार्थः स्तेया मन्वंतरादयः॥ अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिके तथा॥ तृतीया माघमासस्य तथा
भाद्रपदस्य च॥ फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा॥ आषाढस्यापि दशमी माघमासस्य सप्तमी॥ श्रा
वणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा॥ फाल्गुनी तद्वज्ज्येष्ठे तद्वया पंचदशी तथा॥ ऊर्द्धं चैवाग्रहायण्या अष्टका
स्तिस्र ह्यारिताः॥ अष्टकाख्याचाष्टमी स्यादाद्यदानानि चाक्षयं॥ गयागंगाप्रयागादौ तीर्थे देवालयादिषु॥ अ
प्रार्थितानि दानानि वैद्यार्थकन्यकानि हि॥ दद्यात्पूर्वमुखो दानं गृह्णीयादुत्तरामुखः॥ आयुर्विवर्द्धते दातु
ग्रहीतुः क्षीयते न तत्॥ नाम गोत्रे समुच्चार्य संप्रदानस्य चात्मनः॥ संप्रदेयं प्रयच्छंति कन्यादानं पुनस्त्रयं॥ स्ना
त्वाभ्यर्च्य व्याहृतिभिर्दद्याद्दानं तु सोदकं॥ कनकाश्वतिलानागा दासीरथमहीगृहाः॥ कन्या च कपिला धेनुर्महा
दानानि वै दश॥ श्रुतशौर्यतपःकन्यायाज्यशिष्यादुपागतं॥ शुक्लं धनं हि शबलं कुक्रोशिल्पानुवृत्तितः॥ कृ
ष्णं दक्षिणवाणिज्यं प्रातिपदुपकारतः॥ पार्श्विकद्यूतचौर्यादिप्रतिरूपकसाहसैः॥ व्याजेनोपार्जितं कृष्णं त्रिवि
धं त्रिविधं फलं॥ अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि॥ भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं॥ ब्राह्मस्ये
न विशामस्य कृतस्यैषामनुग्रहात्॥ बंधुभ्यो न प्रदेयानि गोमहत्यायनं स्त्रियः॥ कुलानां तु शतं हन्याद्प्रयच्छन्

प्रतिश्रुतं॥ देवानां च गुरूणां च माता पित्रोस्तथैव च॥ पुण्यं देयं प्रयत्नेन नापुण्यं चार्जितं क्वचित्॥ प्रतिज्ञामेव
यादत्तं यद्दत्तं तदप्रार्थकं॥ श्रद्धयासाध्यते धर्मो दत्तं वार्यपि चाक्षयं॥ ज्ञानशील गुणोपेतः परपीडाबहिष्कृतः॥
अज्ञानां पालनात्त्राणात्तत्पात्रं परमं स्मृतं॥ मातुः शतगुणं दानं सहस्रं पितुरुच्यते॥ अनंतं दुहितुर्दानं सोदर्ये
मक्षयं॥ अमनुष्ये समं दानं पापे शेयं महाफलं॥ वर्णसंकरे द्विगुणं शूद्रे दानं चतुर्गुणं॥ वैश्ये चाष्टगुणं क्षत्रे षोड
शं द्विजब्रुवे॥ वेदाध्याये शतगुणमनंतं ब्रह्मबोधके॥ पुरोहिते याजकादौ दानमक्षयमुच्यते॥ श्रीविहीनेषु यद्द
त्तं तदनंतरयज्विनि॥ तपश्चर्याधीयतः प्रतिग्रहरुचिर्द्विजः॥ अंभस्यश्मप्लवेनैव सह तेनैव मज्जति॥ स्नातः
सम्यगुपस्पृश्य गृह्णीयात्प्रयतः शुचिः॥ प्रतिगृह्णीताथ सावित्रीं सर्वत्रैव प्रकीर्तयेत्॥ ततस्तु कीर्तयेत्सार्ध
द्रव्येण सह दैवतं॥ प्रतिगृह्णंस्तु वै ऊर्ध्वैः प्रतिगृह्य द्विजोत्तमान्॥ मंदं पठेत्क्षत्रियात्तु उपांशु च तथा विशः॥ मनसा
च तथा शूद्रात्स्वस्ति वाचकं नतथा॥ अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता॥ कन्यादानं तथा दासी प्राजापत्या
प्रकीर्तिताः॥ प्राजापत्योऽयमश्वोक्तस्तुरगो यमदैवतं॥ तथा चैकशफं सर्वं याम्यं च महिषास्तथा॥ उष्ट्रश्च नैर्ऋ
तो धेनुरौद्री छागोऽनलस्तथा॥ आप्यो मेषो हरिः क्रोड आरण्याः पशवोऽनिलाः॥ जलाशयं वारुणं स्याद्वारिधानी
घटादयः॥ समुद्रजानि रत्नानि हेमलोहानि चानलः॥ प्राजापत्यानि सस्यानि पक्वान्नमपि सत्तमः॥ गांधर्वं गंध

मित्याकुर्वस्त्रं वा हसितं स्मृतं॥ वायव्याः पक्षिणः सर्वे विद्या ब्राह्मीत यो ह्यकं॥ सारस्वतं पुस्तकादि विश्वकर्मा तु वै
शिल्पके॥ वनस्पतिद्रुमादीनां द्रव्यदेवा हरेस्तनुः॥ छत्रं कृष्णाजिनं सय्या रथमासनमेव च॥ उपानहौ तथा यान
मुत्तानाङ्गिरिहारितं॥ रणोपकरणं शस्त्रं ध्वजाद्यं सर्वदैवतं॥ गृहं च सर्वदैवत्यं सर्वेषां विष्णुदेवता॥ शिवो वा
नततोद्रव्यं अतिरिक्तं ततो स्मृहि॥ द्रव्यस्य नाम गृह्णीयात् ददामीति तथा वदेत्॥ तोयं दद्यात्तथा हस्ते दा
ने विधिरयं स्मृतः॥ विष्णुर्दाता विष्णुद्रव्यं प्रतिगृह्णाति वै वदेत्॥ स्वस्ति प्रतिगृहं धर्मभुक्तिमुक्तिफलद्वयं॥
गुरून्भृत्यांश्चोज्जिहीर्षुरर्चिष्यन्देवतापितॄन्॥ सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः॥ शूद्रान्नं तु य
शार्थं धनं शूद्रस्य तत्फलं॥ गुडतक्ररसाद्याश्च शूद्राद्ग्राह्या निवृत्तिना॥ सर्वतः प्रतिगृह्णीयात् अविद्या कर्शिता
द्विजः॥ नाध्यायानध्योजानन्वाग्हर्ता द्विप्रतिग्रहात्॥ दोषो न यं चिविप्राणां ह्रुतमर्कसमाहिते॥ हुते तु दीय
ते गत्वा नेता स्नानेन नु दीयते॥ द्वापरे याच मानाय कलौ पनुगमान्विते॥ मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपे
त्॥ विद्यते सागरस्यांतो नांतो दानस्य विद्यते॥ अद्य सोमार्कग्रहणं संक्रांत्यादौ सुकालकः॥ तथा चामुकगो
त्रायतथा चामुकशर्मणे॥ वेदवेदांगयुक्ताय पात्राय सुमहात्मने॥ यथानाम महाद्रव्यं विष्णुरुद्रादिदैवतं॥
पुत्रपौत्रगृहैश्वर्यपत्नीधर्मार्थसद्गुणः॥ कीर्तिविद्यामहाकामसौभाग्यारोग्यवृद्धये॥ एतत्तुभ्यं संप्रददे प्रीपतां॥

अ॰पु॰ मेहरिः शिवः॥ दिव्यांतरिक्षभूमीपिसमुत्पातादिपापकृत्॥ धर्मार्थकाममोक्षाप्त्यै वक्ष्ये लोकयशोस्तु मे॥ यथानाम
१९६ सगोत्राय विद्याय पात्रकरामणे॥ अनेनैव न वाक्येन सर्वदानानि वै वदेत्॥ ॥ इत्याग्नेये दानपरिभाषा॥ ॥ अग्नि
रुवाच॥ ॥ सर्वदानानि वक्ष्यामि महादानानि षोडश॥ तुलापुरुष आद्यं तु हिरण्यगर्भदानकं॥ ब्रह्मांडक
ल्पवृक्षश्च गोसहस्रं तु पंचमं॥ हिरण्यं कामधेनुश्च हिरण्याश्वस्तु सप्तमः॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिरथ
स्तथा॥ पंचलांगलकं तद्वद्धरादानं तथैव च॥ विश्वचक्रं कल्पलतासप्तसागरकं परं॥ रत्नधेनुर्महाभूतघ
टंशुभदिनेर्पयेत्॥ मंडपे मंडले दानं देवान् प्रार्च्यार्थ विक्षिपेत्॥ धान्यद्रोणसहस्रेण उत्तमोद्रिरितः परे॥ उत्तमः
षोडशः द्रोणः कर्त्तव्यो लवणाचलः॥ दशभारैर्गुडाद्रिः स्यात् उत्तमोर्द्धकृतस्तनो॥ उत्तमः पलसाहस्रैस्स्वर्णगैव
रधः परे॥ दशद्रोणैस्तिलाढ्यः स्यात् पंचभिश्च त्रिभिः क्रमात्॥ कार्पासपर्वतो विंशभारैस्सदशपंचभिः॥ विंशत्याघृ
तकुंभानामुत्तमस्स्यात् घृताचलः॥ दशभिः पलसहस्रैरुत्तमो रजताचलः॥ अष्टभारैः शर्कराभिर्मध्यो मंदार्य
धु तोकृतः॥ दशधेनुं प्रवक्ष्यामि दत्वा भुक्तिमुक्तिभाक्॥ प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथापरा॥ तिलधेनुस्तृती राम.
या च चतुर्थी जलधेनुका॥ क्षीरधेनुर्मधुधेनुः शर्करादधिधेनुके॥ रसधेनुस्स्वरूपेण दशमी दधि रूप्यते॥ १९६०
कुंभास्स्युर्द्रवधेनूनामितरासां तु राशयः॥ कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि॥ गोमयेनानुलिप्तायां दर्भा

स्वी

नास्तीर्य सर्वतः॥ लघ्वेणकाजिनं तद्वत् वत्सस्य परिकल्पयेत्॥ प्राङ्मुखीं कल्पयेद्धेनुं उदक्पादां सवत्सकां॥ उत्त
मा गुडधेनुस्स्यात् सदा भारचतुष्टयात्॥ वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता॥ अर्द्धभारेण वत्सस्या
कनिष्ठा भारकेन तु॥ चतुर्थांशेन वत्सस्स्यात् गृहवित्तानुसारतः॥ पंचकृष्णलको माषस्तैस्सुवर्णस्तु षोडशः॥
पलं सुवर्णाश्चत्वारः तुलापलशतं स्मृतं॥ स्याद्भारो विंशतितुलो द्रोणस्तु चतुराढकः॥ धेनुवत्सौ गुडस्योभौ सित
सूक्ष्मांबरावृतौ॥ शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ॥ सितसूत्रशिरालौ च सितकंबलकंबलौ॥ ताम्रगंडुक
पृष्ठौ तौ सितचामररोमकौ॥ विद्रुमभ्रूयुगावेतौ नवनीतस्तनान्वितौ॥ क्षौमपुच्छौ कांस्यदोहाविंद्रनीलकतारकौ॥
सुवर्णशृंगाभरणौ राजतखुरसंयुतौ॥ रोचयित्वा यजेद्धेनुमिमैर्मंत्रैर्द्विजोत्तमः॥ या लक्ष्मीः सर्वभूतानां या च देवेष्व
वस्थिता॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु॥ देहस्था या च रुद्राणी शंकरस्य सदा प्रिया॥ धेनुरूपेण सा देवी
मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥
चतुर्मुखस्य या लक्ष्मीर्लक्ष्मीर्या धनदस्य च॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ स्वधा त्वं पितृमुख्यानां स्वा
हा यज्ञभुजां यतः॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥ एवमामंत्रितां धेनुं ब्राह्मणाय निवेदयेत्॥ समा
नं सर्वधेनूनां विधानं चैतदेव हि॥ सर्वयज्ञफलं प्राप्य निर्मलो भुक्तिमुक्तिभाक्॥ स्वर्णशृंगे शफे रूप्यैः सुशीला

अ॰पु॰ लावस्त्रसंयुता॥कांस्योपदोहायतमाक्षिरिणीगोःसदक्षिणा॥दाताचस्वर्गमाप्नोतिवत्सरान्रोमसंमितान्॥कपि
१९९ लाचोत्तारयतिमर्त्यस्त्वासप्तमंकुलं॥स्वर्णशृंगीरूप्यखुरैःकांस्यदोहनकान्वितां॥शक्तितोदक्षिणायुक्तांदत्वास्या
द्भुक्तिमुक्तिभाक्॥सवत्सरोमतुल्यानियुगान्युभयतोमुखीं॥दत्वास्वर्गमवाप्नोतिपूर्वेणविधिनाददत्॥आसन्नम
त्युनादेयासवत्सागौस्तुपूर्ववत्॥यमद्वारेमहाघोरेतप्तावैतरणीनदी॥तांततुंगांददाम्येनांकृष्णांवैतरणींस्म
ता॥ ॥इत्याग्नेयेमहादानानि॥ ॥अग्निरुवाच॥ ॥एकांगांदशगुर्दद्याद्दशदद्याच्चगोशती॥शतंसहस्रगुर्दद्यात
सर्वेतुल्यफलाहिते॥प्रासादायत्रसौवर्णावसोर्धाराचयत्रसा॥गंधर्वाप्सरसोयत्रदत्तसेसर्वकामदाः॥धर्मरा
जस्यसाह्यस्ययस्याःपुत्रःप्रतिष्ठितः॥महिषासुरजननीयासासुवरदामम॥महिषीसर्वसौभाग्यंवृषदानात्दिवं
व्रजेत्॥संयुक्तहलपंक्त्याख्यंदानंसर्वफलप्रदं॥पंक्तिर्दशहलाप्रोक्तादारवृषसंयुता॥सौवर्णपट्टसन्नद्धा
दत्वास्वर्गेमहीयते॥दशानांकपिलानांतुदत्तानांज्येष्ठपुष्करे॥तत्फलंचाक्षयंप्रोक्तंवृषभस्यतुमोक्षणे॥धर्मो
सित्वंचतुष्पादश्चतुर्हस्तप्रियाहिसा॥नमोब्रह्मण्यदेवेशपितृभूतर्षिपोषक॥त्वयिमुक्तेस्तपालोकाममसंतु
निरामयाः॥मासौऋणोस्तुदैवोस्तोभौतःपैत्रोथमानुषः॥धर्मस्त्वंतत्परस्त्वयागतिःसास्तुमेध्रुवा॥अंकये राम
च्चक्रशूलाभ्यांमंत्रेणानेनमोत्सृज्येत्॥एकादशाहेप्रेतस्ययस्योत्सृज्यतेवृषः॥मुच्यतेप्रेतलोकात्तुषण्मासेच १९९

पु

ब्दिकादिषु॥दशहस्तेनदंडेनत्रिंशद्दंडान्निवर्त्तनं॥तान्येवदशविस्तारात्गोचर्मस्ततमदोधमित्॥गोचर्महिरण्यसं
युक्तंकृष्णाजिनंतुयोर्पयेत्॥सर्वंदुःकृतकमपिसायुज्यंब्रह्मणेपुजेत्॥भाजनेतिलसंपूर्णंमधुनापूर्णमेववा॥द
द्यात्कृष्णतिलानांचप्रस्थमेकंचमाघधं॥शय्यांदत्वातुसद्गुणांभुक्तिमुक्तिमवाप्नुयात्॥हेमांप्रतिसतांगत्वादक
ष्टंगीतपाल्मनः॥विपुलंतुगृहंकृत्वादत्वासाभुक्तिमुक्तिदं॥गृहंमध्यंसमांस्वर्गीदत्वास्याश्चप्रतिश्रियं॥दत्वा
कृत्वागोगृहंचनिष्पापःस्वर्गमाप्नुयात्॥ब्रह्माहरिहरिर्वेदंमध्येचयमकृतकः॥पात्रीतिसमीरस्थिलातंदद्या
त्स्वर्गमाप्नुवेत्॥विस्मरस्यास्मिदंदानंगृहीत्वान्नद्विजोत्रभाक्॥यंचकृष्णमयंकृत्वाकेधत्वाततप्रदापयेत्॥होम
युक्तंद्विजायैतत्कालचक्रमिदंमहत्॥आयुर्तुल्यंतुयोमोहंददत्तुनरकंव्रजेत्॥पंचाशत्पलसंयुक्तंलोहदंडंतुयो
र्पयेत्॥वस्त्रेणाछाद्यविप्रायथमदंडोनविद्यते॥मूलंफलादिवाद्रव्यंसंहतंचार्घचैकतः॥मृत्युंजयंसमुद्दिश्य
दद्यादायुर्विवर्द्धते॥पुमान्कृष्णतिलैःकार्योरोप्यदंडस्तुवर्णाद्दिकः॥खड्गीधृतकरोदीर्घोजपाकुसुममंडनः॥रक्तां
बरधरःस्रग्वीशंखमालाविभूषितः॥उपानत्योगयुक्तांघ्रिःकृष्णकंबलपार्श्वकः॥गृहीतमांसपिंडश्चपौवा
मेवैकालपुरुषः॥संपूज्यतंचगंधाद्यैर्ब्राह्मणायोपपादयेत्॥मरणव्याधिहीनस्यात्राजराजेश्वरोभवेत्॥गो
वृषौतुद्विजेदत्वाभुक्तिमुक्तिमवाप्नुयात्॥एवंताधिष्ठितंचात्रमहैमंदत्वानमत्कृभाक्॥जप्यादिष्ठस्मिन्येकंदत्वास्य

ब्र०पु० भुक्तिमुक्तिभाक्॥ सर्वान् कामानवाप्नोति यः प्रयच्छति कांचनं॥ सुवर्णं दीपमाने तु रजतं दक्षिणोच्यते॥ अन्येषाम
१९२ पि दानानां सुवर्णं दक्षिणा स्मृता॥ सुवर्णं रजतं ताम्रं तंडुलं धान्यमेव च॥ नित्यश्राद्धं देवपूजा सर्वमेतदद्दक्षिणं॥
रजतं दक्षिणा पित्र्ये धर्मकामार्थसाधनं॥ सुवर्णं रजतं ताम्रं मणिमुक्ताप्रवालकं च॥ सर्वमेतन्महादानं प्रोक्तो ददाति न्म
वसुधां ददत्॥ पितृंश्च पितृलोकास्तान् देवस्थाने च देवता॥ शांतपर्येति शं तात्मा यो ददाति वसुंधरां॥ कर्कटं खे
टकं वापि ग्रामं वा सस्यमालिनं॥ निवर्तनशतं वापि तदर्धं वा पदहा दिकं॥ अपि गोचर्ममात्रं वा दत्वोर्व्यां सर्वभाग्भवेत्॥ तै
लबिंदुर्यथा चाप्सु रूपसर्पेष्ठ तेन या॥ सर्वेषामेव दानानामेकजन्मानुगं फलं॥ हाटकं क्षिति गौरीणां सप्तजन्मानु
गं फलं॥ त्रिसप्तकुलजं कृत्वा कन्यादो ब्रह्मलोकभाक्॥ गजं सदक्षिणं दत्वा निर्मलः स्वर्गमाप्नुयात्॥ अश्वं दत्वा वरा
रोपयन्सो नाग्यं स्वर्गमाप्नुयात्॥ दासीं दत्वा द्विजेंद्राय अप्सरोलोकमाप्नुयात्॥ दत्वा ताम्रमयीं स्थालीं पलानां पंच
भिः शतैः॥ अर्धस्थालीं समं दत्वा भुक्तिमवाप्नुयात्॥ शकटं वृषसंयुक्तं दत्वा याने न नाकभाक्॥ दत्वा वस्त्रं स्वर्गम
क्षयं॥ धान्यगोधूमकृतमयं वापि स्वर्गमाग्ददत्॥ आसनं तैजसं पात्रं लवणं गंधचंदनं॥ धूपदीपं च तांबूलं लो रा म०
हरूप्यं च रत्नकं॥ विद्यादिदानात् नाश्वयानि दत्वा स भुक्तिमुक्तिभाक्॥ तिलांश्च तिलपात्रं च दत्वा स्वर्गमवाप्नुयात्॥ १९२
अन्नदानात्परं नास्ति न भूतं न भविष्यति॥ हस्त्यश्वरथदानानि दासीदासगृहाणि च॥ अन्नदानस्य सर्वाणि कलां ना

र्हंति षोडशीं॥ तत्रापि स्वमहाघोरं घोरं यः द्रनुदो भवेत्॥ सर्वपापविनिर्मुक्तो लोकानाप्नोति चाक्षयान्॥ पानीयं च प्र
पां दत्वा भुक्तिमुक्तिमवाप्नुयात्॥ अग्निष्टिकां चमाजा दौ दत्वा दीप्त्यादिमाप्नुयात्॥ देवगंधर्वनारीभिर्विमाने से व्यते
दिवि॥ घृतं तैलं च लवणं दत्वा सर्वमवाप्नुयात्॥ छत्रोपानहकाष्ठानि दत्वा स्वर्गे सुखी भवेत्॥ प्रतिपत्रिषि चिमुख्येषु
विष्कंभादिषु कं नादिषु योगके॥ चैत्रादौ वत्सरादौ च अश्विन्यादौ हरिं यजेत्॥ ब्रह्माणं लोकपालादीन् प्राप्य दानं म
हाफलं॥ वृक्षारामान्नभोजनादीन्मार्गसंवाहनादिकान्॥ पादाभ्यंगादिकं दद्यात् भुक्तिमुक्तिमवाप्नुयात्॥ त्रीणि तुल्य क्रिम
फलानीह गावः पृथ्वी सरस्वती॥ ब्राह्मीं सरस्वतीं दत्वा निर्मलो ब्रह्मलोकभाक्॥ सप्तद्वीपमहीदो यब्रह्मज्ञानं ददाति यः॥
अभयं सर्वभूतेभ्यो स दद्यात्सर्वभक्तितः॥ पुराणं भारतं वापि रामायणमथापि वा॥ लिखित्वा पुस्तकं दद्यात् भुक्ति
मुक्तिमवाप्नुयात्॥ वेदशास्त्रं च नृत्यगीतं यो ध्यापयति स नाकभाक्॥ वृत्तिं दद्यादुपाध्याये छात्राणां भोजनादिकं॥ कि
मदत्तं न वे तेन धर्मकामादिदर्शनात्॥ वाजपेयसहस्राणि सम्यक् दत्तस्य यत्फलं तत्फलं समवाप्नोति विद्यादाना
न्न संशयः॥ शिवालये विष्णुगृहे सूर्यस्य भवने तथा॥ सर्वदानप्रदः स स्यात्पुस्तकं वाचयेत्तु यः॥ त्रैलोक्ये चतुरो व
र्णाश्चत्वारश्चाश्रमाः पृथक्॥ ब्रह्माद्याः देवताः सर्वाः विद्यादाने प्रतिष्ठिताः॥ विद्या कामदुघा धेनुर्विद्या चक्षुर
नुत्तमं॥ उपवेदप्रदानेन गंधर्वैः सह मोदते॥ वेदांगानां च दानेन नाकलोकमवाप्नुयात्॥ सिद्धांतानां प्रदानेन न

मोक्षमाप्नोत्यसंशयं॥ विद्यादानमवाप्नोति प्रदानात्पुस्तकस्य तु॥ शास्त्राणि च पुराणानि दत्वा सर्वमवाप्नुयात्॥ शि
ष्यांश्च शिक्षयेद्यस्तु पुंडरीकफलं लभेत्॥ येन जीवति तं दत्वा फलस्यांतो न विद्यते॥ लोके श्रेष्ठतमं सर्वमात्मनश्चा
पि यत्प्रियं॥ सर्वं पितॄणां दातव्यमक्षयं फलवांछनैः॥ विष्णुरुद्रं पद्मयोनिं देवीं विघ्नेश्वरादिकान्॥ पूजयित्वा प्रदद्या
द्यः पूजार्थं स सर्वभाक्॥ देवानां पंचप्रतिमाः कारयन्सर्वमाप्नुयात्॥ सन्मार्जनं चोपलेपं कुर्वन्स्यान्निर्मलः पु
मान्॥ गंधं पुष्पं धूपदीपं नैवेद्यं च प्रदक्षिणं॥ घंटाध्वजवितानं च प्रेक्षणं वाद्यगीतकं॥ वस्त्रादि दत्वा देवाय भु
क्तिमुक्तिमवाप्नुयात्॥ कस्तूरिकां सिल्हकं च श्रीखंडमगुरुं तथा॥ कर्पूरं च तथा मुस्तं गुग्गुलं विजयं दहेत्॥
घृतप्रस्थेन संस्नाप्य संक्रांत्यादौ च सर्वभाक्॥ स्नानं पलशतं ज्ञेयमभ्यंगं पंचविंशतिः॥ पलानां तु सहस्रेण म
हास्नानं प्रकीर्त्तितं॥ दशापराधांस्तोयेन क्षीरेण स्नपनाच्छतं॥ सहस्रं पयसा दध्ना घृतेनायुतमिष्यते॥ दासी
दासमलंकृत्वा गोमहिष्यश्वगजादिकं॥ देवाय दत्वा सौभाग्यं धनायुष्मान्व्रजेद्दिवं॥ इत्याग्नेये नानादाना
नि॥ ॥ अग्निरुवाच॥ ॥ काम्यदानानि वक्ष्यामि सर्वकामप्रदानि मो॥ नित्यं पूजां मासि मासि कृत्वार्थे काम्यपू
जने॥ व्रताहेर्णगुरोः पूजा वत्सरांते महार्चनं॥ मार्गशीर्षे मार्गशीर्षे चैत्रके मलं पिष्टसंभवं॥ शिवाय पूजयेद्दद्या
त्स शिवलोके चिरं वसेत्॥ गजं पौषेपि ष्टमरखं त्रिः सप्तकुलमुद्धरेत्॥ माघे चाश्वरथं पैष्टं दत्वा न नरकं व्रजेत्॥ राम
१९३

फाल्गुने तु रथं पौष्टं स्वर्गभुक्स्यान्महीपतिः॥ चैत्रे चेक्षुमयं गारं दासदासीसमन्वितं॥ दद्यात्स्वर्गे चिरं स्थित्वा तदं
ते स्यान्महीपतिः॥ सप्तव्रीहींश्च वैशाखे दत्वा शिवमयो भवेत्॥ आषाढे पक्वजानां तु दत्तो तत्कुलं नृपः॥ बलिमंडल
कं चान्नं कृत्वाषाढे शिवो भवेत्॥ विमाने श्रावणे पौष्पं दत्वा स्वर्गी ततो नृपः॥ क्षीरसर्पिर्मधुर्युक्तं पात्रमाश्विने स्व
गुणोद्दत्त॥ कार्त्तिके गुडखंडाघं दद्यात्स्वर्गी ततो नृपः॥ मेरुदानं द्वादशकं वक्ष्येहं भुक्तिमुक्तिदं॥ मेरुव्रते तु
कार्त्तिक्यां रत्नमेकं ददेत द्विजे॥ सर्वेषां चैव मेरूणां प्रमाणं क्रमशः शृणु॥ वज्रपद्ममहानीलनीलस्फटिक
संज्ञितः॥ पुष्पं मरकतं मुक्ता प्रस्थमात्रेण चोत्तमः॥ मध्यार्द्धं स्यात्तदर्द्धे वित्तशाठ्यं विवर्जयेत्॥ कर्णिका
यां न्यसेन्मेरुं ब्रह्मविष्ण्वीशदेवतं॥ माल्यवान्पूर्ववित्त पूज्यस्तत्र त्रयेभ नसंज्ञितः॥ अश्व हस्यस्ततः प्रोक्तानि
षधो मेरुदक्षिणे॥ हेमकूटोथ मगवान्त्रयं सोमो तथा त्रयं॥ नीलश्वेतश्च शृंगी च पश्चिमे गंधमादनः॥ वैष
ह्रं केतुमालस्यात्मेरुर्द्वादशसंयुतः॥ सोपवासोर्चयेद्विष्णुं शिवं वा स्नानपूर्वकं॥ देवाग्रे चार्च्य मेरुं च मंत्रैर्वि
प्रायवैद ददेत्॥ विप्राय शुभगोत्राय मेरुरत्नमयं ददेत्॥ युक्तसमुत्तय विमलस्थे विष्णुदेववदामिते॥ इंद्रलोके ब्रह्म
लोके शिवलोके हरेः पुरे॥ कुलमुद्धृत्य क्रीडेत विमाने देवपूजितः॥ अयनेष्वपि च कालेषु संक्रांत्यादौ प्रदापयेत्॥ प
लानां तु सहस्रेण महामेरुं प्रकल्पयेत्॥ शृंगत्रयसमायुक्तं ब्रह्मविष्णुहरान्वितं॥ एकैकं पर्वतं तस्मात्तेकैकेन

अ०पु० १९५

कारयेत्॥ मेरुणा सह शैलाः स्युः ख्यातास्तत्र त्रयोदश॥ अयने ग्रहणादौ च विष्णवे हरिमर्च्य च॥ स्वर्णमेरुं द्विजा
याच्य विष्णुलोके चिरं वसेत्॥ परमाणवो यावंतः सह राजा भवेच्चिरं॥ रौप्यमेरुं द्वादशाद्रियुतं संकल्पितं ददेत्॥
प्रागुक्तं तु फलं तस्य विप्रं प्रपूज्य च॥ भूमिमेरुं च विषयं मंडलं ग्राममेव च॥ परिकल्प्याष्टमांशेन शेषगाः पूर्ववत्फ
लं॥ द्वादशाद्रिसमायुक्तं हस्तिमेरुं च रूपिणं॥ द्वे त्रिपुरुषैर्युक्तं दत्वानंतफलं भवेत्॥ त्रिपंचाश्वैरश्वमेरुं हययु
द्वादशसंयुतं॥ विष्ण्वादीन्पूज्य तं दत्वा भुक्तिभोगी नृपो भवेत्॥ अश्वसंख्याप्रमाणेन गोमेरुं पूर्ववद्ददेत्॥ यज्ञवे
भारमात्रैः सुवस्त्रैस्तु मेरुश्च मध्यतिः॥ द्वेभ्या द्वादशवस्त्रैश्च सदत्वा चाक्षयं फलं॥ घृतपंचसहस्रैश्च पलानामाज्यप
र्वतः॥ दशैव पर्वत एकैकः पर्वतस्मिन्हरिं यजेत्॥ विष्णवे ब्राह्मणायर्पितश्च वत्वा हरिं व्रजेत्॥ एवं तु खंडमेरुं तु
कृत्वा दत्वाप्नुयात्फलं॥ धान्यमेरुं पंचखारो परएकैकखारकः॥ स्वर्णत्रिशृंगकाः सर्वे ब्रह्मविष्णुमहेश्वरा
न्॥ सर्वं संपूज्य विष्णुं वा विशेषादक्षयं फलं॥ एवद्दृष्टंसमानेन तिलमेरुं प्रकल्पयेत्॥ शृंगाणि पूर्ववत्तस्य त
था चान्येन रेणुच॥ तिलमेरुं प्रदत्वाथ बंधुभिर्ब्रह्मलोकभाक्॥ नमो विष्णुस्वरूपाय धराधाराय वै नमः॥ ब्रह्म
विष्ण्वीशशृंगाय धरानाभिस्थिताय च॥ दशद्वादशनार्याप सर्वपापापहारिणे॥ विष्णुभक्ताय पूर्णताय त्राणं
मे कुरु सर्वथा॥ निष्पापः पितृभिः सार्धं विष्णुं गच्छामि ॐ नमः॥ त्वं हरिस्त्वं हरेरग्रे अहं विष्णुं स विष्णवे॥ निवेद

राम० १९५

यामि भक्त्या तु भुक्तिवाक्याय हितवे॥॥ इत्याग्नेये मेरुदानानि॥॥ अग्निरुवाच॥॥ पृथ्वीदानं प्रवक्ष्यामि पृथिवी त्रि
विधा मता॥ शतकोटियोजनानां सप्तद्वीपा वसुंधरा॥ जंबूद्वीपावधिः सा तन्मादिः समीरिता॥ उत्तमां पंचभि
र्भारैः कांचनेन प्रकल्पयेत्॥ तदर्धाद्भावयेत्कूर्मं तथा यत्नं समादिशेत्॥ उत्तमा कल्पिता पृथ्वी अंशेनैव तु मध्य
मा॥ कन्यका च त्रिभागेन त्रिशद्धा कूर्मपंकजे॥ फलानां तु सहस्रेण कल्पयेत्कल्पपादपं॥ मूलदंडं सपत्रं च
फलपुष्पसमन्वितं॥ पंकं च स्कंधसंकल्पं पंचानां दापयेत्सुधीः॥ एतद्दत्वा ब्रह्मलोके पितृभिर्मोदते चिरं॥ विष्णुमे
कामधेनुं च पलानां पंचभिः शतैः॥ ब्रह्मविष्णुमहेशाद्या देवा धेनौ व्यवस्थिताः॥ धेनुदानं सर्वदानं सर्वब्रह्मलोकदं।
वैष्णवेक कपिलां दत्वा तारयेत्सकुलं कुलं॥ अलंकृत्वा स्त्रियं दद्यान्नरमेधफलं लभेत्॥ भूमिं दत्वा सर्वभाक्स्यात्स
र्वसस्यप्ररोहिणीं॥ ग्रामं चाथ पुरं वापि खेटकं च ददत्सुखी॥ कार्त्तिक्यादौ वृषोत्सर्गं कुर्वंस्तारयते फलं॥॥ इत्याग्ने
ये महादानानि॥॥ अग्निरुवाच॥॥ नाडीचक्रं प्रवक्ष्यामि यद्ज्ञानाज्ज्ञायते हरिः॥ नाभेरधस्ताद्यत्कंदमंकुरास्तत्र
निर्गताः॥ द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः॥ तिर्यगूर्ध्वमधश्चैव व्याप्तं ताभिः समंततः॥ चक्रवत्संस्थिता
स्त्वेताः प्रधाना दश नाडयः॥ इडा च पिंगला चैव सुषुम्णा च तथैव हि॥ गांधारी हस्तिजिह्वा च पूषा चैव पत्रणत
था॥ अलंबुषा कुहूश्चैव शंखिनी दशमी स्मृता॥ दशप्राणवहा ह्येता नाड्यः परिकीर्त्तिताः॥ प्राणोपानः समान

श्च उदानो व्यान एव च॥ नाग कूर्मोथ कृकरो देवदत्तो धनंजयः॥ प्राणस्थः प्रथमो वायुः पंचानामपि स प्रभुः॥ प्राणप्रा
णायते प्राणं विशानां पूरणं प्रति॥ नित्यमापूरयत्येष प्राणिनामुरसि स्थितः॥ निश्वासोछ्वासकासैस्तु जीवनो नाम
मारुतः॥ स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनं॥ उद्वेजयति मर्माणि उदानो नाम मारुतः॥ व्यानो विनामयत्यंगं
व्यानो व्याधी प्रकोपनः॥ प्रतिदानं तथा कंठाद्व्यापनाद्व्यान उच्यते॥ उद्गारे नाग इत्युक्तः कूर्मश्चोन्मीलने स्थितः
कृकरो भक्षणे चैव देवदत्तो विजृंभिते॥ धनंजय स्थितो घोषे मृतस्यापि न मुंचति॥ जीवः प्रयाति दशधा नाडीचक्रं हि
ते न तत्॥ संक्रांतिर्विषुवं चैव अहोरात्रायनानि च॥ अधिवासमणं चैव ऊनरात्रं बलं तथा॥ ऊनरात्रं भवेद्धिकाश्च
धिवासो विजृंभिका॥ रूपं चात्र भवेत्कासो निश्वासो बलमुच्यते॥ उत्तरं दक्षिणं ज्ञेयं वामं दक्षिणसंज्ञितं॥ मध्ये
तु विषुवं प्रोक्तं पुटद्वयविनिःसृतं॥ संक्रांतिः पुनरस्यैव स्वस्थानात्स्थानयोगतः॥ सुषुम्णा मध्यमे त्वंगे इडा वा
मे प्रतिष्ठिता॥ पिंगला दक्षिणे विप्रैः प्राणवहः स्मृतः॥ आयामो वा त्रिरेवं स्यादेको वा स्वर्गसाधकः॥ प्राणायामो
देहमध्यस्थः सोमग्रहण निष्पते॥ देहातीतमनायाममादित्यग्रहणं विदुः॥ उदरं पूरयेत्तावत् वायुनाया
वदीप्सितम्॥ प्राणायामो भवेदेष पूरको देहपूरकः॥ पिधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः॥ संपूर्णकुं
भवत्तिष्ठेत् प्राणायामः स कुंभकः॥ मुंचेद्वायुं ततस्तूर्ध्वं श्वासेनैकेन मंत्रवित्॥ उच्छ्वासयोगयुक्तस्तु वायुमूर्द्ध्वं

विरेचयेत्॥ उच्चरंति स्वयं यस्मात्स्वदेहावस्थितः शिवः॥ तस्मात्तत्वविदां चैव स एव जप उच्यते॥ अयुतद्वे सह
स्रैकं षट्शतानि तथैव च॥ अहोरात्रेण योगीन्द्रो जपसंख्यां करोति सः॥ अजपा नाम गायत्री ब्रह्मविष्णुमहेश्वरी॥
अजपां जपते यस्तां पुनर्जन्म न विद्यते॥ चंद्राग्निरविसंयुक्ता आद्या कुंडलिनी मता॥ हृत्प्रदेशे तु सा ज्ञेया अंकुराका
रसंस्थिता॥ सृष्टिन्यासो भवेत्तत्र स्वर्गे सर्गावलंबनात्॥ स्रवंतं चिंतयेत्तस्मिन्नमृतं चाधिकोत्तमः॥ देहस्थः सक
लो ज्ञेयो निष्कलो देहवर्जितः॥ हंस हंसेति यो ब्रूयात् हंसो देवः सदाशिवः॥ तिलेषु च यथा तैलं पुष्पे गंधः समाश्रि
त॥ पुरुषस्य तथा देहे स बाह्याभ्यंतरे स्थितः॥ ब्रह्मणो हृदये स्थानं कंठे विष्णुः समाश्रितः॥ भानुमध्ये स्थितो रु
द्रो ललाटे तु महेश्वरः॥ प्राणाग्रं तु शिवं विद्यात्तस्यांते तु परापरं॥ पंचधा सकलः प्रोक्तो विपरीतस्तु निष्कलः॥ प्र
सादन्नादसुखाय स उत्तमं तु जपेद्बुधः॥ षण्मासात्सिद्धिमाप्नोति योगयुक्तो न संशयः॥ गमागमस्य ज्ञानेन सर्व
पापक्षयो भवेत्॥ अणिमादिगुणैश्वर्यं षड्भिर्मासैरवाप्नुयात्॥ स्थूलः सूक्ष्मः परश्चेति प्रसादः कथितो मया॥ ह्र
स्वो दीर्घः प्लुतश्चेति प्रसादं लक्षयेत्त्रिधा॥ ह्रस्वो दहति पापानि दीर्घो मोक्षप्रदो भवेत्॥ आप्यायने प्लुतश्चेति मूर्ध्नि बि
न्दुविभूषितः॥ आदावंते च कूटस्य सषट्कारो मारपीडितः॥ आदानं तेन तद्रूपमात्मनो संप्रकीर्तितः॥ देवस्य दक्षि
णां मूर्तिं पंचलक्षं स्थितो जपेत्॥ जपांते घृतहोमस्तु दशसाहस्रिको भवेत्॥ एवमाप्यायितो मंत्रो तद्रूपो घाटादिका

अ०पु० रयेत्॥ ऊर्ध्वं शून्यमधः शून्यं मध्ये शून्यं निरामयं॥ त्रिशून्यं यो विजानाति स मुच्येत ध्रुवं द्विजः॥ प्रासादं यो न जानाति
१९६ पंचमं च महांतरं॥ अष्टत्रिंशत्कलायुक्तं न स आचार्य उच्यते॥ तथोंकारं च गायत्रीं रुद्रादीन्वेत्त्यसौ गुरुः॥ ॥इ
१९७ त्याग्नेये महापुराणे मंत्रमाहात्म्यं॥ ॥अग्निरुवाच॥ ॥ॐकारं जो विजानाति स योगी स हरिः पुमान्॥ ॐकारमभ्यसे
त्तस्मात्तमंत्रसारं तु सर्वदा॥ सर्वमंत्रप्रयोगेषु प्रणवः प्रथमः स्मृतः॥ तेन संपरिपूर्णं यत्तत्पूर्णं कर्म नेतरत्॥ ॐ
कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः॥ त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखं॥ यो धीते हन्यहन्येतां त्री
णि वर्षाण्यतंद्रितः॥ स ब्रह्म परमभ्येति वायुभूतः स्वमूर्तिमान्॥ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः॥ सावि
त्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते॥ सप्तावर्त्ता पापहरा दशभिः प्रापयेद्दिवं॥ विंशावर्त्ता तु सा देवी नयते ही
श्वरालयं॥ अष्टोत्तरशतं जप्त्वा तीर्णः संसारसागरात्॥ रुद्रकुंभांडजप्येभ्यो गायत्री तु विशिष्यते॥ न गायत्र्याः परं
जप्यं न व्याहृतिसमं त्वतः॥ गायत्र्याः पादमप्यर्द्धमृगर्द्धमृतमेव वा॥ ब्रह्महत्यासुरापानं सुवर्णस्तेयमेव च॥ गु
रुदारागमं चैव जप्येनैव प्रणश्यति॥ पापे कृते तिलैर्होमो गायत्र्या जप ईरितः॥ जप्त्वा सहस्रं गायत्र्या उपवासी राम
स पापहा॥ गोघ्नः पितृघ्नो मातृघ्नो ब्रह्महा गुरुतल्पगः॥ ब्रह्मघ्नः स्वर्णहारी च सुरापो लक्षजप्यतः॥ शुध्यते १९६
चाथवा स्नातः शतमंत्रं जले जपेत्॥ अपः शतेन पीत्वा तु गायत्र्याः पापहा भवेत्॥ शतं जप्त्वा तु गायत्री पापोपश १९७

मनी स्मृता॥ सहस्रं जप्त्वा सा देवी उपपातकनाशनी॥ अभीष्टदा कोटिजप्या देवत्वं राजतामियात्॥ ॐकारं पूर्व
मुच्चार्य भूर्भुवः स्वस्तथैव च॥ गायत्रीं प्रणवं चांते जपे चैवमुदाहृतं॥ विश्वामित्र ऋषिश्छंदो गायत्री सविता त
था॥ देवतोपनयो जाप्ये वै नियोगाद्धुते तथा॥ अग्निर्वायू रविर्विद्युत्यमो जलपतिर्गुरुः॥ पर्जन्य इंद्रो गंधर्वः पू
षा च तदनंतरं॥ मित्रोऽथ वरुणस्त्वष्टा वसवो मरुतः शशी॥ अंगिरा विश्वनासत्यः कस्तथा सर्वदेवताः॥ रुद्रो ब्रह्मा
च विष्णुश्च क्रमशोऽक्षरदेवताः॥ गायत्र्या जपकाले तु कथिताः पापनाशनाः॥ पादांगुष्ठौ च गुल्फौ च नलकौ
जानुनी तथा॥ जंघे शिश्नं च वृषणौ कटिर्नाभिस्तथोदरं॥ स्तनौ च हृदयं ग्रीवा मुखं तालु च नासिका॥ चक्षुषी
च भ्रुवोर्मध्यं ललाटं पूर्वमाननं॥ दक्षिणोत्तरपार्श्वौ द्वे शिर आस्यमनुक्रमात्॥ पीतः श्यामश्च कपिलाः कबर
शिवसन्निभः॥ रुक्मविद्युद्धूम्रकृष्णरक्तगौरेंद्रनीलभा॥ स्फटिकवर्णपीतो वा पद्मरागोऽखिलद्युतिः॥ हेमधूम्र
नीलरक्तरक्तकृष्णसुवर्णाः शुक्लमन्मथपलाशाभासा गायत्र्या वर्णकाः क्रमात्॥ ध्यानकाले पापहरा हुतैषा सर्वका
मदा॥ गायत्र्या तु तिलैर्होमः सर्वपापप्रणाशनः॥ शांतिकामो यवैः कुर्यादायुष्कामो घृतेन च॥ सिद्धार्थकैः क
र्मसिद्ध्यै पयसा ब्रह्मवर्चसे॥ पुत्रकामस्तथा दध्ना धान्यकामस्तु शालिभिः॥ क्षीरवृक्षैः शमीभिस्तु ग्रहपीडो
पशांतये॥ धनकामस्तथा बिल्वैः श्रीकामः कमलैस्तथा॥ आरोग्यकामो दूर्वाभिस्त्वौत्पाते स एव हि॥ सो

भाग्येष्टु पुग्गुलेन विद्यार्थी पापसेन च ॥ अपुत्रेणो ऋसि विस्यात् लक्षेण्मे एणेन सेप्सितं ॥ द्या ब्रह्मवधात्मुक्तः ऊ
लोपारी हरिर्भवेत् ॥ गृहयज्ञखरोवापि होमो पुतमुखोथ कृत ॥ आवाहनं च गायत्र्यास्ततऊंकारमस्यसेत ॥ सम
लोंकारं तु गायत्रीं निवध्नीयाच्छिखां ततः ॥ पुनराचम्य हृदयं नाभिस्कंधौ च संस्पृशेत् ॥ प्रणवस्य ऋषिर्ब्रह्मा गा
यत्री छंद एव च ॥ देवोग्निः परमार्थः स्यात् योगो वै सर्वकर्मसु ॥ शुक्ला चाग्निमुखी दिव्या कात्यायनसगोत्रजा ॥
त्रैलोक्यचरणा दिव्या पृथ्व्याधारसंयुता ॥ अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥ ॐ तेजोसि सहोसि बलम
सि भ्राजोसि ॥ देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि ॥ सर्वमभिभूः ॐ अभिभूः आगच्छ वरदे देवि जप्ये
मे सन्निधौ भव ॥ व्याहृतीनां तु सर्वासामृषिरेव प्रजापतिः ॥ व्यस्ताश्चैव समस्ताश्च ब्राह्ममक्षरमोमिति ॥ विश्वामि
त्रो जमदग्निर्भरद्वाजोथ गौतमः ॥ ऋषिरत्रिर्वसिष्ठश्च काश्यपश्च यथाक्रमं ॥ अग्निर्वायुरविश्चैव बृहस्पतिर्वरु
णस्तथा ॥ इंद्रो विश्वे च व्याहृतीनां देवता निय यथाक्रमं ॥ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ त्रिष्टुप् च जगती
चेति छंदांस्याहुरनुक्रमात् ॥ विश्वयोगो व्याहृतीनां प्राणायामे च होमके ॥ आपो हि ष्ठेत्यचा चांडुपदादीति
तिसृणां ॥ तथा हिरण्यवर्णाभिः पावमानीभिरंततः ॥ विप्रुषोष्टौ क्षिपेदूर्ध्वमधो यत्क्षस्य पापजित् ॥ ऋतं च सत्यं रू
तं चेति जपो त्रिरघमर्षणं ॥ आपो हि ष्ठेति तिसृणां सिंधुद्वीप ऋषिः स्मृतः ॥ ब्राह्मस्नानाय छंदोस्य गायत्रं देवता

जलं ॥ मार्जने विनियोगोस्य हयावभृथके क्रतौ ॥ अघमर्षणसूक्तस्य ऋषिर्देवाघमर्षणं ॥ अनुष्टुप् च भवेच्छंदो भाव
वृत्तं च दैवतं ॥ आपो ज्योतिरस इति गायत्र्यास्तु शिरः स्मृतं ॥ ऋषिः प्रजापतिस्तस्य छंदो हीनं यजुर्यतः ॥ ब्रह्माग्निवायुसू
र्याश्च देवताः परिकीर्तिताः ॥ प्राणाद्वायुस्तु वायुः स्यात् वायोरग्निश्च जायते ॥ अग्नेरापस्ततः शुद्धिस्ततश्चाचमनं चरेत् ॥
अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु ॥ तपो यज्ञ वषट्कार आपो ज्योतिरसोमृतं ॥ उदुत्यं जातवेदसमृषिः प्रस्कण्व
उच्यते ॥ गायत्रं छंद आख्यातं सूर्यश्चैव तु दैवतं ॥ अतिरात्रे नियोगः स्यात् तदग्निसोमे नियोजकः ॥ चित्रं देवेति वर्गस्य च
ऋषिः कौत्सो उदाहृतः ॥ त्रिष्टुप् च छंदो दैवतं च सूर्योस्याः परिकीर्तिताः ॥ ॥ इत्याग्नेये संध्याविधिः ॥ ॥ अग्निरुवाच ॥
एवं संध्याविधिं कृत्वा गायत्रीं च जपेत्स्मरेत् ॥ गायच्छिष्यान्यतस्त्रायेत्कायात् प्राणांस्तथैव च ॥ ततः स्मृतेयं गायत्री सा
वित्रीयं ततो यतः ॥ प्रकाशनात्स सवितुर्वाग्रूपत्वात्सरस्वती ॥ तज्ज्योतिः परमं ब्रह्म भर्गस्तेजो यतः स्मृतं ॥ भा दीप्ताविति
रूपं हि भ्रस्ज पाके थ तत्स्मृतं ॥ ओषध्यादिकं पचति भ्राजृ दीप्तौ तथा भवेत् ॥ भर्गः स्याद्भ्राजत इति बहुलं छंदसीरि
तं ॥ वरेण्यं सर्वतेजोभ्यः श्रेष्ठं वै परमं पदं ॥ स्वर्गापवर्गकामैर्वा वरणीयं सदैव हि ॥ वृणोतेर्वरणार्थत्वात् जाग्रत्स्व
प्नादिवर्जितं ॥ नित्यशुद्धबुद्धमेकं सत्यं तद्धी महेश्वरः ॥ अहं ब्रह्म परं ज्योतिः पापेन हि विमुक्तये ॥ तज्ज्योतिर्भगवान्
विष्णुर्जगज्जन्मादिकारणं ॥ शिवं केचित्पठंति स्म शक्तिरूपं पठंति च ॥ केचित्सूर्यं केचिदग्निं वेदगा अग्निहो

त्रिधा॥ अग्न्यादिरूपी विष्णुर्हि वेदादौ ब्रह्म गीयते॥ अग्नेदं परमं विष्णोर्देवस्य सवितुः स्मृतं॥ महद्दाघं स्तूयते हि स्वयं ज्योति
र्हरिः प्रभुः॥ पर्जन्यो वायुरादित्यः शीतोष्णाद्यैश्च पाचयेत्॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते॥ आदित्याज्जाय
ते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ दधातेर्वा धीमहीति मनसा धारयेमहि॥ नोस्माकं यच्च भर्गस्तत्सर्वेषां प्राणिनां धियः॥ चो
दयात्प्रेरयेद्बुद्धीर्भोक्तॄणां सर्वकर्मसु॥ दृष्टादृष्टविपाकेषु विष्णुः सूर्याग्निरूपवान्॥ ईश्वरप्रेरितो गच्छेत्स्वर्गं वा स्वर्ग
मेव च॥ ईशावास्यमिदं सर्वं महदादि जगद्धरेः॥ स्वर्गाद्यैः क्रीडते देवो योहं सः पुरुषः प्रभुः॥ आदित्यांतर्गतं यच्च
भर्गाख्यं वै मुमुक्षुभिः॥ जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च॥ ध्यानेन पुरुषोयं च द्रष्टव्यः सूर्यमंडले॥ त
अ त्वं सदसि चिद्ब्रह्म विष्णोर्यत्परमं पदं॥ देवस्य सवितुर्भर्गो वरेण्यं हि तुरीयकं॥ देहादिजाग्रद्ब्रह्मात्सगंमहं ब्रह्मेति धी
महि॥ योसावादित्ये पुरुषः सोसावहमनंतकः॥ यज्ञादिशुभकर्मादीन्प्रवर्तयति यः सदा॥ ॥ इत्याग्नेये गायत्रीविष्णु
निर्वाणं॥ अग्निरुवाच॥ ॥ लिंगमूर्त्तिं शिवं स्तुत्वा गायत्रीयोगमाप्तवान्॥ निर्वाणं परमं ब्रह्म वशिष्ठोन्यत्र शंकरात्॥ नमः
कनकलिंगाय वेदलिंगाय वै नमः॥ नमः परमलिंगाय व्योमलिंगाय वै नमः॥ नमः सहस्रलिंगाय वह्निलिंगाय वै नमः॥ न
मः पुराणलिंगाय स्मृतिलिंगाय वै नमः॥ नमः पाताललिंगाय ब्रह्मलिंगाय वै नमः॥ नमो रहस्यलिंगाय सप्तद्वीपोर्ध्वलिं राम १९९
गिने॥ नमः सर्वात्मलिंगाय सर्वलोकांगलिंगिने॥ नमस्त्वव्यक्तलिंगाय बुद्धिलिंगाय वै नमः॥ नमोहंकारलिंगाय

श्रुतिलिंगाय

नमस्तन्मात्रलिंगिने॥ नमः पुरुषलिंगाय भावलिंगाय वै नमः॥ नमो रजोर्ध्वलिंगाय सत्वलिंगाय वै नमः॥ नमस्ते भव
लिंगाय नमस्त्रैगुण्यलिंगिने॥ नमोनागतलिंगाय तेजोलिंगाय वै नमः॥ नमो वायूर्ध्वलिंगाय वै नमः॥ नमस्तेथर्वलिंगा
यपत्तलिंगाय वै नमः॥ नमो यज्ञांगलिंगाय यज्ञलिंगाय वै नमः॥ नमस्ते भवलिंगाय देवानुगतलिंगिने॥ दिश नः प
रमं योगं सत्सतं सत्तमं तथा॥ ब्रह्म चैवाक्षयं देव शमं चैवं परं विभो॥ अक्षयत्वं च वंशस्य धर्मं च मतिमक्षयां॥ अ
ग्निरुवाच॥ ॥ वशिष्ठेन स्ववर्गस्तु स्तुष्टः श्रीपर्वते पुरा॥ वशिष्ठाय वरं दत्वा तत्रैवांतरधीयत॥ ॥ इत्याग्नेये लिंगमूर्ति
शिवनिरूपणं॥ ॥ अग्निरु॰॥ ॥ पुष्करेण च रामाय राजधर्मान्हि पृच्छते॥ यथादौ कथितं तद्वद्वशिष्ठः कथयामि ते॥
राजधर्मं प्रवक्ष्यामि सर्वस्माद्राजधर्मतः॥ राजा हरिः शत्रुहंता प्रजापालः सदंडवान्॥ पालयिष्यामि वः सर्वान्धर्मस्था
न्व्रतमाचरेत्॥ सांवत्सरं स वृणुयात्पुरोहितमथर्त्विजं॥ मंत्रिणो निखिलान्स्वर्गान्महिषीं धर्मलक्षणां॥ सांव
त्सरो नृपं काले संभारैरभिषेचनं॥ कुर्यान्मनुत्रयेणान्त्रिकालस्य नियमः स्मृतः॥ तिलैः सिद्धार्थकैः स्नानं सांवत्सर
पुरोहितौ॥ घोषयित्वा जयं राज्ञो राजा भद्रासनः स्थितः॥ अभयं घोषयेद्बद्धान्मोक्षयेद्राज्यकालिके॥ पुरोधसाभि
षिक्तस्तु कार्यैन्द्री शांतिरेव च॥ उपवासाभिषेकाहे वेद्यग्नौ जुहुयान्मनून्॥ वैष्णवानैन्द्रमंत्रांश्च सावित्रान्वैश्वदे
वतान्॥ सौम्यान्स्वस्त्ययनं धर्म्यमायुष्याभयदान्मनून्॥ अपराजितां च कलशं वह्नेर्दक्षिणपार्श्वगं॥ संपातवंतं च हे

अ०पु० मेच पूजयेद्गंधपुष्पकैः॥ प्रदक्षिणावर्त्तशिखस्तप्तजांबूनदप्रभः॥ रथौघमेघनिर्घोषो विधूमश्च कृताशनः॥ अनुलो
२०० मः स्वगंधश्च स्वस्तिकाकारसंनिभः॥ प्रसन्नार्चिर्महाज्वालः स्फुलिंगरहितो हितः॥ न व्रजेच्चांतरा मध्ये नमार्जारमृ
गपक्षिणः॥ पर्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः॥ वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात्॥ इंद्रा
लयमृदा ग्रीवां हृदयं तु नृपाजिरात्॥ करिदंतोद्धृतमृदा दक्षिणं तु तथा भुजं॥ वृषशृंगोद्धृतमृदा वामं चैव तथा
भुजं॥ सरोमृदा च तथा पृष्ठमुदरं संगमान्मृदा॥ नदीतटद्वयमृदा पार्श्वे संशोधयेत्तथा॥ वेश्याद्वारमृदा रा
ज्ञः कटिशौचं विधीयते॥ गोस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा॥ अश्वस्थानात्तथा जंघे रथचक्रमृदांघ्रि
के॥ मूर्द्धानं पंचगव्येन भद्रासनगतं नृपं॥ अभिषिंचेन्नमात्यानां चतुष्टयमथो घटैः॥ पूर्वतो हेमकुंभेन घृतपूर्णेन
ब्राह्मणः॥ रूप्यकुंभेन याम्ये च क्षीरपूर्णेन क्षत्रियः॥ दध्ना च ताम्रकुंभेन वैश्यः पश्चिमगेन च॥ मृन्मयेन जलेनोद
क् शूद्रामात्योऽभिषेचयेत्॥ ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः॥ कुर्वीत मधुना विप्रश्छंदोगश्च कुशोदकैः॥ स
म्पातवंतं कलशं तथा गत्वा पुरोहितः॥ सविधायाग्निरक्षां तु सदस्येषु यथाविधि॥ राजश्रियाभिषेके च ये मंत्राः राम
परिकीर्त्तिताः॥ तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वनैस्तथा॥ ततः पुरोहितो गच्छेत् वेदिमूलं सदेव तु॥ शतच्छि २००
द्रेण पात्रेण सौवर्णेनाभिषेचयेत्॥ या ओषधीत्योषधीभिः रथे अक्षेति गंधकैः॥ पुष्पैः पुष्पवतीत्येव ब्राह्मणेति

च बीजकैः॥ रत्नैराशुः शिशानश्च ये देवाश्च कुशोदकैः॥ यजुर्वेद्यथ ऋग्वेदी गंधद्वारेति संस्पृशेत्॥ शिरः कंठं रोच
नया सर्वतीर्थोदकैर्द्विजाः॥ गीतवाद्यादिनिर्घोषैश्चामरव्यजनादिभिः॥ सर्वौषधिमयं कुंभं धारयेयुर्नृपाग्रतः॥ तं प
श्येद्दर्पणं राजा घृतं वै मंगलादिकं॥ अभ्यर्च्य विष्णुं ब्रह्माणमिंद्रादींश्च ग्रहेश्वरान्॥ व्याघ्रचर्मोत्तरां शय्यामुपविष्टः पु
रोहितः॥ मधुपर्कादिकं कृत्वा पट्टबंधं प्रकारयेत्॥ राज्ञो मुकुटबंधं च पंचचर्मोत्तरं ददेत्॥ ध्रुवा द्यौरिति च विशेत् तद्
वृषदंशं वृषदंशजं॥ द्वीपिजं सिंहजं व्याघ्रजातं चर्म तदासने॥ अमात्यसचिवादींस्तु प्रतिहारः प्रदर्शयेत्॥ गोजाविगृहदाना
द्यैः सांवत्सरपुरोहितौ॥ पूजयित्वा द्विजान् प्रार्च्य ह्यन्यान् भूगोन्नमुख्यकैः॥ वह्निं प्रदक्षिणीकृत्य गुरुं नत्वाथ पृष्ठतः॥
वृषमालभ्य गां वत्सां पूजयित्वाथ मंत्रितं॥ अश्वमारुह्य नागं च पूजयेत्तं समारुहेत्॥ परिभ्रमेद्राजमार्गे बलयुक्तः प्र
दक्षिणं॥ पुरं विशेच्च दानाद्यैः प्रार्च्य सर्वान्विसर्जयेत्॥ ॥ इत्याग्नेये राजाभिषेकः॥ ॥ अग्निरुवाच॥ ॥ राजदेवाद्य
भिषेकमंत्रान्वक्ष्ये घमर्द्दनान्॥ कुंभात्कुशोदकैः सिंचेत् तेन सर्वं हि सिध्यति॥ सुरास्त्वामभिषिंचंतु ब्रह्मवि
ष्णुमहेश्वराः॥ वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः॥ भवंतु विजयायैव इंद्राद्या दश दिक्पताः॥ रुद्रो धर्मो म
नुर्दक्षो रुचिः श्रद्धा च सर्वदा॥ भृगुरत्रिर्वसिष्ठश्च सनकश्च सनंदनः॥ सनत्कुमारोंगिराश्च पुलस्त्यः पुलहस्तथा
मरीचिः कश्यपः पांतु प्रदेशाः पृथिवीपते॥ प्रभासुरा बर्हिषदो अग्निष्वात्ताश्च पांतु ते॥ क्रव्यादाश्चोपहूताश्च सुप

अ॰पु॰ २०९ श्वस्तकालिनः॥ अभ्यषिषिंचंतु लक्ष्म्याद्या धर्मवल्लभाः॥ आरिष्टाद्याः कश्यपश्च बहुपुत्रस्य वल्लभा॥ कृशाश्वस्य तु
पुत्राश्च भार्याश्चारिष्टनेमिनः॥ अश्विन्याद्यास्तु चंद्रस्य पुलहस्य सता प्रिया॥ भूता च कपिशा दंष्ट्री सुरसा सरमा दनुः॥
श्येनी भासी तथा क्रौंची धृतराष्ट्री शुकी तथा॥ एतास्त्वामभिषिंचंतु अरुणश्चार्कसारथिः॥ आयतिर्नियती रात्रिर्निद्रा
लोकस्थितौ स्थिताः॥ उमा मेना शची पांतु धूम्रोर्णा निर्ऋतिर्भवेत्॥ गौरी शिवा च ऋद्धिश्च वेलायां चैव नड्वला॥ असिक्नी
च तथा ज्योत्स्ना देवपत्न्यो वनस्पतिः॥ महाकल्पश्च कल्पश्च मन्वंतरयुगानि च॥ संवत्सराणि वर्षाणि पांतु त्वामयनद्व
यं॥ ऋतवश्च तथा मासाः पक्षा रात्र्यहनी तथा॥ संध्या रात्रिर्मुहूर्त्ताश्च कालस्यावयवाकृतिः॥ सूर्याद्याश्च ग्रहाः पांतु
मनुः स्वायंभुवादिकः॥ स्वायंभुवः स्वारोचिषः उत्तमस्तामसो मनुः॥ रैवतश्चाक्षुषः षष्ठो वैवस्वत इहार्चनात्॥ साव
र्णिर्ब्रह्मपुत्रश्च धर्मपुत्रश्च रुद्रकः॥ दक्षजो रौच्य भौत्यौ च मनवस्तु चतुर्दश॥ विश्वभुक् च विपश्चिच्च सुचित्तिश्च शि
खिर्विभुः॥ मनोजवस्तथोजस्वी बलिरद्भुतशांतयः॥ वृषश्च ऋतधामा च दिवस्पृक् कविरिंद्रकः॥ रेवतश्च कुमारश्च तत
था वत्सविनायकः॥ वीरभद्रश्च नंदी च विश्वकर्मा पुरोजवः॥ एते त्वामभिषिंचंतु सुरमुख्याः समागताः॥ नासत्यौ दे राम॰
वभिषजौ ध्रुवाद्या वसवोष्ट च॥ दश चांगिरसो देवास्त्वाभिषिंचंतु सिद्धये॥ आत्मा ह्यायुर्मनो दक्षो मदः प्राणस्तथै २०९
व च॥ हविष्मांश्च गरिष्ठश्च ऋतः सत्यश्च पांतु ते॥ क्रतुर्दक्षो वसुः सत्यः कालः कामो धुरिर्जयेत्॥ पुरूरवा माद्रवाश्च वि

श्वेदेवाश्च रोचनाः॥ अंगारकोपस्सर्पस्त्वां निर्ऋतिश्च तथा यमः॥ अजैकपादहिर्बुध्न्यो धूमकेतुश्च रुद्रकाः॥ भर त
श्च तथा मृत्युः कापालिरथ किंकणिः॥ भुवनो भावनः पातु स्वजन्यः सुजनस्तथा॥ क्रतुश्च वाश्च मूर्द्धा च उग्रश्चा
प्युशिजस्तथा॥ प्रसवश्चाव्ययश्चैव दक्षश्च भृगवः सुराः॥ मनोनमंताः प्राणश्च नरोपानश्च वीर्यवान्॥ वीतिहयो
नयः साध्यो हंसो नारायणो विभुः॥ विभुश्चैव प्रभुश्चैव देवश्रेष्ठा जगद्धिताः॥ धाता मित्रोर्यमा पूषा शक्रांशो भगः॥ त्वष्टा
विवस्वान् सविता विष्णुर्द्वादशा भास्कराः॥ एकज्योतिश्च द्विज्योतिस्त्रिश्चतुर्ज्योतिरेव च॥ एकशक्रो द्विशक्रश्च त्रिशक्रश्च
महाबलः॥ इंद्रश्च नद्यो दृश्यस्तु ततः प्रतिसकृत्तथा॥ मितश्च संमितश्चैव अमितश्च महाबलाः॥ ऋतजित्सत्यजिच्चैव सुषे
णः सेनजित्तथा॥ अतिमित्रोनुमित्रश्च पुरुमित्रोपराजितः॥ ऋतश्च ऋतवाग्धाता विख्याता धारणो ध्रुवः॥ विधारणो
महाहोतेजा वासवस्य परः सखाः॥ ईदृक्षश्चाप्यदृक्षश्च एतादृगमिताशनः॥ क्रीडितः प्रसदृक्षश्च शरभुश्च महा
तपाः॥ धर्ता धुर्यो धुनिर्भीम अतियुक्तः क्षपात्सहः॥ धृतिर्वसुरनाधृष्वः वसुरामः कामो जयो विराट्॥ देवा एकोनपंचा
शन्मरुतस्त्वामवंतु ते॥ चित्रांगदश्चित्ररथश्चित्रसेनश्च वै कलिः॥ उर्णायुरुग्रसेनश्च धृतराष्ट्रश्च नंदकः॥ हा
हा हूहूर्नारदश्च विश्वावसुस्तुंबरुः॥ एते त्वामभिषिंचंतु गंधर्वा विजयाय ते॥ पांतु त्वां मुनयो मुख्या दिव्याश्चाप्स
रसां गणाः॥ अनवद्या सुकेशी च मेनका सहजा यता॥ क्रतुस्थला घृताची च विश्वाची पुंजिकस्थला॥ प्रम्लोचा चोर्वशी

रंभा पंचचूडा तिलोत्तमाः॥ चित्रलेखा लक्ष्मणा च पुंडरीका च वारुणी॥ प्रह्लादो विरोचनोथ बलिर्बाणोथ तत्सुताः॥ ए
ते चान्ये सिषिंचं तु दानवा राक्षसास्तथा॥ हेतिश्चैव प्रहेतिश्च विद्युत्स्फूर्जस्तथा ग्रहैकः॥ यक्षः सिद्धार्थकः पातु माणि
भद्रश्च नंदनः॥ पिंगाक्षो द्युतिमांश्चैव पुष्पदंतो जयावहः॥ शंखः पद्मश्च मकरः कछपश्च निधिर्यजेत्॥ पिशाचा
ऊर्ध्वकेशाद्या भूता भूम्यादिवासिनः॥ महाकालं पुरस्कृत्य नरसिंहं च मातरः॥ गुहस्कंदो विशाखस्त्वां नैगमे
यो भिषिंचतु॥ डाकिन्यो याश्च योगिन्यः खेचरा भूचराश्च याः॥ गरुडश्चारुण्यः पांतु संपातिप्रमुखाः खगाः॥ अ
नंताद्या महानागाः शेषवासुकितक्षकाः॥ ऐरावतो महापद्मः कंबलाश्वतरावुभौ॥ शंखः कर्कोटकश्चैव धृतरा
ष्ट्रो धनंजयः॥ कुमुदैरावणौ पद्मः पुष्पदंतोथ वामनः॥ सुप्रतीकोंजनो नागाः पांतु त्वां सर्वतः सदा॥ पैतामहस्त
था हंसो वृषभः शंकरस्य च॥ दुर्गासिंहश्च पांतु त्वां यमस्य महिषस्तथा॥ उच्चैःश्रवाश्चाश्वपतिस्तथा धन्वंतरिः स
दा॥ कौस्तुभः शंखराजश्च वज्रं शूलं च चक्रकं॥ नंदकोस्त्राणि रक्षंतु धर्मश्च व्यवसायकः॥ चित्रगुप्तश्च दंड
श्च पिंगलो मृत्युकालकौ॥ वालिखिल्याश्च ऋषयो व्यासवाल्मीकमुख्यकाः॥ पृथुर्दिलीपो भरतो दुष्मंतः श
त्रुजिद्बली॥ मनुः ककुत्स्थश्चानेता यावनाश्वो जयद्रथः॥ मांधाता मुचकुंदश्च पांतु त्वां च पुरूरवाः॥ नवास्तु
देवः पंचविंशत्तत्वानि विजयाभ्युपयते॥ रुक्मभौमः शिलाभौमः पातालो नीलमृत्तिकः॥ पीतरक्तः क्षितिश्चैव श्वेत

भौमो रसातलं॥ भूर्लोकोथ भुवर्मुख्या जंबूद्वीपादयश्च ते॥ उत्तराः कुरवः पांतु रम्यो हैरण्यकस्तथा॥ भद्राश्व
केतुमालश्च वर्षश्चैवेलावृतः॥ हरिवर्षः किंपुरुषं इंद्रद्वीपः कसेरुमान्॥ ताम्रवर्णो गभस्तिमान्नागद्वीपश्च
सौम्यकः॥ गंधर्वो वारुणो यं च नवमः प्रांतरापुधः॥ हिमवान् हेमकूटश्च निषधो नील एव च॥ श्वेतश्च शृंगवान्मेरु
र्माल्यवान् गंधमादनः॥ महेंद्रो मलयः सह्यः शुक्तिमान् ऋक्षवान् गिरिः॥ विंध्यश्च पारियात्रश्च गिरयः शांतिदा
स्तु ते॥ ऋग्वेदाद्याः षडंगानि इतिहासपुराणकं॥ आयुर्वेदश्च गांधर्वधनुर्वेदोपवेदकाः॥ शिक्षा कल्पो व्याकर
णं निरुक्तं ज्योतिषां गतिः॥ छंदोंगानि च वेदाश्च मीमांसा न्यायविस्तरः॥ धर्मशास्त्रं पुराणं च विद्यास्त्वेताश्चतुर्दश॥
सांख्ययोगपाशुपतं वेदा वै पंचरात्रकं॥ कृतांतपंचकं ह्येतत् गायत्री च शिवा तथा॥ दुर्गाविद्या च गांधारी यां
तु त्वां शांतिदाश्च ते॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलाब्धयः॥ चत्वारः सागराः पांतु तीर्थानि विविधानि वा॥ पु
ष्करश्च प्रयागश्च प्रभासो नैमिषः परः॥ गयाशीर्षो ब्रह्मशिरस्तीर्थमुत्तरमानसं॥ कालोदको नंदिकुंडस्तीर्थं पंचनद
स्तथा॥ भृगुतीर्थं प्रभासं च तथा चामरकंटकं॥ जंबूमार्गश्च विमलः कपिलस्य तथा पुनः॥ गंगाद्वारं कुशावर्तो
विन्ध्यको नीलपर्वतः॥ वराहपर्वतश्चैव तीर्थं कनखलस्तथा॥ कालंजरश्च केदारो रुद्रकोटिस्तथैव च॥ वारा
णसी महातीर्थं बदर्याश्रमएव च॥ द्वारका श्रीगिरिस्तीर्थं तीर्थं च पुरुषोत्तमः॥ शालग्रामोथ वाराहः सिंधुसाग

अ॰पु॰ संगमः ॥ फल्गुतीर्थं विंदुसरः करवीराश्रमस्तथा ॥ नद्यो गंगासरस्वत्यः शतद्रुर्गण्डकी तथा ॥ अच्छोदा च विपाशा च वि
२०३ तस्ता देविका नदी ॥ कावेरी वरदा चैव निश्चिरा गोमती नदी ॥ पारा चर्मण्वती रूपा मंदाकिनी महानदी ॥ तापी पयोष्णी
वेणा च गौरी वैतरणी तथा ॥ गोदावरी भीमरथी तुंगभद्रारणी तथा ॥ चंद्रभागा शिवा गौरी अभिषिंचंतु पांववः ॥ ॥
इत्याग्नेये अभिषेकमंत्राः ॥ ॥ अग्निरुवाच ॥ ॥ साभिषिक्तः सहायार्थी पजेच्छत्रून्नृपोत्तमः ॥ राज्ञा सेनापतिः कार्यो
ब्राह्मणः क्षत्रियोऽथवा ॥ कुलीनो नीतिशास्त्रज्ञः प्रतीहारश्च नीतिवित् ॥ दूतश्च प्रियवादी स्यादक्षीणोऽतिबलान्वि
तः ॥ तांबूलधारी ना स्त्री वा भक्तः क्लेशसहः प्रियः ॥ संधिविग्रहकः कार्यः षाड्गुण्यादिविशारदः ॥ खड्गधारी रक्षक
स्यात्सारथिः स्याद्बलादिवित् ॥ सूदाध्यक्षो हितो विज्ञो महानसगतो हितः ॥ सभासदस्तु धर्मज्ञो लेखकोऽक्षरवि
द्धितः ॥ आह्वालकवरज्ञाः स्युर्हिता दौवारिका जनाः ॥ रत्नादियोधनाध्यक्षश्चार्थद्वारे हितो नरः ॥ स्यादायुर्वेदवि
द्वैद्यो गजाध्यक्षोऽथ हस्तिवित् ॥ जितश्रमो गजारोहो हयाध्यक्षो हयादिवित् ॥ दुर्गाध्यक्षो हितो धीमान्स्थपतिर्वा
स्तुवेदवित् ॥ यंत्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तवारिते ॥ अस्त्राचार्यो नियुद्धे च कुशलो नृपतेर्हितः ॥ वृद्धश्चांतःपुरा
ध्यक्षः पंचाशद्वार्षिकाद्विकः ॥ सप्ततसूर्तास्तु पुरुषाश्चरेयुः सर्वकर्मसु ॥ जाग्रत्स्यादायुधागारे ज्ञात्वा वृत्तिर्विधीय राम॰
ते ॥ उत्तमाधममध्यानि बुध्वा कर्माणि पार्थिवः ॥ उत्तमाधममध्यानि पुरुषाणि नियोजयेत् ॥ जयेच्छुः पृथिवीं राजा २०३

सहायान्मानयेद्धितान् ॥ धर्मिष्ठान्धर्मकार्येषु शूरान्संग्रामकर्मसु ॥ निपुणानर्थकृत्येषु सर्वत्र च तथा
शुचीन् ॥ स्त्रीषु षंढान्नियुंजीत तीक्ष्णान्दारुणकर्मसु ॥ यो यत्र विदितो राज्ञा शुचित्वेन तु तत्परं ॥ धर्मे चार्थे च
कामे च नियुंजीताधमेऽधमान् ॥ राजा यथार्हं कुर्याच्च उपधाभिः परीक्षितान् ॥ समतीतोपधान्यान्कुर्या
द्धस्तिवनेचरान् ॥ तत्पदान्वेषणे यातान्तदध्यक्षांस्तु कारयेत् ॥ यस्मिन्कर्मणि कौशल्यं यस्य तस्मिन्नियोजये
त् ॥ पितृपैतामहान्भृत्यान्सर्वकर्मसु योजयेत् ॥ विना दायादकृत्येषु तत्र ते हि समागताः ॥ परराजगृहात्प्रा
प्तान्जनानाश्रयकाम्यया ॥ दुष्टानप्यथवादुष्टान्संश्रयेत प्रयत्नतः ॥ दुष्टं ज्ञात्वा विश्वसेत्तं न तद्वृत्तिं वर्तये
द्वशे ॥ देशांतरगतान्प्राप्तांश्चारैर्ज्ञात्वा हि पूजयेत् ॥ शत्रवोऽग्निर्विषं सर्पा निस्त्रिंशमपि चैकतः ॥ भृत्या वशि
ष्टा विज्ञेयाः कुभृत्याश्च तथैकतः ॥ चारचक्षुर्भवेद्राजा नियुंजीत सदा चरान् ॥ जनस्याविदितान्सौम्यांस्तथा
ज्ञातान्परस्परं ॥ वणिजो मंत्रकुशलान्सांवत्सरचिकित्सकान् ॥ तथा प्रव्रजिताकारान्बलाबलविवेकिनः ॥
नैकस्मिन्राजा संदध्यात्संदध्याद्बहुवाक्यतः ॥ रागापरागौ भृत्यानां जनस्य च गुणागुणान् ॥ शुभानामशुभानां च
ज्ञानं कुर्याद्वशाय च ॥ अनुरागकरं कर्म चरेज्जह्याद्विरागकं ॥ जनानुरागः या लक्ष्मी राज्ञा स्याज्जनरंजनात् ॥
इत्याग्नेये सहायसंपत्तिः ॥ ॥ पुष्कर उवाच ॥ ॥ भृत्यकृयतुराजा शांशिष्यवत्तच्छस्तियः पतिः ॥ नाक्षिपेद्वचनं

राज्ञो अनुरूपंप्रियंवदेत्॥ रहोगतस्य वक्तव्यमप्रियंयद्धितंभवेत्॥ ननियुक्तोहरेद्वित्तंनोपेक्षेत्तस्यमानसं॥ राज्ञ
श्चनतथाकार्यंवेषभाषाविचेष्टितं॥ अंतःपुरचराध्यक्षोवैरभूतैर्निराकृतैः॥ संसर्गंनव्रजेत्सेवोराजगुह्यंचगो
पयेत्॥ राज्ञायच्छादितंगुह्यंनतल्लोकेप्रकाशयेत्॥ आज्ञाप्यमानेचान्यस्मिन्किंकरोमीतिवावदेत्॥ वस्त्रंपत्र
मलंकारंराज्ञादत्तंचधारयेत्॥ नानिर्दिष्टेद्वारिविशेत्नायोग्येभुविराजदृक्॥ जृंभांनिष्ठीवनंकासंकोपंपर्यं
किकाश्रयं॥ भृकुटींवातमुद्गारंतत्समीपेविवर्जयेत्॥ स्वगुणाख्यापनेयुक्त्यापरानेवनियोजयेत्॥ शाठ्यंलौ
ल्यंसपैशुन्यंनास्तिक्यंक्षुद्रतांतथा॥ चापल्यंचपरित्याज्यंनित्यंराजानुजीविना॥ श्रुतेनस्वचविद्येश्चसंयो
ज्यात्मानमात्मना॥ राजसेवांततःकुर्यात्भूतयेभूतिवर्द्धनः॥ नमस्कार्याःसदाचास्यपुत्रवल्लभमंत्रिणः॥ सचिवैर्ना
स्यविश्वासोराजचित्तप्रियंचरेत्॥ त्यजेद्विरक्तंरक्तात्तुवृत्तिमीहेतराजवित्॥ अपृष्टश्चास्यनब्रूयात्कामंकया
तथापदि॥ प्रसन्नोवाक्यसंग्राहीरहस्येनवशंगतः॥ कुशलादिपरिप्रश्नंसंप्रयच्छतिचासनं॥ तत्कथाश्रव
णाद्धृष्टोअप्रियाण्यपिनंदते॥ अल्पंदत्तंप्रगृह्णातिस्मरेत्कथांतरेष्वपि॥ इत्याग्नेयेअनुजीविवृत्तं॥
पुष्करउवाच॥ दुर्गसंपत्तिमाख्यास्येदुर्गदेशेवसेन्नृपः॥ वैश्यशूद्रजनप्रायोनाहार्यस्तथापरैः॥ कंश्चि
द्ब्राह्मणसंयुक्तोबहुकर्मकरस्तथा॥ अदेवमातृकोभक्तजनोदेशःप्रशस्यते॥ परैरपीडितःपुष्पफल

धान्यसमन्वितः॥ अगम्यःपरचक्राणांव्यालतस्करवर्जितः॥ षण्णामेकतमंदुर्गंतत्रकृत्वावसेद्बली॥ धन्वदुर्गं
महीदुर्गंनरदुर्गंतथैवच॥ वार्क्षंचैवांबुदुर्गंचगिरिदुर्गंचभार्गव॥ सर्वोत्तमंशैलदुर्गमभेद्यंचान्यभेदनं॥
पुरंतत्रारघुदद्याद्देवताराधनंपरं॥ प्रजाश्चपालयेद्दुष्टान्जयेद्दानानिदापयेत्॥ देवद्रव्यादिहरणात्कल्पं
तुनरकंवसेत्॥ देवालयानिकुर्वीतदेवपूजारतोनृपः॥ सुरालयापालनीयाःस्थापनीयाश्चदेवताः॥ मृन्म
यादारुजंपुण्यंदारुजादिष्टकामयं॥ इष्टिकाच्छैलजंपुण्यंशैलजात्स्वर्णराजतं॥ अत्रयंत्रायुधोपेतंसोदकं
सगुप्तिनमं॥ राजरक्षांप्रवक्ष्यामिरक्षोनृपोविषादितः॥ पंचांगंतुशिरीषंस्यान्मूत्रपिष्टोविषापहः॥ शतावरि
छिन्नरुहाविषघ्नीतंडुलीयकं॥ घोषातकीचक्रकारीब्राह्मीचित्रपटोलिकं॥ मंडूकपर्णीवाराहीधात्र्यानंद
कमेवच॥ उन्मादीनिसोमराजीविषघ्नंरत्नमेवच॥ वास्तुलक्षणसंयुक्तेवसन्दुर्गेसुरान्यजेत्॥ क्रीडन्सुरग
हेऊर्ध्वंभुक्तिमुक्तिमवाप्नुयात्॥ चित्रंगीतवाद्यानिप्रेक्षणीयादिदानकृत्॥ तैलाद्यैर्मधुदुग्धाद्यैःस्नाप्यदे
वंव्रजेत्॥ पूजयेत्सालयेविप्रान्द्विजस्वंतुहरेन्नृपः॥ सुवर्णमेकंगामेकांभूमेरप्येकमंगुलं॥ हरन्नरकमा
प्नोतियावदाहूतसंप्लवं॥ दुराचारंतुद्विष्ठेचसर्वपापेष्वपिस्थिता॥ नैवास्तिब्राह्मणवधात्पापंगुरुतरंक्व
चित्॥ अदेवंदैवतंकुर्युःकुर्युर्दैवमदैवतं॥ ब्राह्मणाहिमहाभागास्तान्नमस्येत्सदेवत्॥ ब्राह्मणीरुदती

हंतिकुलेराजंप्रजास्तथा॥साध्वीस्त्रीणांपालनंचराजाकुर्याच्चधार्मिकाः॥स्त्रियाप्रहृष्टयाभाव्यंगृहकार्यैकदक्ष
या॥सुसंस्कृतोपस्करयाव्ययेचामुक्तहस्तया॥यस्मैदद्यात्पितात्वेनांशुश्रूषेतपतिंसदा॥मृतेभर्तरिस्वर्यायातब्र
ह्मचार्यस्थितांगना॥परवेश्मरुचिर्नस्यात्नस्यात्कलहशालिनी॥मंडनंवर्जयेन्नारीतथाप्रोषितभर्तृका॥देव
ताराधनपरातिष्ठेद्भर्तृहितेरता॥धारयेन्मंगलार्थायकिंचिदाभरणंतथा॥भर्त्रग्निंयापविशेन्नारीसापिस्व
र्गमवाप्नुयात्॥श्रियसंपूजनंकार्यंगृहसंमार्जनादिकं॥द्वादश्यांकार्तिकेविष्णोर्गांसवत्सांददेत्तथा॥सा
वित्र्यारक्षितोभर्तासत्यवान्सुव्रतेनच॥सप्तम्यांमार्गशीर्षेतुसितेभ्यर्च्यदिवाकरं॥पुत्रान्नाप्नोतित्रीहरानात्र
कार्यविचारणा॥॥इत्याग्नेयेराजधर्मे॥॥पुष्करउवाच॥॥ग्रामस्याधिपतिंकुर्याद्दशग्रामाधिपंनृपः॥शत
ग्रामाधिपंचान्यंबहुग्रामंतथैवच॥तेषांभोगविभागश्चभवेत्कर्मानुरूपतः॥नित्यमेवतथाकार्यंतेषांचा
रैक्षणं॥ग्रामेदोषान्समुत्पन्नांस्त्वीनेषुप्रसमंनयेत्॥असक्तोदशपानस्यतत्रगत्वानिवेदयेत्॥श्रुत्वापिद
शपालोपितत्रयुक्तिमुपाचरेत्॥वित्ताद्याप्नोतिराजावैविषयात्तुसुरक्षितात्॥धनवान्धर्ममाप्नोतिधनवान्काम
मश्नुते॥उच्छिद्यतेविनत्यर्थंक्रियाग्रीष्मेसरिद्यथा॥विशेषोनास्तिलोकेषुपतितस्याधनस्यवा॥पतितांतुन
गृह्णतिदरिद्रोनप्रयच्छति॥धनहीनस्यभार्यापिनैवस्याद्धर्मवर्त्तिनी॥राष्ट्रपीडाकरोराजानरकेवसतेचिरं॥

स्र

नित्यंराजातथाभाव्यंगर्भिणीसहधर्मिणी॥यथास्वंसुखमुत्सृज्यगर्भस्यसुखमावहेत्॥किंयज्ञैस्तपसातस्यप्रजाय
स्यनरक्षिताः॥सुरक्षिताःप्रजायस्यस्वर्गस्तस्यगृहोपमः॥अरक्षिताःप्रजायस्यनरकंतस्यमंदिरं॥राजाषड्भाग
मादद्यात्सुकृताद्दुःकृतादपि॥धर्मागमोरक्षणाच्चपापमाप्नोत्समाददेत्॥कोत्रोप्रवेशायेदृष्टंनिधिंचार्द्धंद्विजे
ददेत्॥निधिंद्विजोत्तमःप्राप्यगृह्णीयात्सकलंतव॥चतुर्थमष्टमंभागंतथाषोडशमंद्विजः॥वर्णक्रमेणाद
द्याच्चनिधिंक्षेत्रेतुधर्मतः॥अनृतंचवदन्दंड्यःस्ववित्तस्यांशमष्टकं॥प्रनष्टस्वामिकंरिक्थंराजात्र्यब्दंनिधा
पयेत्॥अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरेणनृपतिर्हरेत्॥ममेदमितियोब्रूयात्सोनुयुक्तोयथाविधिं॥संपाद्यरू
पसंख्यादीन्स्वामीतद्द्रव्यमर्हति॥बालदायादिकंरिक्थंतावद्राजानुपालयेत्॥यावत्स्यात्ससमावृत्तोया
वद्वातीतशैशवः॥बालपुत्रास्तुचैवंस्यादक्षणंनिष्कलासुच॥पतिव्रतासुचस्त्रीषुविधवास्वातुरासुच॥जीवं
तीनांतुतासांयेतद्धरयुस्वबांधवाः॥तांछिष्याच्चोरदंडेनधार्मिकःपृथिवीपतिः॥सर्ववर्णहृतंचौरैस्तत्स्वा
नंतंदद्यान्नृपः॥चौररक्षाधिकारिभ्योराजाप्राप्तमवाप्नुयात्॥अकृतेपिकृतंब्रूयात्निःसार्योदंडएवसः॥
नतद्राज्ञाप्रदातव्यंगृहेयद्गृहगैर्हृतं॥स्वराष्ट्रपण्यादादद्याद्राजाविंशतिकंद्विज॥शुल्कांशंपरदेशाच्चक्ष
यव्ययप्रकाशकं॥ज्ञात्वासंकल्पयेच्छुल्कंलाभंवणिक्यथाप्नुयात्॥विंशांशंलाभमादद्याद्दंडनीयस्ततोन्यथा॥

अ०पु०
२०६

स्त्रीणां प्रव्रजितानां च तत्वशुल्को विवर्जयेत् ॥ नरेषु दासदोषेण नष्टं द्रव्यं तु दापयेत् ॥ अकन्यान्येस्वसुराभंधि
षिधान्वेतथाश्रमे ॥ राजा वस्त्वलमादद्याद्देशकालानुरूपकं ॥ पंचाशद्भागमादद्यात्राजा पशुहिरण्ययोः ॥ गं
धौषधिरसानां च पुष्पमूलफलस्य च ॥ पत्रशाकतृणानां च वंशानां वैणवचर्म्मणां ॥ वैदलानां च भांडानां सर्व
ण्याश्ममयस्य च ॥ षड्भागमेव वादद्यात्मधुमांससर्पिषः ॥ म्रियं वापि न वादद्याद्ब्राह्मणेभ्यस्तथाकरं ॥ यस्य
राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ॥ तस्य सीदति तद्राष्ट्रं व्याधिदुर्भिक्षतस्करैः ॥ श्रुतं वृत्तं च विज्ञाय वृत्तिं तस्य
प्रकल्पयेत् ॥ रक्षेच्च सर्वतस्त्वेनं पिता पुत्रमिवौरसं ॥ संरक्ष्यमाणो राज्ञा यः कुरुते धर्म्ममन्वहं ॥ तेनायुर्वर्द्धते राज्ञो द्र
विणं राष्ट्रमेव च ॥ कर्म्म कुर्युर्नरेंद्रस्य मासेनैकं च शिल्पिनः ॥ भक्तमात्रेण ये चान्ये स्वशरीरोपजीविनः ॥ ॥ इत्या
ग्नेये राजधर्म्मो ॥ ॥ पुष्कर उवाच ॥ ॥ वक्ष्ये तु पुरवृत्तं च धर्म्मार्थौ पुरुषार्थकाः ॥ अन्योन्यरक्षया तेषां सेवा कार्या
स्त्रियो नृपैः ॥ धर्म्ममूलो यथा विटपस्तथा कामफलो महान् ॥ त्रिवर्गपादपस्तत्र रक्षया फलभाग्भवेत् ॥ कामाधा
राः स्त्रियो राम तद्वै रत्नसंग्रहः ॥ सेव्यास्ता नातिसेव्याश्च भूभुजा विषयैषिणा ॥ आहारमैथुनंनिद्रासेव्यानी
भिहि रुग्भवेत् ॥ न चाधिकारे कर्त्तव्या कर्त्तव्या च बराशिका ॥ दिष्ट्यान्याचरते या तु नाभिनंदति तत्कथां ॥ रोकां द्वेषि
ब्रजति गर्वं वहति चोद्धतः ॥ चुंबिता मार्ष्टि वदनं न तु नं बहु मन्यते ॥ स्वपित्यादौ सुप्तापि तथा पश्चाद्विबुध्यते ॥ राम०
२०६

स्पृष्टा धुनोति गात्राणि गात्रं च निरुणद्धि जा ॥ ईषच्छृणोति वाक्यानि प्रियाण्यपि पराङ्मुखी ॥ न पश्यत्यग्रदत्तं तु
जघनं च निगूहते ॥ दृष्टे विवर्णवदना मित्रेष्वपि पराङ्मुखी ॥ तत्कामितासु च स्त्रीषु मध्यस्थेव च लक्ष्यते ॥ ज्ञा
तमंडनकालापि न करोति च मंडनं ॥ या सा विरक्ता तां त्यक्त्वा सानुरागां स्त्रियं भजेत् ॥ दृष्ट्वैव हृष्टा भवति वीक्षते च परा
ङ्मुखी ॥ दृश्यमाना तथान्यत्र दृष्टिं क्षिपति चंचलां ॥ तथोपावर्त्तयित्वं तु नैव शक्नोत्यपेक्षतः ॥ विवृणोति तथांगानि स्व
न्यस्यानि च भागशः ॥ गर्हितं च तथैवांगं प्रयत्नेन निगूहते ॥ तद्दर्शने न कुरुते बालालिंगनचुंबने ॥ आभाष्यमाना भव
ति सत्यवाक्या तथैव च ॥ स्पृष्टा पुलकितैरंगैः स्वेदेनैव च युज्यते ॥ करोति च तथा राम सुलभं द्रव्ययाचनं ॥ ततः स्वल्प
मपि प्राप्य करोति परमां मुदं ॥ नामसंकीर्त्तनादेव मुदिता बहु मन्यते ॥ करजांकांकितानि स्यात्सफलानि प्रेषयत्यपि
तत्प्रेषितं च हृदये विन्यस्यत्यपि चादरात् ॥ आलिंगनैश्च गात्राणि लिंपतीवामृतेन या ॥ सुप्ते स्वपित्यथादौ च तथा
तस्य विबुध्यते ॥ ऊरू स्पृशति चात्यर्थं स्वप्नं चैवं विचुंबते ॥ कपित्थचूर्णयोगेन तथा दधुः स्त्रजानता ॥ घृतं सुगंधि
भवति दुग्धे क्षिप्ते तथा यवैः ॥ भोज्यस्य कल्पनैवं स्यात् गंधयुक्तिः प्रदर्श्यते ॥ शौचमाचमनं राम तथैव च विरेचनं ॥
भावना चैव पाकश्च बोधनं धूपनं तथा ॥ वासनं चैव निर्दिष्टं कर्माष्टकमिदं स्मृतं ॥ कपित्थबिल्वजंबाम्रकरवीरक
पल्लवैः ॥ कृत्वोदकं तु यद्द्रव्यं शौचितं शौचनं ततः ॥ एषामभावे त्वेकेन मगदर्प्पनिसा भवेत् ॥ नखं कुष्टं घनं मां

सीसृक्क शैलेयजं फलं ॥ तथैव कुंकुमं लाक्षा चंदनागुरुनीतलं ॥ सरलं देवदारुं च कर्पूरं कांतया सह ॥ वालं कुं
दुकं श्चैव गुग्गुलुं श्रीनिवासिनः ॥ सह सर्जरसेनैव धूपद्रव्यैकविंशति ॥ धूपद्रव्यगणादस्मादेकविंशाद्यथेच्छया ॥
द्वे द्वे द्रव्ये समादाय सर्जभागैर्नियोजयेत् ॥ नखपिण्याकमलैः पाद्यैः संयोज्य मधुना तथा ॥ धूपयोगा भवंती हयथा
वच्छेष्टैः स्वेच्छया कृता ॥ त्वचं जातीफलं तैलं कुंकुमं ग्रंथिपर्णकं ॥ शैलेयं तगरं कांता चोलं कर्पूरमेव च ॥ मांसीसु
रां च कुष्टं च स्नानद्रव्याणि निर्दिशेत् ॥ एतेभ्यस्तु समादाय द्रव्यत्रयमथेच्छया ॥ मृगदर्पयुतं स्नानं कार्यं कंदर्पवर्द्ध
नं ॥ त्वमारामलदैस्तु स्यैर्बालकार्धसमायुतैः ॥ स्नानमुत्पलगंधिः स्यात्सतैलं कुंकुमायते ॥ जातीपुष्पसुगंधिस्या
त्तगरार्द्धनियोजितं ॥ सव्यामकं स्याद्बकुलैस्तुल्यगंधि मनोहरं ॥ मंजिष्ठातगरं चोलं त्वचं व्याघ्रनखं तथा ॥ गंधप
त्रं च विन्यस्य गंधतैलं भवेच्छुभं ॥ तैलं निपीडितं राम तिलैः पुष्पाधिवासितैः ॥ वासनात्पुष्पसदृशं गंधेन तु भवे
च्छुभं ॥ एलालवंगकंकोलजातीफलनिशाकराः ॥ जातीपत्रिकया सार्द्धं स्वतंत्रा मुखवासकाः ॥ कर्पूरं कुंकुमं
कांता मृगदर्पं हरेणुकं ॥ कंकोलैला लवंगं च जातीकोषकमेव च ॥ त्वक्पत्रं त्रुटिमुस्तौ च लताकस्तूरिकं तथा ॥ राम०
कंटकान्यादि लवंगस्य फलपत्रे च जातितः ॥ कटुकं च फलं राम कार्षिकान्यत्र कल्पयेत् ॥ तच्चूर्णे खादिरं सारं दद्या २०९
वर्षंतितोन्मतं ॥ सहकाररसेनास्मात्कर्तव्या गुटिकाः शुभाः ॥ मुखे न्यस्ताः सुगंधास्ता मुखरोगविनाशनाः ॥ पूगं प्र

क्षालितं सम्यक् पंचपल्लववारिणा ॥ शुभ्यान्तु गुटिकाद्रव्यैर्वासितं सुखवासकं ॥ कटुकं दंतकाष्ठं तु गोमूत्रे वासि
तं त्र्यहं ॥ हृतं च पूगवत्काममुखसौगंध्यकारकं ॥ त्वक्पथ्ययोः समं शो चं शशिनागाह्वसंयुतौ ॥ नागवल्लीसमो भा
ति मुखवासो मनोहरः ॥ एवं कुर्यात्सदा स्त्रीणां रक्षणं पृथिवीपतिः ॥ न चासां विश्वसेज्जातु पुत्रमातुर्विशेषतः ॥ न
स्वपेत्स्त्रीगृहे रात्रौ विश्वासः कृत्रिमो भवेत् ॥ ॥ इत्याग्नेये स्त्रीरक्षादिकामशास्त्रं ॥ पुष्कर उ० ॥ राजपुत्रस्य रक्षा
च कर्तव्या पृथिवीक्षिता ॥ धर्मार्थकामशास्त्राणि धनुर्वेदं च शिक्षयेत् ॥ शिल्पानि शिक्षयेच्चैव प्राप्तैर्मिथ्याप्रियंव
दैः ॥ शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत् ॥ न चास्य संगो दातव्यः क्रुद्धलुब्धविमानितैः ॥ असक्यं तु गुणा
धानं कर्तुं तं बंधयेत्सुखे ॥ अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ॥ मृगयापानमक्षांश्च राज्यनाशांस्त्यजेन्नृ
रः ॥ दिवास्वप्नं वृथाट्यां च वाक्पारुष्यं विवर्जयेत् ॥ निंदां च दंडपारुष्यमर्थदूषणमुत्सृजेत् ॥ आकराणां स
मुच्छेदो दुर्गादीनामसत्क्रिया ॥ अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥ अदेशकाले यद्दानमपात्रे दानमेव
च ॥ अर्थेषु दूषणं प्रोक्तं असत्कार्यप्रवर्तनं ॥ कामक्रोधं मदं मानं लोभं दर्पं च वर्जयेत् ॥ ततो भृत्यजयं कृत्वा पौ
रजानपदं जयेत् ॥ जयेद्बाह्यानरीन्पश्चाद्बाह्याश्च त्रिविधारयः ॥ गुरवस्ते यथापूर्वं कुल्यानंतरकृत्रिमाः ॥ पि
तृपैतामहं मित्रं सामंतं च तथा रिपोः ॥ कृत्रिमं च महाभागे मित्रं त्रिविधमुच्यते ॥ स्वाम्यमात्यजनपदा दुर्गं दंडस्तथै

अ०पु०
२०८

वच॥ कोशो मित्रं च धर्मज्ञः सप्तांगं राज्यमुच्यते। मूलं स्वामी स वै रक्ष्यस्तस्माद्राज्यं विशेषतः॥ राज्यांगद्रोहिणं हन्या
त्काले तीक्ष्णो मृदुर्भवेत्॥ एवं लोकद्वयं राज्ञो भृत्यैर्हासं विवर्जयेत्॥ भृत्याः परिभवंतीह नृपं हर्षणसत्कथं॥ लोकसं
ग्रहणार्थाय कृतकव्यसनो भवेत्॥ स्मितपूर्वाभिभाषी स्यात्लोकानां रंजनं चरेत्॥ दीर्घसूत्रस्य नृपतेः कर्महानि
र्ध्रुवं भवेत्॥ रागे दर्पे च काले च मोहे पापे च कर्मणि॥ अप्रिये चैव वक्तव्ये दीर्घसूत्रः प्रशस्यते॥ गुप्तमंत्रो भवेद्राजा
नापदो गुप्तमंत्रतः॥ ज्ञायते हि कृतं कर्म नारब्धं तस्य राष्ट्रकं॥ आकारैरिंगितैर्गत्या चेष्टया भाषितेन च॥ नेत्रवक्त्र
विकाराभ्यां गृह्यतेंतर्गतं मनः॥ नैकस्तु मंत्रयेन्मंत्रं न राजा बहुभिः सह॥ बहुभिर्मंत्रयेत्कामं राजा मंत्रान्पृथ
कमंत्रिणामपि नो कुर्यान्मंत्री मंत्रप्रकाशनं॥ क्वापि कस्यापि विश्वासो भवतीह सदा नृणां॥ निश्चयश्च तथा मंत्रे का
र्य एकेन सूरिणा॥ नश्येदविनयाद्राजा राज्यं च विनयाल्लभेत्॥ त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिं च शाश्वतीं॥ आ
न्वीक्षिकीं चात्मविद्यां वार्तारंभांश्च लोकतः॥ जितेंद्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥ पूज्या देवा द्विजाः सर्वे दद्याद्दा
नानि तेषु च॥ द्विजे दानं चाक्षयोयं निधिः॥ केश्चित्र नास्यते संग्रामे ष्वनिवर्तित्वं प्रजानां परिपालनं॥ दानानि ब्राह्मणा राम
नां च राज्ञो नियमसंपरं॥ कृपणानाथवृद्धानां विधवानां च योषितां॥ योगक्षेमं च वृत्तिं च तथैव परिकल्पयेत्॥ वर्णा २०८
श्रमव्यवस्थानं कार्यं तापसपूजनं॥ न विश्वसेच्च सर्वत्र तापसेषु च विश्वसेत्॥ विश्वासयेच्चापि परं तत्त्वभूतेन हेतुना॥

बकवच्चिंतयेदर्थं सिंहवच्च पराक्रमेत्॥ वृकवच्चावलुंपेत शशवच्च विनिष्पतेत्॥ दृढप्रहारी च भवेत्तथा शूक
रवन्नृपः॥ काकपंकी भवेन्नित्यं समवाती वसती भवेत्॥ नापरीक्षितपूर्वं च भोजनं शयनं स्पृशेत्॥ नाविज्ञातां स्त्रियं ग
च्छेन्नाज्ञातां नावमारुहेत्॥ राष्ट्रकर्षी भ्रश्यति च राज्याच्चार्थाच्च जीवनात्॥ भृतो वत्सो जातबलः कर्मयोग्यो यथा भ
वेत्॥ तथा राष्ट्रं महाभाग भृतं कर्मसहं भवेत्॥ सर्वं कर्मेदमायत्तं विधाने दैवपौरुषे॥ तयोर्दैवमचिंत्यं हि पौरुषे वि
द्यते क्रिया॥ जनानुरागप्रभवा राज्ञो राज्यमहीश्रियः॥ ॥इत्याग्नेये राजधर्मेषु॥ ॥पुष्कर उ०॥ ॥स्वमेव कर्म दै
वाख्यं विद्धि देहांतरार्जितं॥ तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः॥ प्रतिकूलं तथा दैवं पौरुषेण विहन्यते॥
सात्त्विकात्कर्मणः पूर्वात्सिद्धिः स्यात्पौरुषं विना॥ पौरुषं दैवसंपत्त्या काले फलति भार्गव॥ दैवं पुरुषकारश्च द्वयं पुं
सः फलावहं॥ कृषेर्वृष्टिसमायोगात्काले स्युः फलसिद्धयः॥ सधर्मं पौरुषं कुर्यान्नालसो न च दैववान्॥ सामा
दिभिरुपायैस्तु सर्वे सिध्यंत्युपक्रमात्॥ सामं चोपप्रदानं च भेददंडौ तथापरौ॥ मायोपेक्षेंद्रजालं च उपायाः
सप्त तान् शृणु॥ द्विविधं कथितं साम तथ्यमेवं च॥ तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते॥ महाकुलीना ह्यजु
वो धर्मनित्या जितेंद्रियाः॥ सामसाध्या अतथ्यैश्च गृह्यंते राक्षसा अपि॥ तथा तदुपकाराणां कृतानां चैव वर्णनं॥
परस्परं तु ये द्विष्टाः क्रुद्धभीतावमानिताः॥ तेषां भेदं प्रयुंजीत परस्मात्दर्शयेत्भयं॥ आत्मानं दर्शयेदासां ये

नदोषेण विद्यति॥ परास्तेनैव तेनेद्यावश्याविज्ञाभिन्नेदकाः॥ सामंतकोपो बाह्यस्तु मंत्रवासोत्मजीविकः॥ अंतःको
पो बाह्यस्तु मंत्रवासोत्मजीविकः॥ अंतःकोपस्त्रोपुत्राणां कुर्वन्त्रात्रोष्य तं यजेत्॥ उपायं श्रेष्ठदानं स्याद्दानादुभ
यलोकभाक्॥ तस्मास्तिरामदाने न वशगो येन जायते॥ दानवाने वशक्रोति संहितान् भेदितपुरान्॥ जयासाध्यसा
वयेत्तु दंडेन च समस्तु च॥ दंडेसर्वं स्थितं दंडो नाशयेद्दुष्प्रणीतकः॥ अदंड्यान् दंडयन्नश्येत् दंड्यान्राजा वदंडये
त्॥ देवदैत्योरगनराः सिद्धा भूतायतंत्रिणः॥ उत्क्रामयःस्व मर्यादां यदि दंडो न पालयेत्॥ यस्माद्दांतान् दमयंत्यदं
ड्यान् दंडयत्यपि दंडमार्गमना श्चैव तस्माद्दंडं विदुर्बुधाः॥ तेजसा तं निरीक्षो हि राजा भास्करतत्ततः॥ लोकं प्रसादं तु
छेत दर्यमांश्वंद्रमारुतः॥ जगद्व्याप्नोति वैचारैरतो राजा समीरणः॥ दोषनिग्रहकारित्वाद्राजा चैव स्वतः प्रभुः॥
स दाद्दहति देवीस्तु सदा भवति पावकः॥ यदा दानं द्विजातिभ्यो दद्यात्तस्मात्स निश्चितः॥ पार्थिवसर्वलोकानां पार्थिवः
पार्थिवः पार्थिवो भवेत्॥ उत्साहमंत्रशक्त्याद्यावक्षेयुगा परिस्तवः॥ इत्याग्नेये सं राजनीति॥ ॥पुष्कर उ०॥ ॥दंडप्र
णमने च क्षे किंनरास्फुसमागति॥ कृष्णमालेन यथा पद्योक्तं कर्षार्धं राम कीर्तितं॥ सुवर्णाश्च विनिर्दिष्टो रामषोडशमा
षकः॥ निषातुवस्त्राश्चुतारौ वरणं दशाभिस्तुतिः॥ ताम्ररूप्यसुवर्णानां मानामेतत्प्रकीर्तितं॥ मध्यमः पंचविहय
सहस्रमपि चोत्तमः॥ चौरं प्रत्यत्यते यस्तु मृषो सिपरिभाषितः॥ तत श्रियात्वरिभूपां संपद्यस्ती पुदैवतु॥ कुटसाक्षं तु

कुर्वाणां स्त्रीव संश्च प्रदापयेत्॥ विवासापयन्नस्तणां तु भोज्यो नाधिन्न हीरितः॥ निक्षेपस्य समं मूल्यं दंडो निक्षिप्तमु
क्षया॥ वस्त्रादिकस्य धर्मस्य तथा धर्मान्महीपते॥ यो निक्षिप्तं घातयति स्वयं तु निक्षिप्य याचते॥ तावुभौ चौरवच्छ
सौ दाप्यो वा द्विगुणं दमं॥ अज्ञानाद्यः पुमान्कुर्यात् परद्रव्यस्य विक्रमं॥ निर्दोषो ज्ञात्वा नपूर्वं तु चौरो सबधमहीति॥
मूल्यमादाय यः शिल्पं न दद्याद्दंडएवच॥ प्रतिश्रुत्या प्रदातारं सुवर्णं दंडयेन्नृपः॥ सो मंगृत्य न कुर्युस्ते कर्मष्टो
 ह ष्टतादयः॥ अक्रांतस्य जनेभ्रत्सं दुर्गो स्यात्तावदेव तु॥ क्रीत्वा विक्रियं वा किंचित् यस्येदानुशयो भवेत्॥ सोन्त्द
शाहं तत्स्वाम्यादद्याश्चैव ददाति च॥ प्रतिश्रुत्या प्रदातारं सुवर्णं दंडयेन्नृपः॥ परोक्षं तु दशाहस्य नादद्यान्नैव दा
पयेत्॥ आदेद्युश्च ददश्चैव राज्ञा दंड्याः शतानि षट्॥ परे दोषानविख्याप्य यः कन्यं वरयेदिह॥ हत्वा यदत्ता मां तस्य
राज्ञा दंड्यः शतद्वयं॥ प्रदाय कन्यां योन्यस्मै पुनस्तां संप्रयच्छति॥ दंडः कार्यो नरेंद्रेण तस्याप्युत्तमसाहसः॥ सत्यं
कारेण वाचा च युक्तं पण्यमसंशयं॥ लुब्धोऽन्यत्र च विक्रीणीत षट्शतं दंडमर्हति॥ दत्त्वा धेनुनयः पालो गृहं
चाभुक्तचेतनं॥ सतु दंड्यः शतं राज्ञा सुवर्णं वाप्यरक्षिता॥ धेनुः शतं परीणाहो ग्रामस्य तु समंततः॥ तद्द्वि
गुणं त्रिगुणं वापि नगरस्य तु कल्पयेत्॥ वृत्तिं तत्र प्रकुर्वीत यामुष्ट्रो नावलोकयेत्॥ तत्रापरिवृते धान्ये हिंसते
नैव दंडनी॥ गृहं तडागमारामं क्षेत्रं चा भीषयाहरं॥ शतानि पंच दंड्यः स्यात् अज्ञानात् द्विशतो दमः॥ मर्यादाभेदकाः

म०पु०
२१०

सर्वेष्ट्या प्रथमसाहसं॥ क्षत्रं ब्राह्मणमांसस्य क्षत्रिया दंडमर्हति॥ विश्यस्तु द्विशतं राम शूद्रस्तु वधमर्हति॥ पंचाशद्ब्रा
ह्मणो दंड्यो क्षत्रियस्याभिशंसने॥ वैश्ये चाप्यर्धपंचाशच्छूद्रे द्वादशको दमः॥ क्षत्रियस्याप्नुयाद्वैश्यः साहसं पूर्वमेव तु॥
शूद्रः क्षत्रियमाक्रुश्य जिह्वाछेदनमाप्नुयात्॥ धर्मोपदेशं विप्राणां शूद्रः कुर्वंश्च दंडभाक्॥ श्रुतदेशादिवितथी दाप्यो
द्विगुणसाहसं॥ उत्तमसाहसस्तस्य यः पापैरुत्तमान्क्षिपेत्॥ प्रमादाद्यैर्मया प्रोक्तं प्रीत्या दंडार्धमर्हति॥ मातरं पि
तरं जेष्ठं भ्रातरं श्वसुरं गुरुं॥ अक्षारयं शतं दंड्योय तथा नेवाददद्गुरो॥ एकजातिर्द्विजातींस्तु येनांगेनापराधुयात्॥
तदेव छेदयेत्तस्य क्षिप्रमेवाविचारयन्॥ अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः॥ अवमूत्रयतो मेढ्रमव
शर्धयतो गुदं॥ उत्कृष्टासनसंगम्यनीचस्याधो निकृंतनं॥ योयदंगं च रुजयेत्तदंगं तस्य कर्षयेत्॥ अर्धपादकराः
कार्या गोजाश्वोष्ट्रघातकाः॥ हस्तं तु सफलं कृत्वा सुवर्णं दंडमर्हति॥ द्विगुणं दापयेच्छिन्ने पथि शालौ जलाश
ये॥ द्रव्याणि यो हरेत्तस्य जानतो जानतोपि वा॥ स तस्योत्पाद्य संतुष्टिं राज्ञो दद्यात्ततो दमं॥ यस्तु रज्जुं घटं कूपा
द्धरेद्भिंद्याच्च यो प्रपां॥ स दंडं प्राप्नुयान्मासं दंड्यः स्यात्प्राणताडने॥ धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिकं वधः॥ राम
शेषेप्येकादशगुणं तस्य दंडं प्रकल्पयेत्॥ सचतुस्त्रजातदीनां त्रिंणी स्त्री हरिणे वधः॥ येन येन त्वंग यथा येन २१०
स्तेनो विचेष्टति चेतने॥ तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः॥ ब्राह्मणः पैं धान्यानि अल्पं स्यादल्पनं न दोषभाक्॥ गो

ग्रात

रेवार्थे हरंश्चापि ग्रसदंडं वधोर्यंत॥ गृहक्षेत्रापहर्तारं तथा पत्न्याभिगामिनं॥ अग्निदं गरदं हत्वा तत्तथाचा
भ्युद्यतायुधं॥ राजगाम्यभिचाराभ्यां हन्याच्चैवाततायिनः॥ परस्त्रियां न भाषेत प्रतिषिद्धो विशेन्न हि॥ अदंड्या स्त्री
भवेद्राज्ञो वरयंती पतिं स्वयं॥ उत्तमां सेवमानस्त्री जघन्यो वधमर्हति॥ भर्तारं लंघयेद्या तां श्वभिः संखादयेत्स्त्रि
यं॥ सवर्णदूषितां कुर्यात्पिंडमात्रोपजीविनीं॥ ज्यायसा दूषिता नारी मुंडनं समवाप्नुयात्॥ वैश्यागमे तु विप्र
स्य क्षत्रियस्यान्त्यजागमे॥ क्षत्रियः प्रथमं वैश्यो दंड्यः शूद्रागमे भवेत्॥ गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति॥
वेतनं द्विगुणं दद्यात् दंडं तु द्विगुणं तथा॥ भार्या पुत्राश्च दासाश्च शिष्यो भ्राता सहोदराः॥ कृतापराधा दं
ड्याः स्यू रज्ज्वा वेणुदलेन वा॥ पृष्ठे न मस्तके हन्याच्चौरस्याप्नोति किल्बिषं॥ रक्षास्वधिकृतायैस्तु प्रजाः समधिविलु
प्यते॥ तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनं॥ ये नियुक्ताः स्वकार्येषु हन्युः कार्याणि कर्मिणां॥ निर्घृणा
न् क्रूरमनसास्तान्निःस्वान्कारयेन्नृपः॥ अमात्यः प्राड्विवाको वा यः कुर्यात्कार्यमन्यथा॥ तस्य सर्वस्वमादा
य तं राजा विप्रवासयेत्॥ गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः॥ अस्त्रादीन्घातयन्राजा पातं विप्रान्
प्रवासयेत्॥ महापातकिनां वित्तं वरुणायोपपादयेत्॥ ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः॥ भांडाव
काशदाश्चैव सर्वांस्तानपि घातयेत्॥ राष्ट्रेषु राष्ट्राधिकृतं सामंतोप्यायते नो हरेत्॥ संधिं छित्वा तु ये चौर्यं रात्रौ कुर्व

ता

तितस्कराः॥तेषां छित्वा शूले नृपो द्रस्तौती क्षोभ्यः स निवेशयेत्॥तडागदेवतारामघातकान्नीजयेन्नृप॥समुत्सृ
जेद्राजमार्गे यस्तु मेध्यमनापदि॥सहि कषार्पणं दंडः कृतमध्यं च शोधयेत्॥प्रतिमासंक्रमभिदो दद्युः पंच
शतानि ते॥समैश्च विषमं यो वा चरते मूल्यतोपि वा॥सोदा ब्रूयान्नरः पूर्वं दमं मध्यममेव वा॥द्रव्यमादाय वा
णिज्यमनर्घेण॥वरुंध्यतां॥राजा पृथक्पृथक्कुर्याद्दंडमुत्तमसाहसं॥द्रव्याणां दोषकोपं च प्रतिछंदकवि
क्रयी॥मध्यमप्राप्नुयाद्दंडं कूटकर्त्ता तथोत्तमं॥कलहार्यकृतं देवं दंडश्च द्विगुणस्ततः॥अभक्ष्यामक्ष्य विप्रे वा स्व
गीवा कृतलोदमः॥तुलासासनकर्त्ता च कूटकृन्नाणकस्य च॥एभिश्च व्यवहर्त्ता यः सदाप्योदममुत्तमं॥विशा
गिदां पति गुरु निजापत्यप्रमाथिनी॥विकर्णकरणा सोष्ट्री कृत्वा गोभिः प्रवाहयेत्॥क्षेत्रवेश्मग्रामवनं विधी
तस्वलग्रच्छकाः॥राजपत्न्यभिगामी च दग्धव्यास्तु कचाग्निना॥ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनं॥पार
जायिकचौरं च मुंचतो दंड उत्तमः॥राजयानासनारोढुर्दंड उत्तमसाहसः॥यो मन्येताजितोस्मीति न्यायेनापि परा
जितः॥तमायांतं पुनर्जित्वा दंडयेद्द्विगुणं दमं॥आह्वानकारी वध्यः स्यादनाहूतमथाह्वयन्॥दांडिकस्य च यो ह
स्तादभियुक्तः पलायते॥हीनः पुरुषकारेण तद्दद्याद्दांडिको धनं॥॥इत्याग्नेये दंडप्रणयनं॥॥पुष्कर उवाच॥
यदा मन्येत नृपती राष्ट्रं देव बलान्वितं॥पार्ष्णिग्राहो भिन्नश्च मे तदा यात्रां प्रयोजयेत्॥पुष्टा योधा भृता भृ

त्याः प्रभूतं च बलं मम॥मूलरक्षासमर्थोस्मि चैत्रे मार्गशिरे व्रजेत्॥शत्रोर्वा व्यसनोपापात् दैवाद्यैः पीडितं परं॥भू
तकुपोदिसंपाति पावकं तु वर्धुपयत॥विद्विष्टनायकं सैन्यं संभूतान्तःप्रकोपकं॥शरीरस्फुरणे धन्ये तथा सु
स्वप्नदर्शने॥निमित्ते शकुने धान्यजाते शत्रुपुरं व्रजेत्॥पदातिनागबहुलां सेनां प्रवृषि योजयेत्॥हेमंते शिशि
रे चैव रथवाजिसमाकुलां॥चतुरंगबलोपेतां वसंते वा सरद्यथा॥सेनापदातिबहुला शत्रून् जयति सर्वदा॥अंग
दक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्॥न शस्तं तु तथा वामे पृष्टस्य हृदयस्य च॥लांछनं पिटकं चैव तेयं प्रस्फु
रणं तथा॥विपर्ययेनाभिहितं सव्ये स्त्रीणां शुभं भवेत्॥॥इत्याग्नेये यात्रा॥॥पुष्कर उवाच॥॥स्वप्नं शुभाशुभं वक्ष्ये
दुःस्वप्नहरणं तथा॥नाभिं विनान्यत्र गात्रे तृणवृक्षसमुद्भवः॥चूर्णितं मूर्ध्नि कांस्यानां मुंडनं नग्नता तथा॥मलि
नांबरधारित्वं रक्तांगः पंकदिग्धता॥उच्चात्प्रपतनं चैव विवाहो गीतमेव च॥मातुः प्रवेशो जठरे चितारोह
णमेव च॥शक्रध्वजाभिपतनं पतनं शशिसूर्ययोः॥दिव्यांतरिक्षभूतानामुत्पातानां च दर्शनं॥देवद्विजाति
भूपानां गुरूणां कोप एव च॥तंत्रीवाद्यविहीनानां वाद्यानामपि वादनं॥स्रोतोवहाधोगमनं स्नानं गोमय वा
रिणा॥पंकोदकेन च तथा मषीतोयेन वाप्यथ॥आलिंगनं कुमारीणां पुरुषाणां च मैथुनं॥हानिश्चैव सुगा
त्राणां विरेको वमनं तथा॥दक्षिणाशाप्रगमनं व्याधिनाभिभवं तथा॥फलानामुपहानिश्च धातूनां भेदनं तथा॥

अ०पु०
२१२

एकस्मामयते स्वाप्ने शौभनं च यदि वा शुभं॥ग्रहाणां चैव पतनं गृहसंमार्जनं तथा॥क्रीडा पिशाचक्रव्यादवानरां
त्यनरैरपि॥परादभिभवश्चैव तस्माच्च व्यसनोद्भवः॥काषायवस्त्रधारित्वं तद्वत्स्त्रीक्रीडनं तथा॥स्नेहपानावगा
हौ च रक्तमाल्यानुलेपनं॥इत्यधन्यानि स्वप्नानि तेषामकथनं शुभं॥भूयश्च स्वपनं तद्वत्कार्यं स्नानं द्विजा
र्चनं॥तिलैर्होमो हरिब्रह्मशिवार्कगणपूजनं॥तथा स्तुतिप्रयागानां पुंसुक्तादिजपास्तथा॥स्वप्नास्तु प्रथमे या
मे संवत्सरविपाकिनः॥षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्त्रियामकाः॥चतुर्थे त्वर्द्धमासेन दशाहादरुणोदये॥
एकस्मामधये रात्रौ शुभं वा यदि वाशुभं॥पश्चाद्दृष्टस्तु यस्तत्र तस्य पाकं विनिर्दिशेत्॥तस्माच्छोभनके स्वप्ने पश्चा
त्स्वापो न विद्यते॥शैलप्रासादनागाश्ववृषभारोहणं हितं॥द्रुमाणां श्वेतपुष्पाणां गगने च तथा द्विजाः॥द्रुमेत
णोद्भवो नाभौ तथा च बहुबाहुता॥तथा च बहुशीर्षत्वं पलितोद्भव एव च॥सुशुक्लमाल्यधारित्वं सुशुक्लांबरधा
रिता॥चंद्रार्कताराग्रहणं परिमार्जनमेव च॥शक्रध्वजालिंगनं च ध्वजोच्छ्रायक्रिया तथा॥भूम्यंबुधीनां ग्रहणं
शत्रूणां चैव विक्रिया॥जयो विवादे द्यूते च संग्रामे च तथा द्विजः॥भक्षणं चार्द्रमांसानां पायसस्य च भक्षणं॥दर्श
नं रुधिरस्यापि स्नानं वा रुधिरेण च॥सुरारुधिरमद्यानां पानं क्षीरस्य चाप्यथ॥अंत्रैर्विचेष्टनं भूमौ निर्मलं गग
नं तथा॥मुखेन दोहनं शस्तं महिषीणां तथा गवां॥सिंहीनां हस्तिनीनां च वडवानां तथैव च॥प्रसादो देवविप्रेभ्यो गु

राम
२१२

रुभ्यश्च तथा द्विजः॥अंभसा चाभिषेकस्तु गवां शृंगस्रुतेन वा॥चंद्रभ्रष्टेन वा राम ज्ञेयं राज्यप्रदं हि तत्॥राज्याभिषेकं
च तथा छेदनं च शिरसस्तथा॥मरणं वह्निलाभश्च वह्निदाहो गृहादिषु॥लब्धिश्च राजलिंगानां तंत्रीवाद्याभिवा
दनं॥यस्तु पश्यति स्वप्नांते राजानं कुंजरं हयं॥हिरण्यं वृषभं गां च कुटुंबं तस्य वर्द्धते॥वृषभेभगृहशैलाग्रवृ
क्षारोहणरोदनं॥घृतविष्ठानुलेपो वाप्यगम्यागमनं तथा॥सितवस्त्रप्रसन्नांभःफली वृक्षो नभो मलं॥१ इ
त्याग्नेये स्वप्नाध्यायः॥ ॥पुष्कर उवाच॥ ॥औषधानि च युक्तानि धान्यानि रूक्षमग्रीमनं॥कार्पासं तृणशुष्कंच
गोमयं बंधनानि च॥अंगारं भस्म सर्पश्च मुंडा मंतुं च नग्नकं॥वृषपंकं च मर्कटश्च उन्मत्तं च नपुंसकं॥चांडा
लं श्वपचाद्यानि नराबंधनपातकाः॥गर्भिणी स्त्री च वधकाः पिता कादीनि वैभृते॥रुषमंसं कपालास्थि भि
न्नदंडमथास्तकं॥अशस्तो वा यत्र शब्दश्च भिन्नभेरवजर्जरैः॥प्रहीनि पुरतः शस्तः शस्तेनं तु पृष्ठतः॥गच्छेति
पश्चाच्छ शस्ताः पुरस्तात् विगर्हितः॥कंपासिनि पृष्ठमागच्छ किं ते तत्र गतस्य च॥ततो निष्टं शस्तमतः पूर्वं क्रियाद
श्चध्वजद्राः॥खलनं वाहनानां च वस्त्रसर्गस्तथैव च॥शिरो मातस्य च राद्धे बडवासारियातनं॥हरिमन्म
च्यसि स्तुत्वा स्याद मंगलस्नानं॥द्वितीयं तु ततो दृष्ट्वा विरुद्धं प्राविशेद्गृहं॥श्वेताः सुमनसः श्रेष्ठाः पूर्णकुंभो
महोत्तमः॥मांसं मत्स्या दूरशब्दा वृद्ध एकः पशुस्त्वजः॥गावस्तुरंगमा नागा देवाश्च ज्वलितो नलः॥दूर्वार्द्रगोमयं

अ०पु० २१३

वेश्यास्वर्णरूप्यंचरत्नकं॥वंशासिद्धार्थकौषध्योमद्यायुधखड्गकं॥छत्रंपीठंराजलिंगंशिवंरुदितवर्जितं॥फ
लंघृतंदधिपयःअक्षतादर्शमाक्षिकं॥शंकइक्षुःशुभंवाक्यंतरिस्तुष्टिश्चमानसी॥एकतःसर्वलिंगानिमनस
स्तुष्टिरेकतः॥ ॥इत्याग्नेयेमंगलाध्यायः॥ ॥पुष्कर उ०॥ ॥त्रिषुतोगमनेप्रश्नेपुरुषस्यशुभाशुभं॥नवेदयंति
शकुनादेशस्यनगरस्यच॥सर्वपापःफलादीप्तोनिर्दिष्टोदैवचिंतकैः॥शांतःशुभफलश्चैवदैवज्ञैःसमुदा
हृतः॥षट्प्रकाराविनिर्दिष्टाशकुनानांचदीप्तयः॥वेलादिग्देशकरणरुतजातिविभेदतः॥पूर्वापूर्वाववि
ज्ञेयासतेषांबलवत्तरा॥दिवाचरोरात्रिचरस्तथारात्रौदिवाचरः॥क्रूरेषुदीप्ताविज्ञेयाऋक्षलग्नग्रहादिषु॥धूमि
तासातुविज्ञेयायांगमिष्यतिभास्करः॥यस्यांस्थितःसाज्वलितामुक्ताचांगारिणीमता॥एतास्तिस्त्रःस्मृतादीप्ता
शकुनेःपरिकीर्तिताः॥ग्रामेवन्योवनेग्राम्यस्तथानिंदितपादपेत्॥देशेचैवाशुभेज्ञेयोदेशदीप्तोद्विजोत्तमः॥
क्रियादीप्तोविनिर्दिष्टस्वजात्यनुचितक्रिया॥रुतदीप्तश्चकथितोभिन्नभैरवनिस्वनः॥जातिदीप्तस्तुविज्ञेयः
केवलंमांसभोजनः॥दीप्ताच्छांतोविनिर्दिष्टःसर्वभेदैःप्रदीपितः॥मिश्रैर्मिश्रोविनिर्दिष्टस्तस्यवाच्यंफलाफ राम.
लं॥गौरश्वोष्ट्रगर्दभःश्वानःसारिकागृहगोधिका॥चटकाभासकूर्माद्याःकथिताग्रामवासिनः॥अजावि २१३
सूकरनागेन्द्राःकोलोमहिषवायसौ॥ग्राम्यारण्याविनिर्दिष्टाःसर्वेन्येवनगोचराः॥मार्जारकुक्कुटौग्राम्यौतौचैवव

नगोचरौ॥तयोर्भवतिविज्ञानंनित्यंवैरूप्यभेदतः॥गोकर्णशिखिचक्राह्वकरटाश्चहारीतवायसाः॥कुलालकु
क्कुटाश्येयाफेनाखंजनवानराः॥शतघ्नचटकःसामनासस्येनकपिंजलाः॥तित्तिरिःशतपत्रश्चकपोतश्चत
थाश्रयः॥खंजरीटकदात्यूहःशुकराजीवकुक्कुटाः॥भारद्वाजश्चसारंगइतिज्ञेयादिवाचराः॥वागदोमूकशरभ
क्रौंचशशककच्छपाः॥लोमासिकपिंजलिकाकथितारात्रिगोचराः॥हंसाश्चमृगमार्जारनकुलर्क्षभुजंगमाः॥
वृकारिसिंहव्याघ्रोष्ट्रश्चशूकरमानुषाः॥श्वाविद्वृषभगोमायुवृककोकिलसारसाः॥तुरंगगोपीततराःगो
धाश्चुभयचारिणः॥स्यग्रार्थनजाःसर्वेपुरस्ताच्छुभचारिणः॥जियावहाश्चनिर्दिष्टापश्चात्संनिधनकारिणः॥
गृहमस्यदाहासोव्याहरत्पुरतःस्थितः॥नृपावमानंवदतिवामःकमलभोजने॥पानेतद्दर्शनंचैवशस्तसप्तं
गम्यचाप्यथा॥चौरैर्मोषमथाख्यातिमहरोभिन्नविस्वनः॥प्रपातसाग्रतोराममृगःप्राणहरोभवेत्॥वृका
रवजंबूकव्याघ्रसिंहमार्जारगर्दभाः॥प्रतिलोमस्तथारामखरश्चविस्वतःस्वनः॥वामःकपिंजलःश्रेष्ठस्तथाद
क्षिणसंस्थितः॥पृष्ठतोसनिंदितफलस्तित्तिरिस्तुनशस्यते॥एणावराहापृषतावामाभूत्वातुदक्षिणाः॥भवं
तोर्थकरोनित्यंविपरीताविगर्हिताः॥वृषाश्वजंबुकव्याघ्रसिंहमार्जारगर्दभाः॥वांछितार्थकराज्ञेयादक्षिणा
वामतोगुणाः॥शिवाश्यामाद्युलावुंछुपिंगलागृहगोधिका॥सूकरीपरिपुष्टाचपुन्नामानश्चवामतः॥स्त्रीसंज्ञ

मासकारूपाकपिश्री कर्णचित्त्रराः॥ कपिश्री कर्णपिप्पीकारुरुमेनाश्च दक्षिणा॥ जातिकाहिशशाकोडगोधानां
कीर्तितं शुभं॥ ततः संदर्शनं नेष्टं प्रतीपं वानरर्क्षयोः॥ कार्यकृद्बली शाकुनः प्रस्थितस्य च यो न्वहं॥ भवेत्तस्य फलं वाच्यं
तदेव दिवसं निजं॥ मत्ताश्च भक्षार्थिनो बाला वैरसक्तास्तथैव च॥ सीमन्तेन घं तरिता विज्ञेया निष्फला द्विजः॥ एकद्वि
त्रिचतुर्भिस्तु शिवा धन्या रुतैर्भवेत्॥ पंचभिश्च तथा षड्भिरधन्या परिकीर्तिताः॥ सप्तभिश्च तथा धन्या निष्फला पर
तो भवेत्॥ नृणां रोमांचजननी वाहनानां भयप्रदा। ज्वालानना सूर्यमुखी विज्ञेया भयवर्द्धिनी॥ प्रथमं सारंगके दृ
ष्टे शुभे देशे शुभं वदेत्॥ संवत्सरं मनुष्येषु अशुभे चाशुभं तथा॥ तथाविधं नरपश्येच्चाड्डुं कं प्रथमेहनि॥
आत्मनश्च तथा तेन ज्ञातं संवत्सरं फलं॥ ॥इत्याग्नेये शाकुनानि॥ ॥पुष्कर उवाच॥ ॥ विशंति येन मार्गेण वाय
सा वाहवा पुरं॥ तेन मार्गेण रुद्धस्य तु रस्य ग्रहणं भवेत्॥ सेनायां यदि वा सार्थे निविष्टो वायसो ब्रुवन्॥ वामो भ
यात्तु रुवं स्तंभो भयं वदति दुस्तरं॥ दायादं वाहनोपानछत्रवस्त्रादिकं हरेत्॥ मृत्यूस्तत्पूजने पूजा तादिष्टकरणे शुभं।
प्रोषितागमं हतं काकः कुर्वन् द्वारि गतागतं॥ रक्तं दग्धं गृहे द्रव्यं मक्षिपन्वह्नि वेदकाः॥ न्यस्तं रक्तं पुरस्ताच्च नि
वेदयति बंधनं॥ पीतद्रव्यं तथा रुक्मं रूपमेतत्तु भार्गव॥ यच्चैवोपनयेद्द्रव्यं तस्य लब्धिं विनिर्दिशेत्॥ द्रव्यं च यो नये राम
त्तु तस्य हानिं विनिर्दिशेत्॥ पुरतो धनुलब्धिस्या सामसासन्न छर्दने॥ भूलब्धिः स्यान्मृदक्षेपे राज्यं रत्नार्पणे २१५

णे महत्॥ जातः काकोनुकूलस्तु क्षेम्ये कार्यासमो भवेत्॥ न कुर्यात्साधकोत्थे यः प्रतिकूलो भयावहः॥ संमुखो भेति विरु
द्धनूपाताघातकरो भवेत्॥ वामः काकः स्मृतो धन्यो दक्षिणार्थविनाशकृत्॥ वामोनुलोमगः श्रेष्ठो मध्यमो द
क्षिणः स्मृतः॥ प्रतिलोमगतिर्वामो गमनप्रतिषेधकृत्॥ निवेदयति यात्रार्थमभिप्रेतं गृहं गतः॥ एकाक्षिचरणस्त्व
र्कं वीक्षमाणो भयावहः॥ कोटरे वासमानश्च महानर्थकरो भवेत्॥ न शुभं लपरि काकः पंकांकः स तु शस्यते॥
अमेध्यपूर्णवदनः काकः सर्वार्थसाधकः॥ ज्ञेयाः पतत्रिणोन्येपि काकवद्भृगुनंदन॥ स्कंधवारापसव्यस्थः श्वा
नो विप्रत्तिनाशकः॥ इन्द्रस्थाने नरेंद्रस्य पुरेपास्तु गोपुरे॥ अंतर्गृहे गृहेशेन समरणाय भवेच्छ्वयन्॥ यस्य जिघ्र
ति वामांगं तस्य स्यादर्थसिद्धये॥ भयाय दक्षिणं चांगं तथा भुजमदक्षिणं॥ यात्राघातकरो यांतुरभिश्रतिमुख
गतः॥ मार्गविरोधको मार्गे चौरान् वदति भार्गव॥ आलाना स्थिमुखस्त्वापो रज्जुचीरमुखस्तथा॥ सोपानके मुख
धन्यो मांसपूर्णमुखोपि च॥ अमंगल्यमथ द्रव्यं केशं चैवाशुभं तथा॥ अवमूत्र्याग्रतो याति यस्य तस्य भयं भवेत्॥
यसावमूत्र्य व्रजति शुभे देशे तथा शुभे॥ मंगल्यं च तथा द्रव्यं तस्य स्यादर्थसिद्धये॥ श्ववत्स्वरा भविज्ञेया तथा वे
जंबुकादयः॥ भयाय स्वामिनो ज्ञेया मनिमत्तं गतं गवां॥ निशि चौरभयाय स्याद्विरुतं मृत्यवे तथा॥ शिवा यस्य
मिनो नाथो वलीवर्दो निदर्शनं भवेत्॥ उत्सृष्टवृषभो राज्ञो विजयं संप्रयच्छति॥ अभक्ष्यं भक्षयंत्यश्वा गावो दंतास्तथा

स्वकान्॥ त्यक्त्वा सुहृच्छत्रछेषु गर्भक्षयकरा मताः॥ भूमिं पादैर्विनिघ्नन्तो दिवा भीता भयावहा॥ आर्द्रशोत्थरश्मोमस्य
स्वंगलग्नस्य देशभाः॥ महिषादिषु चाप्येतत्सर्वं वाच्यं विजानता॥ आरोहणं तथान्येन सपर्याणस्य वाजिनः॥ जलोपवे
शनं नेष्टं भूमौ च परिवर्तनं॥ विपक्करोऽनुगंतस्यास्वन्नं वाप्य निमित्ततः॥ भयसोदकयोर्द्वेषत स्याच्च नशशस्यते॥ वद
नाद्रुधिरं याति वेपनं नेन च शस्यते॥ क्रीडयंकैः कपोतैश्च सारिकाभिस्तथैव देत्॥ साश्रुनेत्रो जिकपाचया दलेहीवि
न इष्यो॥ वामपादेन च तथा विलिखंश्च वसुंधरां॥ स्वनेत्रु वामपार्श्वे न दिवा चान शुभप्रदः॥ भयायस्या स्वरूपम्वीत
यानि क्रोधविनाशनः॥ आरोहणं न सोढ्यात्प्रतीपं वा गृहं व्रजेत्॥ यात्रा विद्या च मा च श्वेवामपार्श्वे तिपास्य शन्॥
हेषमाणः शक्रयोधं पादस्य दृशीजयावहा॥ ग्रामे व्रजति नागश्चेन्मैथुनं देशहा भवेत्॥ प्रसूता नागवनिता मन्त्र
चां तायनृपते॥ आरोहणं न वेदघ्या प्रतीपं वा गृहं व्रजेत्॥ मदवारणो जत्या नागजघातकरो भवेत्॥ यात्राकालेर
योवापि छत्रादिपतनं भयं॥ हृष्टाननाश्चानुलोमा ग्रहा वै जयलक्षणं॥ काकोऽयधि भिभवनं कृष्णाङ्गिमंडलिक्ष
येत्॥ प्राचीपश्चिमकेशानीनी सौम्या प्रस्वस्त्रिताच दिक्॥ ॥ इत्याग्नेये शकुनानि॥ ॥पुष्करउ०॥ ॥ सर्वयात्रां प्रव
क्ष्यामि राजधर्मसमाश्रयात्॥ अस्तंगते निचगते विपुले रिपुराशिमे॥ प्रतिलोमे च विध्वस्ते शुक्रो यात्रां विवर्जयेत्॥
प्रतिलोमे बुधे यात्रां दिक्पतौ च तथा ग्रहो॥ वैधृते चव्यतीपाते नागे च शकुनौ तथा॥ चतुष्पादे च किंस्तुघ्ने तथा यात्रां

विवर्जयेत्॥ विपत्तारे नैधने च प्रत्यरे वाथ जन्मनि॥ दग्धे विसर्जयेद्यात्रां रिक्तायां च तथा तिथौ॥ उदीची च तथा प्राची
तयोरैक्यं प्रकीर्तितं॥ पश्चिमा दक्षिणा या दिक् तयोरैक्यं तथैव च॥ वाय्वग्निदिक्समुद्भूतं परिघं न तु लंघयेत्॥ आ
दित्यचंद्रसौरास्तु दिवसाश्च न शोभनाः॥ कृत्तिकाद्यानि पूर्वेण मघाद्यानि तु याम्यतः॥ मैत्राद्यान्यपरे चाथ वासवाद्या
नि चोत्तरे॥ सर्वद्वाराणि शस्तानि छायामानं वदामि ते॥ आदित्ये विंशतिर्ज्ञेया चंद्रे षोडश कीर्तिता॥ भौमे पंच
दशैवोक्ता चतुर्दश तथा बुधे॥ त्रयोदश तथा जीवे शुक्रे द्वादश कीर्तिता॥ एकादश तथा सौरे सर्वकर्मसु कीर्ति
ता॥ जन्मलग्ने शक्रचापे संमुखे न व्रजेन्नरः॥ शकुनादौ शुभे पापात् अपापी हरिमास्मरन्नवक्ष्ये मंडलचिंता
ते कर्तव्यं राज्यलक्षणं॥ स्वाम्यमात्यं तथा दुर्गं कोषो दंडस्तथैव च॥ मित्रं जनपदश्चैव राज्यं सप्तांगमुच्यते॥ स
प्तांगस्य तु राज्यस्य विघ्नकर्तॄन्विनाशयेत्॥ मंडलेषु च सर्वेषु वृद्धिः कार्या महीक्षिता॥ आत्ममंडलमेवात्र प्र
थमं मंडलं भवेत्॥ समंतात्तस्य विज्ञेया रिपवो मंडलस्य तु॥ उपेतस्तु सुहृत्तस्य शत्रुमित्रमपरं॥ मित्रस्त्र
म तेज्ञेयं मित्रमित्ररिपुस्ततः॥ एतत्पुरस्तात्कथितं पश्चादपि निबोध मे॥ पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रंद उ
च्यते॥ आसारस्तु ततोऽन्यः स्यादाक्रंदासार उच्यते॥ जिगीषोः शत्रुयुक्तस्य विमुक्तस्य तथा द्विज॥ नात्रापि निश्च
यः शक्यो वक्तुं मनुजपुंगव॥ निग्रहानुग्रहे शक्तो मध्यस्थः परिकीर्तितः॥ निग्रहानुग्रहे शक्तः सर्वेषामपि ये

जयेत्॥उदासीनस्सकथितोबलवान्पृथिवीपतिः॥मंडलंतवसंप्रोक्तःमेतः द्वादशराजिकं॥नकस्यचिद्रिपुमित्रंकार
णाच्छत्रुमित्रके॥त्रिविधाविपदोज्ञेयाःकुल्यान्यंतरकृत्रिमाः॥पूर्वपूर्वौगुरुस्तेषांदुश्चिकित्स्यसमोमतः॥अंतरो
पिचयःशत्रुसोपिमेकृत्रिमोमतः॥पार्ष्णिग्राहोभवेच्छत्रोर्मित्राणिरिपवस्तथा॥पार्ष्णिग्राहंसुपायेश्चसमयेच्चतथास्व
कं॥मित्रेणशत्रुरुछेदंप्रशंसंतिपुरातनाः॥मित्रंचशत्रुतामेतिसामंतत्वादनंतरं॥शत्रुंजिगीषुरुछिंद्यात्स्व
यंशक्नोतिचेद्यदि॥प्रतापवृद्धौतेनापिनाममित्राज्ञायतेभयं॥तथास्यानोद्विजल्लोकोविश्वस्यश्चतथाभवेत्॥जिगी
षुर्धर्मविजयीतथालोकंवसेनयेत्॥॥इत्याग्नेयेयात्रामंडलचिंतानि॥॥पुष्करउवाच॥॥सामभेदोमयाप्रोक्तो
दानंदंडोतथैवच॥दंडःस्वदेशेकथितःपरदेशेब्रवीमिते॥प्रकाशश्चाप्रकाशश्चद्विविधोदंडउच्यते॥पत
नंग्रामघातश्चशस्यघातोग्निदीपनं॥प्रकाशेथविषंवह्निर्विविधैपुरुषैर्वधः॥दूषणंचैवसाधूनांउदकानां
चदूषणं॥दंडप्रणयनंप्रोक्तःमुपेक्षांशृणुभार्गव॥यदामान्येतरैन्नृपतिरणेनममहीविग्रहे॥अनर्थाजानुबंध
स्यात्संधिनाचतथाभवेत्॥सामलब्धास्पदंचात्रदानंचार्थक्षयंपरं॥भेदेदंडानुबंधःस्यात्तदोपेक्षांसमाश्रयेत्॥न
चायंममशक्नोतिकश्चित्कर्तुमुपद्रवं॥नचाहमस्यशक्नोतितत्रोपेक्षांसमाश्रयेत्॥अवज्ञोपहतस्तत्रराजाका
र्योरिणाभवेत्॥मायोपायंप्रवक्ष्यामिउत्पातैरनृतैश्चरेत्॥शत्रोरुद्वेजनंशत्रोःशिबिरस्थस्यपक्षिणः॥स्थूलस्तस्य

प्रछन्नंकृत्वोल्काविपुलाद्विजा॥विसृजेचतथाश्चैवमुल्कापातंप्रदापयेत्॥एवमन्योदर्शनीयोउत्पाताबहवोपिच॥उ
द्वेजनंतथाकुर्यात्कुहकैर्विविधैर्द्विषां॥सांवत्सरास्तापसाश्चनाशंब्रूयुःपरस्परं॥जिगीषुःपृथिवींराजातेनचोद्वे
जपरस्परं॥देवतानांप्रसादश्चकीर्त्तनीयःपरस्यतु॥आगतनामित्रबलंप्रहरध्वमभीभवेत्॥एवंब्रूयाद्रणेप्राप्तेभग्नाः
सर्वेपरेइति॥क्ष्वेडाःकिलकिलाःकार्यावाच्याकुहतस्तथा॥देवाज्ञाबृंहितोराजासन्नद्धसमरंप्रति॥इंद्रजालंप्र
वक्ष्यामिइंद्रजालेनदर्शयेत्॥चतुरंगबलंराजासहायार्थंदिवौकसां॥बलंतुदर्शयेत्प्राप्तंरक्तवृष्टिंचवैरिपौ॥
छिन्नानिरिपुशीर्षाणिप्रासादाग्रेप्रदर्शयेत्॥षाड्गुण्यंसंप्रवक्ष्यामितद्वरौसंधिविग्रहौ॥संधिश्चविग्रहश्चैवया
नमासनएवच॥द्वैधीभावःसंश्रयाश्चषड्गुणाःपरिकीर्तिताः॥पणबंधःस्मृतःसंधिरपकारस्तुविग्रहः॥जिगी
षोःशत्रुविषयेयानंयात्राभिधीयते॥विग्रहेणस्वकेदेशेस्थितिरासनमुच्यते॥बलार्द्धेनप्रयाणंतुद्वैधीभावःस
उच्यते॥उदासीनेमध्यमेवासंश्रयात्संश्रयस्मृतः॥समेनसंधिरन्वेष्योहीनेनचबलीयसा॥हीनेनविग्रहःका
र्यस्वयंराज्ञाबलीयसा॥तत्रापिशुद्धपार्ष्णिस्तुबलीयांसंसमाश्रयेत्॥आसीनंकस्यचिछेदंशक्तःकर्तुंरिपोर्य
दा॥अशुद्धपार्ष्णिरासीतविगृह्यवसुधाधिपः॥अशुद्धपार्ष्णिर्बलवान्द्वैधीभावंसमाश्रयेत्॥बलिनाविग्रहीत
स्तुयोसंधेयेनपार्थिवः॥संश्रयस्तेनकर्तव्योगुणानांप्रथमोगुणः॥बहुक्षयव्ययायासंतेषांयानंप्रकीर्तितं

अ०पु० वकुलाभकरं यस्मात्तदा राजा समाश्रयेत ॥ सर्वच्छिद्रान्निहीनस्तु तदा कुपतिसंश्रयं ॥ ॥ इत्याग्नेये ज्पायषड्गुण्यानि ॥ पु
२१७ ष्कर उवाच ॥ अजस्रं कर्म वक्ष्यामि दिनं प्रति यदाचरेत् ॥ द्विमुहूर्त्तावशेषायां रात्रौ निद्रां चरेन्नृपः ॥ वाद्यवंदिस्वनैर्गी
तैः पश्येद्गूढांस्ततोन्नरान् ॥ विज्ञायांते न येल्लोके तु दीपाद्यतिकेन चित् ॥ आयव्ययस्य श्रवणं ततः कार्यं यथाविधि ॥ वेगो
त्सर्गं ततः कृत्वा राजा स्नानगृहं व्रजेत् ॥ स्नानं कुर्यात्ततो नृपः पश्चात्दंतधावनपूर्वकं ॥ कृत्वा संध्यां ततो जप्यं वासुदेवं प्र
पूजयेत् ॥ वह्नौ पवित्रान् जुहुयात् तर्पयेत्तदुदकेपितृन् ॥ दद्यात्सकांचनी धेनुं द्विजाशीर्वादसंयुतः ॥ अनुलिप्तो ह्यलंक
रस्सुखं पश्येद्दर्पणे ॥ सुवर्णं च स्पृशेत् राजा ह्युपाद्दिवसादिकं ॥ औषधं भिषजो भुक्त्वा मांगल्यालंभनं चरेत ॥ यः पश्येत गु
रुं तेन ह्याशीर्वादं व्रजेत्सभां ॥ तत्रस्थो ब्राह्मणान् पश्येदमात्यान्मंत्रिणस्तथा ॥ प्रकृतीश्च महाभाग प्रतीहारे निवेदिता ॥
श्रुत्वेतिहासं कार्याणि कार्याणां कार्यनिश्चयं ॥ व्यवहारं ततः पश्येन्मंत्रं कुर्यात्तु मंत्रिभिः ॥ नैकेन सहितः कुर्यान्न त्रि
कुर्याद्बहुभिः सह ॥ न च मूर्खैर्न चानाप्तैर्गुप्तं न प्रकटं चरेत् ॥ मंत्रं स्वधिष्ठितं कार्यं येन राष्ट्रं न बाधते ॥ आकारग्रहणे रा
ज्ञो मंत्ररक्षापरा मता ॥ आकारैरिंगितैः प्राज्ञाः मंत्रं गृह्णंति पंडिताः ॥ सांवत्सराणां वैद्यानां वैद्यानां वचने रतः ॥ राजा राम.
विभूतिमाप्नोति वारयंति न पंहिते ॥ मंत्रं कृत्वाथ व्यायामं चक्रे याने च वस्त्रके ॥ नियुद्धादौ न पस्तातः पश्येद्विप्रांस्तु सुह २१७
जितं ॥ कृतं च पावकं पश्येद्विप्रान् पश्येत्तु पूजितान् ॥ भूषितो भोजनं कुर्याद्गीताद्यैः सुपरीक्षितं ॥ भुक्त्वा गृहीततां

बूलं वामपार्श्वेन संस्थितः ॥ शास्त्राणि चिंतयेद्दृष्ट्वा योधान् कोष्ठायुधान् गृहं ॥ अर्थाश्च पश्चिमां संध्यां कार्याणि च विचिंत्य स
तु ॥ चरान् संप्रेष्य भुक्त्वान्नमंतःपुरचरो भवेत् ॥ वाद्यगीतै रक्षितान्यैरेवं नित्यं चरेन्नृपः ॥ ॥ इत्याग्नेये आजस्रिकं ॥ ॥
पुष्कर उ० ॥ ॥ यात्राविधानं वक्ष्ये वं तु मक्षे संग्रामिकं विधिं ॥ सन्नाहेन यदा यात्रा भविष्यति महीपते ॥ पूजनीयो हरिः
शंभुर्मोदकाद्यैर्विनायकः ॥ द्वितीयेह्नि दिक्पालान् संमक्षणायनं चरेत् ॥ शय्यायां च तदा मंत्रं देवान् प्रार्थ्य मनु
स्मरेत् ॥ नमः शंभो त्रिनेत्राय रुद्राय वरदाय च ॥ वामनाय विरूपाय स्वप्नाधिपतये नमः ॥ भगवन्देवदेवेश शूलभृत्
वृषवाहन ॥ इष्टानिष्टं ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वतः ॥ यज्ञाग्रतो दूरमिति पुरोधा मंत्रमुच्चरेत् ॥ तृतीयेह्नि
दिक्पालाग्रहांस्नानदिक्पतीन् यजेत् ॥ ग्रहान्यजेच्चतुर्थेह्नि पंचमे वा खिलान्यजेत् ॥ मार्गस्थे देवतास्तेषां नधारा
णां च पूजनं ॥ दिव्यांतरीक्षभौमस्थदेवानां च तथा बलिः ॥ रात्रौ भूतगणानां च वासुदेवादि पूजनं ॥ भद्रकाली श्रि
यः कुर्यात्प्रार्थयेत्सर्वदेवताः ॥ वासुदेवसंकर्षणप्रद्युम्नश्चानिरुद्धकः ॥ नारायणोब्जजो विष्णुर्नारसिंहो वराह
कः ॥ शिवहासस्तत्पुरुषो ह्यघोरो वामसद्यजः ॥ सूर्यसोमं कुजाश्चांद्रिजीवः शुक्रश्शनैश्चरः ॥ राहुः केतुः कुम
पतिसेनानिश्चंडिका ह्युमा ॥ लक्ष्मीसरस्वती दुर्गा ब्रह्माणी प्रमुखा गणाः ॥ रुद्रा इंद्रादयो वह्निर्नागास्तार्क्ष्योप
रेः सुराः ॥ दिव्यांतरिक्षभूमिष्ठा विजयाय भवंतु मे ॥ मर्दयित्तुच मे शत्रून् संग्रामे प्रोपकारकं ॥ सपुत्रमातृभृत्योहं ॥

देवाधःशरयांगतः॥ वसूनांपृष्ठतोगत्वारिपुघ्नानामोस्तुवा॥ विनिहन्तंप्रदास्यामिदत्वाद्भ्यधिकंबलिं॥ षष्ठेक्ति
विजयस्नानंकर्त्तव्यंसाभिषेकवत्॥ यात्रादिनेसप्तमेचपूजयेच्चत्रिविक्रमं॥ नीराजनोक्तमंत्रैश्चस्वायुधंवाहनं
यजेत्॥ पुण्याहजयशब्देनमंत्रमेतन्निशामयेत्॥ दिव्यांतरिक्षभूमिष्ठाःसंत्वायुर्दासुराश्चये॥ देवसिद्धिंप्राप्नु
हित्वंदेवयात्रास्तुसारतः॥ रक्षंतुदेवतासर्वाइतिश्रुत्वानृपोव्रजेत्॥ गृहीत्वासशरंचापंधनुर्नागेतिमंततः
तद्विष्णोरितिजप्त्वार्घ्यदद्याद्विसुमुखेपदं॥ दक्षिणंपरकाविंशद्दिक्षुप्राच्यादिषुक्रमात्॥ नागंरथंहयंचैवधूर्य
नंचारुहेत्क्रमात्॥ आरुह्यवाद्यैर्गच्छेततःपृष्ठतोनावलोकयेत्॥ क्रोशमात्रंगतस्तिष्ठेत्पूजयेद्देवताद्विजान्॥ पर
देशंव्रजन्कुर्याद्दिलासैन्यंविपालयन्॥ राजाप्राप्यविदेशंतुदेशाचारेणपालयेत्॥ देवानांपूजनंकुर्यात्कृ
छिन्नाक्रमणेनतु॥ नावमानयेततद्देशजास्तथाःस्वपुरुषाशिनः॥ जयेचप्राचयेद्देवंदद्याद्दानानिपार्थिवः॥ द्वितीयो
हनिसंग्रामेभविष्यतियदातदा॥ स्नापयेद्गजमश्वांश्चयजेद्देवंनृसिंहकं॥ छत्रादिराजलिंगानिशस्त्रादिनिशिवे
गयान्॥ प्रातर्नृसिंहकंपूज्यवाहनाद्यान्शेषतः॥ पुरोधसाहुतंपश्येद्वन्हिंकृत्वाद्विजान्यजेत्॥ गृहीत्वासंशरंचा
पंगजाद्यारुह्यवैव्रजेत्॥ देशोत्तदृश्यशत्रूणांकुर्यात्प्रकृतिकल्पनां॥ संहतान्योजयेदल्पान्कामंविस्ता
रयेद्बहून्सूचीमुखमनीकंस्याद्दल्पानांबहुभिःसह॥ व्यूहाप्राणिधायास्चद्रव्यरूपाश्चकीर्तिताः॥ गरुडमकरश्ये

नश्चक्रसेनस्तथैवच॥ अर्धचंद्रस्तुवज्रश्चशकटव्यूहएवच॥ मंडलःसर्वतोभद्रःसूचीव्यूहश्चतेनव॥ व्यूहानामथ
सर्वेषांपंचधासैन्यकल्पना॥ संपक्षौस्वमंभवेत्॥ एकेनयदिवाद्भ्यांभागाभ्यांयुद्धमाचरेत्॥ भागत्रयंस्थापयेच्च
तेषांरक्षार्थमेवच॥ नव्यूहकल्पनाकार्याराज्ञाभवतिकर्हिचित्॥ मूलच्छेदेविनाशःस्यान्नयुध्याच्चस्वयंव्रजेत्॥ सै
न्यस्यपश्चात्तिष्ठेतक्रोशमात्रेमहीपतिः॥ पग्नःसंधारणंतत्रयोधानांपरिकीर्तितं॥ प्रधानभंगेसैन्यस्यनावस्थानं
विधीयते॥ नसंहितान्नविरलान्व्यूहंस्तत्रप्रकल्पयेत्॥ आयुधानांचसंमर्दोयथानस्यात्परस्परं॥ भेत्तुकाम
परानीकंसंहितैरेवभेदयेत्॥ भेदरक्षापणेनायकर्तव्याःसंहतास्तथा॥ व्यूहंभेदावहंकुर्यात्परव्यूहेषुचाभ्या
त्॥ गजस्यपादरक्षार्थंचत्वारस्तुरथाद्विज॥ रथस्यचाश्वास्चत्वारःसमास्तस्यचधर्मिणः॥ धन्विनश्चमभिस्तुल्या
पुरस्ताच्चर्मिणोरणे॥ पृष्ठतोधन्विनःपश्चाद्धन्विनांतुरगारथाः॥ रथानांकुंजरास्यापृष्ठादेयाश्चपृथिवीक्षिता॥ प
दातिकुंजराश्वानांधर्मःकार्यंप्रयत्नतः॥ शूराःप्रमुखतोदेयाःस्कंधमात्रप्रदर्शिनां॥ कर्तव्यंभीरसंघेनशत्रुविद्रा
वकारकं॥ दारयंतिपुरस्ताद्दुविज्ञातोभीरवःपुनः॥ प्रसारयन्तेवरणेभीरून्शूरापुरस्थिताः॥ प्रांशवःशुकनासा
श्चयेचजिह्मेक्षणानराः॥ सिंहस्कंधाश्चयुग्मभ्रूश्चवक्रोधनाःकलहप्रियाः॥ नित्यहृष्टाःप्रहृष्टाश्चशूराज्ञेयाश्चकामिनः॥
सहतानांहतानांचरणापनयनक्रिया॥ प्रतियुद्धंगजानांचतोयदानादिकंचयत्॥ आयुधानयनंचैवपत्तिकर्मवि

अ०पु० धीयते॥ निघ्नता मैत्रकामानां स्वसैन्यस्य तु रक्षणं॥ भेदनं संहतानां च धर्मिणां कर्म कीर्त्तितं॥ विमुखीकरणं युद्धे ध्वनि
२१९ नाश्वतथोच्यते॥ दूरायशरणं याति संहत्य श्वतपोच्यते॥ आगत्य नरि पु सैन्यानां रथकर्म तथोच्यते॥ भेदनं संहतानां च भि
न्नानामपि संहति॥ प्राकारतोरणाट्टालद्रुमभंगं च संकुजे॥ पत्तिभूर्विषमा ज्ञेया रथाश्वस्य तथा समा॥ सकर्दमा
चानागानां युद्धभूमिरुदाहृता॥ एवं विचरितस्य हकृत दृष्टा दिवाकरः॥ तथानुलोम शक्रा किंदिका जमृथमा
रुतः॥ योधानां च जये सर्वं न्यवामः श्रीगीत्राव दानतः॥ भोग प्राप्ता च विजये स्वर्गप्राप्तामृतस्य च॥ जित्वारीन्
भोग संप्राप्ति मृतस्य च परा गतिः॥ निःकृतिश्चापि पिंडस्य नास्ति युद्धमागति॥ शूराणां रक्षमजानितिन पापं त्यजं
तितो॥ घातादि कुःस्व सहनं रणे तत् परमं तपः॥ वराप्सरसहस्राणि यांति शूरं रणे मृतं॥ स्वामी सुकृतमादत्ते भग्नानां वि
निवर्त्ततां॥ ब्रह्महत्याफलं तेषां तथा प्रोक्तं पदे पदे॥ त्यक्त्वा सहायान् योगच्छेत् देवास्तस्य विविष्टये॥ अश्वमेधफलं
प्रोक्तं शूराणामनिवर्त्तिनां॥ धर्मनिष्ठा जयो राज्ञि योद्धव्याश्च समा समैः॥ राजाद्याश्च गजाद्याश्च न हंतव्याः पलायितः॥
न प्रेक्षा प्रतिष्टाश्च व्यसनाव्यापतितादयः॥ भ्रांते निद्रांति भूते च अर्द्धोत्तीर्णेन दीजले॥ दुर्द्दिने कूटयुद्धादि शत्रुनाशं वि
मीरयेत्॥ बाहू प्रगृह्य विक्रोशेत् भग्ना भग्ना परे हरि॥ प्राप्तं मित्रबलं हार नायको त्र निपातित॥ सेनानीर्निहतश्चायं न राम० २१९
पतिश्चापि विद्रुतः॥ विद्रुतानां तु योधानां सुखं घातो विधीयते॥ धूपाश्च देया धर्मज्ञ तथा च परमोहनाः॥ पताकाश्चैव संभ

रो वादित्राणां भयावहाः॥ संप्राप्य विजयं युद्धे देवान् विप्रान् गुरून् यजेत्॥ रत्नानि राजगामीनि निघ्नं न दीनं कृतं रणे॥
तस्य स्त्रियो न कस्यापि रक्षास्तास्वपरस्य च॥ शत्रुं प्राप्य रणे मुक्तं पुत्रवत् परिपालयेत्॥ पुनस्तेन न योद्धव्यं देशाचारादि पा
लयेत्॥ ततस्तु स्वपुरं प्राप्य ध्रुवभे प्रविशेद्गृहं॥ देवादि पूजनं कुर्यात् रक्षेद्योधकुटुंबकं॥ संविभागं परप्राप्तैः कुर्याद्भृत्य
जनस्य च॥ रणदीक्षा मयोक्ता ते जयाय नृपतेर्ध्रुवं॥ इत्याग्नेये रणदीक्षा॥ पुष्कर उवाच॥ राज्यलक्ष्मीस्थिरत्वाय य
अ थेंद्रेण पुरा श्रियः॥ स्तुतिः कृता तथा राजा जयार्थं स्तुतिमाचरेत्॥ इंद्र उ०॥ नमस्ये सर्वभूतानां जननीमब्धिसंभवां॥
त्वं श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्थलस्थितां॥ सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनि॥ संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा
सरस्वती॥ यज्ञविद्या महाविद्या गुह्यविद्या च शोभने॥ आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥ आन्वीक्षिकी त्रयी
वार्त्ता दंडनीतिस्त्वमेव च॥ सौम्यासौम्यं जगद्रूपं त्वयैतद्देवि पूरितं॥ का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः॥ अध्या
स्ते देवदेवस्य योगिचिंत्यं गदाभृतः॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयं॥ विनष्टप्रायमभवत्त्वयेदानीं समेधि
तं॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकं॥ भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणां॥ शरीरारोग्यमैश्वर्य
मरिपक्षक्षयः सुखं॥ देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभं॥ त्वमंबा सर्वभूतानां देवदेवो हरिः पिता॥ त्वयै
तद्विष्णुना चांब जगद्व्याप्तं चराचरं॥ मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदं॥ मा शरीरं कलत्रं च त्यजेथाः सर्वपा

अ॰३७ वनि॥ मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणं॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये॥ सत्येन सत्यशौचाभ्यां तथा
२२० शीलादिभिर्गुणैः॥ त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयामले॥ त्वयावलोकिताः सत्वः शीलाद्यैरखिलैर्गुणैः॥ कुलैश्वर्यैश्च
युज्यंते पुरुषा निर्गुणा अपि॥ स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान्॥ स शूरः स च विक्रांतो यस्त्वया देवि वी
क्षितः॥ सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभा॥ न ते वर्णयितुं श
क्ता गुणान् जिह्वापि वेधसः॥ प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन॥ ॥पुष्कर उ०॥ एवं स्तुता ददौ श्रीश्च वरमिंद्रा
य चेप्सितं॥ इत्थं वृत्रं च वध्यस्य संग्रामे विजयादिकं॥ स्तोत्रपाठश्रवणनराणां भुक्तिमुक्तिदं॥ श्रीस्तोत्रं सततं तस्मा
त्पठेच्च शृणुयान्नरः॥ ॥इत्याग्नेये श्रीस्तोत्रं॥ ॥अग्निरुवाच॥ ॥नीतिस्ते पुष्करोक्ता तु रामोक्ता लक्ष्मणाय च॥ ज
यायतां प्रवक्ष्यामि शृणु धर्मादिवर्द्धनीं॥ राम उवाच॥ न्यायेनार्जनमर्थस्य वर्द्धनं रक्षणं चरेत्॥ सत्पात्रप्रतिपत्ति
श्च राजवृत्तं चतुर्विधं॥ नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात्॥ विनयो हींद्रियजयस्तैर्युक्तः पालयेन्महीं॥ शा
स्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता॥ उत्साहो वाग्मिता दार्ढ्यं मापत्क्लेशसहिष्णुता॥ प्रभावः शुचिता मैत्री त्यागः स
त्यं कृतज्ञता॥ कुलं शीलं दमश्चेति गुणाः संपत्तिहेतवः॥ प्रकीर्णविषयारण्ये धावंतं विप्रमाथिनं॥ ज्ञानांकुशेन कु राम॰
र्वीत वश्यमिंद्रियदंतिनं॥ कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा॥ षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नृपः॥ आ २२०

न्वीक्षिकीं त्रयीं वार्त्तां दंडनीतिं च पार्थिव॥ तद्विद्यैस्तत्क्रियोपेतैश्चिंतयेद्विनयान्वितः॥ आन्वीक्षिक्यार्थविज्ञा
नं धर्माधर्मौ त्रयीस्थितौ॥ अर्थानर्थौ च वार्त्तायां दंडनीत्यां नयानयौ॥ अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा॥
वर्णिनां लिंगिनां चैव सामान्यो धर्म उच्यते॥ प्रजाः समनुगृह्णीयात्कुर्यादाचारसंस्थितिं॥ वाक्सूनृता दयादानं च
गतिरक्षणं॥ इति वृत्तं सतां साधुहितं सत्पुरुषव्रतं॥ आधिव्याधिपरीताय अद्य श्वो वा विनाशिने॥ को हि राजा श
रीराय धर्मापेतं समाचरेत्॥ न हि स्वसुखमन्विच्छन्पीडयेत्कृपणं जनं॥ कृपणः पीड्यमानो हि मन्युना हंति
पार्थिवं॥ क्रियतेऽभ्यर्हणीयाय स्वजनाय यथांजलिः॥ ततः साधुतरः कार्यो दुर्जनाय हितार्थिना॥ प्रियमेवा
भिधातव्यं सत्सु नित्यं द्विषत्सु च॥ देवास्ते प्रियवक्तारः पशवः क्रूरवादिनः॥ शुचिरास्तिक्यपूतात्मा पूजयेद्दे
वताः सदा॥ देवतावद्गुरुजनमात्मवच्च सुहृज्जनं॥ प्रणिपातेन हि गुरुं सतोऽनूचानचेष्टितैः॥ कुर्वीताभिमुखान्भृत्यै
र्देवान्सुकृतकर्मणा॥ सद्भावेन हरेन्मित्रं संभ्रमेण च बांधवान्॥ स्त्रीभृत्यान्प्रेमदानाभ्यां दाक्षिण्येनेतरं जनं॥
अनिंदा परकृत्येषु स्वधर्मपरिपालनं॥ कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः॥ प्राणैरप्युपकारित्वं मित्रायाव्य
भिचारिणे॥ गृहागते परिष्वंगः शक्त्या दानं सहिष्णुता॥ स्वसमृद्धिष्वनुत्सेकः परवृद्धिष्वमत्सरः॥ परोपतापव
चनं मौनव्रतचरिष्णुता॥ बंधुभिर्बद्धसंयोगः स्वजने चतुरस्रता॥ उचितानुविधायित्वमिति वृत्तं महात्मनां॥ ॥६

अ०पु० २२१

ताग्नेयेरामोक्तनीति॥॥रामोवाच॥॥स्वाम्यमात्यश्चराष्ट्रंचदुर्गंकोशोबलंसुहृत्॥परस्परोपकारीदंसप्तांगंराज्य
मुच्यते॥राज्यांगानांवरंराष्ट्रंसाधनंपालयेत्सदा॥कुलंशीलंवयःसत्वंदाक्षिण्यंक्षिप्रकारिता॥अविसंवादितास
त्यंवृद्धसेवाकृतज्ञता॥दैवसंपन्नताबुद्धिरक्षुद्रपरिषत्तथा॥शक्यसामंतताचैवतथाचदृढभक्तिता॥दीर्घदर्शि
त्वमुत्साहःशुचितास्थूललक्षिता॥विनीतताधार्मिकतासाधोश्चनृपतेर्गुणाः॥प्रख्यातवंशमक्रूरंलोकसंग्राहिणंशुचिं॥कु
र्वीतात्महिताकांक्षीपरिवारंमहीपतिः॥वाग्मीप्रगल्भःस्मृतिमानुदग्रोबलवान्वशी॥नेतादंडस्यनिपुणः
कृतशिल्पःसुकृत्कृतः॥पराभियोगप्रसहःसर्वदुष्टप्रतिक्रियः॥परछिद्रान्ववेक्षीचसंधिविग्रहतत्ववित्॥
गूढमंत्रप्रचारश्चदेशकालविभागवित्॥आदातासम्यगर्थानांविनियोक्ताचपात्रवित्॥क्रोधलोभभय
द्रोहदंभचापलवर्जितः॥परोपतापपैशून्यमात्सर्येर्ष्यानृतातिगः॥वृद्धोपदेशसंपन्नःशक्तोमधुरद
र्शनः॥गुणानुरागस्थितिमानात्मसंपद्गुणाःस्मृताः॥कुलीनाःशुचयःशूराःगुणवंतोनुरागिणः॥दंडनी
तेःप्रयोक्तारःसचिवाःस्युर्महीपतेः॥सुविग्रहोजनपदःकुलशीलकलान्वितः॥वाग्मीप्रगल्भश्चक्षुष्मान्
उत्साहीप्रतिपत्तिमान्॥स्तंभचापलहीनश्चमैत्रःक्लेशसहःशुचिः॥सत्यसत्वधृतिस्थैर्यप्रभावारोग्य
संयुताः॥कृतशिल्पश्चदक्षश्चप्रज्ञावान्धारणान्वितः॥दृढभक्तिरकर्ताचवैराणांसचिवोभवेत्॥स्मृतिस्तत्पर

राम० २२१

तार्थेषुवितर्कोज्ञाननिश्चयः॥दृढतामंत्रगुप्तिश्चमंत्रिसंपत्प्रकीर्तिता॥त्रय्यांचदंडनीत्यांचकुशलःस्यात्पु
रोहितः॥अथर्ववेदविहितंकुर्याच्छांतिकपौष्टिकं॥साधुतेषाममात्यानांतद्विद्यैःसहबुद्धिमान्॥चक्षुष्मत्तांचशिल्पंचपरी
क्षेतगुणद्वयं॥स्वजनेभ्योविजानीयात्कुलंस्थानमवग्रहं॥परिकर्मसुदक्षंचविज्ञानंधारयिष्णुतां॥गुणत्रयंपरीक्षे
तप्रागल्भ्यंप्रतिभांतथा॥कथायोगेषुबुध्येतवाग्मित्वंसत्यवादितां॥उत्साहंचप्रभावंचतथाक्लेशसहिष्णुतां॥धृ
तिंचैवानुरागंचस्थैर्यंचापदिलक्षयेत्॥भक्तिंमैत्रींचशौचंचजानीयाद्व्यवहारतः॥संवासिभ्योबलंसत्वमारोग्यं
शीलमेवच॥अस्तब्धतामचापल्यंवैराणांचाप्रकीर्तनं॥प्रत्यक्षतोविजानीयाद्भद्रतांक्षुद्रतामपि॥फलानुमेयाःसर्व
त्रपरोक्षगुणवृत्तयः॥सस्याकरवतीपुण्याखनिद्रव्यसमन्विता॥गोहिताभूरिसलिलापुण्यैर्जनपदैर्युता॥र
म्यासकुंजरबलावारिस्थलपथान्विता॥अदेवमातृकाचेतिशस्यतेभूर्विभूतये॥शूद्रकारुवणिक्प्रायोमहा
रंभःकृषीवलः॥सानुरागोरिपुद्वेषीपीडासहःपृथुः॥नानादेशसमाकीर्णोधार्मिकःपशुमान्बली॥ईदृ
ग्जनपदःशस्तोमूर्खव्यसनिनायकः॥पृथुसीमंमहाखातमुच्चप्राकारगोपुरं॥पुरंसमावसेच्छैलसरित्मरुव
नाश्रयं॥जलधान्यधनवद्दुर्गंकालसहंमहत्॥औदकंपार्वतंवार्क्षमैरिणंधान्वनंविदुः॥ईप्सितंद्रव्यसंपूर्णंपि
तृपैतामहोवश्यःसंहतोदत्तवेतनः॥विख्यातपौरुषोजन्यःकुशलःकुशलैर्वृतः॥नानाप्रहरणोपेतोनानासत्वविशा

अ०पु० २२२

रद॥ नानायोधसमाकर्षे नानावाजिहयद्विपः॥ प्रवासायासदुःखेषु युद्धेषु च कृतश्रमः॥ अद्वैधः क्षुः प्रियः मा
योदंडो दंडवतीमतः॥ योगविज्ञानसत्वाढ्यं महापक्षं प्रियंवदं॥ आपतिक्षमम् अद्वैधं मित्रं कुर्वीत सत्कुलं॥ दूरा
देवाभिगमनं स्पष्टार्थहृदयानुगा॥ वाक्सत्कृत्य प्रदानं च त्रिविधो मित्रसंग्रहः॥ धर्मकामार्थसंयोगो मित्रान्त्रि
विधं फलं॥ औरसं तत्र संबंधं तथा वंशक्रमागतं॥ रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधं॥ मित्रे गुणाः सत्यता
याः समानसुखदुःखता॥ वक्ष्येनुजीविनां वृत्तिं सेवितनृपतिं॥ सदक्षः मृदुता दाक्ष्यं क्षांतिः क्लेशसमाहितः॥
संतोषः शीलमुत्साहो मंडयत्यनुजीवितं॥ यथाकालमुपासीत राजानं सेवको नयात्॥ परस्थानगमं क्रौर्यं सौ
त्यत्वं मत्सरं त्यजेत्॥ विगृह्य कथनं भृत्यो कुर्याद्राज्ञा प्रसारहः॥ गुह्यं वर्म च मंत्रं च न च भर्तुः प्रकाशयेत्॥
रक्ताद्वृत्तिं समीहेत विरक्तं संत्यजेन्नृपं॥ आकार्ये प्रतिषेधश्च कार्ये चापि प्रवर्तनं॥ संक्षेपाद्दिति सद्वृत्तं ब
धुमित्रानुजीविनां॥ अजीव्यः सर्वसत्वानां राजा पर्जन्यवद्भवेत्॥ आयद्वारेषु चाप्यंतःस्थो धनिं च ददीत च॥ कुर्य्या राम.
द्व्योमसं मंत्रानयक्षा सर्वकर्मसु॥ स्पृष्टिवाणिग्पथो दुर्गं सेतुकुंजरबंधनं॥ खन्याकरधनादानं शून्यानां च
निवेशनं॥ अष्टवर्गमिमं राजा साधुरक्षेनुपालयेत्॥ आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात्॥ पृथिवीपति २२२
लोभाच्च प्रजानां पंचधा भयं॥ आविक्षेऽत्र पं काले च्यादद्दीत करं नृपः॥ अभ्यंतरं शरीरं स्वं बाह्यं राष्ट्रं च लक्षयेत्॥

आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात्॥ पृथिवीपतिलोभाच्च प्रजानां पंचधा भयं॥ आविक्षेऽभयं काले च्याददीतक
रं नृपः॥ अभ्यंतरं शरीरं स्वं बाह्यं राष्ट्रं च लक्षयेत्॥ दंड्यांस्तु दंडयेद्राजा स्वं रक्षेच्च विषादितः॥ स्त्रियः पुत्रांश्च शत्रुभ्यो विश्व
सेन्न कदाचन॥ ॥ इत्यादिमहापुराणे आग्नेये राजधर्म्मा॥ ॥ राजोवाच॥ ॥ मंडलं चिंतयेन्मुख्यं राजा द्वादशरा
जिकं॥ अरिमित्रमरेर्मित्रं मित्रमित्रमतः परं॥ तथारिमित्रमित्रं च विजिगीषोः पुरः स्मृताः॥ पार्ष्णिग्राहः स्मृतः पश्चात्
दाक्रंदस्तदनंतरं॥ आसाराधनयोश्चैव विजिगीषोः पुरः स्मृताः॥ पार्ष्णिग्राहः स्मृतः पश्चात् दाक्रंदस्तदनंतरं॥ आ
साराधनयोश्चैव विजिगीषोमो मध्यमंनंतरं॥ अनुग्रहे संहतयोर्निग्रहे व्यस्तयोः प्रभुः॥ मंडलाद्बहिरेतेषामुदासी
नो बलाधिकः॥ अनुग्रहे संग्रहे च हतानां च वसे प्रभुः॥ संधिं च विग्रहं यानमासनादि वदामि ते॥ बलवद्विगृहीते
न संधिं कुर्याद्भिवायच॥ कपाल उपहारश्च संतानसहृतस्तथा॥ उपन्यासः प्रतीकारः संयोगः पुरुषांतरः॥ अदृ
ष्टनरश्चक्षिष्टश्चाद्यापिषउपग्रहः॥ परिग्रहस्तथोच्छिन्नस्तथा च परदूषणं॥ स्कंधोपनेयः संतैश्च सुधयः षोडश
स्मृताः॥ परस्परोपकारश्च मैत्रः संबंधकस्तथा॥ उपहारश्च चत्वारस्तेषु मुख्याश्च संधयः॥ बालो वृद्धो दीर्घ
ध्यो रोगस्तथा बंधुबहिष्कृतः॥ भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा॥ विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान्॥ अने
कचित्तमंत्रश्च देवब्राह्मणनिंदकः॥ दैवोपहतकश्चैव दैवचिंतक एव च॥ दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः॥

ध्य

प्रदेशास्तो बहुरिपुरसुक्ता कालेनयश्च नु॥ सत्यधर्म्मव्यपेतश्च विंशतिः पुरुषा अमी॥ एतैः संधिं न कुर्वीत विगृह्णीयात्तु के
वलं॥ परस्परोपकारेण पुंसां जयति विग्रहः॥ आत्मानोभ्युदयाकांक्षी पीड्यमानः परेण वा॥ देशकालबलोपेतः प्रार
भेतेह विग्रहं॥ राज्यस्त्रीस्थानदेशानां ज्ञानस्य च बलस्य च॥ अपहारो मदो मानः पीडा वैषयिकी तथा॥ ज्ञाना
त्मशक्तिधर्म्माणां विघातो दैवमेव च॥ मित्रार्थं चापमानश्च तथा बंधुविनाशनं॥ भूतानुग्रहविच्छेदस्तथा मंडल
दूषणं॥ एकार्थाभिनिवेशित्वमिति विग्रहयोनयः॥ सापत्न्यं वास्तुजं स्त्रीजं वाग्जातमपराधजं॥ वैरं पंचविधं प्रोक्तं सा
धनैः प्रशमं नयेत्॥ किंचित्फलं निःफलं वा संदिग्धफलमेव च॥ तदात्वे दोषजननमायत्यां चैव निःफलं॥ अपस्थाने च
दाते च द्वेषसंजननं तथा॥ अपरिज्ञातवीर्य्येण परेणास्तोभितोऽपि वा॥ परार्थं स्त्रीनिमित्तं च दीर्घकालं द्विजैः सह॥
अकाले दैवयुक्तेन बलोद्धृतसखेन च॥ तदात्वे फलसंयुक्तमायत्यां फलवर्जितं॥ आयत्यां फलसंयुक्तं तदात्वे निष्फ
लं तथा॥ इतीमं षोडशविधं न कुर्यादेव विग्रहं॥ तदात्वायतिसंशुद्धं कर्म्म राजा सदा चरेत्॥ हृष्टपुष्टबलं बुद्ध्वा गृ
ह्णीयाद्विपरीतकं॥ मित्रमाक्रंद आसारो यदा स्युर्दृढभक्तयः॥ परश्च विपरीतश्च तदा विग्रहमाचरेत्॥ विगृह्य
संधाय तथा संभूयाथ प्रसंगतः॥ उपेक्षया च निपुणैर्यानं पंचविधं स्मृतं॥ परस्परस्य सामर्थ्यविघाताद
ग्रानस्मृतं॥ अरेश्च विजिगीषोश्च यानवत्संधयास्मृतं॥ बलिनो द्विंशतो मर्म्मण्येवाचात्मानं समर्पयेत्॥ द्वैधीभावे

न तिष्ठेत् काकाक्षिवदलक्षितः॥ उभयोरपि संपाते सेवेत बलवत्तरं॥ यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ॥ तदो
पसर्पेत् छत्रुमधिकं वा स्वयं व्रजेत्॥ उच्छिद्यमानो बलिना॥ निरुपायप्रतिक्रियः॥ कुलोद्भूतं सत्यमार्य्यमासेवे
त बलोत्कटं॥ तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता॥ तत्कारितप्रश्रयिता वृत्तं संश्रयिणः स्मृतः॥ ॥ इत्या
ग्नेये षाड्गुण्यं॥ ॥ राम उवाच॥ ॥ प्रभावोत्साहसंशोभ्यां मंत्रशक्तिः प्रशस्यते॥ प्रभावोत्साहवान्काव्यो जितो देवपुरो
धसा॥ मंत्रयेतेह कार्याणि नानाप्तैर्नाविपश्चिता॥ अशक्यारंभवृत्तीनां कुतः क्लेशादृते फलं॥ अविज्ञातस्य विज्ञा
नं विज्ञातस्य च निश्चयः॥ अर्थद्वैधस्य संदेहच्छेदनं शेषदर्शनं॥ सहायाः साधनोपाया विभागो देशकालयोः॥
विपत्तेश्च प्रतीकारः पंचांगो मंत्र इष्यते॥ मनःप्रसादः श्रद्धा च तथा करणपाटवं॥ सहायोत्थानसंपच्च कर्म्मणां सिद्धि
लक्षणं॥ मदः प्रमादः कामश्च स्वप्नप्रलपितानि च॥ भिन्दंति मंत्रं प्रच्छन्नाः कामिन्यो वा रताः स्त्रियः॥ प्रगल्भः स्मृ
तिमान्वाग्मी शास्त्रे शस्त्रे च निष्ठितः॥ अभ्यस्तकर्म्मा नृपतेर्हितो भवितुमर्हति॥ निसृष्टार्थो मितार्थश्च तथा शासनहा
रकः॥ सामर्थ्यात्पादतो हीनो हितस्तु त्रिविधः स्मृतः॥ नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदं॥ कालमीक्षेत कार्या
र्थमनुज्ञातश्च निष्पतेत्॥ छिद्रं च शत्रोर्जानीयात्कोशमित्रबलानि च॥ राजा परागोजानीयात् दृष्टिवक्त्रविचेष्टितैः॥
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि॥ तपस्विव्यंजनोपेतैः सुचरैः सह संवसेत्॥ चरमकार्य्येहतस्यादस्यकार

अ॰पु॰
२२४

प्ररोहि धा॥ वणिक्कृषीवलो लिंगी भिक्षुकाद्याश्रकारकाः॥ पापादनित्यसलिलं विफले मृते चेरिते॥ प्रकृतिव्यस
नं यत्स्यात्तत्समीक्ष्य समुत्सृजेत्॥ अनयाद्व्यसनं श्रेयस्तस्मात्तु व्यसने स्मृतं॥ हुताशनो जलं व्याधिर्दुर्भिक्षं मरकं तथा
इति पंचविधं दैवं व्यसनं मानुषं परं॥ दैवं पुरुषकारेण शांत्या च प्रशमं नयेत्॥ उत्थापितेन नीत्या च मानुषं व्यसनं
हरेत्॥ मंत्रो मंत्रफलावाप्तिः कार्यानुष्ठानमायतिः॥ आयव्ययौ दंडनीतिरमित्रः प्रतिषेधनं॥ व्यसनस्य प्रतीकारो रा
जा राजाभिरक्षणं॥ इत्यमात्यस्य कर्म्मेदं हंति सव्यसनान्वितः॥ हिरण्यधान्यवस्त्राणि वाहनं प्रजया भवेत्॥ तथा
म्ये द्रव्यनिचयो हंति सव्यसनात् प्रजाः॥ प्रजानामापदिस्थानं रक्षणं कोषदंडयोः॥ पौराद्याश्चोपकुर्व्वंति संश्रयाये
ह दुर्गिणं॥ तूष्णींयुद्धं जनत्राणं मित्रामित्रपरिग्रहः॥ सामंतादिहरं दुर्गं नरपे तुष्य्व्यसनावृतत्॥ भृत्यानां भरणं दा
नं प्रजामित्रपरिग्रहः॥ धर्मकामादिभेदश्च दुर्गसंस्कारभूषणं॥ कोषं तु व्यसनात्कंति कोषमूलो हि भूपतिः॥ मित्र
मित्रावलीहेमसाधनं रिपुमर्द्दनं॥ दूरकार्य्याशुकारित्वं दंडो व्यसनमीहरेत्॥ संस्तंभयति मित्राणि अमित्राल्लाग
यत्यपि॥ नाशो रुपकारित्वं मित्राद्व्यसनाद्धरेत्॥ राजा सव्यसनी हन्याद्राजकार्याणि यानि च॥ वाग्दंडयोश्च
पारुष्यमर्थदूषणमेव च॥ पानं स्त्री मृगया द्यूतं व्यसनानि महीपते॥ आलस्यस्तब्धता दर्पः प्रमादो वैरकारिता॥ इ
ति पूर्वमुदिष्टश्च सचिवव्यसनं स्मृतं॥ अनावृष्टिश्च पीडादिराष्ट्रव्यसनमुच्यते॥ विशीर्णयंत्रप्राकारे परिखातम

राम॰
२२४

स्वता॥ क्षीणयावसेन्धनान्नं च दुर्गव्यसनमुच्यते॥ व्ययीकृत परिक्षिप्तो प्रजितोसंचितस्तथा॥ मूषितो दूरसंस्थश्च कोष
व्यसनमुच्यते॥ उपरुद्धं परिक्षिप्तममानित विमानितं॥ अभृतं व्याधितं श्रांतं दूरायानं नवागतं॥ परिक्षीणं परिहतं
प्रहताग्रहनं तथा॥ आशानिर्वेदभूयिष्ठमनृतुप्राप्तमेव च॥ कलत्रगर्भिनिक्षिप्तमंतःशल्यं तथैव च॥ विच्छिन्नवी
वधासारं शून्यमूलं तथैव च॥ अस्वाम्यसंहतं वापि भिन्नकूटं तथैव च॥ दुष्पार्ष्णिग्राहमर्थं च बलव्यसनमुच्यते॥ दैवो
पपीडितं मित्रं ग्रस्तं शत्रुबलेन च॥ कामक्रोधादिसंयुक्तमुत्साहादरिभिर्भवेत्॥ अर्थस्य दूषणं क्रोधात्पारुष्यं वाक्य
दंडयोः॥ कामजं मृगया द्यूतं व्यसनं पानकं स्त्रियः॥ वाक्पारुष्यं परं लोके उद्वेजनमनर्थकं॥ असिद्धसाधनं दंडस्त
युक्तोपि वनयेन्नृपः॥ उद्वेजयति भूतानि दंडपारुष्यवान्नृपः॥ भूतास्तु त्वेषमानाभिद्विषतां यांति संश्रयं॥ विवृद्धाः शत्रवस्ते
च विनाशाय भवंति ते॥ दूष्यस्य दूषणार्थं च परित्यागो महीयसः॥ अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते॥ पानात्कार्या
दिनाशानं मृगयातो वितक्षयः॥ जितश्रमार्थं मृगयां विचरेद्रक्षिते धने॥ धर्म्मार्थप्राणनाशादि यतेस्यात्कलहादिकं॥
कालातिपातो धर्मार्थपीडा स्त्रीव्यसनाद्भवेत्॥ प्राणनाशः कार्यकार्याकार्यकार्यविनिश्चयः॥ स्कंधावारनिवेशज्ञो
निमित्तज्ञो रिपुं जयेत्॥ स्कंधावारस्य मध्ये तु सकोशं नृपतेर्गृहं॥ मौलं भृतं श्रेणिसुहृद्द्विषदाटविकं बलं॥ राजह
र्म्यसमावृत्य क्रमेण विनिवेशयेत्॥ सैन्यैकदेशः संनद्धः सेनापतिपुरःसरः॥ परिभ्रमेत्तच्च क्षपां मंडलेन बहिर्नि

शि॥ वानाश्चिकाविजानीयुर्दूरसामंतचारिणः॥ निर्गच्छेत्प्रविशेच्चैव सर्वएवोपलक्षितः॥ सामदानं च भेदश्च दंडोपे
क्षेंद्रजालकं॥ मायोपायाः सप्तपरे निक्षिपत्साधनायतान्॥ चतुर्विधस्मृतं साम उपकारानुकीर्तनं॥ मिथः संबंधक
थनं प्रीतिपूर्वं च भाषणं॥ आयातेर्दर्शनं वाचा उवाहमितिचार्पणं॥ जासंप्राप्तधनोत्सर्ग उत्तमाधममध्यम॥ प्र
तिदानं तथा तस्य गृहीतस्यानुमोदनं॥ द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनं॥ देयस्य प्रतिमोक्षश्च दानं पंचविधं स्मृ
तं॥ स्नेहरागापनयनं संघर्षोत्पादनं तथा॥ तिथो भेदश्च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः॥ वधोधहरणं चैव परिक्ले
शस्त्रिधा दंडः प्रकाशश्चाप्रकाशश्च लोकद्विष्टान् प्रकाशतः॥ उद्विजेत हतैर्लोकस्तेषु यांशु प्रशस्यते॥ विषेणोप
निषद्योगैर्हन्याच्छस्त्रादिना द्विषः॥ जातिमात्रद्विजान्नैव हन्यात्सामोत्तमं वदेत्॥ दुर्लिप्साभिर्वचेतांसि हृष्टा साधु
पिंबंति वा॥ प्रसन्निवास्तं साम प्रयुंजीत प्रियं वचः॥ मिथ्याभिशस्तः श्रीकामस्त्वाहूय प्रतिमानितः॥ राजद्वेषी चातिकरश्च
पुंसश्चावितस्तथा॥ विच्छिन्नधर्मकामार्थः क्रुद्धो मानी विमानितः॥ अकारणात्परित्यक्तः कृतवैरोपि सांत्वितः॥ हृतद्रव्यक
लत्रश्च पूजार्होप्रतिपूजितः॥ एतांस्तु भेदयेच्छत्रौ स्थितान्वित्याशुशंकितान्॥ आगतान् पूजयेत्कामैर्निजाः प्रशमनं यये
त्॥ सामदृष्टानुसंधानमत्युग्रभयदर्शनं॥ प्रदानदानपानं च भेदोपायाः प्रकीर्तिताः॥ भिन्नं हतं काष्ठमिव घुणजं वेविशी
र्यते॥ त्रिशक्तिर्देशकालज्ञो दंडेनास्तं नयेदरीन्॥ मैत्रीप्रधानं कल्याणं बुद्धिसामान्तेन साधयेत्॥ लुब्धं क्षीणं च दा

नेन भिन्नान्न्योन्यशंकया॥ दंडस्य दर्शनाद्दुष्टान् पुत्रभ्रातादि सामतः॥ दानभेदैश्च मुख्यान्भेदाज्जनपदातिकान्॥
सामंताटविकान्भेद दंडाद्यपमपराधकान्॥ देवताप्रतिमाशस्त्रे पूजयोन्नतकृतैर्नृपः॥ पुमान् स्त्रीवस्त्रसंवीतो निशि चाद्भुत
दर्शने॥ वेतालोल्कापिशाचानां शिवानां च सरूपकी॥ कामतो रूपधारित्वं शस्त्राग्न्यश्मांबुवर्षणं॥ तमोनिलोनलांभो
मेघ इति माया ह्यमानुषी॥ जघान कीचकं भीम आस्थितः स्त्रीस्वरूपतां॥ अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणं॥
उपेक्षेयं स्मृता भ्रातोपेक्षितं च हिडिंबया॥ मेघांधकारवृष्ट्यग्निपर्वताद्भुतदर्शनं॥ दूरस्थानां च सैन्यानां दर्शनं ध्व
जशालिनां॥ छिन्नपाटितभिन्नानां संस्रुतानां च दर्शनं॥ इतींद्रजालं द्विषतां भीत्यर्थमुपजायते॥ ॥ इत्याग्नेये महा
पुराणे सामादि॥ ॥ राम उवाच॥ ॥ षड्विधं तु बलं व्यूह्य देवान् प्रार्च्य रिपुं व्रजेत्॥ मौलं भूतं श्रेणिसुहृद्द्विषतादवि
कं बलं॥ पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं तथा॥ षडंगं मंत्रकोषाभ्यां पदात्यश्वरथद्विपैः॥ नद्यद्रिवनदुर्गेषु यत्र
यत्र भयं भवेत्॥ सेनापतिस्तत्र तत्र गच्छेद्व्यूहीकृतैर्बलैः॥ नायकः पुरतो यायात्प्रवीरैः पुरुषैर्वृतः॥ मध्ये कलत्रं स्वामी
च कोषः फल्गु च यद्बलं॥ पार्श्वयोरुभयोरश्वा वाजिनां पार्श्वयो रथाः॥ रथानां पार्श्वयोर्नागा नागानां चाटवीबलं॥
पश्चात्सेनापतिः सर्वं पुरस्कृत्य कृती स्वयं॥ यायात्सन्नद्धसैन्योघैः खिन्नाश्वासयन् शनैः॥ यायाद्व्यूहेन महता मक
रेण पुरोभये॥ श्येनेनोद्धृतपक्षेण सूच्या वा वीरवक्त्रया॥ पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितं॥ सर्वतः सर्वतो

 भङ्गं न पेत्व्यूहं प्रकल्पयेत्।।कंदरे शैलगहने निम्नगावनसंकटे।।दीर्घाध्वनि परिश्रांतं क्षुत्पिपासाहितक्लमं।।व्याधिदु
 र्भिक्षमरकपीडितं दस्युविद्रुतं।।पंकपांशुजलस्कंधं व्यस्तं पुंजीकृतं पथि।।प्रसुप्तं भोजनव्यग्रमभूमिष्ठमसुस्थितं।।चौ
राग्निभयवित्रस्तं वृष्टिवातसमाहतं।।इत्यादौ स्वचमूं रक्षेत् परसैन्यं च घातयेत्।।विशिष्टो देशकालाभ्यां भिन्ना
दिप्रकृतिर्बली।।कुर्यात्प्रकाशयुद्धं हि कूटयुद्धं विपर्यये।।तेष्ववस्कंधकालेषु परं हन्यात्समाकुलं।।अभूमिष्ठं सु
भूमिष्ठः प्रभग्नो वोपजायते।।प्रकृतिप्रग्रहाकृष्टं पाशैर्वनचरादिभिः।।हन्यात्प्रवीरपुरुषं भंगदानादिकर्षणैः
पुरस्ताद्दर्शनं दत्वा तल्लक्षकृतनिश्चयात्।।हन्यात्पश्चात्प्रवीरेण बलेनोत्पत्य वेगिना।।पश्चाद्वासंकुलीकृत्य
हन्याच्छूरेण प्रबलतः।।ताभ्यां पार्श्वाभिघातौ तु व्याख्यातौ कूटयोधने।।पुरस्ताद्विषमे देशे पश्चाद्धन्यात्तु वेगवान्।।
पुरः पश्चात्तु विषमे एवमेव तु पार्श्वयोः।।प्रथमं योधयित्वा तु दूष्यामित्राटवीबलैः।।श्रान्तं मन्दं निराक्रन्दं हन्यादश्रा
न्तवाहनः।।दूष्यामित्रबलैर्वापि भंगं दत्वा प्रयत्नवान्।।जितमित्येव विश्वस्तं हन्यान्मन्त्रव्यपाश्रयः।।स्कंधावारपु
ग्रामसस्यसालप्रजादिषु।।विश्रब्धं न परानीकमप्रमत्तो विनाशयेत्।।अथवा गोग्रहाकृष्टं तल्लक्ष्यं मार्गबंधना
त्।।अवस्कंदभयाद्रात्रिप्रजागरकृतश्रमं।।दिवासुप्तं समाहन्यान्निद्राव्याकुलसैनिकं।।निशि विस्रब्धसंव
संसुप्तं नागैर्वा खड्गपाणिभिः।।प्रयाणे पूर्वयायित्वं वनदुर्गप्रवेशनं।।अभिन्नानामनीकानां भेदने

भिन्नसंग्रहः।।विभीषिका द्वारघातं कोशरक्षेभकर्म च।।अभिन्नभेदनं भिन्नसंधानं रथकर्म वा।।वनदिग्मार्गविच
यो वीरधी सारक्षणं।।अनुपातीयुधरणे शीघ्रकार्योपपादने।।दीनाभ्युद्धरणं घातः कोटीनां जघनस्य च।।अश्वक
र्माप्ययित्वेन सर्वदेशस्व धारणं।।शिरीषस्य च मार्गादिशोधनं विष्टिकर्म च।।सस्थूलस्थाणुवल्मीकवृक्षगुल्मपक
टकं।।सापसारा पदातीनां भिन्ना भिर्विषमा गता।।स्वल्पवृक्षोपलाक्षिप्रलंघनीयनगा स्थिरा।।निःशर्करा विपंकी
च सापसारा च वाजिभूः।।निःस्थाणुवृक्षकेदारा रथभूमिरकर्दमा।।मर्दनीयतरुक्षेप्यव्रताभिः पंकवर्जिता।।निद्
राग्म्यशैला च विषमा गजमेदिनी।।उरस्यादीनि भिन्नानि प्रतिगृह्य बलानि हि।।प्रतिग्रह इति ख्यातो राजकार्यांतरः
क्षमा।।तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते।।जयार्थी न च युध्येत मतिमान प्रतिग्रहः।।यत्र राजा तत्र कोशः को
षाधीना हि राजता।।योधेभ्यस्तु ततो दद्यात्किं हि दातुं न युज्यते।।द्रव्यलक्षं राजघाते तदर्धं तत्सुताहने।।सेनापति
वधे तद्वद्दद्याद्धस्त्यादिमर्दने।।तथा वा खलु युध्येरन्पत्तयश्च रथद्विपैः।।रथा भवेदयत्नादो व्यायामनिवर्तने ऽश्वसं
करे न युध्येरन् संकरः संकुलावहः।।महासंकुलयुद्धेषु संश्रयेरन्मतंगजं।।अश्वस्य प्रतियोद्धारो भवेयुः पुरुषा
स्त्रयः।।इति कल्प्यास्त्रयश्चाश्वा विधेयाः कुंजरस्य तु।।पादगोपा भवेयुश्च पुरुषा दश पंच वा।।विधानमिति नागस्य वि
हितस्यंदनस्य च।।अनीकमिति विज्ञेयमिति कल्प्यानवाद्विजाः।।तथानीकस्य रंध्रं तु पंचधा यं प्रवक्ष्यते।।इत्यनी

कविभागेन स्थापयेद्व्यूहसंपदः॥ उरस्यकक्षपक्षांस्तु कल्पानेतान् प्रचक्षते॥ उरः कक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः॥
कोटि च व्यूहशास्त्रज्ञैः सप्तांगो व्यूह उच्यते॥ उरस्यकक्षपक्षास्तु व्यूहोयं सप्रतिग्रहः॥ गुरोरेष च शुक्रस्य कक्षाभ्यां परि
वर्जितः॥ तिष्ठेयुः सेनापतयः प्रवीरैः पुरुषैर्वृताः॥ अभेदेन च युद्ध्येरन् रक्षेयुश्च परस्परं॥ मध्यव्यूहे फल्गुसैन्यं तु युद्धवस्तु
जघन्यतः॥ युद्धं हि नायकप्राणं हन्यते तदनायकं॥ उरसि स्थापयेन्नागान् प्रचंडान् कक्षयो रथान्॥ हयांश्च पक्ष
योर्व्यूहो मध्यभेदी प्रकीर्तितः॥ मध्यदेशे हयानीकं रथानीकं तु कक्षयोः॥ पक्षयोश्च गजादीनां व्यूहेत्वन्तभेद्य स्मृतः॥
रथस्थाने हयान्दद्यात्पदातींश्च हयाश्रये॥ रथाभावे तु द्विरदान्व्यूहे सर्वत्र दापयेत्॥ यद्या दंडव्यास्तु समावधः संप्र
कीर्तितः॥ मंडलासंहतो भोगो दंडस्ते बहुधा स्मृतः॥ तिर्यग्वृत्तिस्तु दंडस्य भोगोऽन्वावृत्तिरेव च॥ मंडलः सर्वतोवृत्ति
पृथग्वृत्तिरसंहतः॥ प्रदरो दृढकोऽसह्यश्चापस्तत्कुक्षिरेव च॥ प्रतिष्ठा प्रतिष्ठश्च श्येनो विजयसंजयौ॥ विशा
लो विजयः सूची स्थूणाकर्णचमूमुखे॥ सुपास्यो वलयश्चैव दंडभेदाश्च दुर्जयाः॥ अतिक्रांतः प्रतिक्रांतः कक्षाभ्यां कक्षप
क्षतः॥ अतिक्रांतस्तु पक्षाभ्यां जयोऽस्य तद्विपर्ययः॥ पक्षोरक्षैरतिक्रांतः प्रतिष्ठोऽन्यो विपर्ययः॥ स्थाप्य पक्षौ धनुःपक्षौ
द्विस्त्वणो दंडउच्छ्रितः॥ द्विगुणस्तु गमतिक्रांतः पक्षोऽन्यो स्वविपर्ययः॥ द्विचतुर्थदंडइत्येते ज्ञेया लक्षणतः क्रमात्॥
गोमूत्रिकाहिसंचारी शकटो मकरस्तथा॥ भोगभेदाः समाख्यातास्तथा परिक्ररङ्कः॥ दंडपक्षौ पुरोगम्यश

कटस्तद्विपर्यये॥ मकरो व्यतिकीर्णश्च शेषः कुंजरवाजिभिः॥ मंडलव्यूहभेदौ तु सर्वतोभद्रदुर्जयौ॥ अष्टानीको द्वि
तीयस्तु प्रथमः सर्वतोमुखः॥ अर्द्धचंद्रकऊर्द्धारो वज्रभेदास्तु संहतेः॥ तथा कर्कटशृंगी च काकपादी च गोधिका॥
त्रिचतुःपंचसैन्यानां ज्ञेया आकारभेदतः॥ दंडस्य स्युः सप्तदश व्यूहा द्वौ मंडलस्य च॥ असंघातस्य षट्पंच भोगस्यैव तु
संगरे॥ पक्षादीनामथैकेन हत्वा शेषैः परिक्षिपेत्॥ उरसा वा समाहत्य कोटिभ्यां परिवेष्टयेत्॥ परे कोटी समाक्रम्य पक्षा
भ्यामप्रतिग्रहं॥ कोटिभ्यां जघनं हन्यादुरसा च प्रपीडयेत्॥ यतः फल्गु यतो भिन्नं यतश्चान्यैरधिष्ठितं ततश्चारिब
लं हन्यादात्मनश्चोपबृंहयेत्॥ सारं द्विगुणसारेण फल्गुसारेण कल्पयेत्॥ संहतं च गजानीकैः प्रचंडं दारयेद्बलं॥
स्यात्कक्षपक्षोरस्ये॥ स्थावर्तमानस्तु दंडकः॥ तत्र प्रयोगो दंडस्य स्थानं तुर्येण दृश्यते॥ ०००॥ स्याद्दंडसमः पक्षाभ्या
मतिक्रांतः प्रदरकः॥ ०००॥ भवेत्स पक्षकक्षाभ्यामतिक्रांतो दृढः स्मृतः॥ ०००॥ कक्षाभ्यां च प्रतिक्रांतव्यूहोऽसह्यः स्मृ
तोपपा ००॥ ००॥ कक्षपक्षावरस्थाप्योरस्यैः क्रांतश्च खादकः॥ ०००० ०००॥ द्वौ दंडौ वलयः प्रोक्तो व्यूहो रिपुविदारणः॥
क ०००० ॥ दुर्जयश्चतुर्वलयः शत्रोर्बलविमर्दनः॥ ००००॥ कक्षपक्षोरस्यैर्भोगो विषमं परिवर्जयेत्॥ ०००॥ सर्पसारि
गोमूत्रिका सकटः शकटाकृतिः॥ ०००॥ विपर्ययो मकरः प्रोक्तः सर्वशत्रुविमर्दनः॥ ००००० स्यात्कक्षपक्षोर
स्यानां भेदकी भावकृन्मंडलं ००० चक्रपद्मादयो भेदमंडलस्य प्रभेदकाः॥ ०००००॥ एवं च सर्वतोभद्रोर ०००००

प्रोगात्ततक्षकारयेत्॥अर्द्धचैलोनामरूपकाः॥मूहग्यपासुखंकार्य्यत्रिनृणांबलवर्धनाः॥॥अग्निरुवाच॥रामस्तु
रावणंहत्वाअयोध्याधिपोभवन्द्विज॥रामोक्तनीत्येंद्रजितंहतवान्लक्ष्मणःपुरा॥॥इत्याग्नेयेमहापुराणेरामोक्तरा
जनीतिः॥अग्निरुवाच॥॥रामोक्तातुमयानीतिस्त्रीपांराजन्यांवदे॥लक्ष्मणंयत्समुद्रेणगर्गायोक्तंयथापुरा॥
रामउवाच॥॥प्रशस्तानंलक्षणंवक्ष्येस्त्रीणांचैवशुभाशुभं॥एकाधिकोद्विशुक्लश्चत्रिगंभीरस्तथैवच॥त्रित्रिकस्त्रिप्र
लंबश्चत्रित्रिस्याक्षि॥॥त्रिकालज्ञश्चसुव्रतः॥पुरुषःस्यात्सुलक्षण्योविपुलस्तथात्रिषु॥चतुर्ह्रस्वस्तथाप्रश्वत
थैवचचतुःसमः॥चतुष्किष्कुचतुर्दंष्ट्रश्चतुःकृष्णस्तथैवच॥चतुर्गंधश्चतुर्ह्रस्वःसूक्ष्मदीर्घश्चपंचसु॥दशापद्मोद
राम्रहस्तन्यग्रोधपरिमंडलः॥चतुर्दशसमद्वंद्वःषोडशाक्षश्चशस्यते॥धर्मार्थकामसंसक्तोधर्मार्थिकाधिकोमतः॥
तारकास्यांविमानोत्रशुक्लादंताद्विशुक्लकः॥गंभीरस्त्रिरोनाभिःशत्रुंचैकशुभंस्तथा॥अन्तर्भूयादक्षांतैर्मगलाचा
रयुक्तता॥शौचंस्वस्तिहीनकार्पण्यमतयोयस्यसोर्यता॥त्रित्रिकस्त्रिप्रलंबश्चसाक्षात्रुपणोभुजयोर्नरः॥द्विग्धेशजाति
वर्गाश्चतेजस्तापसमाश्रिया॥आप्नोतियस्त्रिकस्यापित्रिवलीमामरस्तमौ॥उदरेवलयस्तिश्रोनंतंत्रिषिनततत्स्पृशु॥
देवतानांद्विजानांचगुरूणांप्रणतश्चयः॥धर्मार्थकामकालस्त्रिकालज्ञोविधीयते॥उरोललाटंवक्त्रंचविविस्तीर्णोपिद्वि
लेखवान्॥द्वौमाण्डीद्वौतथापादौसुजघन्वादिभिर्घनौ॥अंगुल्योहृदयंपृष्ठंकटिशंखौचतुःसमं॥षड्वक्षंपुण्यशोधंचतु

ष्किष्कःप्रमाणतः॥दंष्ट्राश्चतस्रश्चंद्राभाश्चतुःकृष्णंवदामिते॥नेत्रेतारौभ्रुवौश्मश्रुःकृष्णाकेशास्तथैवच॥नासायांवदने
स्वेदेकक्षयोर्गंधशुभंधकः॥ह्रस्वंलिंगंतथाग्रीवाजंघेस्याद्वेदनास्वकः॥सूक्ष्मोरपणुनिपर्वाणिनखकेशद्विजत्वचः॥
हनुनेत्रेललाटेचनासादीर्घस्तुनांतरं॥वक्षःकक्षौनखानाशौनंतवक्त्रंकृकाटिका॥जान्वोरूर्ध्वंत्वपृष्ठंह्रस्वंबृंशोवैक
रणाश्रायो॥नेत्रेनाशापुटेकर्णौमेढ्रंयाम्मुखेनलं॥तिस्त्रौसुताश्चनेत्रेतुहस्तपादौतथानखा॥शिखश्रवक्त्रशसतेप
श्चाभागसदेहिनं॥प्राणिपादमुखंग्रीवाश्रवणेहृदयःशिरः॥ललाटमुदरंपृष्ठंस्फुतुःपूजितादिशा॥संप्रसारितु
मस्येहमध्यमांचमपानुकं॥उच्छायेणसमंयस्यन्यग्रोधपरिमंडलः॥पौदौगुल्फौस्फिचौपार्श्वौषषणौषचवक्षणौ॥
जान्वोकर्णौस्त्रंसक्थिन्यौजंघेहस्तौतपाक्षिपी॥चतुर्दशसमद्वंद्वएतस्मात्समतोनरः॥विद्याचतुर्दशापक्षेपश्ये
युःषोडशाक्षकः॥रुक्षशिरततंगात्रमसुभंसाधुवर्जितं॥दुर्गंधिपरीतंचछंत्तदृष्ट्याप्रसन्नया॥धन्यसमधुराचापी
गतिर्मत्तेभसंनिभा॥एवंकूपनवरोमनयेरक्षात्सस्तरुत॥॥इत्याग्नेयेपुरुषलक्षणं॥॥समुद्रउवाच॥॥संनास्त्री
गरुसबंगीमतुलानेगगामिनी॥गुरुरुजधनायाचमंतरावासलेक्षणा॥स्वनीलकेशीतन्वंगीविलोमांगीमनोह
रा॥समभूमिस्पृशौपादौसंहतौचतथास्तुरो॥नाभिःप्रदक्षिणावर्तागुह्यंमश्वत्थपत्रवत॥गुल्फौनिगूढौमध्येन
नाभिरंगुष्ठमालिका॥जघनेनप्रलंबंचरोमारूक्षानशोभना॥नक्षत्रवृक्षनदीनास्त्रानसदाकलहप्रिया॥नलो

 युपानदुर्गापाक्षमादेवादिपूजका ॥ गंधैर्मध्यिकपुष्पाद्यैर्नीराजनान्नतोमया ॥ नसंहतस्तुकुटिलापतिप्राण्पतिप्रि
या ॥ अलक्षणापि लक्ष्मण्या पंत्राकारस्ततो गुणाः ॥ उर्द्धकनिष्ठिकायस्यानस्र्ञोऽनस्यतुरेवसा ॥ ॥ इत्याग्नेये स्त्रील
 क्षणं ॥ ॥ अग्निरुवाच ॥ ॥ चमरो रुक्मदंडोऽस्य श्रेष्ठो राज्ञः प्रशस्यते ॥ हंसपक्षैर्विरचितं मयूरस्य शुकस्य च ॥ यद्वैवापि
बलाकायानकार्य्यं मिश्रापक्षकैः ॥ चतुरस्रं ब्राह्मणस्य वृत्तं राज्ञश्च शुक्लकं ॥ त्रिचतुःपंचषट्सप्ताष्टवर्गश्च दंडकः ॥
भद्रासनं क्षीरवृक्षैः पंचाशदंगुलोच्छ्रयैः ॥ विस्तारेण त्रिहस्तं स्यात् सुवर्णाद्यैश्च चित्रितं ॥ धनुत्रयं द्रव्यलोहश्रृं
दारु द्विजोत्तमं ॥ ज्याद्रव्यं त्रितयं चैव वंशभंगत्वचस्तथा ॥ दारुचापप्रमाणं तु श्रेष्ठं हस्तचतुष्टयं ॥ तदेव समही
नं तु प्रोक्तं मध्यकनीयसि ॥ मुष्टिग्राहनिमित्तानि मध्ये द्रव्याणि कारयेत् ॥ स्वल्पकोटिस्त्वचा शृंगं शार्ङ्गलोहम
यी द्विजा ॥ कामिनीभ्रूलताकाराः कोटिकाः सुसंयताः ॥ पृथग्वा विप्र मिश्रं वा लोहं शार्ङ्गं तु कारयेत् ॥ शार्ङ्गं सु
सुचितं कार्य्यं रुक्मचित्रविभूषितं ॥ स्फुटं कुटिलं स्फुटितं च सच्छिद्रं च न शस्यते ॥ सुवर्णरजतताम्रं कृष्णायो ध
नुः स्मृतं ॥ माहिषं शारभं शार्ङ्गं रौहिषं वा धनुः स्मृतं ॥ चंदनं वेतसं साल धावनं ककुभं तरुः ॥ शस्तं स्त्रेष्ठं धनुर्वं
शैर्गृहीतैः शरदि यत्नैः ॥ पूजयेत् तु धनुः खड्गमंत्रैस्त्रैलोक्यमोहनैः ॥ अयसश्चाथ वंशस्य शरस्याथ शस्यते ॥ रा
जवो हेमवर्णाभास्नायुःश्लिष्टाः सुपत्रकाः ॥ रुक्मपुंखाः सुपत्राश्च तैलधौताः सुवर्णकाः ॥ पानाया मनिवेकारै

युजेद्बाणधनुर्मुखान् ॥ सपत्नाकास्त्रसंग्राहः बाणासंवत्सरान्नृपाः ॥ ब्रह्मा वै मेरुशिखरे स्वर्गंगातटे यजेत् ॥ लोह
दैत्यं सदृश्यो विघ्नं यज्ञे तु चिंतयत् ॥ तस्य चिंतयतो मध्ये पुरुषो भूद्बली महान् ॥ ववंदे जं च तं देवा अभ्यनंदन्त हर्षि
ताः ॥ तस्मात्तु नंदकः खड्गो देवोक्तो हरिरग्रहीत् ॥ तं जघ्नाह गले देवो विष्णुः कोशः सोऽपि पपात च ॥ खड्गो नीलोरत्नमुष्टि
स्तुतो भूत्शतबाहुकः ॥ दैत्यस्य गदया देवान् द्रावयामास वै रिपोः ॥ विष्णुना खड्गछिन्नानि दैत्यगात्राणि भूतले ॥ प
तितानि तु सम्पूर्णां तं नंदकस्य च तानि हि ॥ लोहभूतानि सर्वाणि हत्वा तस्मै हरिर्वरं ॥ ददौ पवित्रं संगं ते शस्त्रायुधा
यन्वै द्युविः ॥ हरिप्रसादाद् ब्रह्मापि विना विघ्नं हरिं प्रभुं ॥ पूजयामास यज्ञेन वक्ष्ये वो खड्गलक्षणं ॥ खड्गी खड्गरजात
ये दर्शनीयस्तु ते स्मृता ॥ कायमच्छिदस्त्वर्षिकास्युदृढाः शूर्पारकोत्तराः ॥ तीक्ष्णाः छेदसहा वंगास्तीक्ष्णाः स्या स्वाङ्गदे
शजाः ॥ शतानि दृंमि गुलानातु श्रेष्ठं खड्गं प्रकीर्तितं ॥ तदर्द्धं मध्यमं ज्ञेयं ततो हीनं न धारयेत् ॥ दीर्घस्वरमधुरं शब्दं
सखड्गस्य सत्तम ॥ किंकिणीसदृशो यस्य धारणं श्रेष्ठमुच्यते ॥ खड्गपद्मपत्राग्रो मंडलाग्रश्च शस्यते ॥ करवी
रदलाग्रा तो घृतगंधो विपत्प्रभुः ॥ समांजुलस्था शस्तं ते ब्रह्मा खड्गेषु लिंगवत् ॥ काकोलूकसवर्णाश्च वि
षमास्ते न शोभनाः ॥ खड्गे न पश्येद्वदनं तच्छिष्टो न स्पृशेदसिं ॥ मूल्यं जातिं न कथयेत् निशि कुर्यान्न शीर्षके ॥ ॥ इ
त्याग्नेये लक्षणानि ॥ ॥ अग्निरु॰ ॥ ॥ रत्नानां लक्षणं वक्ष्ये रत्नं धार्य्यमिदं नृपैः ॥ वज्रं मरकतं रत्नं पद्मरागं च मोक्तिकं ॥

इन्द्रनीलं महानीलं वैदूर्यं गंधसस्यकं॥ चंद्रकांतं सूर्यकांतं स्फटिकं पुलकं तथा॥ कर्केतनं पुष्परागं तथा ज्योति
रसं द्विज॥ स्फटिकं वारुणं चैव तथा राजमयं शुभं॥ सौगंधिकं तथा गंजं शंखब्रह्ममयं तथा॥ गोमेदं रुधिराक्षं च त
था भल्लातकं द्विज॥ धूली मरकतं चैव तुत्थकं सीसमेव च॥ पीलुप्रवालकं चैव गिरिवज्रं द्विजोत्तम॥ भुजंगममणिं
चैव तथा वज्रमणिं शुभं॥ टिट्टिभं च तथा पिंडं भ्रामरं च तथोत्पलं॥ सुवर्णप्रतिबद्धानि रत्नानि श्रीजयादिके॥
अंतःप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च॥ संधार्याणि न धार्याणि निःप्रभाणि मलिनानि तथा॥ खंडानि सशर्कराणि च प्रश
स्तं वज्रधारणं॥ अंभसि तरति यद्वज्रमभेद्यं विमलं च यत्॥ षट्कोणं शक्रचापाभं लघु चार्कनिभं शुभं॥ शुकपत्रनि
भः स्निग्धः कांतिमान् विमलस्तथा॥ स्वर्णचूर्णनिभैः सूक्ष्मैर्मरकतश्च बिंदुभिः॥ स्फटिकजाः पद्मरागाः स्यू रागवंतो
ति निर्मलाः॥ जातरंगाश्च वल्लीहकरुविंदसमुद्भवाः॥ सौगंधिकाः स्युः काश्यायाः रक्ताः फलास्तु स्फटिकजाः॥ विमलास्ते
च जात्रष्टा ये वै शंखोद्भवा मुने॥ रागदत्ता भवा या स्यात् साकं अस्य करमण्डजाः॥ वेणुनागभवाः कोशा मौक्तिकं मेघजं वरं॥
वृत्तत्वं स्फुरता स्वाच्छत्वं महत्वं मौक्तिके गुणाः॥ इन्द्रनीलं सुभं क्षीरे राजते भ्राजते स्थितं॥ रंजयेत् सुप्रभावेन तन्मूल्यं
विनिर्दिशेत्॥ नीलरक्तं तु वैदूर्यं श्रेष्ठं हारादिकं भवेत्॥॥ इत्याग्नेये रत्नपरीक्षा॥॥ अग्निरुवाच॥॥ वास्तुलक्ष्म प्रव
क्ष्यामि विप्रादीनां च भूरिदं॥ श्वेता रक्ता तथा पीता कृष्णा चैव यथाक्रमं॥ घृतरक्तान्नमद्यानां गंधा वरसतश्च मः॥ राम॰ २३०

मधुरा च कषाया च अम्लाद्युपरसा क्रमात्॥ कुशैः शरैस्तथा काशैर्दूर्वाभिर्यच्च संश्रिता॥ प्रार्च्य विप्रांश्च निःशल्यां
जातपूर्वं तु कल्पयेत्॥ चतुःषष्टिपदं कृत्वा मध्ये ब्रह्म चतुष्पदं॥ प्रोक्तो विष्णुं गृहस्वामी कथितस्तु तथार्यमाः॥ दक्षि
णेन विवस्वांश्च मित्रः पश्चिमतस्तथा॥ उदग्भूधरश्चैव षडाय वन्यो च वक्रिणे॥ सावित्रश्चैव विजितां जयेन्द्रो नैरृत्ये बुधे।
रुद्रव्याधी च वायव्ये पूर्वादौ कोणवात्त हि॥ महेन्द्रश्च रविः सत्यो भृशाः पूर्वेऽथ दक्षिणे॥ गृहक्षतोऽर्यमधृतो गंधर्वश्चा
थ वारुणे॥ पुष्पदंतोऽसुराश्चैव वरुणोपक्षाय च॥ सौम्ये भल्लाटसोम्यो च अदितिर्धनदस्तथा॥ नाग करग्रहश्चैवैशे
शे दिशि दिशि स्मृताः॥ आद्यंतौ तु तयोर्देवौ प्रोक्तावत्र हि ईश्वरौ॥ पर्जन्यः प्रथमो देवो द्वितीयश्च करग्रहः॥ महें
द्र रविसत्याश्च भृशोऽथ गगनं तथा॥ पवनः पूर्वतश्चैव तेऽन्तरीक्ष घनेश्वरौ॥ आग्नेये चाथ नैरृत्ये मृगसुग्रीवको
सुरौ॥ रोगान्तु अश्च वायव्ये दक्षिणे पुष्पवित्तदौ॥ गृहक्षतोऽर्यमदृष्टो गंधर्वो भृंगराजकः॥ आर्यदौवारिसुग्रीवो पुष्पदंतो
सुरो जलं॥ यक्ष्मा रोगश्च नागोपि च उत्तरे नागराजकः॥ मुख्यो भल्लाटनामा शिरोऽथ दितिश्च कुबेरकः॥ मारो ह्यनुताराः श्रेष्ठ
वेश्म कस्य रोचिर्हृताः॥ दक्षे गृहक्षतः पुष्प आप्ये सुग्रीवउत्तमः॥ पुष्पदंतोऽथ दग्धारि भल्लाटः पुष्पदंतकः॥ शि
लेष्टकादिविन्यासं मंत्रैः प्रार्च्य सुरांश्चरेत्॥ नंदे नंदय वासिष्ठे वसुभिः प्रजया सह॥ जये भार्गवदायादे प्रजानां ज
यमावह॥ पूर्णे ऽंगिरसदायादे पूर्णकामं कुरुष्व मां॥ भद्रे काश्यपदायादे कुरु भद्रासनं मम॥ सर्वबीजसमायुक्ते सर्व

अ०पु०
२३१

रक्तौषधैर्हते॥ रुचिरे नंदने देवाव ह्निष्टे रम्यतामिह॥ प्रजापतिसुते देवि च्छत्रस्त्रे महीपतेः॥ सुभगे खुन्ते भद्रे गृहं
कास्यपि रम्यतां॥ पूजिते परमाचार्ये हेठमान्यो रलंकृतौ॥ तन्मूतिकरे देवि गृहे भार्गव रम्यतां॥ अव्यंगे वाग्यते हृ
र्षे मुनेरंगिरसः सुते॥ इष्टके त्वं प्रयच्छेष्टं प्रतिष्ठां कारयाम्यहं॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे॥ मनुष्यधन
हस्त्यश्वपशुवृद्धिकरि भव॥ गृहप्रवेशे पितृया शिलान्यासं समाचरेत॥ उत्तरेण समः पक्षीवटः प्राक्स्यात्द्दादितः
उत्तरस्ववरूपः याम्येन पश्चिमोस्वत्थ उत्तरे मः॥ वामभागे तथोद्यानं कुर्याद्वासगृहे शुभं॥ सायं प्रातः स्वधर्मं तिशीतका
ले दिनान्तरे॥ वर्षारात्रे भुवः शोषे सेक्तव्या रोपिता क्रमात॥ विडंगघृतसंयुक्तान् सेचयेच्छीतवारिणा॥ फलनाशे
कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः॥ घृतशीतपयःसेकं फलपुष्पाय सर्वदा॥ मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः॥
यत्रचूर्णे अविकाजशकृच्चूर्णं तिलानि च॥ गोमांसमुदकं चेति सप्तरात्रं निधापयेत॥ उत्सेकं सर्ववृक्षाणां फलपुष्पादिवृ
द्धिदं॥ मत्स्योदकेन शीतेन आम्राणां सेक इष्यते॥ प्रशस्तं चाप्यशोकानां कामिनीपादताडनं॥ खर्जूरनारिकेलादि
लवणाद्भिर्विवर्धनं॥ विडंगं मत्स्यमांसाद्भिः सर्वेषां दोहदं शुभं॥ ॥ इत्याग्नेये वास्त्वादि॥ ॥ अग्निरुवाच॥ ॥ पुष्पैस्तु
पूजनाद्विष्णुः सर्वकार्येषु सिद्धिदः॥ मालतीमल्लिका यूथी पाटला करवीरकं॥ पावंति रतियुक्तश्च कर्णिकारः कु
ब्जकस्तगरो नीपो बाणो बर्बरकेतकी॥ आग्नेयः कस्तिलकः कुंद इजापि सा तु माल्यलक्ष्म॥ बिल्वपत्रं समीपत्रं भृंग राम: २३१

पुष्पं तु यात्यतु॥ तुलसी कालतुलसीपत्रं वासकमर्च्चने॥ केतकीपत्रपुष्पं च पद्मं रक्तोत्पलादिकं॥ नार्कोन्मत्तकं कां
चीकृजनगिरिमल्लिका॥ कोटजं शाल्मली पुष्पं कंटकारीभवं न हि॥ घृतप्रस्तेन दीपेन श्वसानेसो किरिस्तिकल्पो॥ धाद
केन न राजी स्यार्घ तक्षा रैर्दिवं व्रजेत॥ ॥ इत्याग्निमहापुराणे पुष्पादिपूजाफलं॥ ॥ अग्निरुवाच॥ ॥ चतुष्पादं धनुर्वे
दं वदे पंचविधं द्विज॥ रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्तितं॥ यंत्रमुक्तं पाणिमुक्तं मुक्तसंधारितं तथा॥ अ
मुक्तं बाहुयुद्धं च पंचधा तत्प्रकीर्तितं॥ तत्र शस्त्रास्त्रसंपत्त्या द्विविधं परिकीर्तितं॥ ऋजुमायाविभेदेन भूयो द्विविधमु
च्यते॥ क्षेपणी यास्त्र चपत्राद्यैः यत्रमुक्तं प्रकीर्तितं॥ शिलातोमारयंत्राद्यं पाणिमुक्तं प्रकीर्तितं॥ मुक्तसंधारितं तत्स्या
त्प्रासाद्यमपि यद्भवेत्॥ खड्गादिकममुक्तं च नियुद्धं विगतायुधं॥ कुर्याद्योग्यानि पात्राणि योद्धुमिच्छुर्जितश्रमः॥
धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च॥ तानि खड्गजघन्यानि बाहुप्रत्यवराणि च॥ धनुर्वेदे गुरुर्विप्रः प्रोक्तो
वर्णद्वयस्य च॥ युद्धाधिकारं शूद्रस्स्य स्वयं व्यापदि शिक्षयाः॥ देशस्थैः शंकरै राज्ञः कार्या युद्धे सहायता॥ अंगुष्ठ
गुल्फपाणींघ्रि च स्थिताः सहिता यदि॥ दृष्टं समपदं स्थानमेतल्लक्षणतस्तथा॥ बाह्यांगुलिस्थितौ पादौ स्तब्धजा
नु बलावुभौ॥ त्रिवितस्त्यन्तरास्थानमेतद्वैशाखमुच्यते॥ हंसपंक्त्याकृति समे दृश्येते यत्र जानुनी॥ चतुर्वितस्ति विच्छि
न्ने तदेतन्मंडलं स्मृतं॥ हलाकृतिसमं यत्र स्तब्धजानुरु दक्षिणम्॥ वितस्त्यः पंच विस्तारो तदालीढं प्रकीर्तितं॥ एत

देवविपर्यस्तं भ्रत्यालीढमिति स्मृतं ॥ तिर्यग्भूतो भवेद्वामो दक्षिणोपि भवेदृजुः ॥ गुल्फौ पार्ष्णिस्थितौ चैवं स्थितौ पंचांगु
लांतरौ ॥ स्थानं जातं भवेद्देव द्वादशांगुलमायत ॥ ऋजुजानुर्भवेद्वामो दक्षिणः सुप्रसारितः ॥ अथवा दक्षिणं जानु
कुब्जं भवति निश्चलं ॥ दंडायतो भवेद्देष चरणः सहजात्मना ॥ एवं विकटमुद्दिष्टं द्विहस्तोत्र समायतं ॥ जानुनि क्षिप्रगुणे स्याता
मुत्तानौ चरणावुभौ ॥ अनेन विधियोगेन संपुटं परिकीर्त्तितं ॥ किंचिद्विवर्त्तितौ पादौ समदंडायतौ स्थितौ ॥ दृष्टमे
व यथान्यायं षोडशांगुलमायतं ॥ स्वस्तिकेनात्र कुर्वीत प्रणामं प्रथमं द्विजः ॥ कार्मुकं गृह्य वामेन वामं दक्षिण
केन तु ॥ वैशाखे यदि वा जाते स्थितो वाप्यथवा पते ॥ गुणान्तं तु ततः कृत्वा कार्मुकं प्रेय कार्मुकिः ॥ अधः कोटिं तु धनु
षः फलं देशं तु पत्रिणः ॥ वेदूर्पास्थापयित्वा संस्त्व न पित्वा तथैव च ॥ भुजाभ्यामंत्रयुक्ताभ्यां प्रकोष्ठाभ्यां शुभं व्रतं ॥
यस्य बाणं धनुःश्रेष्ठ प्रत्यं देशे च मंत्रिणः ॥ विन्यासो धनुषश्चैव द्वादशांगुलमंतरं ॥ स्थापावशिष्टकर्त्तव्यो नाति
हीनो न वाधिपः ॥ निवेश्य कार्मुकं नाभ्यां नितंबे शरणं करी ॥ गच्छिपे चक्षिंतिं हस्तमंतरेण क्षिकर्णयोः ॥ पूर्वेण
मुष्टिनाग्राह्यं स्तनाग्रे दक्षिणे शरः ॥ हरणं तु ततः कृत्वा शीघ्रं पूर्वं प्रसारयेत् ॥ नातं घरा नैव वा क्षं घ्रानोर्ध्व कान
धकातपा ॥ न चक्रुत्रा न वैन्नरा न वलानानि वेष्टिता ॥ समास्थपर्णगुणोपेता पूर्वा दंडमिव स्थिता ॥ छादयित्वा त
तो लक्षं पूर्वेणानेन मुष्टिना ॥ उरसा तुच्छितो पत्वात्रिकोणविनतः स्थितः ॥ पस्त्रांगो निश्चलग्रीवो मयूरा चेतम	राम॰
२३२

स्तकः ॥ ललाटनासावक्त्रांसाकुर्परास्युः समं भवेत् ॥ अत्र रतं गुलं ज्ञेयं चिबुकं स्मात्कस्य च ॥ प्रथमं तु मुष्टं विद्यात् द्वि
तीयं घं गुलं स्मृतं ॥ तृतीयां ग्रुलमुद्दिष्टमापतं चिबुकांश्रयो ॥ गृहीत्वा सायकं पुंखात् तर्जन्यांगुष्ठकेन तु ॥ अना
मपात घाग त्युत पम पार्थिव ॥ तावदाकर्षयेद्वेगाद्यावद्बाणः सुपूरितः ॥ एवं धर्विंन्तुपक्रम्यमोक्षत्य विधिवत् स्वगं ॥
दृष्टिमुष्टिहतं लक्षं भित्वा बाणेन सुव्रता ॥ मुक्तान्तु पश्चिमं हस्तं क्षेपतद्वेगेन प्रष्टतः ॥ एतदुच्छेदमिच्छंति ज्ञातव्य
ह्रित्वया द्विज ॥ कूर्परीतं दधः कार्य्यमाकृष्य तत्र धनुष्मतः ॥ उक्तं विमुक्तके कार्य्यम क्षास्त्रिशासमध्यम ॥ ज्येष्ठ प्र
त्हृष्टं विज्ञेय धनुष्पस्त्रविशारदः ॥ ज्येष्ठस्तु स्यात् पको हि यो भवेद्द्वादशमुष्टयः ॥ एकादश तथा मध्यः कनीयान्द
शमुष्टयः ॥ चतुर्हस्तं धनुःश्रेष्ठं त्रयः सार्द्धं तु मध्यमं ॥ कनीयस्तु त्रयः प्रोक्तं नित्यमेव पदातिनः ॥ अश्वे रथे गजे
ज्येष्ठं तदेव परिकीर्त्तितं ॥ ॥ इत्याग्नि पुराणे धनुर्वेदे ॥ ॥ अग्निरुवाच ॥ ॥ हूर्णपित्रं द्विजः कृत्वा ततो मांसे र्ग्गतायु
षां ॥ सुनिधौतं धनुः कृत्वा यज्ञभूमौ विधानवित् ॥ ततो बाणं समादाय दंसितः सुसमाहितः ॥ तूणामासाद्य बध्नी
यात् दृढां कक्षास्य दक्षिणं ॥ विलक्षं भपितधा यंतश्चैव सुसंस्थितं ॥ ततः समुद्धरेद्बाणं तूणां दक्षिणपाणिना ॥ ॥
तेनैव सहितं मध्ये शरं संगृह्य चापि वेत् ॥ वामहस्तेन वै कक्षं धनुस्तस्मात् समुद्धरेत् ॥ अविषण्णमभिर्नूत्वा गुणे
पुंखे निवेशयेत् ॥ संपीड्य सिंहकर्णेन पुंखेनापि समेदृढा ॥ वामकर्णोपविष्टं च फलं वाम स धारयेत् ॥ व स्स

अ॰पु॰ मध्यमया तर्ज्जन्या मोक्षं वा धारयेत्॥ मनो लक्ष्यगतं कृत्वा मुष्टिना वा विधानवित्। दक्षिणेनोन्नमावेतु कृत्वा वर्ण्म
२३३ न्निमोक्षयेत्॥ ललाटपुटसंस्थानं दंडं लक्ष्ये निवेशयेत्॥ आकृष्य ताडयेत्तत्र चन्द्रकं षोडशांगुलं॥ मुक्त्वा बाणं ततः प
श्चादुत्कृष्टशिक्षयस्तदा तथा॥ निग्रहीयान्मध्यमया ततोङ्गुल्या पुनः पुनः॥ अक्षिलक्ष्यं क्षिपेत्तूर्णं चतुरस्रं च दक्षिणे।
चतुरस्रं च दक्षिणं॥ चतुरस्रगतं वेध्यमभ्यसेन्न्यादितः स्थितिः॥ तस्मादनन्तरं तीक्ष्णं पराहततरां तं चयेत्॥ निम्नमुन्नतवेध्यं
च अभ्यसेत्क्षिप्रकं स्वरः॥ वेध्यस्थानेष्वथैतेषु सत्वपुच्छाङ्कनं कुः॥ हस्तावापशतैश्चित्रैस्तर्जयेद्दुस्तरैरपि॥ तस्मिन्ने प
गतो विप्र अवध्यो हृदसंज्ञयो। द्विविद्धे दुष्करे विद्धे न तथा चित्रदुष्करे। न तु न मंचे तिर्य्यक्श्च वर्द्धं विध्येत्प्रकीर्त्तितं॥ निम्नं
दुष्करस्तु द्विष्टं वेध्यमूर्द्धगतं चयेत्॥ जंभकासनमध्ये तु चित्रदुष्करसंज्ञकं। एवं वेध्यगणं कृत्वा दक्षिणेनेतरेण
च॥ आरोहेत्सपमं वीरो जितलक्ष्यस्ततो नरः॥ एष एव विधिः प्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः॥ अधिकं भ्रमणं तस्य
तस्माद्विघात्वन्वाक्षितं। लक्ष्यं संयोजयेत्तत्र पत्रिपत्रगतं दृढं॥ भ्रान्तं प्रचलितं चैव स्थिरं यच्च भवेदिति॥ समन्तात्तज
येद्भिद्याच्छेदयेद्व्यथयेदपि॥ कर्मयोगविधानज्ञो ज्ञात्वैवं विधिमाचरेत्। मनसा चक्षुषा दृष्ट्या योगशिक्षुपसंजयेत्॥
इत्याग्नेयपुराणे धनुर्वेदे॥ ॥अग्निरुवाच॥ ॥ जितहस्तो जितमतिर्जितदृग्लक्ष्यसाधकः॥ नियतां सिद्धिमास्थाय तत
तो वाहनमारुहेत्॥ देशहस्तो भवेत्पाशो वृत्तः करमुखस्तथा॥ गणकार्पाससुञ्जानां नामकालायुधकर्म्मणां॥ अ

न्येषां सुदृढानां च सुकृतं परिवेष्टितं॥ तथा त्रिंशत्समं प्राज्ञो वृत्तं कुर्यात्तु वर्त्तितं॥ कर्त्तव्यं शिक्षकैः स्थानं कक्षासु वै
तदा॥ वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः॥ कुंडलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि॥ क्षिपेत्तृणमये तूर्णं पु
रुषे चर्म्मवेष्टिते॥ वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च॥ समायोगविधिं कृत्वा प्रयुंजीत सुशिक्षितं॥ विजित्वा तु यथा
न्यायं ततो बंधनमाचरेत्। कट्यां बध्वा ततः खड्गं वामपार्श्वावलंबिते॥ दृढं विगृह्य वामेन निष्कर्षेद्दक्षिणेन तु॥ ष
डंगुलपरीणाहं सप्तहस्तसमुच्छ्रितं॥ अयोमयाः शलाकाश्च चर्म्माणि विविधानि च॥ अर्द्धहस्ते समे चैव तिर्य्य
गूर्द्ध्वमधस्तथा॥ क्रोधयेद्विधिना येन तथा त्वं गदतः शृणु॥ तत्तु चर्म्म विनश्यांगे स्थापयित्वा नरं दृढं॥ विषयद
पलगुडं दक्षिणां गुल्मकारकं॥ उदग्रघातयेद्यस्तु नागस्तेन शिरो दृढं॥ उभाभ्यामथ हस्ताभ्यां कुर्यात्तस्य निपा
तनं॥ अंकुशेन ततः कुर्यान्नित्यं सिद्धिः प्रकीर्त्तिता॥ वाहनानां श्रमकरणं प्रकाराद्ध्युपरात्तवः॥ ॥ अग्निरुवाच।
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं स्मृतं॥ सम्पातं समुदीशं च श्येनपातमथाकुलं॥ उद्धूतमवधूतं च सव्यं दक्षि
णमेव च॥ अनालक्षितविस्फोटौ करालेन्द्रमहासखौ॥ विकरालनिपातौ च विभीषणभयानकौ॥ समग्रार्द्धतृती राम.
यांगपादार्द्धवारिजाः॥ प्रत्यालीढमथालीढं वराहं लुलितं तथा॥ इति द्वात्रिंशतो ज्ञेयाः खड्गधर्म्मविधौ रणे॥ २३३
परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितं॥ ऊर्द्ध्वक्षिप्तमधःक्षिप्तं संधारितविधारितं॥ श्येनपातं गजपातं ग्राहग्राह्यं

अ०पु० तथैव च ॥ एवमेकादशविधा खेपादीनां विधारणा ॥ रज्वायतं विशालं च तिर्य्यग्भ्रामितमेव च ॥ पंचकर्म्म विनिर्दि
२३४ ष्टं व्यस्तं पाशे महात्मभिः ॥ छेदनं भेदनं पातो भ्रमणं गमनं तथा ॥ विकर्त्तनं कर्त्तनं च चक्रे कर्मेदमेव च ॥ आस्फोटः
क्ष्वेदनी भेदस्त्रासो न्दोलितकस्तथा ॥ शूलकर्म्माणि जानीहि पंचमाद्यांत संक्षितं ॥ दृष्टिघातं भुजाघातं पार्श्वेघातं
द्विजोत्तमा ॥ ऋजुपक्षेद्यमापातं तोमरस्य प्रकीर्त्तितं ॥ आहतं विप्रगोमूत्रं तत्र चक्रमलां च तां ॥ ततोर्द्धगात्रनमि
तं वाम दक्षिणमेव च ॥ आहतं च पराहत्तं पादोद्धृतमवप्लुतं ॥ हंसमार्गं विमार्गं च गदाकर्म्म प्रकीर्त्तितं ॥ करालम
वघातं च दंशनोपप्लवमेव च ॥ क्षिप्रहस्तस्थितं शून्यं परशोस्तु विनिर्दिशेत् ॥ ताडनं छेदनं विप्र तथा चूर्णनमेव च ॥
मुद्गरस्य तु कर्माणि तथा तपनघातनं ॥ संघातमथ विक्रांतं गोविसर्गस्तुडभ्रवं ॥ भिंदिपालस्य कर्माणि लगुड
स्य विडान्यपि ॥ अन्यं मध्यं पराहत्तं निर्दिशान्तं द्विजोत्तमान् ॥ वज्रस्यैतानि कर्म्माणि पट्टिशस्य च तान्यपि ॥ तरणाछे
दनं घातो भेदनं रक्षणं यथा ॥ कृपाणकर्म्म निर्दिष्टं पातनं स्फोटनं तथा ॥ त्रासनं रक्षणं घातो बलोद्धरणमाप
तं ॥ क्षेपणीकर्म्म निर्दिष्टं यंत्रकर्म्मैतदेव तु ॥ संत्यागमवदेशं च वराहोद्धृतकं तथा ॥ हस्तावहस्तपालीनमेकह राम०
स्तावहस्तके ॥ द्विहस्तबाहुपाशे च कटिरेचितकोद्गते ॥ उरोललाटघाते च भुजाविधमनं तथा ॥ कराद्धृतविम २३४
नं च पादाहतिविपादिकं ॥ गात्रसंश्लेषणं कांतं तथा गात्रविपर्ययं ॥ ऊर्ध्वप्रहारं घातं च गोमूत्रं सव्यदक्षिणे ॥ पा

दपं तारकं गंडं कवरीबंधमाकुलं ॥ तिर्य्यग्बंधमपामार्गं भीममवेगं सुदर्शनं ॥ सिंहाक्रांतं गजाक्रांतं गर्द्दभाक्रांतमेव
च ॥ गदाकर्म्माणि जानीयान्नियुद्धस्याथ कर्म्म च ॥ आकर्षणं विकर्षणं बाहूनामनमेव च ॥ ग्रीवाविपरिवर्त्तं च पृष्ठभं
गं सुदारुणं ॥ पायासनविपर्यासौ पशुमारमजाविकं ॥ पादप्रहारमास्फोटं कटिरेचितकं तथा ॥ गात्राश्लेषं स्कंधग
तं महीव्याजनमेव च ॥ उरोललाटघातं च विस्पष्टकरणं तथा ॥ उद्धृतमवधूतं च तिर्य्यग्मार्गगतं तथा ॥ गजस्कंध
मवक्षेपं सवाङ्गुरवकमेव च ॥ देवमार्गमधोमार्गममार्गगमनाकुलं ॥ यष्टिघातमवक्षेपो वसुधाहरणं तथा ॥
जानुबंधं भुजाबंधं गात्रबंधं सुदारुणं ॥ विपृष्ठं सोदरं श्वस्त्रं भुजावेष्टितमेव च ॥ मंत्रदैवं पुरोगाव्यं सन्नाहेनैगजा
दिभिः ॥ वरांगं शबरीचापौ एकोश्वो वागतोपरः ॥ स्कंदगा हौ च धाष्ठकौ द्वौ च खड्गधरो गजे ॥ रथे रथे गजे वापि तुरंग
णां त्रयं भवेत् ॥ धानुष्काणां च संप्रोक्तं रक्षायै तु रणस्य च ॥ धन्विनो रक्षणायापि धर्मिणं तु नियोजयेत् ॥ असंत्रैः शास्त्र
मप्यस्त्रशास्त्रैलोकसमोहनं ॥ यो युद्धे याति सज्जयेवरीतं पराजयेद्ध्रुवं ॥ ॥ अग्निपुराणे धनुर्वेदः ॥ ॥ अग्निरुवाच ॥
व्यवहारं प्रवक्ष्यामि नयानयविवेकदं ॥ चतुष्पाच्चतुःस्थानं चित्रैः साधनमुच्यते ॥ धनुर्हेतुश्च तत्र पि च तत्र कारी च की
र्तितः ॥ अष्टांशो द्वादशपदः शततशाखस्तथैव च ॥ त्रियोनिस्त्रिभियोगश्च द्विद्वारो द्विगतिस्तथा ॥ धर्मश्च व्यवहारश्च चरि
त्रं राजशासनं ॥ चतुष्पाद्व्यवहाराणामुत्तरः पूर्वसाधकः ॥ तत्र संवेष्टितो धर्मो व्यवहारस्तु साक्षिषु ॥ चरित्रं संग्रहे पुंसां

अ॰पु॰ राजाज्ञायातु दुर्गसनो॥ सामाद्युपायसाध्यत्वाच्चतुःसाधन उच्यते॥ चतुर्णामाश्रमाणां च रक्षणाच्चतुर्हितः॥ कर्त्तॄनथो साक्षि
२३५ णश्चैव सभ्यान्राजानमेव च॥ व्याप्नोति पादगो यस्माच्चतुर्व्यापी ततः स्मृतः॥ धर्मस्यार्थस्य यशसो लोकपंक्तेस्तथैव च॥
चतुर्णां करणादेव चतुष्कारी प्रकीर्त्तितः॥ राजा सपुरुषः सभ्याः शास्त्रं गणकलेखकौ॥ हिरण्यमग्निरुदकमष्टांगः
समुदाहृतः॥ कामात्क्रोधाच्च लोभाद्वा त्रिभ्यो यस्मात्प्रवर्त्तते॥ त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत्॥ अभियो
गस्तु विज्ञेयः शंकातत्वाभियोगतः॥ शंका सतां तु संसर्गात्तत्वं होढादिदर्शनात्॥ पक्षद्वयाभिसंबंधाद्द्विधारस
मुदाहृतः॥ पूर्ववादस्तयोः पक्षः प्रतिपक्षस्त्वनंतरः॥ भूतछलानुसारित्वाद्द्विगतिः समुदाहृतः॥ ऋणं देयमदेयं वा ये
न यत्र यथा चरेत्॥ दानग्रहणधर्मश्च ऋणादानमिति स्मृतं॥ सद्रव्यं चत्र विश्रंभान्निक्षिप्तेश्च विसंगितं॥ निक्षिप्तं ने
मतच्चोक्तं व्यवहारपदं बुधैः॥ वणिक्प्रभृतयो यत्र कर्म संभूय कुर्वते॥ तत्संभूयसमुत्थानं व्यवहारपदं विदुः॥ दत्त्वा
द्रव्यमसम्यक् यः पुनरादातुमिच्छति॥ दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतं॥ अभ्युपेत्य च शुश्रूषां यस्तां न प्रति
पंचते॥ अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते॥ क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते॥ क्रीत्वा मूल्येन यः
पुण्यं दुःक्रीतं मन्यते क्रये॥ पाषंडनैगमादीनां स्थितिः समय उच्यते॥ समयस्यानपाकर्म तद्विवादपदं स्मृतं॥ से राम॰
तुकेदारमर्यादा॥ विकृष्टाकृष्टनिश्चया॥ क्षेत्राधिकारे यत्र स्युर्विवादः क्षेत्रजस्तु सः॥ वैवाहिको विधिः स्त्रीणां यत्र २३५

पुंसां च कीर्त्तितः॥ स्त्रीपुंसयोगसंज्ञं तु तद्विवादपदं स्मृतं॥ विभागोर्थस्य पैत्र्यस्य पुत्रैर्यत्र प्रकल्प्यते॥ दायभागमिति
प्रोक्तं विवादपदमुच्यते॥ दराजातिकुजादीनामाक्रोशव्यंगसंयुतं॥ यद्वच प्रतिलोमार्थं च वाक्पारुष्यं तदुच्यते॥ परगात्रेष्वभि
द्रोहो हस्तपादायुधादिभिः॥ भस्मादिभिस्तापघातैर्दंडपारुष्यमुच्यते॥ अक्षवध्रशलाकाद्यैर्देवनं द्यूतमुच्यते॥ पणक्रीडा
वयोभिश्च प्राणिद्यूतं समाह्वयः॥ प्रकीर्णकः पुनर्ज्ञेयो व्यवहारो निराश्रयः॥ राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा॥
व्यवहारोष्टादशकः एषां भेदोथ वैशतं॥ क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते॥ व्यवहारान्नृपः पश्येत्तज्ञानि वि
प्रैरकोपनः॥ शत्रुमित्रसमाः सभ्याश्चलोभाः श्रुतिवेदिनः॥ अपश्यता कार्यवशात्सभ्यैर्विप्रं नियोजयेत्॥ रागाल्लोभाद्भया
द्वापि स्मृत्यपेतादिकारिणः॥ सभ्याः पृथक्पृथग्दंड्या विवादाद्द्विगुणं दमं॥ स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः॥ आवे
दयति चेद्राज्ञे व्यवहारपदं हि तत्॥ प्रत्यर्थिनोग्रतो लेख्यं यथावेदितमर्थिना॥ समामासतदर्द्धाहर्नामजात्यादिचिह्नि
तं॥ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ॥ ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं॥ तत्सिद्धौ सिद्धिमाप्नोति विपरी
तमतोन्यथा॥ चतुष्पाद्व्यवहारोयं विवादेषूपदर्शितः॥ अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्॥ अभियुक्तं च
नान्येन नोक्तं विप्रकृतिं नयेत्॥ कुर्यात्प्रत्यभियोगं तु कलहे साहसेषु च॥ उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनि
र्णये॥ भागविभावितो दद्याद्धनं राज्ञे तु तत्समं॥ मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥ साहसस्तेयपारुष्य

ऽयो भिसाषाद्यपेक्षिया ॥ विचारयेत्तद्घृएवकालोन्यत्र छयास्मृतः ॥ देशाद्देशांतरं याति सृक्कर्णीपरिलीढितं ॥ ललाटं स्वि
द्यतं चास्यमुखं वैवर्ण्यमेव च ॥ स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्म्मभिः ॥ अभियोगे यवा साक्ष्ये वाग्दुष्टः स परिकीर्त्तितः ॥
संदिग्धार्थं स्वतंत्रो यः साधयेद्यश्च निष्पते ॥ न चाहूतो वदेत्किंचिद्धीनो दंड्यश्च स स्मृतः ॥ साक्षिषूभयतः सत्सु साक्षि
णः पूर्ववादिनः ॥ पूर्वपक्षेधरीभूते भवंत्युत्तरवादिनः ॥ सपणश्चेद्विवादः स्यात्तत्र हीनंतु दापयेत् ॥ दंडं च स्वपणं चैव
धनिधनेधनमेव च ॥ छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ॥ भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ निन्हुते लिखितो नै
कमेकदेशविभावितं ॥ दाप्यः सर्वान्नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥ स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ॥ अर्थ
शास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितः ॥ एषामन्यतमाभावे दिव्यान्यत
ममुच्यते ॥ सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥ पश्यतोब्रुवतो भूमेर्हानि
र्विंशतिवार्षिकी ॥ परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ आधिसीमोपनिक्षेपजडबालधनैर्विना ॥ तथोपनि
धिराजस्त्रीश्रोत्रियाणां धनैरपि ॥ आध्यादीनां विहर्त्तारं धनिने दापयेद्धनं ॥ दंडं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा ॥ राम.
आगमोप्यधिको भोगाद्विना पूर्वक्रमागतान् ॥ आगमोपि बलान्नैव भुक्तिस्तोकापि यत्र नो ॥ आगमेन विशुद्धेन भोगो २३६
याति प्रमाणतां ॥ अविशुद्धागमो भोगः प्रामाण्यं नाधिगच्छति ॥ आगमस्तु कृतो येन सोभियुक्तस्तमुद्धरेत् ॥ न तत्सुतस्त

त्सुतो वा भुक्तिस्तत्र गरीयसी ॥ योभियुक्तः परेतस्स्यात्तस्य रिक्थी तमुद्धरेत् ॥ न तत्र कारणं भुक्तिरागमेन विना कृता ॥ बलोप
धिविनाकृतान्व्यवहारान्निवर्त्तयेत् ॥ स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा ॥ मत्तोन्मत्तार्त्तव्यसनिबालभीतप्रयोजि
तः ॥ असंबद्धकृतश्चैव व्यवहारो न सिध्यति ॥ प्रणष्टाधिगतं देयं नृपेण धनिने धनं ॥ विभावयेन्न चेल्लिंगैस्तत्समं दं
डमर्हति ॥ देयं चौरहृतं द्रव्यं राज्ञा जानपदस्य तु ॥ अशीतिभागो वृद्धेः स्यान्मासि मासि सबंधके ॥ वर्णक्रमाच्छतं द्वित्रि
चतुःपंचकमन्यथा ॥ संततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ॥ वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा तथा ॥ प्रा
मोत्तरात्तु हरकं साप्नुयादपि विंशति ॥ दधुर्वास्वकृताद्दृष्टिं सर्वे सवर्णासु जातिषु ॥ प्रपन्नं साधयन्नर्थं न वाच्यो न
पतिर्भवेत् ॥ साध्यमानो नृपं गच्छेद्दंड्यो दाप्यश्च तद्धनं ॥ अनेन विधिना राज्ञो व्यवहारो न सिध्यति ॥ ॥ इत्याग्नेये पुरा
णे व्यवहारो ॥ ॥ अग्नि रु० ॥ ॥ गृहीतार्थं क्रमाद्दाप्यो धनिनामधमर्णिकः ॥ दत्वा तु ब्राह्मणायैव नृपतेस्तदनंतरं ॥
राज्ञा धमर्णिको दाप्यः साधिताद्दशकं शतं ॥ पंचकं च शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥ हीनजातिं परि
क्षीणमृणार्थं कर्म्म कारयेत् ॥ ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं ॥ दीयमानं न गृह्णाति प्रयुक्तं यः स्व
कं धनं ॥ मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परं ॥ रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च ॥ पुत्रोनन्याश्रि
तद्रव्यः पुत्रहीनस्य रिक्थिनः ॥ अविभक्तैः कुटुंबार्थे यदृणं तु कृतं भवेत् ॥ दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कु

अ०पु० दृदिति॥ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता॥ दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा॥ गोपशौण्डिकशैलूषरज
२३१ कव्याधयोषितां॥ ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं॥ स्वयं कृतं वा य
त दृणं नान्यत्स्त्री दातुमर्हति॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेपि वा॥ पुत्रपौत्रैर्ऋणं देयं निह्नुते साक्षिभावितं॥ सुराकाम
द्यूतकृतं दंडशुल्कावशिष्टकं॥ वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं॥ भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि॥ प्राति
भाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतं॥ दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते॥ आद्यौ तु वितथे दाप्यौ वितरस्य सुता
अपि॥ दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा॥ न तत्पुत्रा धनं दद्याद्दानाय समुपस्थित॥ बहवः स्युर्यदि स्वां
शैः दद्युः प्रतिभुवो धनं॥ एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचिः॥ प्रतिभूर्दापितो यत्र प्रकाशं धनिने धनं॥
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्॥ संततिः स्त्री पशुष्वेव धान्यं त्रिगुणमेव च॥ वस्त्रं चतुर्गुणं प्रोक्तं र
सश्चाष्टगुणस्तथा॥ आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते॥ काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥
गोप्याधिर्भोगे नो वृद्धिः सोपकारे विनाश्यते॥ नष्टो देयो विनष्टश्च दैवराजकृतादृते॥ आधिः स्वीकरणात्सिद्धि
रक्ष्यमाणोप्यसारतां॥ यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ चारित्रं बंधनं त्रयं सवृद्धं दापयेद्धनं॥ सत्यंकारकृतं राम
द्रव्यं द्विगुणं प्रतिदापयेत्॥ उपस्थितस्य मोक्तव्य आधिर्दंडोन्यथा भवेत्॥ प्रयोजके सति धनं कुलेन्यस्याधिमाप्नुयात्। २३१

तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः॥ विना धारणकाद्वापि विक्रीणीत ससाक्षिकं॥ यदा तु द्विगुणीभूतमृणमाधौ
तदा खलु॥ मोक्ष्यश्चाधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने॥ वासनस्थमनाख्याय हस्तेन्यस्य यदर्प्यते॥ द्रव्यं तदौपनिधि
कं प्रतिदेयं तथैव च॥ न दाप्योपहृतं तत्तु राजदैविकतस्करैः॥ भ्रेषश्चेन्मार्गितेदत्ते दाप्यो दंडश्च तत्समं॥ आजीवन्स्वे
च्छया दंड्यो दाप्यस्तं चापि सोदयं॥ याचितान्वाहितं न्यासो निक्षेपेष्वप्ययं विधिः॥॥ इत्यग्निपुराणे व्यवहारे॥॥ अग्निरुवा
च॥ तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः॥ धर्मप्रधाना ऋजवः पुत्रवंतो धनान्विताः॥ पंचयज्ञक्रियायुक्ताः सा
क्षिणः पंच वा त्रयः॥ पंचजातिषु वा वर्णाः सर्वे सर्वेषु वा स्मृताः॥ स्त्रीवृद्धबालकितवमत्तोन्मत्ताभिशस्तकाः॥ रंगावता
रिपाखंडिकूटकृद्विकलेंद्रियाः॥ पतिताप्तार्थसंबंधिसहायरिपुतस्कराः॥ असाक्षिणः सर्वसाक्षी चौर्यपारुष्यसाह
से॥ उभयानुमतः साक्षी भवत्येकोपि धर्मवित्॥ अब्रुवन्हि नरः साक्ष्यमृणं सदशबंधकं॥ राज्ञा सर्वं प्रदाप्यः स्यात्
षट्चत्वारिंशकेहनि॥ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः॥ स कूटसाक्षिणां पापैस्तुल्यो दंडेन चैव हि॥ साक्षिणः
श्रावयेद्वादिप्रतिवादिसमीपगान्॥ ये पातककृतां लोका महापातकिनां तथा॥ अग्निदानां च ये लोका ये च स्त्रीबाल
घातिनां॥ तान्सर्वान्समवाप्नोति यः साक्ष्यमनृतं वदेत्॥ सुकृतं यत्त्वया किंचिज्जन्मांतरशतैः कृतं॥ तत्सर्वं तस्य
जानीहि यं पराजयसे मृषा॥ द्वैधे बहूनां वचनं समेषु गुणिनां तथा॥ गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः॥ यस्यो

बुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्॥अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः॥उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये
गुणवत्तराः॥द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः॥पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा॥विवा
दाद्द्विगुणं द्रव्यं विवास्यो ब्राह्मणः स्मृतः॥यः साक्ष्यं श्रावितोन्येभ्यो निह्नुते तत्तमोवृतः॥स दाप्योष्टगुणं दंडं ब्राह्मण
स्तु विवासयेत्॥वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्॥यः कश्चिदर्थोभिमतः स्वरुच्या तु परस्परं॥लेख्यं तु
साक्षिमत्कार्यं तस्मिन्धनिकपूर्वकं॥समामासतदर्धाहर्नामजातिस्वगोत्रकैः॥सब्रह्मचारिकात्मीयपितृनाम
च चिह्नितं॥समाप्तेर्थे ऋणी नाम स्वहस्तेन निवेशयेत्॥मतं मेमुकपुत्रस्य यदत्रोपरि लेखितं॥साक्षिणश्च स्वह
स्तेन पितृनामकपूर्वकं॥अत्राहममुकः साक्षी लिखेयुरिति ते समाः॥अलिपिज्ञ ऋणी यः स्याल्लेखयेत्स्वमतं तु सः॥सा
क्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः॥उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना॥लिखितं ह्यमुकेनेति लेखको
प्यंततो लिखेत्॥विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्॥तत्प्रमाणं स्मृतं सर्वं बलोपधिकृतादृते॥ऋणं लेख्यकृ
तं देयं पुरुषैस्त्रिभिरेव तु॥आधिस्तु भुज्यते यावत्तावत्तेन प्रदीयते॥देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा॥भिन्ने छि
न्ने तथा दग्धे लेख्यमन्यत्तु कारयेत्॥संदिग्धार्थविशुद्ध्यर्थं स्वहस्तलिखितं च यत्॥युक्तिप्राप्तिक्रियाचिह्नसंबंधाग
महेतुभिः॥लेख्यस्य पृष्ठेभिलिखेत्प्रविश्य मधमर्णिकः॥धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितं॥दत्त्वर्णं पाटयेल्लेख्यं

शुद्ध्यै वान्यत्तु कारयेत्॥साक्षिमच्च भवेद्यत्तु तद्दातव्यं ससाक्षिकं॥तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये॥म
हाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरि॥रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छिरः॥विनापि शीर्षकात्कुर्यान्नृप
द्रोहे सपातके॥नासहस्राद्धरेत्फालं न तुलां न विषं तथा॥नृपार्थेष्वभियोगेषु वहेयुः शुचयः सदा॥सहस्रार्धे
तुलादीनि कोशमल्पेपि दापयेत्॥शतार्धं दापयेच्छुद्धमशुद्धो दंडभाग्भवेत्॥सचैलस्नातमाहूय सूर्योदय उपो
षितं॥कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ॥तुला स्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां॥अग्निर्जलं वा शूद्रस्य
यवाः सप्त विषस्य च॥तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः॥प्रतिमानसमीभूतो रेखां कृत्वावतारितः॥आदि
त्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च॥अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तं॥त्वं
तुले सत्यधामासि पुरा देवैर्विनिर्मिता॥तत्सत्यं वद कल्याणि संशयान्मां विमोचय॥यद्यस्मि पापकृन्मातस्ततो
मां त्वमधो नय॥शुचिश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेत्॥करौ विमृदितव्रीहीँल्लक्षयित्वा ततो न्यसेत्॥सप्ताश्व
त्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत्॥त्वमग्ने सर्वभूतानामंतश्चरसि पावक॥साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं क
वे मम॥सप्तमादाय सप्तैव मंडलानि शनैर्व्रजेत्॥षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं॥मुक्ताग्निं मृदितव्रीहिरदग्धः
शुद्धिमाप्नुयात्॥अंतरा पतिते पिंडे संदेहे वा पुनर्हरेत्॥पवित्राणां पवित्र त्वं शोध्यं शोधय पावन॥सत्येन माभि

अ॰ पु॰ प्राप्य कं॥ नाभिदघ्नेदकस्तस्मगृहीत्वारूजलं विशेत्॥ समकालमिषुं मुक्तमासाद्याघो जवी नरः॥ गते तस्मिन्निम
२३९ ज्जांगं पश्येच्चेच्छुद्धिमाप्नुयात्॥ त्वं विश ब्रह्मणः पुत्र सत्यधर्मेव्यवस्थितः॥ त्रायस्वास्माद्भीशापाग्नस्तेन भवेमे मृतं॥
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्विजशैलजं॥ यस्य वेगो विनाजीर्णस्तं शुद्धितस्याविनिर्दिशेत्॥ देवानुग्रान्समभ्यर्च्य तत्स्नानोद
कमाहरेत्॥ संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयं॥ आचतुर्दशकादाह्नो यस्य नो राजदैविकं॥ व्यसनं जायते
घोरं स शुद्धः स्यादसंशयं॥ सत्यवाहनशस्त्राणि गोबीजकनकानि च॥ देवतागुरुपादांश्च इष्टापूर्तकृतानि च
इत्येते सुकराः प्रोक्ताः शपथाः स्वल्पसंशये॥ ॥इत्याग्नेयपुराणे दिव्यादिप्रसंगः॥ ॥अग्निरुवाच॥ ॥ विभागं चे
त्पिता कुर्यादिच्छया विभजेत्सुतान्॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥ यदि दद्यात्समानंशान्कार्याः पत्न्यः
समांशकाः॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥ शक्तस्यानीहमानस्य किंचिद्दत्त्वा पृथक्क्रिया॥ न्यूनाधिकविभ
क्तानादेयः पितृकृतः॥ विभजेयुः सुताः पित्रोरूर्ध्वं रिक्थमृणं समं॥ मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः॥ पितृद्रव्य
विनाशेन यदन्यत्स्वयमर्जितं॥ मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्॥ सामान्यार्थसमुत्थाने विभागस्तु समः राम॰
स्मृतः॥ अनेकपितृकाणां तु पितृतो भागकल्पना॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा॥ तत्र स्यात्सदृशं स्वाम्यं २३९
पितुः पुत्रस्य चोभयोः॥ विभक्तेषु सुतो जातः सवर्णायां विभागभाक्॥ दृश्याद्वा तद्विभागः स्यादायव्ययविशोधि

तात्॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव
धनं भवेत्॥ पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत्॥ असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥ भगिन्यश्च निजा
दंशाद्दत्त्वांशं तु तुरीयकं॥ चतुस्त्रिद्व्येकभागीनो वरणगो ब्राह्मणात्मजः॥ क्षपुत्रजाद्विवेकानां विडास्तु द्व्येकभागि
नः॥ अन्योन्यापहृतं द्रव्यं विभक्तैर्यत्तु दृश्यते॥ तत्पुनस्ते समैरंशैर्विभजेरन्व्यवस्थितः॥ अपुत्रेण परक्षेत्रे नियोध
त्पादितः सुतः॥ उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः॥ औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः॥ क्षेत्रजः क्षे
त्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः॥ कानीनः कन्यकाजातो मातामहसुतो म
तः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः॥ दद्यान्माता पिता वापि स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्रीतः
कृत्रिमः स्यात्स्वयं कृतः॥ दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः॥ उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः॥ पिंड
दोंशहरश्चैषां पूर्वाभावे परः परः॥ सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥ जातोपि दास्यां शूद्रस्य कामतोंश
हरो भवेत्॥ मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकं॥ अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्दृते॥ पत्नी दुहितरश्चैव
पितरौ भ्रातरस्तथा॥ तत्सुतो गोत्रजो बंधुः शिष्यः सब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः॥ स्वर्या
तस्य त्वपुत्रस्य सर्ववर्णेष्वयं विधिः॥ वानप्रस्थयतिब्रह्मचारिणः रिक्थभागिनः॥ क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रे

वतीपिनिः॥संसृष्टिमस्तुसंसृष्टीसोदरस्यतुसोदरः॥दद्याच्चापहरेच्चांशंजातस्यचमृतस्यच॥अन्योदर्यस्तुसंसृष्टीना
न्योदर्योधनंहरेत्॥असंसृष्ट्यापिचादद्यात्सोदर्योनान्यमातृजः॥पतितस्तत्सुतःक्लीबपङ्गुरुन्मत्तकोजडः॥अंधोचि
कित्सरोगीचभर्तव्यास्तुनिरंशकाः॥औरसाःक्षेत्रजास्तेषांनिर्दोषाभागहारिणः॥सुताश्चैषांप्रभर्तव्यायावद्वैभ
र्तृसात्कृताः॥अपुत्रायोषितश्चैषांभर्तव्याःसाधुवृत्तयः॥निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथैवच॥पितृ
मातृपतिभ्रातृदत्तमध्यग्न्युपागतं॥आधिवेदनिकंचैवस्त्रीधनंपरिकीर्त्तितं॥बंधुदत्तंतथाशुल्कमन्वाधेयकमेव
च॥अप्रजायामतीतायांबांधवास्तदवाप्नुयात्॥अप्रजास्त्रीधनंभर्तुर्ब्राह्मादिषुचतुर्ष्वपि॥दुहितॄणांप्रसूताचेच्छे
षेषुपितृगामितत्॥दत्ताकन्याहरंदंड्योव्ययंदद्याच्चसोदयं॥मृतायांदत्तमादद्यात्परिशोध्योभयव्ययं॥दुर्भिक्षेध
र्मकार्येचव्याधौसंप्रतिरोधके॥गृहीतंस्त्रीधनंभर्त्तानस्त्रियैदातुमर्हति॥अधिविन्नस्त्रियैदद्यादाधिवेदनिकंसमं॥
नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्द्धंप्रकीर्त्तितं॥विभागनिह्नवेज्ञातेबंधुसाक्ष्यभिलेखितौ॥विभागभावनाज्ञेयागृहक्षेत्र
कयौतुकैः॥इत्याग्निपुराणेदायविभागः॥अग्निरुवाच॥सीम्नोविवादेक्षेत्रस्यसामंताःस्थविरादयः॥गोपाःसीमा
कृषाणायेसर्वेचवनगोचराः॥नयेयुरेतेसीमांतुस्थलांगारतुषद्रुमैः॥सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां॥ राम०
सामंतावासमग्रामाश्चत्वारोष्टौदशापिवा॥रक्तस्रग्वसनाःसीमांनयेयुःक्षितिधारिणः॥अनृतेतुपृथग्दंड्याराज्ञा २५०

मध्यमसाहसं॥अभावेज्ञातिचिह्नानांराजासीम्नःप्रवर्त्तकः॥आरामायतनग्रामनिपानोद्यानवेश्मसु॥एषएवविधि
र्ज्ञेयोवर्षांबुप्रवहेषुच॥मर्यादायाःप्रभेदेतुक्षेत्रस्यहरणेतथा॥मर्यादायाश्चदंडाःस्युरधमोत्तममध्यमाः॥
ननिषेध्योल्पबाधस्तुसेतुःकल्याणकारकः॥परभूमिंहरःकूपःस्वल्पक्षेत्रंबहूदक॥स्वामिनोयोनिवेद्यैवक्षेत्रेसेतुं
प्रकल्पयेत्॥उत्पन्नेस्वामिनोभोगस्तदभावेमहीपते॥फालाहतमपिक्षेत्रंयोनकुर्यान्नकारयेत्॥तंप्रदाप्याकृष्टस
स्यंक्षेत्रमन्येनकारयेत्॥माषानष्टौतुमहिषीसस्यघातकारिणी॥दंडनीयातदर्द्धंतुगौस्तदर्द्धमजाविकं॥भक्षयि
त्वोपविष्टानांद्विगुणोवसतांदमः॥सममेषांविधीयेतखरोष्ट्रंमहिषीसमं॥यावत्सस्यंविनश्येत्तुतावत्क्षेत्रीफलंलभे
त्॥पालस्ताड्योथगोमीतुपूर्वोक्तंदंडमर्हति॥पथिग्रामविवीतांतक्षेत्रेदोषोनविद्यते॥अकामतःकामचारेचौर
वद्दंडमर्हति॥महोक्षोत्सृष्टपशवःसूतिकागंतुकाश्चगौः॥पालोयेषांचतेमोच्यादैवराजपरिप्लुताः॥यथार्पितान्
पशून्गोपःसायंप्रत्यर्पयेत्तथा॥प्रमादमृतनष्टांश्चप्रदाप्यःकृतवेतनः॥पालदोषविनाशेतुपालेदंडोविधीयते॥
अर्द्धत्रयोदशपणःस्वामिनोद्रव्यमेवच॥ग्रामेच्छयागोप्रचारोभूमिराजवशेतदा॥द्विजस्तृणैधःपुष्पाणिसर्वतः
सर्वदाहरेत्॥धनुःशतंपरीणाहोग्रामक्षेत्रांतरंभवेत्॥द्विशतंखर्वटस्यस्यान्नगरस्यचतुःशतं॥स्वंलभेतान्य
विक्रीतंक्रेतुर्दोषोप्रकाशिते॥हीनाद्रहोहीनमूल्येवेलाहीनेचतस्करः॥नष्टापहृतमासाद्यकर्त्तारंग्राहयेन्नरं।

अ० पु०
२५१

देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत्॥ विक्रीणीते दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमं॥ क्रेता मूल्यमवाप्नोति तस्मा
द्यस्तत्र विक्रयी॥ आगमोप्युपभोगेन नष्टं भाव्यमतोन्यथा॥ पंचबंधो दमस्तस्य राज्ञस्तेनाविभाविते॥ हृतं प्रनष्टं यो
द्रव्यं परहस्तादवाप्नुयात्॥ अनिवेद्य नृपे दंड्यः स तु षण्णवतिं पणान्॥ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं॥
अर्वाक्संवत्सरात्स्वामी लभते परतो नृपः॥ पणानेकशफे दद्याच्चतुरः पंच मानुषे॥ महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजा
जाविके॥ स्वं कुटुंबाविरोधेन देयं दारसुतादृते॥ नान्वये सति सर्वस्वं देयं यच्चान्यसंश्रुतं॥ प्रतिग्रहः प्रकाशः स्यात्स्थाव
रस्य विशेषतः॥ देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनः॥ दशैकपंचसप्ताहमासत्र्यहार्द्धमासिकं॥ बीजायोवाह्यरत्न
स्त्रीदोह्यपुंसां परीक्षणं॥ अग्नौ सुवर्णमक्षीणं रजते द्विपलं शतं॥ अष्टौ त्रपुणि सीसे च ताम्रे पंचदशायसि॥ शते दश
पला वृद्धिरौर्णे कार्पासिके तथा॥ पंच पंच पला ज्ञेया सौक्ष्मे तु त्रिपला मता॥ कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो
मतः॥ न क्षयो न च वृद्धिस्तु कौशेये वल्कलेषु च॥ देशकालं च भोगं च ज्ञात्वा नष्टे बलाबलं॥ द्रव्याणां कुशला ब्रूयु
र्यत्तद्दाप्यमसंशयं॥ बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते॥ स्वामिप्राणप्रदो भक्तस्त्यागात्तन्निष्क्रयादपि॥ प्रव्र
ज्यावसितो राज्ञो दास आमरणान्तिकः॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ कृतशिल्पोपि निवसेत्कृतं कालं गु
रोर्गृहे॥ अंतेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः॥ राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु॥ त्रैविद्यं वृत्तिमद्ब्रूया

राम०
२५१

त्स्वधर्मः पाल्यतामिति॥ निजधर्माविरोधेन यस्तु सामयिको भवेत्॥ सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ ग
णद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः॥ सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्॥ कर्तव्यं वचनं सर्वैः समूहहितवा
दिभिः॥ यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमं॥ समूहकार्यप्रहितो यल्लभेत्तु तदर्पयेत्॥ एकादशगुणं दाप्यो
यद्यसौ नार्पयेत्स्वयं॥ वेदज्ञाः शुचयोलुब्धा भवेयुः कार्यचिंतकाः॥ कर्तव्यं वचनं तेषां समूहहितवादिनां॥ श्रेणि
नैगमपाषंडिगणानामप्ययं विधिः॥ भेदं चैषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत्॥ गृहीतवेतनः कर्म त्यजन्द्विगु
णमावहेत्॥ अगृहीते समं दाप्यो भृत्यै रक्ष्य उपस्करः॥ दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः॥ अनिश्चित्य भृतिं
यस्तु कारयेत्स महीक्षिता॥ देशं कालं च योतीयात्कर्म कुर्याच्च यो यथा॥ तत्र तु स्वामिनश्छंदोधिकं देयं कृतेधि
के॥ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं॥ उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाश्रुतं॥ अराजदैविकं नष्टं
प्पो भांडं दाप्यस्तु वाहकः॥ प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिं॥ प्रक्रांते सप्तमं भागं चतुर्थं पथि संत्यजेत्॥ भृति
मर्द्धपथे सर्वां प्रदाप्यस्त्याजकोपि च॥ ग्लहे शतिकवृद्धेस्तु सभिकः पंचकं मतं॥ गृह्णीयाद्धूर्तकितवादितराद्दशकं
शतं॥ स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतं॥ जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी॥ प्राप्ते नृपतिना भागे प्र
सिद्धे धूर्तमंडले॥ जितं ससभिके स्थाने दापयेदन्यथा न तु॥ द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि॥ राज्ञा सचि

कानिब्रह्मस्वापकृत्तस्करो प्रविशेद्विना॥ द्यूतमेकमुखंकार्यंतस्करज्ञानकारणात्॥ एषएवविधिर्ज्ञेयः प्राणिद्यूतेसमा
ह्वये॥॥ इत्यादिमहापुराणेआग्नेयेव्यवहारो॥ ॥अग्निरुवाच॥ ॥सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां॥ क्षे
पंकरोतिचेद्दंड्यः पणानर्धत्रयोदश॥ अभिगन्तास्मिभगिनीं मातरंवा तवेतिच॥ शपंतंदापयेद्राजा पंचविंशति
कंदमं॥ अर्धोधमेषुद्विगुणः परस्त्रीषूत्तमेषुच॥ दंडप्रणयनंकार्यं वर्णजात्युत्तराधरैः॥ प्रातिलोम्यापवादेषु द्विगुण
त्रिगुणादमाः॥ वर्णानामानुलोम्येनतस्मादेवार्धहानितः॥ बाहुग्रीवानेत्रसक्थिविनाशेवाचिकेदमः॥ शत्यस्ततो
र्धिकः पादनासाकर्णकरादिषु॥ अशक्तस्तुवदन्नेवंदंडनीयः पणान्दश॥ तथाशक्तः प्रतिभुवंदद्यात्क्षेमायतस्य
तु॥ पतनीयेकृतेक्षेपेदंडोमध्यमसाहसं॥ उपपातकयुक्तेतुदाप्यःप्रथमसाहसं॥ त्रैविद्यनृपदेवानांक्षेपउत्तमसा
हसं॥ मध्यमंजातिपूगानांप्रथमंग्रामदेशयोः॥ असाक्षिकहतेचिह्नैर्युक्तिभिश्चागमेनच॥ द्रष्टव्योव्यव
हारस्तुकूटचिह्नकृतोभयात्॥ भस्मपंकरजस्पर्शेदंडोदशपणस्मृतः॥ अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शनेद्विगुणस्मृतः
समेष्वेवंपरस्त्रीषुद्विगुणस्तूत्तमेषुच॥ हीनेष्वर्धदमोमोहमदादिभिरदंडनं॥ विप्रपीडाकरंछेद्यमंगमब्राह्मणस्य
तु॥ उद्गूर्णेप्रथमोदंडः संस्पर्शेतुतदर्धिकः॥ उद्गूर्णेहस्तपादेतुदशविंशतिकोदमो॥ परंपरस्तुसर्वेषांशस्त्रेमध्यम राम
साहसः॥ पादकेशांशुककरोल्लुंचनेषुपणान्दश॥ पीडाकर्षांशुकावेष्टपादाध्यासेशतंदमः॥ शोणितेनविना २४२

दुःखंकुर्वन्काष्ठादिभिर्नरः॥ द्वात्रिंशतिंपणान्दाप्योद्विगुणान्दर्शनेसृजः॥ करपाददतोभंगेछेदनेकर्णनासयोः॥
मध्योदंडोव्रणोद्भेदेमृतकल्पहतेतथा॥ चेष्टाभोजनवाग्रोधेनेत्रादिप्रतिभेदने॥ कंधराबाहुसक्थ्नांचभंगेमध्यमसा
हसः॥ एकंघ्नतांबहूनांचयथोक्ताद्द्विगुणोदमाः॥ कलहापहृतंदेयंदंडश्चद्विगुणस्ततः॥ दुःखमुत्पादयेद्यस्तुसमुत्था
नजंव्ययं॥ दाप्योदंडंचयोयस्मिन्कलहेसमुदाहृतः॥ तरिकःस्थलजंशुल्कंगृह्णन्दाप्यःपणान्दश॥ ब्राह्मणप्रातिवेश्या
नामेतदेवानिमंत्रणे॥ अभिघातेतथाभेदेछेदेकुड्यावपातने॥ पणान्दाप्यःपंचदशविंशतितद्व्ययंतथा॥ दुःखोत्पा
दिगृहेद्रव्यंक्षिपन्प्राणहरंतथा॥ षोडशाद्यःपणान्दाप्योद्वितीयोमध्यमंदमं॥ दुःखेचशोणितोत्पादेशाखांगछे
दनेतथा॥ दंडःक्षुद्रपशूनांस्याद्द्विपणप्रभृतिक्रमात्॥ लिंगस्यछेदनेमृत्यौमध्यमोमूल्यमेवतु॥ महापशूनामेते
षुस्थानेषुद्विगुणोदमः॥ प्ररोहिशाखिनांशाखास्कंधसर्वविदारणे॥ उपजीव्यद्रुमाणांतुविंशतिर्द्विगुणोदमः
यःसाहसंकारयतिसदाप्योद्विगुणंदमं॥ यस्त्वेवमुक्त्वाहंदाताकारयेत्सचतुर्गुणं॥ आर्याक्रोशातिक्रमकृद्भ्रातृजा
याप्रहारदः॥ संदिष्टस्याप्रदाताचसमुद्रगृहभेदकृत्॥ सामंतकुलिकादीनामपकारस्यकारकः॥ पंचाशत्प
णिकोदंडएषामितिविनिश्चयः॥ स्वच्छंदंविधवागामीविक्रुष्टेनाभिधावकः॥ अकारणेचविक्रोष्टाचंडालश्चोत्तमा
न्स्पृशन्॥ शूद्रःप्रव्रजितानांचदैवेपित्र्येचभोजकः॥ अयुक्तंशपथंकुर्वन्नयोग्योयोग्यकर्मकृत्॥ वृषक्षुद्रप

म्मूनां च पुंस्त्वस्य प्रतिघातकृत् ॥ साधारणस्यापलापी दासीगर्भविनाशकृत् ॥ पिता पुत्रस्वसृभ्रात्रेदमात्याचार्यशि
ष्यकाः ॥ एषामपतितान्योन्यत्यागी च शतदंडभाक् ॥ वसानस्त्रीन्पणान्दंड्यो नेजकस्तु पराम्बरं ॥ विक्रयाविक्र
याधानयाचितेषु पणान्दश ॥ तुलाशासनमानानां कूटकृट्टकं ॥ सनाणकपरीक्षी तु दाप्यः प्रथमसाहसं ॥
भिषग्मिथ्याचरन्दाप्यस्तिर्यक्षु प्रथमं दमं ॥ मानुषे मध्यमं राजमानुषेषूत्तमं तथा ॥ अबंध्यं यश्च बध्नाति बंध्यं प
च प्रमुंचति ॥ अप्राप्तव्यवहारं च स दाप्यो दममुत्तमं ॥ मानेन तु तथा चापि योंऽशमष्टमकं हरेत् ॥ द्वात्रिंशति पणा
न्दाप्यो वृद्धौ हानौ च कल्पितं ॥ भेषजस्नेहलवणगंधधान्यगुडादिषु ॥ पण्येषु हीनं क्षिपतः पणान्दाप्यस्तु षो
डश ॥ संभूय कुर्वतामर्घमाबाधं कारुशिल्पिनां ॥ अर्घस्य ह्रासं वृद्धिं वा सहस्रो दंड उच्यते ॥ राजनि स्थाप्यते योऽर्घ
प्रत्यहं तेन विक्रयः ॥ क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः ॥ स्वदेशपण्ये तु शतं वणिग्गृह्णीत पंचकं ॥
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥ पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं ॥ अर्घोनुग्रहकृत्का
र्यः क्रेतुर्विक्रेतुरेव च ॥ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ॥ सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥ वि
क्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति ॥ हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥ राजदैवोपघातेन पण्ये दोषमु
पागते ॥ हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥ अन्यहस्ते तु विक्रीतं दुष्टं वादुष्टवद्यदि ॥ विक्रीणीते दमस्तत्र त

न्मूल्याद्द्विगुणो भवेत् ॥ क्षयं वृद्धिं च वणिजा पण्यानामविजानता ॥ क्रीत्वा नानुशयः कार्यः कुर्वन्षड्भागदंडभा
क् ॥ संभूय वणिजां लाभार्थं कर्म कुर्वतां ॥ लाभालाभौ यथा द्रव्यं यथा वा संविदा कृतौ ॥ प्रतिषिद्धमनादिष्टं प्रमा
दाद्यच्छिन्नं वाच्च रक्षिता दशमांशभाक् ॥ अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ॥ व्यासिद्धं राजयोग्यं च विक्रीतं रा
जगामि तत् ॥ मिथ्या वदन्परीमाणं शुल्कस्थानादपाक्रमन् ॥ दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ देशांतर
गते प्रेते द्रव्यं दायादबांधवाः ॥ ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपाः ॥ जिम्हं त्यजेयुर्निर्लाभमशक्तोऽन्येन का
रयेत् ॥ अनेन विधिराख्यातऋत्विक्कर्षककर्मिणां ॥ ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा ॥ पूर्वकर्मापराधी व
तथैवाशुद्धवासकः ॥ अन्येऽपि शंकया ग्राह्या जातिनामादिनिह्नवैः ॥ द्यूतस्त्रीपानशक्ताश्च शुष्कभिन्नमुख
स्वराः ॥ परद्रव्यगृहाणां च पृच्छका गूढचारिणः ॥ निराया व्ययवंतश्च विनष्टद्रव्यविक्रयाः ॥ गृहीतः शंकया
यश्चौर्ये नात्मानं चेद्विशोधयेत् ॥ दापयित्वा हृतं द्रव्यं चौरदंडेन दंडयेत् ॥ चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः ॥
अ सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥ घातिते ह्यपहृते दोषो ग्रामभर्तुरनिर्गते ॥ स्वसीम्नि दद्याद्ग्रामस्तु पदं वा
यत्र गच्छति ॥ पंचग्रामी बहिःक्रोशाद्दशग्री वा स्वहारिणः ॥ प्रसह्यघातिनश्चैव शूलमारोपयेन्नरान् ॥ उत्क्षेपकग्रंथि
भेदौ च करसंदंशहीनकौ ॥ कार्यौ द्वितीयापराधे करपादैकहीनकौ ॥ रक्षावहासामुद्रकमर्घोपकरणस्य पात

अ०पु०
२४५

कृत्वा चौरस्य हंतुर्वा साहसं दंड उत्तमः॥ शस्त्रावपाते गर्भस्य पातने चोत्तमः सदा॥ उत्तमो वाधमो वापि पुरुष
स्त्रीप्रमापणे॥ शिलां बध्वा क्षिपेदप्सु नरघ्नीं विषदां स्त्रियं॥ विषाग्निदां निजगुरुनिजापत्यप्रमापणीं॥ विकर्ण
करणासोष्ठीं कृत्वा गोभिः प्रमापयेत्॥ क्षेत्रवेश्मवनग्रामविवीतखलदाहकः॥ राजपत्न्यभिगामी च दग्धव्य
स्तु कटाग्निना॥ पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया॥ सजातावुत्तमो दंडः आनुलोम्ये तु मध्यमः॥
प्रतिलोम्ये वधः पुंसो नार्याः कर्णविकर्तनं॥ नीवीस्तनप्रावरणनाभिकेशावमर्दनं॥ अदेशकालसंभाषं स
हावस्थानमेव च॥ स्त्री निषेधे शतं दद्यात् कुर्वती द्विपती पुमान्॥ अनिषेधितयोर्दंडो यथा संग्रहणे तथा॥ प
शून्गच्छन्शतं दाप्यो हीनस्त्रीगश्च मध्यमं॥ अवरुद्धासु दासीषु भुजिष्यासु तथैव च॥ गम्यास्वपि पुमा
न्दाप्यः पंचाशत्पणिकं दमं॥ प्रसह्य दास्यभिगमे दंडो दशपणः स्मृतः॥ कुबंधेनांकमपे दत्वा प्रव्रजि
तागमे॥ न्यूनं वाप्यधिकं वापि लिखेद्यो राजशासनं॥ पारदारिकचौरौ वा मुंचतो दंड उत्तमः॥ अभक्ष्येण
द्विजं दंड्य उत्तमसाहसं॥ कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी॥ अंगहीनस्तु कर्तव्यो दाप्यश्चोत्त
मसाहसं॥ शक्तो ह्यमोक्षयन्स्वामी दंष्ट्रिणः शृंगिणस्तथा॥ प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा॥ अचौ
रं चौरेत्यभिवदन्दाप्यः पंचशतं दमं॥ राज्ञो निष्टप्रवक्तारं तस्यैवाक्रोशकं तथा॥ तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां

राम.
२४५

प्रवासयेत्॥ मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा॥ राजयानासनारोढुर्दंडो मध्यमसाहसः॥ द्विनेत्रभेदिनो
राजद्विष्टादेशकृतस्तथा॥ विप्रत्वेन च शूद्रस्य जीवतोष्टशतो दमः॥ यो मन्येताजितोस्मीति न्यायेनापि पराजितः
तमायांतं पुनर्जित्वा दंडयेद्द्विगुणं दमं॥ राज्ञान्यायेन यो दंडो गृहीतो वरुणाय तं॥ निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिं
शद्गुणीकृतं॥ धर्मश्चार्थश्च कीर्तिश्च लोकपंक्तिरुपग्रहः॥ प्रजाभ्यो बहुमानं च स्वर्गे स्थानं च शाश्वतं॥ पश्य
तो व्यवहारांश्च गुणाः स्युः सप्त भूपते॥ ॥ इत्याग्नेये व्यवहारः॥ ॥ अग्निरुवाच॥ ॥ ऋग्यजुःसामाथर्वाख्या विधा
नं पुष्करोदितं॥ भुक्तिमुक्तिपरं जप्या होमात्सोमाप तत्क्रमे॥ ॥ अग्निरु०॥ ॥ प्रतिवेदं तु कर्माणि कार्याणि प्रवदा
मि ते॥ प्रथमं त्वृग्विधानं वै शृणु त्वं भुक्तिमुक्तिदं॥ अंतर्जले तथा होमे जप्यते मनसेप्सितं॥ कामं करोति गाय
त्री प्राणायामो द्विजोत्तमः॥ गायत्र्या दशसाहस्रो जप्यो नक्ताशिनो द्विजः॥ बहुस्नातस्य तत्रैव सर्वकिल्बिषना
शनः॥ दशायुतानि जप्त्वाथ हविष्याशी स मुक्तिभाक्॥ प्रणवो हि परं ब्रह्म तज्जपः सर्वपापनुत्॥ ओंकारं तु ज
पेन्नित्यं नाभिमात्रोदकस्थितः॥ जलं पिबेत्स सर्वैस्तु पापैर्विप्रमुच्यते॥ मात्रात्रयं त्रयो वेदास्त्रयो देवास्त्रयोग्न
यः॥ महाव्याहृतयः सप्त लोका होमाखिलाघहाः॥ गायत्री परमा जप्या होमे व्याहृतयस्तथा॥ अंतर्जले तथा राम
प्रोक्तश्चैवाघमर्षणः॥ अग्निमीले पुरोहितमित्यृक्तोयं वह्निदैवतः॥ शिरसा धारयेद्वह्निं यो जयेत्परिवत्सरं॥ हो

अ०पु० २४५

मंत्रिषवर्णं नैऋतमग्निज्वलनसंचरेत्॥ अतःपरंश्रुचःसप्तवाघाघायाप्रकीर्तिताः॥ताजयत्स्मयतोनित्यमिष्टान्कामा
न्समश्नुते॥वामकामोजायेल्लिलंसदासप्ततिदिकृचं॥अनुयोजपंतिजाः श्रीकानववेत्स्तुनाशना॥शुनःशेफ
मृषिंबद्धःसन्निरुधोयवाजयेत्॥मुच्यतेसर्वपापेभ्योगदीचाप्यगदीभवेत्॥य इच्छेत्शाश्वतंकामंमित्रंप्राज्ञंपु
रंदरं॥ ऋग्भिःषोडशभिःकुर्यादिंद्रस्यतिदिनेदिने॥हिरण्यस्तूय इत्येतज्जपन्शत्रून्प्रबाधते॥क्षेमीभवति
चाध्वानेयेतिपंथाजयन्नरः॥रौद्रीभिःषड्भिरीशानंस्तूयाद्योवैदिनेदिने॥चारुंवाकल्पयेद्रौद्रंतस्यशांतिपरा
भवेत्॥उदित्यदंतसादैत्यमुपतिष्ठेदिनेदिने॥क्षिपेज्जलांजलीन्सप्तमनोदुःखविनाशनं॥द्विषंतमित्यथार्द्धं
यदिश्याातुयनस्मरेत्॥आसंस्कृत्यप्रराप्तेणविद्वेषमधिगच्छति॥आरोग्यकामोरोगीचप्रबुक्षपीसोक्षमंयजेत्॥उ
त्तमस्यवचाध्यायोजपेद्वैरिविनाशने॥उदयंत्वामुरक्षैयंतेजोमध्यंदिनेजयेत्॥अस्तप्रतिगतेसूर्येद्विषंतंप्रति
बाधते॥नतआध्वोतिसूक्तांतिजयन्शत्रूनियच्छति॥एकादशसुपर्णस्यसर्वकामान्निनिर्दिशेत्॥अध्यात्मि
काकइत्येताजपन्मोक्षमवाप्नुयात्॥आनोभद्राइत्यनेनदीर्घमायुरवाप्नुयात्॥त्वंसोमेतिचसूक्तेनसर्वपुष्टिंपेल्लि
शाकरं॥उपतिष्ठेत्समित्याणिवसीसाप्ततान्चसंशयं॥आयुरछन्नराशेषु निकेसंसूक्तंसदानयेत्॥अपनःशोशुच राम. २४५
दितिसूक्तंवामध्येदिवाकरं॥यथायुत्यावैवैषीकंसथापापंप्रमुंचति॥जातवेदसइत्येतज्जपेत्स्वस्त्ययनंपथि॥

ततोर्विमुच्यतेसर्वैःस्वस्तिमानाप्नुयात्गृहान्॥व्युष्टायांचतथारात्र्यामेतद्दुःस्वप्ननाशनं॥प्रमंदिनेतिमंपुसां
जपेद्गर्भविमोचनं॥जपन्निंद्रमितिस्नातोविश्वेदेवंतुसप्तकं॥जुंचबात्स्यन्नयाजुकान्सकलेकिल्बिषंनरैः॥इमामे
तियजन्शश्वत्कामोनाप्नोसमीप्सितान्॥मानस्तोकइतिकाभ्यांत्रिरात्रोपोषितःशुचिः॥ॐ दद्बरीश्वजुरूयासमि
धस्थात्संस्कृताः॥छिन्ताःसर्वान्मृत्युपाशान्जीवेद्रोगविवर्जितः॥उर्द्ध्वबाहुंचनैवस्पृशंतत्रैवच॥मान
स्तोकेतिस्वंभवायशिखाबंधेकृतेनरः॥अधृष्यःसर्वभूतानांजायतेसंशयंविना॥चित्रमितिस्पृतिष्ठेतत्रिसंध्यंभा
स्करंतथा॥समित्पाणिर्नरोनित्यमीप्सितलनमाप्नुयात्॥अतःस्वप्नेनिवजजयन्त्रातर्मध्यंदिने॥दुःस्वप्नंचाहि
तेरुक्तंभोजनंचाप्नुयात्शुभं॥उभेप्रनामीतितथारक्षोघ्नपुरिकीर्तितः॥यद्विवासामइत्येनजपन्वानूकामानवा
प्नुयात्॥तमायरन्निजयातमुच्यतेवाततापिनः॥कषास्वभेतिचजयन्नातिश्रेष्ठमवाप्नुयात्॥तमायुरग्निजि
यामुच्यतेवाततापिनः॥इमंत्रेसाममिधेतस्सर्वान्कामानवाप्नुयात्॥गणानामितिसूक्तेनस्निग्धमात्सोस्तुनुस्त॥
यामेराजन्नितीमंतुदुःस्वप्नशमनीमचं॥अध्वनिप्रस्थितोयस्तुपश्येच्छकुनिंवदंतियेतंप्रशस्तं प्रशस्तंवाकु
विदंशंइमेयजेत्॥द्वात्रिंशकंजपन्सूक्तंमाध्यात्मिकमनुत्तमं॥पत्रस्पुत्रयतोनित्यमिष्टान्कामान्समश्नुते॥
शृणुधेतिजपन्सूक्तंमुच्यतेदायसमाहितः॥अरातिनहरिरैत्याणरक्षास्यपिचनाशयेत्॥उपतिष्ठेत्स्वयंवहिपरि

सूक्ता दिने दिने ॥ तं रक्षति स्वयं वह्निर्विश्वतो विश्वतोमुखं ॥ हंसः शुचिषदित्येतच्छुचिरीक्षेद्दिवाकरं ॥ गंधमाल्येन मस्का
रेजपेदेताश्च देवताः ॥ प्रवायवे प्रलवेरन्लक्ष्मीतायूहारयोः ॥ अमोघं कर्म भवति वर्धते सर्वदा कृषिः ॥ समुद्रादिति
सूक्तेन कर्मणो प्रातिपाववकान् ॥ विश्वानर इति ह्याप्यायोत्सृग्मं वह्निमर्हति ॥ स तवर्थापदः सर्वायिशः प्राप्नोति चाक्षयं ॥
विपुलां श्रियमाप्नोति जयं प्राप्नोत्यनुत्तमं ॥ अयं स मिति चतुलाधनमाप्नोति वांछितं ॥ प्रजाकामो जपेन्नित्यं वरुणो दै
वयत्रयं ॥ स्वस्त्यात्रेयं जपेत्प्रातः सदा स्वस्त्ययनं महत् ॥ स्वस्ति पन्था इति प्रोच्य स्वस्तिमान् व्रजते ध्वनि ॥ विजिहीर्ष
वनस्पात शत्रूनां पासिसिपितं भवेत् ॥ स्त्रियागर्भप्रमूढाया गर्भमोक्षणमुत्तमं ॥ अच्छा वदेति सूक्तं च वृष्टिकामः प्रयो
जयेत् ॥ निराहारक्लिन्नवासा न चिरेण प्रवर्षति ॥ मनसः काम इत्येतां पशुकामो नयोजयेत् ॥ कर्दमेन इति स्नायात्प्र
जाकामः शुचिव्रतः ॥ अश्वपूर्वा इति स्नायाद्राज्यकामस्तु मानवः ॥ रोहिते चर्मणि स्नायाद्ब्राह्मणस्तु यथाविधि ॥ रा
जा चर्मणि वैयाघ्रे छागे वैश्यस्तथैव च ॥ दशसाहस्रिको होमः प्रत्येकं परिकीर्तितः ॥ आगाव इति सूक्तेन गोरेगिजो
कमातरं ॥ उपतिष्ठन्व्रजे वैश्व वयदाछेत्ताः सहाक्षया ॥ इत्यति तिसृभी रात्रौ दुंदुभीमभिमंत्रयेत् ॥ तेजो बलं च प्राप्नो
ति शत्रुं चैव विनियच्छति ॥ तृणपाणिर्जपेत्सूक्तं रक्षोघ्नं दस्युभिर्वृतः ॥ केचिन्नज न्नवामनुजा दीर्घमयुरवाप्रवात ॥ राम २४९
जीमूतस्य सूक्तेन तथा सेनांगान्यभिमंत्रयेत् ॥ यथालिंगं ततो राजा विनिहंस्यरिणो रिपून् ॥ अग्ने ये त्रिभिः सूक्तै

ईनमाप्नोति चाक्षयं ॥ अमीवाहा इति सूक्तेन भूतानि स्वापयेन्निशि ॥ संबाधे विषमे दुर्गे बंधो वा निर्गतः क्वचित् ॥
पालाय याश्रही तो वा सूक्तमेतद्यथा नयेत् ॥ त्रिरात्रं नियतोपोष्य श्रपयेत्पायसं चरुं ॥ तेनाहुतिशतं पूर्णं जुहुयात्त्र्यं
बकेस्तु च ॥ सप्ताद्विप्रमहादेवं जीवेद्वर्षशतं सुखं ॥ तच्चक्षुरित्यृचा स्नात उपतिष्ठेद्दिवाकरं ॥ उद्यंतमध्यगं चैव दीर्घमा
युर्जिजीविषुः ॥ सुक्राम्पापार एताभ्यां कृतां भांस्तिमाप्नुयात् ॥ इंद्र सोमेति सूक्तं तु कथितं शत्रुनाशनं ॥ यस्तु
प्रवृत्तं मोहात्प्राघ्ये वसिं स्रजेत्सह ॥ उपोष्य अंसमनुमयं श्रुमग्नेषु तथा इति ॥ आदित्येति प्रसमाजं जप्त्वा वाक्पेश
पीनवेत् ॥ न हाति नश्चलुकेपणशुच्यते महतो भयात् ॥ रुद्रं जप्त्वा पदित्येतत्सर्वकामानवाप्नुयात् ॥ चत्वारिंशत्कं चै
त्रंजप्त्वा नाग्नय पतेरिहत् ॥ वासं महीति जप्त्वा च प्राप्नोत्यारोग्यमेव च ॥ गंधो भवेति द्वाभ्यां तु भुक्त्वा ह्रियमतः शुचिः ॥
हृदयं पाणिनास्पृष्ट्वा व्याधिभिर्नाभिभूयते ॥ उत्तमेदमिति स्नातो हुत्वा शत्रुं क्षमापयेत् ॥ त्वं नो अग्न इति सूक्तेन हुत्वे
नार्थमवाप्नुयात् ॥ हन्या का कुषि सूक्तेन दिग्द्रोपा ह्यप्रमुच्यते ॥ प्रदस्मकं चेत्फदित्येतच्छिवद्वं जगद्भवेत् ॥ यस्त्व
पिति ज्ञानेनवा णीभवति संस्कृता ॥ वाचो वदमिति त्वेतां जपित्वा तमश्नुते ॥ पवित्राणां पवित्रं तु पावमान्यो ह्य
चो मता ॥ वैखानसा ऋचस्त्रिंशत्पवित्रा परमा गताः ॥ सतो व्यहिष्टि प्रोक्ता अपराः स्तूपिसत्तम ॥ सर्वकल्मषनाशा
पपावनाय शिवाय च ॥ स्वादिष्ठयेति सूक्तानां सप्तषष्टिरुदाहृतः ॥ दशोत्तराण्युक्तानां चैता पावमान्यः शताति निषद्

शतजपं प्रजुहुयाद्वा अघोरं मृत्युंजयं जपेत्॥ आपो हि ष्ठेति वारिस्थो जपेत्पापभयार्दने॥ प्रदेवमिति नियतो जपेच्च मरुवं
धसु॥ प्राणांतिके भये प्राप्ते क्षिप्रमायुस्तु विंदति॥ प्रावेपामन्त्रं च मे कां जपेच्च मनसा निशि॥ व्युष्टायामुदिते सूर्ये धृते
जपमवाप्नुयात्॥ मा प्रगामेति मूढस्य पस्थानं प्र पिथि विंदति॥ क्षीणायुरिति मन्येत तस्य पेकं वित्तं दंप्रियं॥ पतेयमिति त
जपमवाप्नुयात्॥ ... सहं सुतहत्यः पंचाइ तेनायुर्विंदते महत्॥ इदम ध्येति जुहुयात् घृतं प्रातः सहस्रशः
स्नात स्वस्य मृत्युनिमा उपेत॥ सहं सुत्स्तः पंचाइ तेनायुर्विंदते महत्॥ इदमध्येति जुहुयात् घृतं प्रातः सहस्रशः
पसुका मोगवांगो ऐरुतु कामस्य तुष्टये॥ वयः सुपर्णा इत्येतां जपं धिक्ष्युते श्रियं॥ इ विष्णुति यमस्य सर्वपापैः प्रमु
च्यते॥ तस्य रोगा वितस्पति कार्याग्निं बध्नेत पा॥ गोतुषध यः स्वस्त्ययने सर्वव्याधिविनाशनं॥ हहस्य तेश्वती धेति
द्विरिका माः प्रयोजये तां॥ सर्वत्रेति पराक्रणं तिर्तैप प्रतिरथ स्तथा॥ श्रितां संकाशयान्नित्यं प्रजाकामस्य कीर्तितं॥ अहं
रुद्रेभिरित्येत वाग्मी भवति मानवः॥ नयो यो जायते विद्वान् पन्नातीति नरा त्रिषु॥ रात्रिरित्यौ जपन्रात्रौ त्रिक्ष माम वे
त्वरः॥ पाकत्य येतीति जयं नित्यं क्षितां विनाशनं॥ आयुष्यं चेव वर्चस्यं दाक्षायणं महत्॥ उतदेवा इतिजपेदाम
यघ्नं धृतव्रतः॥ अयमग्ने जनित्येते जये दग्निभये सति॥ अरण्यानीत्यरण्येषु जपं तु तपनाशनं॥ ब्राह्मीमासाद्य स
त्कोलवचां ब्राह्मीं हाता वरी॥ पृथग्गृह्य घृतैर्वापि मेदां लक्ष्मीं च विंदति॥ सारस्वतां सपंत्रघ्नं संग्रामे विजिगीषतः॥ प्रा
ण्णोग्निः संविशानं जन्ममृत्यु निवारणं॥ अयं ही ति जयेत्तं कुंभ्र चिदुःस्वप्ननाशनं॥ येनेदमिति वै जप्त्वा समाधिं विंद

तेपरं॥ मयो भूर्वात भतितु गवां स्वस्त्ययनं परं॥ मयो भूर्वतिहति गवां स्वत्ययनं परं॥ सा वरीमिंद्रजा लंवा मायामेते
न धारयेत्॥ महीत्रीणामवो स्विती पथि स्वस्त्ययनं जपेत्॥ अग्नये विधि खिलेत्स्त्वे जपेच रिपुनाशनं॥ वास्तोष्पते चमं
त्रेण यजेत गृहदेवतां॥ जपस्यैष विधिः प्रोक्तो पुनेश्च विशेषतः॥ होमांते दक्षिणा देया पापघ्नं तिकृतं नतु॥ कृतं
चाप्यतिचातेन अथ हि मन्त्र दानतः॥ विप्राणिषस्त्वमोघाः स्युर्वहिस्नानं तु सर्वतः॥ सिद्धार्थकायवाधान्यपयो
दधिघृतं तथा॥ क्षीरवृक्षात पैध्मं तु होम दं सर्वकामदा॥ समिधः कंटकिन्यश्च राजिका रुधिरं विषं॥ अभिचारे तपाश्चे
ले त्रस नेसक्त वः पयः॥ दधिभैक्षं फलं मूलं कृग्विधानमुदाहृतं॥ इत्याग्नेये कृग्विधानं॥ पुष्कर उवाच॥ यजु
र्विधानं वक्ष्यामि भुक्तिमुक्तिप्रदं शृणु॥ ॐकारः सर्वकिरामम हाव्याहृतयो मतः॥ सर्वकल्मषनाशिन्यः सर्वका
मप्रदास्तथा॥ आज्याहुतिसहस्रेण देवताराधये बुधः॥ मनसः कांक्षितं राम मनसेप्सितकामदं॥ शांतिकामो य
वैःकुर्यात्तिलैः पापापनुत्तये॥ धान्यैः सिद्धार्थकैश्चैव सर्वकामकरैस्तथा॥ औदुंबरीभिध्मा भिः पशुकामस्य शस्य
ते॥ दध्ना चैवान्नकामस्य पयसा सांतिमिच्छता॥ अपामार्गसमिद्भिस्तु कामयन्कनकं बहु॥ कान्याकामो घृताक्ता
नि युग्मशो ग्रथितानि तु॥ जातिपुष्पाणि जुहुयाद्ग्राममार्थी तिलतंडुलान्॥ वश्यकर्मणि शाखोटवासांपामार्गमेव च
विषासृग्मिश्रसमिधो व्याधिघातस्य सर्वच॥ क्रुद्धस्तु जुहुयात्सम्यक् शत्रूणां वधकाम्यया॥ सर्वव्रीहिमयीं कृत्वा

अ०पु०
२४८

तः प्रतिकृतं द्विज॥ सहस्रशस्तु जुहुयाद्राजा वश्यगतो भवेत्॥ वस्त्रकामस्य पुष्पाणि दूर्वाया व्याधिविनाशनी॥ ब्रह्मवर्चस
कामस्य वासोऽग्नेच विधीयते॥ प्रत्यंगिरेषु जुहुयात्तुषकंटकभस्मभिः॥ विद्वेषणे च पक्षाणि काककौशिकयोस्तथा॥ क
पिलां च घृतं हुत्वा तथा चंद्रमसे द्विजः॥ वचाचूर्णं न सम्पातात्समानीय प्रतां वचां॥ सहस्रमंत्रितां भुक्त्वा मेधावी जायते
नरः॥ एकादशं गुडं शंखं लोहं खदिरमेव वा॥ द्विषतो वधो सीति जपन्धिधने त्रिपुरेष्वनि॥ उच्चाटनमिदं चैव शत्रूणां कथि
तं तव॥ चक्षुष्या इति जप्त्वा च विनष्टं चक्षुमाप्नुयात्॥ उपयुंजत इत्येतदनुवाकं तथान्नदं॥ तन्नूनपान्ने सदिति घृतं हुत्वा त्रि
वह्निभिः॥ भेषजमसीति दध्याज्यैर्होमः पशुवशीकृत॥ त्र्यंबकं यजामहे होमः सौभाग्यवर्द्धनः॥ कन्यानाम गृही
त्वा कन्यालाभेकरः परः॥ भयेषाते जपन्नित्यं भयेभ्यो विप्रमुच्यते॥ धत्तूरपुष्पं सघृतं हुत्वा स्यात्सर्वकामभाक्॥ हुत्वाच
गुग्गुलं रामस्त्र्यंबकं पतिलाभकरं॥ युंजतेन मनोवाकं जप्त्वा दीर्घमवाप्नुयात्॥ विष्णोरराटमित्येतत्सर्वबाधाविनाशनं॥ रक्षोघ्नं भयघ्नं चैव तथैव विजयप्रदं॥ अयन्नो मग्निविधौ तत्संग्रामे विजयप्रदं॥ इदमापः प्रवहत स्नाने पापापनोदनं॥
विश्वकर्मणि हविषा श्रुचिं लौहीं दश गुलां॥ कन्यापालि रक्षन्वारि स्यान्यास्मेन प्रदीयते॥ देवसवितरेते न कृते नैते न च
त्सवान्॥ अग्नेश्च स्नानतिजुहुयात्स वन्दी मोक्षिजो नमः॥ तिलैर्पीवेष्वपमर्त्तत पापामार्गतंडुलैः॥ सहस्रमंत्रितां कृत्वा त
था गोरोचनां द्विज॥ तिलकं च तथा कृत्वा जनस्य प्रियतामियात्॥ रुद्राणां च तथा जप्यं सर्वाघविनिमर्द्दनं॥ सर्वकर्मक

राम
२४६

रो होमः स्तथा सर्वप्रशांतिदः॥ आजाविकामश्वानां च कुंजराणां तथा गवां॥ मनुष्याणां नरेंद्राणां बालानां योषितामपि॥ ग्रा
मपत्तननगराणां च देशानामपि भार्गव॥ उपद्रुतानां धर्मज्ञः व्याधितानां तथैव च॥ मकरे समयुद्धाग्ने रिपुघ्नेचैव तथा भये॥
रुद्रहोमपरा शांतिपायसेन घृतेन च॥ कूष्मांडघृतहोमेन सर्वान्पापान्व्यपोहति॥ सक्तुयावककृतेर्गायिनक्तं मनुजसत्तम॥
बहिःस्नानरतो मासान्मुच्यते ब्रह्महत्यया॥ मधुवातेतिमंत्रेण होमादितोखिलं लभेत॥ दधिक्राव्णोतिहुत्वा तु पुत्राल्लाभान्न
संशयः॥ तथाघृतवती स्वेत दायुष्यं साष्ट ते न तु॥ स्वस्ति न इंद्रो स्यो देत सर्वबाधाविनाशनं॥ इह गावः प्रजायध्वं गावः
पुष्टिविवर्द्धनः॥ घृताहुतिसहस्रेण तथालक्ष्मीविनाशनः॥ स्रुवेण देवस्य त्वेति हुत्वापामार्गतंडुलं॥ मुच्यते विकृता
च्छीघ्रमभिचारात्तु संशयः॥ रुद्रपत्नेपलाशस्य समिद्भिः कनकं लभेत्॥ हंसः शुचिः पदित्येतज्जप्तो पेयनाशनं॥
चत्वारि शृंग इत्येते सर्वपापहरं जले॥ देवायज्ञेतु जप्त्वा तु ब्रह्मलोके महीयते॥ शिवोभव इत्ये स्तुत्वा तिलब्राह्मभिर्जुहुया
न्नरः॥ याः सेना इतिवै तद्वत्तस्करेभ्यो भयापहः॥ यो अस्मभ्यमरातीयाद्धुधाक्रुष्टतिलान्नरः॥ सहस्रोरीभिचारश्च
मुच्यते विकृता द्विज॥ अन्नेनानुपतेत्यैव हुत्वा चान्नमवाप्नुयात्॥ सुपर्णोसीति चेत्सस्य कर्मव्याहृतिविज्ञवेत्॥ नमस्ते
ते त्रिभिर्जप्त्वा वंधनान्मोक्षमाप्नुयात्॥ अंतर्जप्त्वेत्रिरावर्त्तं द्रुपदा सर्वपापमुक्॥ इह गावः प्रजायध्वं मंत्रोयं बुद्धिवर्द्ध
नः॥ हुतस्तु सर्पिषा दध्ना पयसा पायसेन वा॥ शातेदेवि इतिवै तत हुत्वा पर्पपि लानि वै॥ आरोग्यं श्रीयमाप्नोतिजा

वितंच चिरंतथा ॥ एषध्वीप्रति मोदध्वं वयने जवने षकृत ॥ अश्ववती पायसेन होमाच्छांतिमवाप्नुयात ॥ उद्बुध्यस्वेति
चैतेन षवनस्थो विमुच्यते ॥ युवा सुवासा इत्येव वासांस्याप्नोत्युत्तमं ॥ मुंचनमा शपथ्या दिसर्वकिल्बिषनाशनं ॥
मा मा हिंसीतिवाज्येन कृतं रिपुविनाशनं ॥ नमोस्तु सर्पेभ्यो घृतेन पायसेन तु वर्लदा ॥ तत्त्वं स्वयाज इत्येतदभिचारवि
नाशनं ॥ दूर्वाकांडायुतं हुत्वा कांडात्कांडा इति मानवः ॥ ग्रामे जनपदे वापि मकरस्तु समं नयेत ॥ रोगान्मुच्यते रोगा
त्तथा दुःखात्तु दुःखितः ॥ उदंबरीश्च समिधो मधुमान्नो वनस्पति ॥ कृत्वा सहस्रसो राम धनमाप्नोति मानवः ॥ सौ
भाग्यं महदाप्नोति अवहारे तथा जयं ॥ आपांगं मुन्नितं कृत्वा देवं धर्षा विये कृवं ॥ अयः पित्वेति च तथा कृत्वा दधिघृतं
मधु ॥ प्रवर्त्तयति धर्मज्ञः महावृष्टिमनस्तुरं ॥ नमस्ते रुद्रमन्येतस्सर्वोपद्रवनाशनं ॥ सर्वं शांतिकरं प्रोक्तं महापातकना
शनं ॥ अध्यवोचदित्यनेन लक्ष्मणं व्याधितस्य तु ॥ रक्षोघ्नं च यशस्यं च पीताधुः पुष्टिवर्द्धनं ॥ सिद्धार्थकानां पेत्लेवपाथिचे
वजयन्तुरक्षा ॥ असौ यस्ताम्र इत्येतमभ्रं नित्यं दिवाकरं ॥ उपातिष्ठेति धर्मज्ञः सायंप्रातरतंद्रितः ॥ अयमिक्ष्यमाप्नोति दीर्घमा
युश्च विंदति ॥ प्रमुंच धन्वन्न इत्येतत्पठ्निरायुधमंत्रिणं ॥ रिपूणां भयदं युद्धे नात्र कार्या विचारणा ॥ मानो महांत इत्येवालानं
न शांतिकारकं ॥ मो हिरण्यबाहव इत्यनुवाकसप्तकं ॥ राजिकाकटुत्याक्तानां जुहुयाच्छत्रुनाशिनीं ॥ नमो वृक्षेभ्यः रिकेत्यश्च राम.
पत्नजक्षाकृतिर्नरः ॥ राजलक्ष्मीमवाप्नोति तथा बिल्वैः सुवर्णकं ॥ इमा रुद्रायेति तैर्होमाः इध्यनमाप्यते ॥ दूर्वाहोमेन २५९

चानेन सर्वव्याधिविवर्जितः ॥ आशुः शिशान इत्येतदायुधानां च रक्षणे ॥ संग्रामे कथितं राम सर्वशत्रुनिबर्हणं ॥ अरा
जक्ष्मेति जुहुयात सहस्रैः पंचभिर्द्विजः ॥ आज्याहुतीनां धर्मज्ञ चक्षुरोगाद्विमुच्यते ॥ शन्नो भुवनस्येति गेहे होमस्य वस्तु
दोषनुत ॥ इमन्नमायुषिकृता म्यां वेषधा नैतिकेन चित ॥ अयं फेने तिलाजाति कृत्वा जयमवाप्नुयात ॥ भद्रा इती द्रियेर्होमे
जपस्यात्सकलेंद्रियः ॥ अग्निश्च पृथिवी चेति वशीकरणमुत्तमं ॥ अध्वनेति जपन्मंत्रं मवहाक्षेजयी भवेत ॥ ब्रह्म राजन्यमिति
च कर्म्मारिंभे तु सिद्धिकृत ॥ संवत्सरोसीति घृतं लंबहोमाद रोगवान ॥ केतुं कृण्वन्निती त्येतत्संग्रामे जयवर्द्धनं ॥ इन्द्रोग्निर्धर्म
इत्येतत्त्राणधर्मनिबंधनं ॥ धनुनागेति मंत्रश्च धनुर्ग्रहणिकः परः ॥ यजीतीति तथा मंत्रो विज्ञेयो ज्याभिमंत्रिणे ॥ मंत्रश्च
हिरिवोलेत्त्रणमंत्रः प्रकीर्त्तितः ॥ पुंजंतीति तथा स्वेनां योजने मंत्र उच्यते ॥ आशुः शिशान इत्येतयात्रारंभणमुच्यते ॥ वि
ष्णोः क्रमेति मंत्रश्च रथारोहणिकः परः ॥ आजंघतीति चाप्यस्तानां ताडनीयमुदाहृतं ॥ याः सेना अभी त्वराति परसेनासु
स्वेपजत ॥ डुंडुभ्य इति चाप्येतदुंदुभि ताडनं भवेत ॥ एतैः पूर्वकृतैर्मंत्रैः कृत्वैवं विजयी भवेत ॥ यमेन दत्तमित्यस्य कोटि
होमाद्विचक्षणः ॥ रथमुत्पातये छीघ्रं संग्रामे विजयप्रदं ॥ आ कृष्णेति तथैतस्य कर्म्मादौ कृतिवद्भवेत ॥ शिवसंकल्प जा
प्येन समाधिं मनसा लभेत ॥ पंचनद्यः पंचलक्षं कृत्वा लक्ष्मीमवाप्नुयात ॥ यदाबध्नंदाक्षायणा मंत्रेणानेन मंत्रितं ॥ स
हस्रकुश्वकनकं धारयेत्त्रिपुराणणं ॥ कामंजीवेन्म्यतिचर्शीता लोप्टं चडर्हिनिं ॥ क्षिपेद्रुहेतदा तस्य नस्याद्वीरभयन्नि ॥

अ॰पु॰ परोमेगामनेयेति वशीकरणमुत्तमं॥ हंतुमभ्यागतस्तस्य वशीभवति मानवः॥ नक्षतांबूलपुष्पाद्यं मंत्रितं तु प्रयच्छ
२५० ति॥ यस्य धर्मजवश्यगं सोस्य श्रीघ्रं भविष्यति॥ रक्षोघ्नं मंत्रैरित्येतत् सदा सर्वत्र शांतिदं॥ गणानां त्वा गणपतिं कृत्वा हो
मं चतुष्पथे॥ वर्णीक्रियजि ग्रत्स्वं सर्वधान्यैः संस्रायं॥ हिरण्यवर्णाः शुचयो मंत्रोयमिति सिंचने॥ शन्नो देवीरभिष्टाय
तया शांतिकरः परः॥ एकचक्रेति मंत्रेण कृतेनाज्येन भागतः॥ ग्रहेभ्यः शांतिमाप्नोति प्रसादं तत्र संस्रायः॥ गावो भग
इति प्राप्योज्जुह्वा ज्वेगाम वाप्नुयात्॥ प्रयादं गाश्रोपदितित्न हयज्ञे विधीयते॥ देवेभ्यो वनस्पतिति द्रुमयज्ञे विधीयते॥
गायत्री वैष्णवी ज्ञेया तद्विष्णोः परमं पदं॥ सर्वपापप्रशमने सर्वकर्मकरं शुभं॥॥ इत्याग्नेये यजुर्विधानं॥ ॥पुष्कर
उ॰॥ ॥यजुर्विधानं कथितं वक्ष्ये साम्नां विधानकं॥ संहितां वैष्णवीं जप्त्वा कृत्वा स्नात्वा सर्वकर्मभाक्॥ संहितां छांदसीं स
धुजस्यां प्रीणाति शंकरं॥ सांदीपिन्यां संहितां च जप्त्वा स्यात्तत्प्रसादवान्॥ यतइंद्रभयामहे हिंसादोषविनाशनं॥
अवकीर्णो मुच्यते च अग्निस्त्रिस्सोतिवै जपन्॥ सर्वपापहरं ज्ञेयं परं तोषिं चतीसुतं॥ अविक्रेयं च विक्रीय जपेत् घृत
वतीति च॥ शन्नो देवस्य कितेति ज्ञेयं दुःस्वप्ननाशनं॥ अबोध्यग्निरिति मंत्रेण घृतं राम यथाविधिः॥ अभ्युद्घुघृतश्रे ति
षेण मेखलाबंधइष्यते॥ स्त्रीणां पाशगतस्यापि पतंति भयसत्तमः॥ मणिजातस्य बालस्य बध्नीयात्तदनंतरं॥ सोमो रा राम
जानमेतेन व्याधिभिर्विप्रमुच्यते॥ सर्पासाम प्रयुंजानो नाप्नुयात्सर्पजं भयं॥ आयत्त्वावायग्नेदेतद्भुक्त्वाद्विप्र सहस्रशः॥ २५०

त्रातावरिमापिबध्ना नाप्नुयाच्छ्रुतो भयं॥ दीर्घं च मनसो घृष्टेति कृत्वार्थं प्राप्नुयात् कृ॥ समध्यपत्रीति जपन् त्रिये
त पिपासया॥ त्वमिमा स उषधी त्येतज्जप्त्वा व्याधिं नवाप्नुयात्॥ पथे देवव्रतं जप्त्वा भयेभ्यो विप्रमुच्यते॥ यदिंद्रो नयेत्येति कृ
तं सौभाग्यवर्द्धनं स्नगोनचित्र इत्येवं नेत्रयोरंजनं हितं॥ सौभाग्यवर्द्धनं राम नात्र कार्या विचारणा॥ जपेदिंद्रेति चक्षं
च तथा सौभाग्यमाप्नुयात्॥ परिप्रियादिवकरिः काम्यां संश्रावयेत्स्त्रियां॥ सा तं कामयते राम नात्र कार्य विचार
णा॥ रथंतरं वामदेव्यं ब्रह्मचर्यस्य वर्द्धनं॥ प्रातश्ये बालकं नित्यं वाचा पूर्णं घृतप्नुतं॥ इंद्रमिं गाथिनं जप्त्वा भवे
त्श्रुतिधरस्त्वसौ॥ कृत्वा रथं भरं जप्त्वा पुत्रमाप्नोत्यसंशयं॥ मयि श्रीरिति मंत्रोयं जप्तव्यं श्रीविवर्द्धनं॥ वैरूपस्या
ष्टकं नित्यं प्रयुंजानः श्रियं लभेत्॥ सप्ताष्टकं प्रयुंजानः सर्वान् कामानवाप्नुयात्॥ आ भोषु नेति यो नित्यं सायं प्रात
रन्वितः॥ उपस्थानं गवां कुर्यात्तस्य स्युस्ताः सदा गृहे॥ घृताक्तं च तु चक्रेण वातश्वा वांत भेषजं॥ अनेन तु त्वा विधि
वत्सतर्यां स यो हंति॥ मा देवो द्रा सवति वा कृत्वा कर्मनकृतनं॥ अभित्वा शूर्पपीये तवषट्कारसमन्वितं॥ वा
संके ध्मसहस्रं तु कृतं युद्धे जयप्रदं॥ हस्त्यश्व पुरुषाकृ यद्विय पिष्टमयान् शत्रून्॥ परकीयात् यो द्विरप्र
यान पुरुषास्तथा॥ स्वस्तिना सिष्टपवनेक्षुरेणा कृत्य भागशः॥ अभित्वा शूरनोनुमो मंत्रेणानेन मंत्रवित्॥ कृ
त्वा सर्षपतैलाक्तो मंत्रेण जुहुयात्ततः॥ एतत्कृत्वा सर्वः कर्मसंग्रामे जयमाप्नुयात्॥ गारुडं क्रमदेवं च रथंतर

अ०पु०
२५१

दृहरयौ ॥ सर्वपापप्रशमना कथिता संशयं विना ॥ ॥ आग्नेये सामविधानं ॥ ॥ पुष्कर उवाच ॥ ॥ साम्नां विधानं
कथितं वक्ष्ये वाथर्वणामथ ॥ शान्तातीयगणं कृत्वा शांतिमाप्नोति मानवः ॥ भैषज्यं च गणं कृत्वा सर्वान्रोगान्व्यपो
हति ॥ त्रिसप्तीयं कृत्वा सर्वपापैः प्रमुच्यते ॥ क्विंचिन्नाप्नोति च भयं कृत्वा चैवाभयं गणं ॥ न क्वचिज्जीयते
रामगणं कृत्वापराजितं ॥ आयुष्यं च गणं कृत्वा ह्यपमृत्युं व्यपोहति ॥ स्वस्तिमाप्नोति सर्वत्र कृत्वा स्वस्त्ययनं
गणं ॥ श्रेयसा योगमाप्नोति शर्म वर्मगणं तथा ॥ वास्तोष्पत्यं गणं कृत्वा वास्तुदोषान्व्यपोहति ॥ तथा रौद्रगणं
कृत्वा सर्वान्दोषान्व्यपोहति ॥ एतैरष्टादशगणैर्होमो घृष्टादशसु शांतिषु ॥ वैष्णवी शांतिरैंद्री च ब्राह्मी रौद्री तथैव च ॥ वाय
व्या वारुणी चैव कौवेरी भार्गवी तथा ॥ प्राजापत्या तथा त्वाष्ट्री कौमारी वह्निदेवता ॥ मरुद्गणा च गांधर्वी शांतिर्नैरृति
की तथा ॥ शांतिरांगिरसी याम्या पार्थिवी सर्वकामदा ॥ यस्त्वा मृत्युरिति ह्येतज्जप्तं मृत्युविनाशनं ॥ सुपर्णस्त्वेति तं
कृत्वा भुजंगैर्न च बाध्यते ॥ इन्द्रेण दत्तमित्येतत्सर्वकामकरं भवेत् ॥ यमस्य लोकादित्येतद्दुःस्वप्नशमनं परं ॥ इ
न्द्रं वयं वणिजं जेति पण्यलाभकरं परं ॥ कामो मे वाजी इति च स्त्रीणां सौभाग्यवर्द्धनं ॥ तुभ्यमेव जवीमन्निति पुष्टिं हु
तं भवेत् ॥ अग्ने गोभिर्न इत्येतन्मायाप्रहिकरं परं ॥ ध्रुवं ध्रुवेणेति कृतं स्थानलाभकरं भवेत् ॥ अहं ते भग इत्येतद्भवे
सौभाग्यवर्द्धनं ॥ ये मे पाशास्तथात्येतद्बन्धमोक्षकारकं ॥ सपत्नहं निर्ऋतिरित्येतन्नाशाय वैरिणां जाप्यतः ॥ त्वमुत्तम

राम०
२५१

वितीत्येतद्धनो बुद्धिविवर्द्धनं ॥ यथा मृगमपीत्येतत्स्त्रीणां सौभाग्यवर्द्धनं ॥ येन चेहदिदं चैव गर्भलाभकरं भवेत् ॥
शिवः शिवाभिरित्येतत्कुर्याद्भूयं प्रसादयेत् ॥ ब्रह्मस्य भीमः परि पातु पथिस्वस्त्ययनं भवेत् ॥ मुचामि त्वेति क्रिय
तं भयमृत्युनिवारणं ॥ अथर्वणो रसो रव्यातो सर्वपापैः प्रमुच्यते ॥ पावा तेनं तु मंत्राणां किंविधमाविता रिति ॥ वृ
क्षाणां याज्ञिपानां तसमिधः प्रथमं हरिः ॥ आज्यं च व्रीहयश्चैव तथा वै गौरसर्षपाः ॥ अक्षतानि तिलाश्चैव दधिं गारेव मा
गवि ॥ दर्भास्तथैव वर्चिः किं वा निकुमल्यानि च ॥ शांतिपुष्टिकरा एषा कृत्या एषैतानि सर्वशः ॥ तैलकराणि धूमे
राजिका रुधिरं विषं ॥ समिधः कंटकोपेता अभिचारेषु योजयेत् ॥ आर्षं चैवं दैवतं छंदो विनियोगश्च मा चरेत् ॥
इत्याग्नेये अथर्वविधानं ॥ पुष्कर उ० ॥ ॥ श्रीसूक्तं प्रतिवेदं च ज्ञेयं लक्ष्मीविवर्द्धनः ॥ हिरण्यवर्णा हरिणीमृचं पंचदश
श्रियः ॥ रथे अक्षेषु राजभिः चतस्रो यजुषि श्रियः ॥ श्रायंतीय तथा साम श्रीसूक्तं सामवेदकं ॥ श्रियं धातुर्मयि धेहि
प्रोक्तमाथर्वणे तथा ॥ श्रीसंगं योजयेत् कृत्वा श्रीसूक्तस्य वै भवेत् ॥ पद्मानि वाथ विल्वानि कृत्वा वाथ तिलान् श्रि
याः ॥ एकं कर्ष्यपि रूपं सूक्तं प्रतिवेदं तु सर्वदं ॥ सूक्तेन दद्यात्पुष्पाणि घोषे के कस्या जलिं जपि ॥ स्नानरएके कपादतु
फलं सा सर्वकर्मसाक ॥ महापापोपपापानां तो भवेत्क्षा तु पौरुषं ॥ रुद्रे विश्वद्वीजं स्वाभ्यां तथा सर्वमाकृ ॥ षद्रार्द
शमः शांतिमाप्नोति सौम्याः शांतियोवराः ॥ अमृता चाभया सौम्या सर्वोत्पातविमर्द्दनाः ॥ अमृता सर्वदैवत्या चाभयास

२५२

अ०पु० र्द्देवता॥ सौम्या तसोपदैवत्या एकास्यात्सर्वकामदा॥ अनया यामणिकायो वरुणस्य भृगुत्तमः॥ ज्ञातकुंडो मृगा
२५२ याश्च सौम्यायोः त्राष्ययोमणि॥ तदेवत्याः स्तथा मंत्राः सिद्धौ सान्मणिबंधनं॥ दिव्यांतरिक्षभौमादि समुत्पाता
र्न्महाद्भुताः॥ दिव्यांतरिक्षभौमं तु अद्भुतं विविधं शृणु॥ ग्रहर्क्षवैकृतं दिव्यमंतरिक्षान्निबोध मे॥ उल्कापातादि
ग्दाहपरिवेषस्तथैव च॥ गंधर्वनगरं चैव वृष्टिश्च विकृता च या॥ चरस्थिरभवं भौमो भूकंपमपि भूमिजः॥ सप्ता
हाभ्यंतरे दृष्ट्वाद्भुतं निःफलं भवेत्॥ शांतिविना त्रिभिर्वर्षैरद्भुतं भयकृद्भवेत्॥ देवताचार्यनृत्यंति वेपंति प्रज्वलं
ति च॥ अनदंति च रोदंति प्रस्विद्यंते हसंति च॥ अर्चाविकारोपसमौ अर्च्य कृत्वा प्रजापतिः॥ अनग्निर्दीप्यते य
त्र राष्ट्रे च भृशनिःस्वनः॥ न दीप्यते चेंधनवान्सु प्रांशुपीड्यते नृपैः॥ अग्निवैकृतशमनमग्निमंत्रैश्च भार्गव॥ अ
काले फलिता वृक्षाः क्षीरं रक्तं स्रवंति च॥ वृक्षोत्पातप्रशमनं शिवं पूजां च कारयेत्॥ अतिवृष्टिरनावृष्टिर्दु
र्भिक्षाय नयं मतं॥ अनृतौ त्रिदिनारब्धा वृष्टिर्ज्ञेया भयाय दि॥ वृष्टिवैकृतनाशः स्यात्पर्जन्येंद्वर्कपूजनात्॥
नगरादपसर्पंति समीपमुपयांति च॥ एभ्यो रुदंत्यश्रवणा विरसाश्च भवंति च॥ सलिलाशयवैकृते जप्तव्यो वारु
णो मनुः॥ अकालप्रसवा नार्यः कालतो वा प्रजास्तथा॥ विकृतप्रसवाश्चैव युग्मप्रसवनादिकं॥ स्त्रीणां प्रशावं वै राम·
कृते स्त्रीविप्रादि प्रपूजयेत्॥ वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते॥ विजात्यं विकृतं वापि षड्भिर्मासैः म्रियेत वै॥ वि २५२

कृतं वा प्रसूयंते परचक्रभयं वदेत्॥ होमः प्रसूतवैकृत्ये जपो विप्रादिपूजनं॥ यांति यानान्ययुक्तानि युक्तानि न वदंति च॥
आकाशे तूर्यनादस्तु महद्भयमुपस्थितं॥ प्रविशंति यदा ग्राममारण्या मृगपक्षिणः॥ अरण्यं यांति वा ग्राम्याः स्थलं यां
ति जलोद्भवाः॥ जलं वा जलजा यांति राजद्वारादिको शिवाः॥ प्रदोषे कुक्कुटेत्रासेसेक्ष्वा चार्कोदये भवेत्॥ गृहं कपो
तः प्रविशेत् क्रव्यादा मूर्ध्नि लीयते॥ मधुवा मक्षिका कुर्यात्काको मैथुनगो दृशि॥ प्रासादतोरणाद्यानां भंगाख्यकारवे
नं श्मनां॥ अनिमित्तं तु पतनं दृढानां राजमृत्यवे॥ रजसा वाथ धूमेन दिशां यत्र समाकुलः॥ केतूदयोपरागो वा छिद्र
ता शशिसूर्ययोः॥ ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत्॥ अग्निर्यत्र न दीप्येत स्रवंते चोदकुंभकाः॥ मृतिर्भयं
भूत्यता रुरुत्याति नांफलं भवेत्॥ द्विजदेवादिपूजाभ्यां शांति प्रोक्ता स्तु होमतः॥ ॥इत्याग्नेये उत्पातशांतिः॥ ॥पु
ष्कर उवाच॥ ॥देवपूजादिकं कर्म वक्ष्ये योत्पातमर्दनं॥ आपो हि ष्ठेति तिसृभिः स्नातोर्घं वैष्णवे यजेत्॥ हिरण्य
वर्णा इति च पाद्यं च तिसृभिर्द्विज॥ शंनन्मयोज्ञामनवमिदमापो तिषेचनं॥ रथेवतस्त्वभिर्महं दुर्वेति वस्त्रकं॥ पुष्पं पु
ष्पवतीत्येव स्वे व धूरसि चाप्यथा॥ तेजोसि शुक्रं दीपं स्यात् मधुपर्कं दधीति च॥ हिरण्यगर्भ इत्यष्टाहृत प्रोक्तानि वेदनै॥
अंधस्य मनुजः श्रेष्ठा नस्य वस्तु गंधिनः॥ चामरं व्यजनौ स्नानं छत्रयानासने तथा॥ यत्किंदेवमादिसाम्ना विष्णोर्नि
वेदयेत्॥ पौरुषं च जपेत्सूक्तं तदेव जुहुयात्तथा॥ अर्चाभावे तथा वेद्यां स्थंडिले पूर्णघटेन वा॥ नदीतीरेयकमलेशांति

स्यात्विष्णुप्रपूजनात्॥ ततोहोमः प्रकर्त्तव्योदीप्यमानेविभावसौ॥ परिसमुह्यपर्युक्ष्यपरिस्तीर्यपविस्तरैः॥ सर्वार्था
ग्रंसमुद्धृत्यजुहुयात्प्रयतस्तथा॥ वासुदेवायदेवायप्रभवेचाव्ययायच॥ अग्नयेचैवसोमायमित्रायवरुणायच
इंद्रायचमहाभाग इंद्राग्निभ्यांतथैवच॥ विश्वेभ्यश्चैवदेवेभ्यः प्रजानांपतयेतथा॥ अनुमत्यैतथाराम धन्वंतर
यएवच॥ वास्तोष्पत्यैततोदेवैततः स्विष्टकृतेग्नये॥ चतुर्थेननाम्नान्तुकृत्वैतेभ्योबलिंहरेत्॥ तम्योपुतक्ष
मभितः पूर्वेणाग्नेमतःपरं॥ अग्न्यागारादिधर्मज्ञः द्वार्नामानिचाप्यथः॥ निरुक्षीधूम्रिणीकाचअभ्रयंतीत
येवच॥ मेघयंतीवनामानिसर्वेषामेवभार्गव॥ आग्नेय्याद्याःक्रमेणाद्यततः शक्तिषुनिक्षिपेत्॥ नंदिन्यैवसु
भार्गैवसुमंगल्यैच भार्गव॥ ततस्ताभ्यैततोदत्वास्तणायांचतथाश्रियै॥ हिरण्यकोश्यचतथावनस्पतयएवच॥
धर्माधर्मतयोद्वारेगृहमध्येध्रुवायतु॥ मृत्यवेचबलिंदद्यात्वरुणायोदकाश्रये॥ भूतेभ्यश्चबहिर्दद्याच्छ
रणेधनदायच॥ इंद्रायेंद्रपुरुषेभ्योदद्यात्वैणमानवः॥ यमायतत्पुरुषेभ्योदद्याद्दक्षिणतस्तथा॥ वरुणा
यतत्पुरुषेभ्योदद्यात्पश्चिमतस्तथा॥ सोमायसोमपुरुषेभ्यः उदङ्मुखोदद्यादुत्तरं॥ ब्रह्मपुरुषेभ्योमध्येदद्यात्तथै
वच॥ आकाशेचतथाचैवंद्वस्थंडिलापक्षितोतथा॥ दिवादिवाचरेभ्यश्चरात्रिंचरेषुच॥ बलिंबलिंस्तथादद्यात्सायं
प्रातस्तुप्रत्यहं॥ पिंडनिर्वपणंकुर्यात्प्राक्तत्रापन्नकारयेत्॥ पित्रेतुप्रथमंदद्यात्तत्पित्रेतदनंतरं॥ प्रपितामहायमात्रे

पिपित्रमात्रेततोपर्यंत्॥ तन्मात्रेदक्षिणाज्ञेयाकुशेष्वेवंपुजेत्लिवेत्॥ इंद्रवारुणवायव्या॥ याम्यावानैरुताश्चये॥ तेका
काः प्रतिगृह्णंतुइमंपिंडंमयोधृतं॥ काकपिंडंतुमंत्रेणश्वनः पिंडंप्रदापयेत्॥ वैवस्वतकुलेजातौद्वौश्यामशवलौ
शुनौ॥ तेषांपिंडंप्रदास्यामिपथिरक्षंतुमेसदा॥ सौरभेय्यः सर्वहिताः पवित्रापापनाशनाः॥ प्रतिगृह्णंतुमेग्रासंगा
वः त्रैलोक्यमातरः॥ गोग्रासंतुस्वस्त्ययनंकृत्वाभिक्षांप्रदापयेत्॥ अतिथिंदीनान्सजित्वागृहीभुंजीतवस्थये॥ ॐ
भूः स्वाहा॥ ॐभुवः स्वाहा॥ ॐस्वः स्वाहा॥ ॐभूर्भुवः स्वाहा॥ ॐदेवकृतस्यैनसोवयजनमसिस्वाहा॥ मनुष्यकृतस्यै
नसैनसोवयजनमसिस्वाहा॥ ॐपितृकृतस्यैनसोवयजनमसिस्वाहा॥ आत्मकृतस्यैनसोवयजनमसिस्वाहा॥
ॐएनसएनसोवयजनमसिस्वाहा॥ ॐयच्चाहमेनोविद्वांश्चकारयच्चाविद्वांस्तस्यसर्वस्यैनसोवयजनमसिस्वाहा॥ अ
ग्नयेस्विष्टकृतेस्वाहा॥ विष्णुपूजावैश्वदेवोबलिस्तेपिस्तेकीर्त्तितामया॥ ॥ इत्याग्नेयोदेवपूजावैश्वदेवादि॥ ॥ अग्नि
रुवाच॥ ॥ सर्वार्थसाधनंस्नानंकक्ष्येहंशांतिकरंशृणु॥ स्नापयेत्सरित्तीरेग्रहाविष्टंविचक्षणः॥ देवालयेज्वरा
र्त्तंघाटेविनायकग्रहादिते॥ विद्यार्थिनोकृदेगेहेजपुकामस्तीर्थिके॥ पद्मिन्यांस्नापयेन्नारींगर्भोयस्याविनश्यति॥
पुष्पार्थिन्यांचपुष्पाढ्येपुष्पेर्थिनीचसागरे॥ गृहोसौनाम्यकांस्तायांसवैष्णाविष्णुसंनिधौ॥ वैश्रवैरैवतीपुष्येस
र्वेषांस्नानमुत्तमं॥ स्नानकामस्यसप्ताहंपूर्वमुत्सादनंस्मृतं॥ पुनर्नवारोचनांचत्वातादारुगुरुणीत्वचं॥ मधुक

रजनीद्वेनगरस्नागकेसरं॥ आसुरीचैवमंजिष्टामांसीयासकमर्दकैः॥ प्रियंगुसर्षपाकुष्टंवनाब्राह्मीवृकुंकुमं॥ प
चगव्यंगुडाकुमिश्रंकृत्यास्नानमाचरेत्॥ मंडलेकर्णिकायांचविष्णुब्रह्माणमच्युतं॥ दक्षेवामेहरेहरंपात्रेपूर्वा
दिकेत्रमातृलिखेद्दिग्दिक्षात्देवान्आयुधान्सहवाहनात्॥ स्वनेमंडलकान्दिक्षुकर्याच्चैवस्वस्तिकंच॥ विष्णु
ब्रह्मेशशक्रादीन्ततस्तान्पूजयेद्धोममपेत्॥ एकैकस्याष्टशतंसमिधस्तुतिलाघृतं॥ भद्रःसुभद्रःसिद्धार्थकञ्च्रः
पालिवर्द्धनी॥ अमोघश्चित्रभानुश्चपर्जन्योपसुदर्शना॥ स्नापयंयुघटावेतांसाक्षिरुद्रमरुद्गणाः॥ विश्वेदेवा
स्तथादैत्यावसवोमुनयस्तथा॥ आवेशयंतुसुप्रीतास्तथान्याअपिदेवता॥ ओषधीर्निक्षिपेत्कुंभेजयंतीविजयांज
यां॥ शतावरीशतपुष्पांविष्णुक्रांतापराजितां॥ ज्योतिष्मतीमतिबलांचंदनोशीरकेसरं॥ कस्तूरीकांचकर्पूरं
बालकंपत्रकंत्वचं॥ जातीफलंलवंगंचमृत्तिकाःपंचगव्यकं॥ भद्रपीठेस्थितंस्नाप्यस्नापयेयुद्विजारवानेन॥
राजाभिषेकमंत्रोक्तदेवानांहोमकःपृथक्॥ पूर्णाहुतिंततोदत्वाद्यरवेदक्षिणांददेत्॥ इंद्रोभिषिक्तोगुरुणापु
रादेत्यान्जघानह॥ दीक्षास्नानकथितंसग्रामादोजयादिदं॥ ॥इत्याग्नेयेदीक्षास्नानादिस्नानं॥ ॥पुष्करउवाच॥
विनायकोपसृष्टानांस्नानंसर्वकरंवदे॥ विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोगतः॥ गणानामाधिपत्येचकेशवे
शपितामहैः॥ स्वप्नेवगाहतेत्यर्थंजलंमुंडाश्चपश्यति॥ विनायकोपसृष्टस्तुक्रव्यादानधिरोहति॥ व्रजमानस्तु	राम॰
२५४

...स्नानंमन्यतेतुमतंपरे॥ विमनाविफलारंभःसंसीदत्यनिमित्ततः॥ कन्यावरंनचाप्नोतिनचापत्यंवरांगना॥ आ
चार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंलभेत्॥ धनीनैवसमाप्नोतिनकृषिंचकृषीवलः॥ राजाराज्यंनचाप्नोतिसुधने
स्नानंकारयेत्॥ हस्तपुष्याश्वयुक्सौम्यवैष्णवेगौरसर्षपं॥ गौरसर्षपकल्केनसाज्येनाछादितस्यच॥ सर्वौष
धैःसर्वगंधैःप्रलिप्तशिरसस्तथा॥ चतुर्भिःकलशैस्तेषुस्नानंतेषुपुनस्तुते॥ भगंतेवरुणोराजाभगंसूर्योवृहस्प
तिः॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोविदुः॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि॥ ललाटेकर्णयोरक्ष्णोराप
स्तत्नुतेसदा॥ दर्भपिंजलमादायवाममहस्तेततोगुरुः॥ स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणच॥ जुहुयान्मूर्द्धि
निनःकुर्यात्सव्येनपरिगृह्यवै॥ मितश्चसंमितश्चैवतथाशालकटंकटौ॥ कूष्मांडाराजपुत्रश्चएतैःस्वाहासमन्वि
तैः॥ नमोभिर्बालमंत्रैश्चवषट्कारसमन्वितैः॥ दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः॥ कृताकृतांस्तंडुलांश्चपला
लौदनमेवच॥ मत्स्यामषंकास्तथैवामानपुष्पंचित्रंसुराचित्रिवा॥ मूलकंपूरिकांपूपांस्तथावेष्टुरिकास्रजा॥ दध्य
न्नपायसंपिष्टंमोदकंगुडमर्पयेत्॥ विनायकस्यजननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमंज
लिं॥ रूपंदेहियशोदेहिसौभाग्यंसुभगेमम॥ पुत्रंदेहिधनंदेहिसर्वान्कामांश्चदेहिमे॥ भोजयेद्ब्राह्मणान्दद्याद्वस्त्र
युग्मंगुरोरपि॥ विनायकंग्रहान्प्रार्च्यशेषंकर्मफलंलभेत्॥ ॥इत्याग्नेयेविनायकस्नानं॥ ॥पुष्करउवाच॥ ॥स्ना

माहेश्वरं वक्ष्ये राजादेर्जयवर्द्धनं॥ दानवेंद्राय बलये पत्तिशादेशनापुरा॥ भास्करेत्रिपदे पवित्रप्रातः संस्नापयेच्छुचैः॥
ॐ नमो भगवते रुद्राय धवलपांडरोपवितत स्मान्नलिप्तगात्राय॥ तद्यथा जय जय सर्वान्शत्रून् नमुक मस्मकलहवि
वादेषु॥ भंज २ ॐ मंथ २ सर्वप्रत्यर्थिकान् योसौ युगांतकाले दिधक्षति इमां पूजां रौद्रमूर्त्तिः सहस्रांशुः॥ शुक्लच्छातेरक्षंतुजी
वितं संवर्त्तकाग्नितुल्यश्च त्रिपुरांतकरः परः॥ सर्वदेवमयः सोपि तव रक्षंतु जीवितं॥ लिखि २ लिलिखि २ स्वाहा॥ एवं
स्नानेन तु मंत्रेण जुहुयात्तिलतंडुलं॥ पंचामृते स्तु संस्नाप्य पूजयेच्छूलपाणिनं॥ स्नानान्यन्यानि वक्ष्यामि सर्वदा विज
यायते॥ स्नानं घृतेन कथितं आयुषो वर्द्धनं परं॥ सोमायन च लक्ष्मीः स्यात् गोमूत्रेणाघमर्द्दनं॥ क्षीरेण बलवृद्धिः स्या
द् ध्यालक्ष्मी विवर्द्धनं॥ कुशोदकेन पापघ्नं पंचगव्येन सर्वभाक्॥ शतमूलेन सर्वाप्तिर्गोशृंगोदकतोघतं॥
पलाशबिल्वकमलकुशस्नानं तु सर्वदं॥ वचाहरिद्रे द्वे मुस्तं स्नानं रक्षोहणं परं॥ आयुष्यं च यशस्यं च धर्ममे
धाविवर्द्धनं॥ हैमाद्भिश्चैव मांगल्यं रूप्यतमोदकेन पा॥ रत्नोदके स्तु विजयः सौभाग्यं सर्वगंधकैः॥ फलाभिश्चत्वपा
रोग्यं धात्र्यद्भिः परमां श्रियं॥ तिलसिद्धार्थकैर्लक्ष्मी सौभाग्यं च प्रियंगुणा॥ पद्मोत्पलकदंबैश्च श्रीबलं बलात्रयोर
कै॥ विष्णुपादोदकं स्नानं सर्वस्नानेभ्य उत्तमं॥ एकाकी एकनामापि लोकान्विधिवच्चरेत्॥ आर्कं दं छत्रिसक्तेन
बध्नीयान्मणिकंकरे॥ कुष्टपाठावचायष्टीशंखो नोहादिको मणि॥ सर्वेषामेव नामानामीश्वरो भगवान्हरिः॥

तस्य संपूजनाद्देवः सर्वान्कामान्समश्नुते॥ स्नापयित्वा घृतक्षीरैः पूजयित्वा वपित्तहा॥ पंचमंगं बलिं दत्वात्य
तिसारान्प्रमुच्यते॥ पंचगव्येन संस्नाप्य वातव्याधिविनाशये॥ द्विस्नेहसुपजान्श्लेष्मरोगहा वातिपूजया॥
घृतं तैलं तथाक्षौद्रं स्नानं तत्रैव संपरं॥ स्नाप[illegible]ताघं त्रिस्नेहममलं घृततैलकं॥ क्षौद्रमिक्षुरसं क्षीरं स्नानं त्रि
मधुरं स्मृतं॥ घृतमिक्षुरसं तैलं क्षौद्रं च द्रूरसं श्रिये॥ अनुलेपस्त्रि शुक्लस्तु कर्पूरोसीरचंदनं॥ चंदनागरकर्पूरमृ
गदर्पैः सकुंकुमैः॥ पंचानुलेपनं विष्णोः सर्वकामफलप्रदं॥ त्रिसुगंधं च कर्पूरं तथा चंदनकुंकुमे॥ मृगदर्पं च
कर्पूरं चंदनं च त्रिशीतकं॥ पीतानि शुक्लवर्णानि तथा शुक्लानि भार्गव॥ कृष्णानि चैव रक्तानि पंचवर्णानि निर्दि
शेत्॥ उत्पलं पद्मजाती च त्रिसितं हरिपूजने॥ कुंकुमं रक्तपद्मानि त्रिरक्तं रक्तमुत्पलं॥ धूपदीपादिभिश्चार्च्य
विष्णुं शांतिर्भवेन्नृणां॥ चतुरस्रं करं कुंडे ब्राह्मणाश्चाष्टषोडश॥ लक्षहोमं कोटिहोमं तिलाज्ययवधान्यकैः॥ ग्र
हानभ्यर्च्य गायत्र्या सर्वशांतिकमाभवेत्॥ ॥इत्याग्नेये लक्षहोमादि॥ ॥पुष्कर उ०॥ कर्मसांवत्सरं राज्ञं
जन्मर्क्षं पूजयेद्व्रतं॥ मासि मासि च संक्रांतौ सूर्यसोमादिदेवताः॥ अगस्त्यस्योदये गस्तिं नाठमासं हरिं यजेत्॥
शापकोत्थापने पंच दिनं कुर्यात्समुत्सवं॥ प्रोष्ठपदे सितेपक्षे प्रतिपत्प्रभृतिक्रमात्॥ शिविरात्पूर्वदिग्भागे शक्र
भवने चरेत्॥ तत्र चक्रध्वजं स्थाप्य शचीं शक्रं च पूजयेत्॥ अष्टम्यां वाद्यघोषेण तांतु देवं प्रवेशयेत्॥ एका

दद्यंसो पवासो वा दद्यंपा के तुमुत्थितं ॥ यजेत्स्वस्वादिसंवीतं घटस्थो खुरपसची ॥ वृद्धर्षिं च द्विजा मित्र इत्र हस्ता
कनूासनः ॥ देवदेव महाभाग त्वं हि भूमिप्रहतां गतः ॥ त्वं प्रभुस्त्वाम्वतं श्चैव सर्वभूतहिते रत ॥ त्वनंतेजो वैराजा
यशो जयविवर्द्धनः ॥ तेजस्ते वर्द्धयंत्येते देवाः शक्रा सुरर्षिभिः ॥ ब्रह्मविष्णु महेशानि कार्त्तिकेयो विनायकः ॥ आ
दित्या वसवो रुद्रा साध्या भृगवो दश ॥ मरुद्गणाः लोकपाला ग्रहा पेक्षादिनिम्नागाः ॥ समुद्रा श्रीमहागौरी
चंडिका च सरस्वती ॥ प्रवर्त्तयंतु ते तेजो ते जयशाकंशाचीपते ॥ तवचापि जसां निसंप्रमसंपद्यतां सुश्रानां ॥ प्रसीद राज्ञां
वि प्राणं प्रजानामपि सर्वशः ॥ भव त्वसादात्पृथिवी नित्यं सस्यवती भवेत् ॥ द्विजैविघ्नंतु निर्विघ्नं साम्यतां मंतयो
प्रइ ॥ मंत्रेणैं द्रेसमभ्यर्च्य जितन्स्वर्गमाप्नुयात् ॥ नक्काले घटे लिख्य द्रजयेदाश्विने जयेत् ॥ शुक्लपक्षे तपाष्ट
म्यां आयुधं धर्मकं ध्वजं ॥ छत्रं च राजलिंगानि शस्त्रा संकुसुमासिमि ॥ जागत्तिशिबलिंदद्यात्द्वितीयेह्नि पुनर्य
येत् ॥ तत्र काश्चद्रकाली च दुर्गा दुर्गा त्रिशूलिणि ॥ त्रैलोक्य विजयेचंडि मम शत्रौ जयो भव ॥ नीराजनविधिं वक्ष्ये
शात्यां मंदिरं चिरेत् ॥ ततो रणविजये शत्रु हे देवान्यजेत्सदा ॥ चित्रां स्वक्ष पदास्वातिं सविता प्रतिपद्यते ॥ ततः
प्रभृति कर्त्तव्यं यावस्वातौ कविस्थितः ॥ ब्रह्मा विष्णुश्च शंभुश्च शक्रश्चैवानलानिलौ ॥ विनायकः कुमारश्च
वरुणा धनदो यमः ॥ विश्वेदेवा वैश्रवसंगजाश्चाष्टौ च तान्यजेत् ॥ कुमुदैरावतौ पद्मपुष्पदंतश्च वामनः ॥ सु

प्रतीको ंजनो नीलः ष्टजाकाप्यग्निहादिषु ॥ पुरोधा जुहुयात्पादाज्यं समिद्धिर्धाज्यकं तिलां ॥ कुंभाष्टौ पूजितास्वातिः स
स्त्राप्पुस्वगजोत्तमः ॥ अश्वधः स्वाच्यादिदेपिंडां स्ततो हि श्रयमंगजात् ॥ निष्क्रामयेत्तोरणेस्तु शोध्य वादिनं लुंघयेत्
निष्क्रमेयुः स्ततः सर्वे राजा लिंगं च हेयजेत् ॥ वरुणे वरुणं प्राच्य रात्रौ भूत बलिं ददेत् ॥ विशाखां सा गजेत्स्वयं आश्र
मे निवसेन्नृपः ॥ अलंकुर्यादिने तस्मिन्वाहनं तु विशेषतः ॥ पूजिता राजलिंगाश्च कर्त्तव्या नरहस्तगाः ॥ मंत्रितांश्च
समारुह्यतो रणे न विनिर्गमेत् ॥ बलिं विभज्य विधिवद्राजा कुंजर धूर्गतिः ॥ उग्रकालीं च निवृत्य सा दीपेत निरं
तरं ॥ राजयेदक्षिणं कुर्यात्रीन्वारं सुसमाहितः ॥ एवं कृत्वा गृहं गच्छेद्विसर्जित जनो जपे ॥ शांतिर्नीराजनश्चेयं
वृद्धये रिपुमर्द्दिनी ॥ ॥ इत्याग्नेये नीराजनादि ॥ छत्रादिमंत्रान्वक्ष्यामि यैस्तत्पूज्य जपादिकं ॥ ब्रह्मणः सत्यवाक्येन
सोमस्य वरुणस्य च ॥ सूर्यस्य च प्रभावेन वर्द्धस्व त्वं महाद्युते ॥ पांडुराभ्रप्रतीकाश हिमकुंदेंदुसप्रभ ॥ पद्मा बु
दच्छेदपतेविश्वा वा पे मां वृद्धुंधर ॥ तथा छादय राजानं विजयारोग्यवृद्धये ॥ गंधर्वकुलजातस्त्वं मा भूयाः कुलदूषक ॥
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ प्रभावाश्च हुताशस्य वर्द्धस्व त्वं तरंगमे ॥ तेजसा चैव सूर्यस्य मुनीनां त
पसा तथा ॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥ स्मर त्वं राजपुत्रोसि कौस्तुभं तु मणिं स्मर ॥ यां गतिं ब्रह्महा गच्छे
त्पितृहा मातृहा तथा ॥ भूम्यर्थे घृतवादी च क्षत्रियश्च पराङ्मुखः ॥ व्रजेस्त्वं तां गतिं क्षिप्रं मा तत्पापं भवेत्तव ॥ विकृ

तिंमापगरुडस्त्वं युद्धे ध्वनिपुरंगमा ।। रिपून्विनिघ्नन्समरे सहतश्च सुखीभव ।। शक्रकेतो महावीर्य सुपर्णस्त्वामुपाश्रि
तः ।। पतत्रिराड्वैनतेयस्तथा नारायणः ध्वजः ।। काश्यपोऽमृताहर्त्ता नागारिर्विष्णुवाहनः ।। अप्रमेयो दुराधर्षो र
णे देवारिसूदनः ।। महाबलो महावीर्यो महाकायोऽमृताशनः ।। गरुत्मान्मारुतगतिस्त्वयि संनिहितस्तथा ।। विष्णु
ना देवदेवेन शक्रार्थं स्थापितो ह्यसि ।। जयाय तव मे नित्यं वृद्धये च बलस्य च ।। साश्ववर्मायुधान्योधान्रक्षास्माक
रिपून्दह ।। कुमुदैरावणः पद्मः पुष्पदंतोऽथ वामनः ।। सुप्रतीकोंऽजनो नील एते ष्टौ देवयोनयः ।। तेषां पुत्राश्च पौत्राश्च
श्च वनान्यष्टौ समाश्रिताः ।। भद्रो मन्दो मृगश्चैव गजः संकीर्ण एव च ।। वने वने प्रसूतास्ते स्मर योनिं महागज ।। पातु त्वां
वसवो रुद्रा आदित्याः समरुद्गणाः ।। भर्त्तारं रक्ष नागेन्द्र समयः परिपाल्यताम् ।। ऐरावणाधिरूढस्तु वज्रहस्तः शतक्र
तुः ।। पृष्ठतोऽनुगतस्त्वेवं रक्षतु त्वां स देवराट् ।। अवाप्नुहि जयं युद्धे स्वस्थश्चैव सदा व्रज ।। अवाप्नुहि बलं चैवैरावणस
मं युधि ।। अग्निस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवोऽनिलात् ।। अवाप्नुहि बलं चैवैरावणसमं युधि ।। अग्निस्ते सोमाद्ब
लं विष्णोस्तेजः सूर्याज्जवोऽनिलात् स्थैर्यं गिरेर्जयं रुद्राद्यशो देवात्पुरंदरात् ।। युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ।।
पश्विनौ सह गंधर्वैः पातु त्वां सर्वतो दिशम् ।। मनवो वसवो रुद्रा वायुः सोमो महर्षयः ।। नागाः किन्नरगंधर्वा यक्षभूतग
णा ग्रहाः ।। प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह ।। शक्रः सेनापतिः स्कंदो वरुणश्चास्ति तस्त्वपि ।। प्रदहंतु रिपून्स

र्वान्राजा विजयमृच्छतु ।। यानि प्रयुक्तान्यरिभिर्भूषणानि समंततः ।। पतंतु तव शत्रूणां हतानि तव तेजसा ।। कालनेमि
वधे यत्त्वं रिपुनरघातने ।। हिरण्यकशिपोर्युद्धे देवासुरे पुरा च ।। शोभितासि तथैवाद्य शोभस्व समयं स्मर ।। नि
लश्वेतासि मां दृष्ट्वा नश्यन्तु नृप शत्रवः ।। व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ।। पूतना रेवती लेखा कालरात्री
ति पठ्यते ।। दहन्त्वाशु रिपून्सर्वान्पताके त्वामुपाश्रिताः ।। सर्वमेधे महायज्ञे देवदेवेन शूलिना ।। सर्वेण जगतश्चैव सारे
ण त्वं विनिर्मितः ।। नंदकस्यापरां मूर्त्तिं स्मर शत्रुनिबर्हण ।। नीलोत्पलदलश्याम कृष्णदुःस्वप्ननाशन ।। असिर्विश
सनः खड्गस्तीक्ष्णवर्त्मा दुरासदः ।। श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च ।। इत्यष्टौ तव नामानि यानि प्रोक्तानि स्वयं
भुवा ।। नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ।। रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः ।। राजानं रक्ष निस्त्रिंशो सब
लं सपुरं तथा ।। पिता पितामहो देवः स त्वं पालय सर्वदा ।। शर्मप्रदस्त्वं समरे धर्मसेनायमोऽस्यसि ।। रक्ष मां रक्ष
णीयोऽहं तवानघ नमोऽस्तु ते ।। दुंदुभे त्वं सपत्नानां घोषात् हृदयकंपनः ।। भव भूमिपसैन्यानां तथा विजयवर्द्धनः ।।
यथा जीमूतघोषेण हृष्यन्ति वरवारणाः ।। तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ।। यथा जीमूतशब्देन स्त्रीणां त्रा
सोऽभिजायते ।। तथा तु तव शब्देन त्रस्यन्तास्मद्विषो रणे ।। मंत्रैः सदार्चनीयास्ते योजनीया जयादिषु ।। घृतकंबल
वरिष्ठादेस्त्वाभिषेकं तु वत्सरे ।। राज्ञोऽभिषेककर्त्तव्यो दैवज्ञेन पुरोधसा ।। ।। इत्याग्नेये मंत्राद्या ।। ।। पुष्करउवाच ।।

त्रिपुरंजघ्नुषुपूर्वंब्रह्मणाविष्णुपंजरं॥शंकरस्यद्विजश्रेष्ठरक्षणायनिरूपितं॥वागीशेनचशक्रस्यबलंहंतुंप्र
यास्यत॥तस्यस्वरूपंवक्ष्यामितत्वंशृणुजयादिषत्॥विष्णुःप्राच्यांस्थितश्चक्रीहरिर्दक्षिणतोगदी॥प्रतीच्यांशा
र्ङ्गधृग्विष्णुर्जिष्णुःखड्गीममोत्तरे॥हृषीकेशोपिकोणेषुतच्छिद्रेषुजनार्दनः॥क्रोडरूपीहरिर्भूमौनरसिंहोंबरेम
म॥क्षुरांतममलंचक्रंभ्रमत्येतत्सुदर्शनं॥अस्यांशुमालादुःप्रेक्ष्यंहंतुंप्रेतनिशाचरान्॥गदाचेयंसहस्रार्चिःप्रदीप्त
पावकोज्ज्वला॥रक्षोभूतपिशाचानांडाकिनी॥शार्ङ्गविस्फूर्जितंचैववासुदेवस्यवेयद्रिपून्॥तिर्यङ्मनुष्यकूष्मांडप्रे
तादीन्हंत्वशेषतः॥खड्गधाराज्वलज्ज्योत्स्नानिर्धूतायेसमाहिताः॥तेयांतुसौम्यतांसद्योगरुडेनेवपन्नगाः॥येकूष्मां
डास्तथायक्षायेदैत्यायेनिशाचराः॥प्रेताविनायकाःक्रूराःमनुष्याजंभकाःखगाः॥सिंहादयश्चपशवोदंदशूकाश्चपन्न
गाः॥सर्वेभवंतुतेसौम्याःकृष्णशंखरवाहताः॥चित्तवृत्तिहरायेमेयेजनाःस्मृतिहारकाः॥बलौजसांचहर्तारश्छायावि
भ्रंशकाश्चये॥येचोपभोगहर्तारोयेचलक्षणनाशकाः॥कूष्मांडास्तेप्रणश्यंतुविष्णुचक्ररवाहताः॥बुद्धिस्वास्थ्यंम
नःस्वास्थ्यंस्वास्थ्यमैंद्रियकंतथा॥ममास्तुदेवदेवस्यवासुदेवस्यकीर्तनात्॥पृष्ठेपुरस्तान्ममदक्षिणोत्तरेविकोण
तश्चास्तुजनार्दनोहरिः॥तमीड्यमीशानमनंतमच्युतंजनार्दनंप्रणिपतितोनसीदति॥यथापरंब्रह्महरिस्तथाप राम॰
रंजगत्स्वरूपंचसएवकेशवः॥सत्येनतेनाच्युतनामकीर्तनात्प्रणाशयेत्तुत्रिविधंममाशुभं॥इत्याग्नेयेविष्णुपंजरं॥ २५८

पुष्कर उवाच॥सर्वार्थसाधकामंत्राश्चतुर्वर्गप्रसाधकाः॥ऋगथर्वतथासामयजुःसंख्यातुलक्षणं॥भेदसंख्योपनत्वै
कन्नाश्वलायनोद्वितीयकः॥शतानिदशमंत्राणांब्राह्मणंद्विसहस्रकं॥ऋग्वेदोहिप्रमाणेनस्मृतोद्वैपायनादिभिः॥
एकोनविंशसहस्रेतुमंत्राणांचयजुस्तथा॥शतानिदशविप्राणांषडशीतिश्चशाखिकाः॥कण्वेमध्यंदिनीसंज्ञाकठेमध्ये
कठीतथा॥मैत्रायणीयसंज्ञाचतैत्तिरीयाभिधानिका॥वैशंपायनिकेत्यादौशाखायजुषिसंस्थिताः॥सामकौथुमसंज्ञै
काद्वितीयाथर्वणायना॥गानान्यपिचचत्वारिवेदआरण्यकंतथा॥उत्थ्यऊहंचतुर्थंचमंत्रानवसहस्रकाः॥सचतुःश
तकाश्चैवब्रह्मसहस्रकाःस्मृताः॥पंचविंशतिरेवात्रशाखामानंप्रकीर्तितं॥सुमंतुर्जाजलिश्चैवश्लोकायनिरथर्वके॥
शौनकःपिप्पलादश्चमुंजकेशादयोपरे॥मंत्राणामयुतंचाष्टशतंचोपनिषच्छतं॥व्यासरूपीसभगवान्शाखाभेदाद्य
कारकः॥शेषाभेदादयोविष्णुरितिहासंपुराणकं॥प्राप्यव्यासात्पुराणादिसूतोवैरोमहर्षणः॥सुमतिश्चाग्निवर्चा
श्चमित्रयुःशांशपायनः॥अकृतव्रणोथसावर्णिःषट्शिष्यास्तस्यचाभवन्॥शांशपायनादयश्चक्रुःपुराणानांतुसंहि
तां॥ब्रह्मादीनिपुराणानिहरिविद्यादशाष्टच॥महापुराणेत्वाग्नेयविद्यारूपोहरिःस्थितः॥सप्रपंचाच्चनिःप्रपंचो
मूर्तामूर्तस्वरूपधृक्॥तंज्ञात्वाभ्यर्च्यसंस्तूयभुक्तिमुक्तिमवाप्नुयात्॥विष्णुर्विष्णुर्भविष्णुश्चअग्निसूर्यादिरूपवा
न्॥अग्निरूपेणदेवादेर्मुखंविष्णुःपरागतिः॥वेदेषुसपुराणेषुयज्ञमूर्तिःप्रगीयते॥आग्नेयाख्यंपुराणंतुरू

पोविल्लेमहित्तरं॥ आग्नेयाख्यपुराणस्य कर्त्ताग्नोताजनार्द्दनः॥ तस्मात्पुराणमाग्नेयं सर्ववेदसंमतं महत्॥ सर्ववि
द्यामयं पुण्यं सर्वज्ञानमयं वरं॥ सर्वात्मिहरिरूपं हि पठतां शृण्वतां नृणां॥ विद्याविनां च विद्यादेमर्थिनां श्रीकरं
प्रदं॥ राज्यार्थिनां राज्यदं च धर्मदं धर्मकामिनां॥ स्वर्गार्थिनां स्वर्गदं च पुत्रदं पुत्रकामिनां॥ गवादिकामिनां गो
दं ग्रामदं ग्रामकामिनां॥ कामार्थिनां कामदं च सर्वसौभाग्यसंप्रदं॥ गुणकीर्त्तिप्रदं नृणां जयदं जयकामिनां॥
सर्वेच्छानां सर्वदं तु मुक्तिदं मुक्तिकामिनां॥ पापघ्नं पापकर्त्तृणां माग्नेयं हि पुराणकं॥ ॥इत्याग्नेये पुराणे वेदशा
स्त्रादिकीर्त्तनं॥ ॥पुष्कर उ०॥ ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये॥ सहस्रदशतं ब्राह्मं लिखित्वा संप्रदाप
येत्॥ वैशाख्यां पूर्णमास्यां च स्वर्गार्थी जलधेनुवत्॥ साहस्रं पंच पंचाशत् पाद्मं दद्याद्धेनुमत्॥ वराहकल्प
वृत्तांतमधिकृत्य पराशरः॥ तयोविंशतिसाहस्रं वैष्णवं प्राह वाचयेत्॥ जलधेनुमदाराषाढ्यां विष्णोः पदम
प्नुयात्॥ चतुर्विंशसहस्राणि वायवीयं हरप्रियं॥ श्वेतकल्पप्रसंगेन धर्मान्वायुरिहाब्रवीत्॥ दद्याल्लिखित्वा तद्विप्रेश्रा
वण्यां गुडधेनुमत्॥ यत्राधिकृत्य गायत्रीं कीर्त्यते धर्मविस्तरः॥ वृत्रासुरवधोपेतं तद्भागवतमुच्यते॥ सारस्वतस्य क
ल्पस्य प्रोष्टपद्यां तु तद्वदेत्॥ अष्टादशसहस्राणि हेमसिंहसमन्वितं॥ यत्राह नारदो धर्मान् बृहत्कल्पाश्रितानिह॥
पंचविंशत्सहस्राणि नारदीयं तदुच्यते॥ सधेनुं चाश्विने दद्यात्सिद्धिमात्यंतिकीं लभेत्॥ यत्राधिकृत्य शकुनान्ध

र्मधर्मविचारणा॥ कार्त्तिक्यां नवसाहस्रं मार्कंडेयमथार्पयेत्॥ अग्निना यद्वसिष्ठाय प्रोक्तं चाग्नेयमेव तत्॥ लिखि
त्वा पुस्तकं दद्यान्मार्गशीर्षे स सर्वदः॥ षोडशैव सहस्राणि सर्वविद्यावबोधनं॥ चतुर्दशसहस्राणि भविष्यं सूर्य
संभवं॥ भवस्तु मनवे प्राह दद्यात्पौष्यां गुडादिमत्॥ सावर्णिना नारदाय ब्रह्मवैवर्त्तमीरितं॥ रथंतरस्य वृत्तांतम
ष्टादशसहस्रकं॥ माघ्यां दद्याद्वराहस्य चरिते ब्रह्मलोकभाक्॥ यत्राग्निलिंगमध्यस्थो धर्मान्प्राह महेश्वरः॥ आ
ग्नेयेकल्पे तत्रैवमेकादशसहस्रकं॥ तं दत्वा शिवमाप्नोति फाल्गुन्यां तिलधेनुमत्॥ चतुर्विंशसहस्राणि वरा
हं विष्णुनेरितं॥ भूम्यै वराहचरितं मानवस्य प्रवर्त्तितं॥ सहेमगरुडं चैत्र्यां पदमाप्नोति वैष्णवं॥ [illegible]शीतिसा
हस्रं च स्कंदे स्कंदेरितं महत्॥ अधिकृत्य सधर्मांश्च कल्पे तत्पुरुषे पयेत्॥ मनंदशसाहस्रं धौम्यकल्पे हरेक
था॥ दद्याच्छरदि विषुवे धर्मार्थादिविबोधनं॥ कूर्मं सप्तदशसहस्रं कूर्मोक्तं च रसातले॥ इंद्रद्युम्नप्रसंगेन दद्यात्तं
हेमकूर्मवत्॥ चतुर्दशसहस्राणि मात्स्यं कल्पादितोब्रवीत्॥ मत्स्यो हि मनवे दद्याद्विषुवे हेममत्स्यवत्॥ गरु
डोन्विंशसहस्रं विष्णूक्तं तार्क्ष्यकल्पके॥ विश्वांडगरुडोत्पत्तिं तद्दद्याद्धेमहंसवत्॥ ब्रह्मा ब्रह्मांडमाहात्म्यमधिकृत्या
ब्रवीत्तु यत्॥ तच्च द्वादशसाहस्रं ब्रह्मांडं तद्द्विजे पयेत्॥ तच्च द्वादशसहस्रं ब्रह्मांडं तद्द्विजेर्पयेत्॥ भारते पर्वसमाप्तौ
वस्त्रगंधस्रगादिभिः॥ वाचकं पूजयेदादौ भोजयेत्पायसैर्द्विजान्॥ गोभूहेमसुरत्नादि दद्यात्सर्वाणि पर्वणि॥

अ०पु० समाप्ते श्रावतो विप्रं सहितां पुस्तिकां यजेत्॥ शुभे देशे निवेश्याथ क्षौमवस्त्रादिनावृतं॥ नरनारायणौ पूज्यौ पुस्त
२६० काकुसुमादिभिः॥ गोनुगं हेम दत्वार्घ्यं भोजयित्वा क्षमापयेत्॥ महादानानि देयानि रत्नानि विविधानि वि॥
मयेको द्वौ त्रयो मासे मासे प्रदापयेत्॥ अयनादौ श्रावकस्य दानमादौ विधीयते॥ श्रोतृभिः सकलैः कार्यं श्रा
वकस्य तु पूजनं द्विजे॥ इतिहासपुराणानां पुस्तकानि प्रयच्छति॥ पूजयित्वा परारोग्यं स्वर्गमोक्षयावाप्नुयात्॥ इ
त्याग्नेये पुराणदानानि॥ ॥ अग्निरुवाच॥ ॥ सूर्यवंशसोमवंशराज्ञां वंशं वदामि ते॥ हरेर्ब्रह्मा पद्मगोभूत् मरीचि
ब्रह्मणः स्मृतः॥ मरीचेः कश्यपस्तस्माद्विवस्वांस्तस्य पत्न्यपि॥ संज्ञा राज्ञी प्रभा तिस्रो राज्ञो रैवतपुत्रिका॥ रेवंतं
सुषुवे पुत्रं प्रभात्वं च प्रभातरवेः॥ त्वाष्ट्री संज्ञा मनुं पुत्रं यमलौ यमुनायमं॥ छाया संज्ञा च सावर्णिं मनुं वैव
स्वतं सुते॥ शनिं च तपतीं विष्टिं संज्ञायां चाश्विनौ पुनः॥ मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः॥ इक्ष्वाकुश्च
वनाभागो धृष्टः शर्यातिरेव च॥ नरिष्यंतस्तथा प्रांशुर्नाभागो दिष्ट सप्तमाः॥ करूषश्च पृषध्रश्च अयोध्यायां महा
बलः॥ कन्येला च मनोरासीद्बुधात्तस्यां पुरूरवाः॥ पुरूरवसमुत्पाद्य सा सुद्युम्नत्वमागता॥ सुद्युम्नादुत्कलस
यौ विनतास्त्रयो नृपाः॥ उत्कलस्योत्कलं राष्ट्रं विनतस्य पश्चिमा॥ दिक्ता सर्वराजपुत्रस्य गयस्य तु गया पुरी॥ राम०
वशिष्ठवाक्यात्सुद्युम्नः प्रतिष्ठानमवाप ह॥ तत्पुरूरवसे प्रादात्सुद्युम्नो राज्यमाप्य तत्॥ नरिष्यकः शकाः पुत्रा ना २६०

भागस्तु वैश्यकः॥ अंबरीषः प्रजापालो धार्ष्टकं धृष्टतः कुलं॥ सुकन्यानर्तौ शर्यातिरथानर्तोत्तानृपः॥ आन
र्त्तविषयश्चासीत्पुरी चास्य कुशस्थली॥ रेवस्य रैवतः पुत्रः ककुद्मीनाम धार्मिकः॥ ज्येष्ठपुत्रः शतस्यासीद्राज्यं
प्राप्य कुशस्थलीं॥ स कन्यासहितः श्रुत्वा गांधर्वं ब्रह्मणोंतिके॥ मुहूर्तं भूतं देवसमा मर्त्ये युगं गतं॥ आजगा
म जवेनाथ स्वां पुरीं यादवैर्वृतां॥ कृतां द्वारवतीं नाम बहुद्वारां मनोरमां॥ भोजवृष्ण्यंधकैर्गुप्तां वासुदेवपुरोगमैः॥
रेवतीं बलदेवाय प्रदायाज्ञातवान्निमतां॥ तपः सुमेरुशिखरे तप्ता विष्णोर्लयं गतः॥ नाभागस्य तु पुत्रौ द्वौ वैश्यौ
ब्राह्मणतां गतौ॥ करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्मदाः॥ पृषध्रस्तु वृषघ्नो गां विंशयित्वा गुरोः शापं॥ मनुपुत्राद
येवाके विकुक्षिर्हि वबाकुमृत॥ विकुक्षेस्तु ककुत्स्थोऽभूत् तस्य पुत्रः सुयोधनः॥ तस्य त्वः पृथुनाम विश्वगश्वः पृथुः
सुतः॥ आयुस्तस्य च पुत्रोऽभूद्युवनाश्वस्तथा सुतः॥ युवनाश्वस्य श्रावस्तः पूर्वे श्रावस्तिका पुरी॥ श्रावस्ताद्बृहदश्वो
भूत्कुवलाश्वस्ततो नृपः॥ धुंधुमारात्रयो नृपा दृढाश्वो दंड एव च॥ कपिलो दृढाश्वाद्धर्यश्वः प्रमोदकः॥ हर्यश्वा
न्निकुंभो भूत् संहताश्वो निकुंभतः॥ अकृताश्वो रणाश्वश्च संहताश्वसुतावुभौ॥ युवनाश्वो रणाश्वस्य मांधाता यु
वनाश्वतः॥ मांधातुः पुरुकुत्सोऽभून्मुचुकुंदो द्वितीयकः॥ पुरुकुत्सात्त्रसदस्युः संभूतो नर्मदा भवः॥ संभूतस्सुधन्वा
भूत्त्रिधन्वा यस्सुधन्वनः॥ त्रिधन्वनस्तु रुणतस्य सत्यव्रतसुतः॥ सत्यव्रतात्सत्यरथो हरिश्चंद्रस्ततस्सुतः॥ हरिश्चंद्राद्रोहि
सु त

ताच्चोरोहिताश्वाद्वृकोऽभवेत्॥ वृकाद्बाहुरभूद्राजा बाहोर्वंशास्तस्य च प्रियो प्रभा षष्टिसहस्राणां सुतानां जननी भूत्॥ तु
ष्टादौर्वान्नृपादेकं भानुमत्यसमंजसं॥ खनंतः पृथिवीं दग्धा विष्णुना बहुसागराः॥ असमंजसोंशुमांस्य दिलीपोंऽशुम
तोऽभवेत्॥ भगीरथो दिलीपात्तु येन गंगावतारिता॥ भगीरथात्तु नाभागो नाभागोदंबरीषकः॥ सिंधुद्वीपोंबरीषा
त्तु श्रुतायुः स्यात्सुतः स्मृतः॥ ऋतायोऋतपर्णोऽभूत्तस्य कल्माषपादकं॥ कल्माषांघ्रिसर्वकर्माघुनरस्तनलोऽभवेत्॥
अनरण्यस्तु निघ्नाद्य अनिमित्ररघुस्ततः॥ रघोरजो दिलीपस्तु दिलीपोचाप्यजो नृपः॥ दीर्घबाहुरजाकालस्तज्जापा
लस्ततोऽभवेत्॥ तस्माद्दशरथो जातस्तस्य पुत्रचतुष्टयं॥ नारायणात्मकास्ते वै रामस्तस्याग्रतोऽभवत्॥ रावणांत
करो राजा ययोध्यायां रघूत्तमः॥ वाल्मीकिर्यस्य चरितं चक्रे तन्नारदश्रुतात्॥ रामपुत्रौ कुशलवौ सीतायां कु
लवर्द्धनौ॥ अतिथिश्च कुशाज्जज्ञे निषधस्तस्य चात्मजः॥ निषधात्तु नलो जज्ञे नभो जायत वै नलात्॥ नभसः पुंड
रीकोऽभूत्सुधन्वा वै ततोऽभवत्॥ सुधन्वतो देवानीकोऽहीनाश्वस्तत्सुतः॥ अहीनाश्वात्सहस्राश्वश्चंद्रालोकस्त
तोऽभवत्॥ चंद्रावलोकात्तारापीडोऽस्माच्चंद्रपर्वतः॥ चंद्रगिरेर्भानुरथः श्रुतायुस्तस्य चात्मजः॥ इक्ष्वाकुवंश राम॰
प्रभवाः सूर्यवंशधराः स्मृताः॥ ॥ इत्याग्नेये सूर्यवंशकथनं॥ ॥ अग्निरुवाच॥ सोमवंशं प्रवक्ष्यामि पवित्रं पाप २६१
नाशनं॥ विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरात्रितः॥ सोमश्चक्रे राजसूयं त्रैलोक्यं दक्षिणां ददौ॥ समाप्तेऽवभृ

थे सोमं तद्रूपालोकनेन वः॥ कामबाणाभितप्तांगो नवदेव्यः सिषेविरे॥ लक्ष्मीर्नारायणं त्यक्त्वा सिनीवाली च कर्दम
हं॥ द्युतिर्विभावसुं त्यक्त्वा पुष्टिर्धातारमव्ययं॥ प्रभा प्रभाकरं त्यक्त्वा हविष्मंतं कुहूः स्वयं॥ कीर्तिर्जयंतं भर्तारं
वसुर्मारीचकश्यपं॥ धृतिस्त्यक्त्वा पतिं नंदीं सोममेवाभजत्तदा॥ स्वकीया इव सोमोऽपि कामयामास तास्त
दा॥ एवं कृतापचारस्य तासां भर्तृगणस्तदा॥ न शशाकापकाराय शापैः शस्त्रादिभिः पुनः॥ सप्तलोकैकनाथत्व
मवाप्तस्तपसा ह्यसौ॥ विबभ्राम मतिस्तस्य विनतानतोहताः॥ बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीं॥ जह
रत्तरसा सोमो ह्यवगम्यांगिरः सुतं॥ ततस्तद्युद्धमभवत्प्रख्यातं तारकामयं॥ देवानां दानवानां च लोकक्षयकरं मह
त्॥ ब्रह्मा निवार्योशनसं तारामंगिरसे ददौ॥ तामंतः प्रसवां दृष्ट्वा गर्भं त्यजाब्रवीद्गुरुः॥ गर्भस्त्यक्तः प्रदीप्तोथ प्राहाहं सो
मसंभवः॥ एवं सोमाद्बुधः पुत्रस्तस्य पुरूरवा॥ स्वर्गं त्यक्त्वोर्वशी सं तं वरयामास चाप्सराः॥ तया सहावसद्राजा द
शवर्षाणि पंच च॥ पंच षट् सप्त चाष्टौ च दश चाष्टौ महामुने॥ एकोग्निरभवत्पूर्वं तेन त्रेता प्रवर्तिता॥ पुरूरवा योगशीलो
गांधर्वलोकमीयिवान्॥ आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान्वसुः॥ दिविजातः शतायुश्च सुषुवे चोर्वशी नृपाः॥ आयु
षो नहुषः पुत्रो वृद्धशर्मा रजिस्तथा॥ दंभो विपाप्मा पंचाख्यं राजपुत्रशतं त्वभूत्॥ राजयाऽति विख्यातो विष्णुदत्तवरो
रजि॥ देवासुरे रणे दैत्यानवधीत्सुरयाचितः॥ इंद्राय पुत्रतां राज्यं दत्वा दिवं गतः॥ राजपुत्रैर्हृतराज्यं शक्रस्याय

श्र॰पु॰
२६२

सुडमनाः॥ग्रहत्वांत्पादिविधिनागुरुरिंद्रापतेददौ॥मोहयित्वारजिसुतानात्मतेजिन्धर्मगाः॥नहुषस्यसुताःसप्तयति
र्ययातिरुत्तमः॥तद्भुवःपंचमश्चैवसप्ततिमेघपालिकौ॥पतिःकुमारभावोपिविष्णुध्यात्वास्वतिगतः॥यदवयानिश्रुक्र
कन्यामपातेगन्यन्ततपा॥हषपर्वजान्त्रामिष्टात्वोस्वंसेपुसहस्रजे॥तालौजिकोरघुकोष्टःशतजित्पसहस्रजित॥सह
जिर्हैहयोवेणुहयोहयइतित्रयः॥धर्मनेत्रोहैहयस्यनमनेत्रस्यसंहितः॥सहिमाससहस्यासौसहिन्मोमहसेनकः॥भद्र
सेनोडर्दमोभद्रर्दमान्कुनकोभवत्॥कनकात्कृतवीर्यस्तुकृताग्निःकरवीरकः॥कृतौजाश्चतुर्थोभूत्सकृतवीर्यात्तुसो
ते र्जुनः॥दानार्जुनापतपसेनद्वीपयमंडलां॥ददौवक्रुसहस्रंचजयत्वरणारिणं॥त्रधार्मवर्त्तमानस्यविष्णुइस्ता
स्वतिंक्रवान्॥दशापत्नसहस्राणिसोर्जुनस्कृतवान्नपः॥अनष्टद्रव्यताराष्ट्रेतस्यसंस्मरणादभूत्॥नकृनेकार्त्त
वीर्यस्यसत्तिंयास्यंतिवैनृपाः॥यज्ञैर्दानैःतयोभिश्चविक्रमेणाश्रुतेनचा॥कार्त्तवीर्यस्यचशतंपुत्राणांयोथवैपुरा
स्तरसेनश्चसस्यधृष्टोक्तःकृस्मरावच॥जयध्वजश्चनामासीदावत्योनृपतिर्महान्॥जयध्वजांकुलेजेघस्तालजंघ
स्ततःसुतः॥हैहयानांकुलाःपंचभोजाश्चावर्णयस्तथा॥वीतिहोत्राश्चयथातास्चोडिकेरास्तथैवच॥वीतिहोत्राद
षस्मान्मृत्यवंतांडुर्जयोनृपः॥क्रोष्टोर्वंसंप्रवक्ष्यामियत्रजातोहरिःस्वयं॥क्रोष्टोस्तुवृजिनीवांस्तुस्वाहाभूद्वृजिनी
वतः॥स्वाहापुत्रोरुषगुश्चतस्यचित्ररथःस्मृतः॥शशबिंदुश्चित्ररथचक्रवर्त्तीहरौरतः॥शशबिंदोस्तुपुत्राणांशत

राम
२६२

नामभवत्सुते॥धीमतांचारुरूपाणांभूरिद्रविणतेजसां॥प्रथुश्रवाःप्रधानोभूत्तस्यपुत्रोसुयज्ञकः॥सुयज्ञस्योशनापु
त्रस्तितिक्षुस्यसनास्तुतः॥तितिक्षोस्तुमरुत्तोभूत्तस्मात्कंबलबर्हिषः॥पंचाशद्रुक्मकवचानरुक्मेषुपृथुरुक्मकः॥
ह्रविषुमिघवान्वघात्यामथस्त्रीजितोभवत्॥सैव्यापीतमघादासीद्विदर्भस्तस्यकौशिकः॥लोमपादःक्रथःश्रेष्ठाधृति
स्पाद्रोमपादतः॥कैशिकस्यचिदिपुत्रस्तस्माद्वैद्यान्नृपास्मृताः॥क्रथ्याद्वैदर्भपुत्रात्कुंतीकुंतेस्तुधृष्टकः॥धृष्टस्मा
तिधृतिस्तस्यउदर्कोरथ्योविहरथः॥दशाहपुत्रोव्यामस्तुव्योमजीमूतउच्यते॥जीमूतपुत्रोविकलस्तस्यभीमरथा
सुतः॥भीमरथान्नवरथस्ततोहृदरथोभवेत्॥सुकृतिश्चहृढरथात्सुकृतेश्चकरंतकः॥करस्तादेवरातोभूद्देवक्षत्र
श्चतत्सुतः॥देवक्षत्रान्मधुर्नाममवोद्भविरसोभवत्॥डरसात्सुरस्त्तोभूत्तात्ठरासीत्त्रुतत्सुतः॥पुपीतुपादपोराजा
जंतुपुत्रस्तुसाश्वतः॥सत्वतेतेजमानश्चहृष्टिवत्ककरएकएवच॥देवाहृधश्चचत्वारोस्तेषांवंशास्तुविश्रुताः॥भज
मानस्यबाह्योभृद्विषिकृमिनिमिस्तथा॥देवाहृधात्बभ्रुरासीत्तस्यश्लोकोत्रगीयते॥यथैवशृण्मोमाहूराद्रूपस्तत्व
मंतिकान्॥बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवाहृधःसमः॥चत्वारश्चसुनोबभ्रोर्वासुदेवपरान्नृपाः॥कुकुरोपजमानस्तु
स्तितिकंबलबर्हिषः॥कुकुरस्यसुतोधृष्णुधृष्णोस्तुतनयोधृतिः॥धृतेःकपोतरोमाभूत्तस्यपुत्रस्तुतित्तिरः॥तित्तिरे
स्तुनरपुत्रेःस्तस्यचंदनदंदुभिः॥पुनर्वसुस्तस्यपुत्रःआहुकश्चाहुकीसुता॥आहुकादेवकोपज्ञेउग्रसेनस्ततोप

म॥ देवधानुपदेवश्च देवकस्य सुताः स्मृताः॥ तेषां सुमारसप्तासन्वसुदेवाय तान्ददौ॥ देवकी श्रुतदेवी च मित्रदेवी यशो
धरा॥ श्रीदेवी सत्यदेवी च सुरापी चेति सप्तमी॥ नवोग्रसेनस्य सुताः कंसस्तासं च पूर्वजः॥ न्यग्रोधश्च सुनामा च कंक
संकुश्च भूमियः॥ सुतनू राष्ट्रपालश्च युधमुष्टिः सुमुष्टिकः॥ भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः॥ राजाधि
देवशूरश्च विदूरथसुतो भवत्॥ राजाधिदेवपुत्रौ द्वौ सेसोहश्वेतवाहनः॥ स्वणोस्वस्य सुता पंच समी शत्रुजिता द
यः॥ समीपुत्रः प्रतीक्षत्रः प्रतिक्षत्रश्च भोजकः॥ भोजस्य हृदिकः पुत्रो हृदिकस्य दशात्मजाः॥ कृतधर्मा पातधन्वा देव
र्होभीषणादयः॥ देवार्हत्किस्मलश्च स्तु समोजास्त ततो भवेत॥ सुदंष्ट्रश्च सुतास्तस्य धृष्टो महाशो जसः॥ गांधारी चैव
माद्री च धृष्टभार्ये बभूवतुः॥ सुमित्रो भूतगांधार्या माद्री जज्ञे युधाजितं॥ आनमित्रं शनिर्धृष्टात्ततो वै देवमीढचः॥
अनमित्रसुतो निघ्नो निघ्नस्यापि प्रसेनकः॥ सत्राजितः प्रसेनोऽथ मणिं सूर्यात्स्यमन्तकं॥ प्राप्यारण्ये चरं तं तु सिंहो हत्वाग्र
ही मणिं॥ हतो जांबवता सिंहो जांबवान्हरिणा जितः॥ तस्मान्मणिं जांबवतीं प्राप्यागो द्वारकापुरी॥ सत्राजिताय प्र
ददौ शूतधन्वा जघान तं॥ हत्वा शतधनुं कृष्णो मणिना यश्च कीर्तिमाक्॥ बलभद्रसमक्षं यो अक्रूरान्मणिमर्पयेत्॥
मिथ्याभिशापशिरः कृष्णः स्वस्व लोका सर्गवित्संपवन्॥ भक्षकारः सत्यभामा सत्यभामा हरेः प्रियाः॥ अनमित्राच्छिनिर्जज्ञे तेशवु
कस्तु शिनेः सुतः॥ सकालस्तस्य किंजितु पुधानां जलिर्यन्मृतः॥ धुनेर्युगंधरः पुत्रः स्वात्योऽस्मात्सयुधाछितः॥ कृष्णभः श्व

फल्को तस्य कृष्णभात्सत्यफल्ककः॥ श्वफल्कपुत्रौ ह्यक्रूरोऽक्रूरात्तु वसुधन्वकः॥ शूरात्तु वसुदेवाद्याः पृथा पांडोः प्रियाभव
त्॥ धर्मात्युधिष्ठिरः पांडोर्वा तिकुंत्यां वृकोदरः॥ इंद्रो धनंजयो माद्र्यां नकुलः सहदेवकः॥ वासुदेवाच्च रोहिण्यां रा
मसारणदुर्गमौ॥ वसुदेवाच्च देवक्यां मादो जातः सुखेणकः॥ कीर्तिमान्भद्रसेनश्च ऋजुध्यारितुदारकः॥ भद्रदे
हः कंसपेतान्षड्गर्भाञ्जिघान ह॥ ततो धन्वन्तवुः कृष्णः सुभद्रा भद्रभाषिणी॥ चारुदेष्णश्च साम्बः कृष्णाज्जांबव
तीसुताः॥ ह्यत्याग्रेये पड्वंशोत्पत्तिः॥ अथ भिरूपा च॥ कश्यपो वसुदेवो भूद्दितिर्देवकीवरा॥ देवक्यां वसुदेवात्तु
कृष्णो भूत्तपसान्वितः॥ धर्मसंरक्षणार्थाय तु धर्महरणाय च॥ पालनाय सुरादेश्च दैत्यादेर्मथनाय च॥ रुक्मिणी
सत्यभामा च सत्या नाग्नजिती प्रिया॥ सत्यभामा हरेः सेव्या गांधारी लक्ष्मणा तथा॥ मित्रविंदा च कालिंदी देवी जांबवती
तथा॥ सुशीला च तथा माद्री कौशल्या विजया च या॥ एवमादीनि देवीनां सहस्राणि तु षोडश॥ प्रद्युम्नाद्याश्च रुक्मि
ण्यां भीमाद्याः सत्यभामया॥ जांबवत्यां च सांबाद्याः कृष्णस्यासं स्तथा परे॥ शतं शतसहस्राणां पुत्राणां तस्य धीम
तः॥ अशीति श्च सहस्राणि यादवाः कृष्णरक्षिताः॥ प्रद्युम्नस्य तु वैदर्भ्यामनिरुद्धो रणप्रियः॥ अनिरुद्धस्य वज्राद्याय
दवा सुमहाबलाः॥ तिस्रः कोट्यो यादवानां षष्टिलक्षाणि दानवाः॥ मानुष्ये लाधकास्ते तु तन्नाशाय बभूव ह॥ कर्तुं
कर्म स्ववर्गानं मानुषे जायते हरिः॥ देवासुराणां संग्रामाद्दशार्थं द्वादशाभवन्॥ प्रथमो नारसिंहस्तु द्वितीयो वामनो

अ॰पु॰
२६७

रणः॥ संग्रामस्त्वथवाराहश्चतुर्थोमृतमंथनः॥ तारकामयसंग्रामः षष्ठोह्याजीविकोरणः॥ त्रैपुरश्चांधकवधो नवमो वृत्र
घातनं॥ जितो हालाहलश्चाथ घोरकोलाहलो रणः॥ हिरण्यकशिपोश्चोरो विदार्य च नखैः पुरा॥ नारसिंहो देवपालः
प्रह्लादं कृतवान्नृपं॥ देवासुरे वामनश्च छलित्वा बलिमूर्जितं॥ महेंद्राय ददौ राज्यं काश्यपादितिसंभवः॥ वराहस्तु हि
रण्याक्षं हत्वा देवानपालयत्॥ उज्जहार भुवं मग्नां देवदेवैरभिष्टुतः॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा च वासुकिं॥
सुरासुरैर्ममंथाब्धिं देवेभ्यश्चामृतं ददौ॥ तारकामयसंग्रामे तदा देवाश्च पालिताः॥ निवार्येंद्रं ह्री देवपालः स्वगुरू
न्देवाननु सोमवंशाकृत॥ विश्वामित्रवसिष्ठ्यां डरकयोश्चरणे सुरान्॥ आजीपलैतो निवार्य रागद्वेषादिदानवा
न्॥ पृथ्वीरथे ब्रह्मयन्तृरुद्रस्याससारो हरिः॥ ददाह त्रिपुरं देवपालको दैत्यमर्दनः॥ गौरीं जिहीर्षुणा रुद्रमंधके
नार्दितं हरिः॥ अनुरक्तपरैरन्ना चक्रे बान्धासुरार्दने॥ अपांफेनमयो भूत्वा देवासुरसुरेरहरो भवत्॥ वृत्रं देवहरं वि
ष्णुर्देवधर्ममपालयत्॥ शाल्वादीन्दानवान्जित्वा हरिः परशुरामकः॥ अपालयन्भुवादीस्तु दुष्टक्षत्रं निहत्य
च॥ हालाहलं विषं दैत्यनिराकृत्य महेश्वरात्॥ मर्यादानिर्नाशयामास देवानां मधुसूदनः॥ देवासुरे रणे यं च दैत्यं
कोलाहलो जितः॥ पालिताश्च सुराः सर्वे विष्णुनाधर्मपालनात्॥ राजानो राजपुत्राश्च मुनयो देवता हरिः॥ यदुक्तं य
च नैवोक्तमवतारा हरेरिमे॥॥ इत्याग्नेये द्वादशसंग्राम॥॥॥ अग्निरुवाच॥ ॥उर्वश्यास्य सुतो वह्नी आनुस्तस्य च

को

राम॰
२६७

त्मजः॥ गोभानुस्त्रैशानिस्त्रैशानेस्तु करंधनः॥ करंधमान्मरुत्तोभूद्दुष्मंतस्तस्य चात्मजः॥ दुष्मंतस्तस्य वरुथोभू
द्गांडीवक्रस्तत्सुतः॥ अंडीराश्चैव गांधारपंचजनपदास्ततः॥ गांधारकेरलाश्चोलापांड्यकोलामहाबलाः॥ द्रु
ह्योस्त्वबभ्रुः सेतुस्तु वस्तुः सोपुरुवसुः॥ ततो गांधारो गांधाराभिधमेधिर्माधृतोभवत्॥ धृतास्ते विदुषस्तस्मात्प्रचेता
स्तस्य वै शतं॥ अनजत्य सभानुस्तु सभानुस्तु परमेषकः॥ सभानरात्कालानलकाशानलजन्मंजयः॥ पुरंजयश्च
जयस्य तस्तुत्रो जनमेजयः॥ तस्तुत्रस्तु महाशालस्तस्य पुत्रो भून्महामनाः॥ तस्मादुशीनरो ब्रह्मन्नृगायां तु नृगस्त
तः॥ नवायास्तु नवस्यासीत्कृमिस्तु कृमितः सुतः॥ दर्शनासर्वतोयत्वेदशा धन्वांशिविस्तथा॥ शिवेःपुत्रास्तु चत्वा
रः पृथुदर्भश्च वीरकः॥ पुंड्रः कलिंगो बालेया बलियोगीवरानतः॥ अंगाद्दधिवाहनोभूत् तस्माद्दिविरथोन्नृपः॥
दिविरथाद्धर्मरथस्तस्य चित्ररथस्सुतः॥ चित्ररथात्सत्यरथो लोमपादश्च तत्सुतः॥ लोमपादाच्चतुरंगः पृथुला
क्षश्च तत्सुतः॥ पृथुलाक्षाच्च चंपोभूद्धर्यंगको भवत्॥ हर्यंगाश्च भद्ररथो बृहत्कर्मा च तत्सुतः॥ तस्मादभूद्बृ
हज्जातु बृहद्भानो बृहात्मवान्॥ तस्माज्जयद्रथो जज्ञे जयद्रथाद्दृढरथो नृपः॥ दृढरथाद्विश्वजितो कर्णो विश्वजितोऽ
भवत्॥ कर्णस्य वृषसेनस्तु वृषसेनस्तदात्मजः॥ एते गंगजा भूपाः पौरोवंशं निबोध मे॥॥ इत्याग्नेये राजवंशो॥
अग्निरुवाच॥॥ पुरोर्जन्मेजयो भूत्वा प्राचीन्वांस्तत्सुतस्सुतः॥ प्राचीन्वतान्मनस्युस्तस्मात्तमयो नृपः॥ धुंधुर्वीतमयो
ही

श्चान्मृत्युन्नोवह्निविधिः सुतः॥ बह्निविधाच्च संजातिः वहोवादी च तत्सुतः॥ तस्य पुत्रो घनन्दाख्यो नन्दा स्वस्य दत्रात्म
जाः॥ रुचेयुश्च रुषेयुश्च सन्नातेयुस्तथात्मजः॥ घृतेयुश्च चितेयुश्च स्थंडिलेयुश्चैव सत्तमः॥ धर्मेयुसन्नतेयुश्च
रुचेयोर्मतिनारकाः॥ तंसुराघः प्रतिरथः सुवस्तोमतिनारजाः॥ आसीत्प्रतिरथात्कदः कदान्मेधातिथिस्त्व
भूत्॥ तत्सुरोघाच्च चत्वारोड्डष्टतोर्थप्रवीरकः॥ रुष्टुतश्चानपोवीरोड्डष्टनाम्नवतीभवत्॥ शाकुंतलायांत्वलीपस्य
नाम्नो त्वभारतः॥ सुते ष्टुमातृकोयेन नष्टेषु भरतस्य वी ततो मरुद्भिरानीयपुत्रस्य तु बृहस्पतेः॥ संक्रामितो भरद्वा
जः क्रतुभिर्जितितोभवत्॥ सचापिवितथापुत्रान्जरयामास पंचवै सुहोत्रं वसुहारं च पंगगतिथेव च॥ कपिलं
चमहात्मानमुकेतुं च सुनवयं॥ कौशिकं च स्पृत्सयतिकृत्स्यातः धृतसुतः॥ ब्राह्मणाः क्षत्रियावैश्याः काशोदी
घतमासुतः॥ ततोधन्वंतरिश्चासीत्तत्सुतो भूत्केतुमान्॥ केतुमंतोहेमरथोदिवोदास इति श्रुतः॥ प्रतर्दि
नोदिवोदासाद्भर्गवत्सो प्रतर्दनात्॥ वत्सादलर्कआसीच्च अलर्कात्क्षेमकोभवेत्॥ क्षेमकाद्वर्षकेतस्तु वर्षकि
तोविभुः स्मृतः॥ विभोरानर्तपुत्रोभूद्धिनोश्च सुकुमारकः॥ सुकुमारात्मकेतुर्वंशभूमिस्तु वाङ्काता॥ सहो
त्रस्य बृहत्सुत्रो बृहत्सुसुतास्त्रयः॥ अजमीढो द्वितीयश्च पुरुमीढश्च वीर्यवान्॥ अजमीढस्य केशिन्यां जज्ञे जह्नुः
प्रतापवान्॥ दक्षोर भूद्जंकोशातथाकाश्च स्तदात्मजः॥ बलाकाश्च सकुशिकः कुशाकांगाधिरिंद्रकः॥ गाधेः

सत्यवतीकन्याविश्वामित्रः सुतन्नमः॥ देवरातकृतिमुखो विश्वामित्रस्य ते सुताः॥ शुनःसेपोष्टकश्चान्योत्यजमी
ढासुतो भवत्॥ नीलिष्यांसंतिरपरः पुरंजातिः सुशांतितः॥ पुरुषोजाते स्तु बात्याश्चो बात्याश्चा त्यंचपार्थि
वः॥ सुकुल्लश्टंजयश्चैवराजद्दृहदिषुस्तथा॥ यवावरश्च नंभिलः पांचाला इति विश्रुतः॥ मुकुलस्यात मौकुल्या
तन्नोपेताद्विजातयः॥ वचाश्वो मुकुलाज्जज्ञे दंचाश्वोमिथुनोत्यभूत्॥ शिवोदासोश्च हल्याच त्रहेन्यायां शिर
श्वतान्॥ शतनंदः शतानंदात्संवंधन्मिथुने ततः॥ कृपः कृपीदिवोदासान्मित्रेयः सोमपस्ततः संजयामा
त्यं च धेनुः सोमदत्तश्च तत्सुतः॥ सहदेवः सोमदत्तात्सहदेवात्तु सोमकः॥ श्चासीत्तु सोमकाजंतु जंतोहस्स
९ तत्रांततिः॥ एषता द्रुपदस्तस्मा धृष्टद्युम्नोयतत्सुतः॥ धृष्टकेतुश्च धूमिन्यां मुखो भूदजमारुतः॥ जक्षा
त्स पुरुणोजज्ञे कुरुसत्वरणान्ततः॥ यः प्रजागादनिःक्रम्य कुरुक्षेत्रे श्वकारतत्॥ कुरुक्षेत्रेत्वासु धनुः परि
क्षिवारिसंजयः॥ सुधन्वनः सुहोत्रोभूत्सुहोत्रा च्यवनोत्यतः॥ वसुमत्रे ष्टो परिचरासमासन्नगिरिकासुताः॥
बृहद्रथः यक्कुशाधीरोयदूः प्रत्यग्रहोबलः॥ मत्स्यकालीकुशाग्यातोयासीनाजाबृहद्रथात्॥ कुशाग्रा
दृषभोजज्ञे तस्य स्तत्यहितस्ततः॥ सुधन्वातत्सुतश्चोर्जो दासिच संभवः॥ संभवो च जरोसत्तासहदेवश्च
तत्सुतः॥ सहदेवाद्देवादाधिश्चउदायेः श्रुतशर्मकः॥ परिक्षितस्य दायादो धार्मिको जनमेजयः॥ जनमेज

अ०पु०
२६६

यात्रयपस्तोस्क यक्षास्तु सुरथः सुतः ॥ श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः ॥ जनमेजयस्य पुत्रौ स्तु सुरथो
महिमास्तथा ॥ सुरथाच्चित्ररथो भूद्दक्षश्चासीद्विदूरथात् ॥ ऋक्षस्तु द्वितीयस्तस्माद्भीमसेनोभवत्सुतः ॥ प्रतीपो
भीमसेनात्तु प्रतीपस्य तु शांतनुः ॥ देवापिर्बाह्लिकश्चैव सोमदत्तस्तु शांतनोः ॥ बाह्लिकोत्सोमदत्तो भूद्भूरिभू
रिश्रवाः शलः ॥ गंगायां शांतनोर्भीष्मः काश्यां विचित्रवीर्यकः ॥ धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् ॥
पांडोर्युधिष्ठिरो कुंत्यां भीमश्चैवार्जुनस्त्रयः ॥ नकुलः सहदेवश्च पांडोर्माद्र्यां वदेवतः ॥ अर्जुनस्य च सौभद्रः
परीक्षिदभिमन्युतः ॥ द्रौपदी पांडवानां पंच प्रियास्तस्यां युधिष्ठिरात् ॥ प्रतिविंध्यो भीमसेनाच्छ्रुतकीर्तिर्धनंजया
त् ॥ सहदेवाच्छ्रुतशर्मा समानीकस्तु नाकुलिः ॥ भीमसेनाद्धिडिंबायां सोमदत्तश्चासीद्घटोत्कचः ॥ एता भूता भ
विष्याश्च नृपाः संख्या न विद्यते ॥ गताः कालेन कालो हि हरिस्तं पूजयेद्द्विजः ॥ होममंत्रोतमुं हित्वा पक्रुरु सर्वप्रदेय
तः ॥ ॥ इत्याग्नेये सोमवंशः ॥ ॥ अग्निरुवाच ॥ ॥ आयुर्वेदं प्रवक्ष्यामि सुश्रुताय मब्रवीत् ॥ देवो धन्वंतरिः सारं स्
तसंजीवनीकरं ॥ ॥ सुश्रुत उ० ॥ ॥ आयुर्वेदं मम ब्रूहि नराश्वेतरुगर्दनं ॥ सिद्धयोगान्सिद्धमंत्रान्मृतसंजीवनी राम.
करान् ॥ धन्वंतरिरुवाच ॥ ॥ रक्षस्व संहिद्धरितं लंघितं भोजयेद्भिषक् ॥ सविश्वं लाजमक्षुन्नद्ज्वरांतु मम्लं तंज २६६
लं ॥ मुस्तपर्पटको शीरचंदनोदीच्य नागरैः ॥ षडंगेन व्यतिक्रांतौ तस्मकं कंपायसेद्यं ॥ स्नेहयेल्लंकदोषं तु तवस्तु

विरेचयेत् ॥ जीर्णाः षष्टिकनीवाररक्तशालिप्रमोदकाः ॥ तद्विधास्ते ज्वरे स्त्विष्टा यवतां विकृतास्तथा ॥ मुद्गामसूराश्च
णकाः कुलत्थाश्च मकुष्ठकाः ॥ आहकालावकापाश्च कर्कोटककविद्गकं ॥ पटोलं च फलं निंबपर्पटं दाडिमं तथा ॥
च धोवमं घनं शांगु मृद्गं गे च विरेचनं ॥ रक्तपित्ते तथापानं षडंगं तु विवर्जितं ॥ सक्तुगोधूमलाजाश्च पलाशशालि
मसूरकाः ॥ सक्तुश्च चणकामुद्गमत्स्यगोधूमको हिताः ॥ गोधेनामत दुग्धाप्योक्षोके षवसोमधु ॥ अतीसारि
पुराणानां शालिनां भक्षणं हितं ॥ अरनिष्पंन्द्याबान्लोघ वत्सकसंयुतं ॥ मरुतं वर्जयेद्बद्ध्यत्नाकार्येगुल्मेषु
सर्कशः ॥ पटोक्षीरेणवा श्रीयाप्तामुकं घृतसाधितं ॥ गोधूमगोमयूस्तिक्ता हिता जठरिणामथ ॥ पंचकोलं जांग
लाश्च निंबधान्यपटोलिकाः ॥ मातुलिंगरसाजानिस्तक्षमूलकसैंधवाः ॥ कुष्ठिनां च तथागं तं पानार्थं बृहिरो
रोदकं ॥ मसूरमुद्गाप्यार्थं जोज्याजीर्णाश्चशालयः ॥ निंबपर्पटकेशाके जांगलानां तथा रसः ॥ विडंगमरिचं मु
स्तं कुष्ठं लोध्रं सुवर्चिकां ॥ मनः शिला च वा लेयः कुष्ठयेस्तत्र पीडितः ॥ अन्पपक्वष्टगुल्मा षपवाघामिहिनां हि
ताः ॥ यवानु क्विक्तिं मुद्गकुलत्थाजीर्णशालयः ॥ तिक्तकरुशाणिशाकानि तिक्ता निहरिता विचा ॥ तैलानि तिलसिद्
कवि भीतकं गुदानि च ॥ मुद्गामसपरागो धूमाः धान्यवर्षाल्हितत्त्वपत् ॥ जांगलश्च रसः शस्तो भोज नेरा जपक्षिणं ॥
कोलन्बमोक्रकोलास्तु शुष्कामूलकजांगलैः ॥ पृष्टेचाविज्वरेसिद्धे रधिदाडिमसाधितैः ॥ मातुलिंगरसोक्षुद्गकाक्षा

च०पु० २६१

योगो द्विसंस्कृतैः॥ यवगोधूमशाल्यन्नैर्भोजयेच्छ्वासकाशिनं॥ दशमूलबलारास्नाकुलत्थैरुपसाधिताः॥ पेयायूषरसाः
कासश्वासहिक्कानिवारणाः॥ शुष्कमूलककौलत्थमूलजांगलजैरसैः॥ यवगोधूमशाल्यन्नैर्जीर्णमासासीरमाचरेत्॥
शोफवान् सगुडां पथ्यां खादेत्वा गुडनागरं॥ तक्रस्य चित्रकस्योभौ ग्रहणीरोगनाशनौ॥ पुराणयवगोधूमशालयो जां-
गलो रसः॥ सुरामलककर्खजूरमृद्वीकाबदराणि च॥ मधुसर्पिःपयस्तक्रं निंबपर्पटकौ हितं॥ तक्रारिष्टाश्च शस्यंते स-
ततं वातरोगिणां॥ रूक्षो मिष्टो विरेच्यस्तु पिप्पलीजो हिक्किनाहितं॥ तक्रं वा नालसीधूनियुक्ता निशि शीतं नसा॥ यु-
क्तासीच चर्व्वलाजाजिमद्यं शस्तं सदात्यये॥ सक्षौद्रे पयसा लाक्षां पिबेत्क्षतवान्नरः॥ क्षयं यक्ष्मरसाहारो वह्नि-
संरक्षणाजयेत्॥ गालयोजनतक्रानीनीवारः क्रमशादयः॥ यवान्नविकृतिर्मांसरसकासो वर्चलं न्नाटी॥ पथ्या
तथैव कासस्य मंडातक्रं च वारुणं॥ खुस्तास्यामसत्यालेपविद्राकणहरिद्रया॥ यवान्नविकृतिः शालिवास्तूकं
समवर्चलं॥ त्रपुषे दारुणे धूमाक्षीरे क्षुघृतसंयुतः॥ मूत्रकृच्छ्रे वशासास्तु यावेमंडसुरादयः॥ लाजाश्च कस्त-
या क्षौद्रं मुन्मंमासं घरूपकं॥ वार्ताकलावणिस्विन्नमूढिपापामकान्विता॥ शाल्यन्नं नो पयसा कंबलो हिसं घृते
पिबा॥ कूर्ममुस्तगुड्योः क्षुद्रिकावामुखे घृताः॥ तवाबुपिरुधिंपूपं छक्कमूलकजं तथा॥ शाकं पयो लवेतुत्रमु
रुतं गविनाशनं॥ मुकानुक्रमस्सराणां सतिलैर्मुद्गलैरसैः॥ ससैंधवघृतश्लाक्ष्णामलककोलजैः॥ यूषैः पु

त्री
द्या

राम २६१

राणगोधूमयवशालान्नमस्नसेत्॥ विसर्पिस्विशताक्षौद्रमद्धीकादाडिमोदकं॥ रक्तपित्तिकगोधूमयमसुद्गादिकं
मधुः॥ काकमाली चक्क्राग्रं वास्तुकं च सुचर्चवला॥ वानशोणितनाशयतीयं शस्तं शिता मधु॥ नाशारोगेषु च
हितघृतं दूर्वाप्रसाधितं॥ भृंगराजरसो सिद्धं तैलं धात्रीरसे पिबा॥ नस्य सर्वामये श्रेष्ठं मृक्तं तं तु नवे पुच॥ शी-
ततोपानपानस्थितिलानां विमर्जक्षणं॥ द्विजवीर्यकरं प्रोक्तं तस्य ममुष्टिकरं परं॥ गंडूषं तिलतैलेन द्विजदार्ढ्य
करं परं॥ विडंगचूर्णं गोमूत्रं सर्वक्रिमिनाशने॥ धात्रीफलाज्यधान्यं च शिरोलेपनमुत्तमं॥ शिरोरोगविना-
शाय स्निग्धमोष्टश्चभोजनं॥ तैलं वा नस्तुमूत्रं वा कर्णपूरणमुत्तमं॥ कर्णशूलविनाशाय सद्वृश्चिकानिवा द्विज
गिरिमृत्त्वं दनेलाक्षामालती कलिकातथा॥ संयोज्य या कृता वर्तिरिकतस्य कण्डू रीतसा॥ ज्योषंत्रिफलया युक्तं
तद्दृक्श्वेतयाजलं॥ सर्वाक्षिरोगशमनं तथा चैव रसांजनं॥ आप्यहरं शिनाशं लोध्रकं जिकसैंधवैः॥ श्वा-
श्वोतनं विनाशाय सर्वनेत्रामयाहितं॥ गिरिमृत्त्वं दनैर्लेपो बहिर्नेत्रस्य शस्यते॥ नेत्रामयविघाता यंत्रिफलं
गीजयेत्सदा॥ रात्रौ तु मधुसर्पिर्भ्यां दीर्घमायुर्जिजीविषुः॥ शतावरीरसे सिद्धो हृद्यौ क्षीररसे स्मृतौ॥ कलविंकं
तिमान मचूर्णो क्षीरघृतौ तथा॥ आमुष्यात्रिफलात्तेया पूर्वबन्मधुकान्विता॥ मधुकायोरजोपेता वलिपलि-
तनाशनी॥ वचासिद्धघृतं विषमूलदोषाविनाशनं॥ कथं बुद्धिप्रदं चैव तथा सर्वार्थसाधनं॥ बलाकल्ककषाये

अ.पु. २६८ पासिद्धमन्नेजनंहितं॥रास्नासहचरैर्वापितैलंवातविकारिणं॥अनभिस्यंदिपक्वान्नंतद्व्रणेषुप्रशस्यते॥शाकपिंडी
तथैवास्नायावनायप्रशस्यते॥यक्षसश्चतथाभेदेनिंबचूर्णंचरोपणे॥तथाश्रसुपचारश्चबलिकर्मविशेषतः
सूतिकाचतथारक्षाप्राणिनांतुसदाहिता॥भक्षणंनिंबपत्राणांसर्पदष्टस्यभेषजं॥तालनिंबकदंबश्चजीरसं
तैलयवाघृतं॥धूपोदष्टकदष्टस्यलिपिपत्रघृतेनवा॥अर्कक्षीरेणसंपिष्टंलोपोवीजंपलाशजं॥वृश्चिकार्त
स्यरुक्ता वाशिवायफलसंयुता॥अर्कक्षीरंतिलंपललंचगुडंसमं॥पानाज्जयतिदुर्वारंसुविषघ्नाश्वमेवतु
पिलामूलंदन्तुल्यंतंडुलीयससर्पिषा॥सर्पकीटविषाणांपाजुजयत्यनिबलान्यपि॥चंदनंपद्मकंकुष्ठंल
तांबोशीरपाटला॥निर्गुंडीसारिवामेनात्ताविषहारोगदः॥विरोविरेचनंशस्तंगुडनापरकंद्विज॥स्नेहपाने
तथावस्तौतैलंघृतमनुत्तमं॥स्वेदनेपयपरोत्तक्तिःशीतांप्रलसुनेपरं॥त्रिवृद्विरेचनेश्रेष्ठारमनेदमनेत्तथा॥व
स्तिविरेकौचमलंतैलसर्पिस्तथामधु॥वातपित्तकफानांक्रमेणपरमौषधं॥॥इत्याग्नेयेसिद्धौषधानि॥
धन्वंतरिरुवाच॥॥शारीरमानसागंतुसहजाव्याधयोमता॥शारीराज्वरकुष्ठाद्याःक्रोधाद्यामानसामताः॥
आगंतवोभिघातोत्थाःसहजाक्षुज्जरादयः॥शारीरागंतुनाशायसूर्यवारेघृतंगुडं॥लवणंसहिरण्यंचविप्र राम. २६८
योपूपमर्चयित॥चंद्रेवाभ्यंगदोविप्रेसर्वरोगैर्विमुच्यते॥तैलंशनिश्वरेदद्याद्रश्मिनेगोरसान्तुदः॥घृतेनपय

वाग्विषमाग्नयः॥भोगाश्चतथास्वप्नेवातप्रकृतिरुच्यते॥अकालेपलितक्रोधीप्रस्वेदीमधुरप्रिय॥स्वप्नेचदीप्ति
मान्नोक्तिःपित्तप्रकृतिरुच्यते॥दृढांगस्थिरचित्तश्चसुप्रजःस्निग्धमूर्द्धजः॥शुक्लांबुदस्तुस्वप्नेचकफप्रकृतिको
नरः॥तामसाराजसाश्चैवसात्विकाश्चतथास्मृता॥मनुष्यास्तुनिशार्दूलवातपित्तकफात्मिकाः॥रक्तशीतव
वायाश्चगुरुकर्मप्रवर्त्तनैः॥कृदंतभोजनाद्वायुर्देहेक्रोशाच्चतुष्पथि॥विदाहिनांतथोष्णानांमांसुस्नात्राध्वनि
सेविनां॥पित्तंप्रकोपमायातिभयेनचतथाद्विज॥अत्यंबुपानगुर्वंधभोजनाभुक्तशायिनां॥श्लेष्माप्रकोप
मायातितथायेचालसाजनाः॥वातघकत्वानिरोगानित्वातासामानिलक्षणैः॥आस्येवैरंगंकषायत्वमास्येशुष्कप
तातथा॥जृंभमाणंलोमहर्षंवातिकव्याधिलक्षणं॥नखनेत्रशिराणांतुपीतत्वंकटुतामुखे॥तृष्णादाहोष्णता
चैवपित्तव्याधितिदर्शनं॥आलस्यंचप्रसेकश्चगुरुतामधुरास्यता॥उष्णाभिलाषितावेतिश्लैष्मिकस्यतुलक्षणं
स्निग्धोष्णमन्नमभ्यंगस्तैलपानादिवातनुत्॥आज्यंक्षीरंसिताद्यंचचंद्ररश्म्यादिपित्तनुत्॥सक्षौद्रंत्रिफला
तैलव्यायामादिकफापहं॥सर्वरोगप्रशांत्यैविष्णोःध्यानंचपूजनं॥इत्याग्नेयेसर्वरोगहराण्यौषधानि॥
धन्वंतरिरुवाच॥॥गजादिलक्षणंवक्ष्येऔषधानांगणंशृणु॥रसवीर्यविपाकज्ञोनृपादीन्रक्षयेन्नरः॥रसा
स्वाद्वम्ललवणास्तोमजाःपरिकीर्तिताः॥कटुतिक्तकषायाणितथाग्नेयामहाभुजा॥त्रिधाविपाकोद्रव्यस्यकट्वम्ल

लवणस्तु कटुः॥ द्विधा तीर्यं समुद्दिष्टमुष्णं शीतं तथैव च॥ अनिर्देश्यप्रभावश्च औषधीनां द्विजोत्तम॥ मधुरश्च
कषायश्च तिक्तश्चैव तथा रसः॥ शीतवीर्याः समुद्दिष्टाः शेषास्तूष्णाः प्रकीर्तिताः॥ गुडूची तत्र तिक्तापि तस्य ह्युष्णा च
वीर्यतः॥ उष्णो कषायापि तथा पथ्या भवति मानव॥ मधुरोपि तथा माषस्तस्य उष्णः प्रकीर्तितः॥ लवणो मधु
रश्चैव विपाके मधुरौ स्मृतौ॥ अम्लो ऽम्लस्य तथा प्रोक्तः शेषाः कटुविपाकिनः॥ वायेपाको विपर्यस्ते प्रभावस्तत्र
निश्चयः॥ मधुरोपि कटुः पाको यथा क्षौद्रं प्रकीर्तितं॥ क्वाथवत् षोडशगुणविवर्द्धं द्रव्यचतुष्पलं॥ कल्कनैषा कषाय
स्य यत्र नोक्तो विधिर्भवेत्॥ कषायं तु भवेत्तोयं स्नेहपाके चतुर्गुणं॥ द्रव्यतुल्यं समुद्धृत्य द्रव्यस्नेहं क्षिपेद्बु
धः॥ तावन्मात्रं द्रव्यस्य स्नेहपादं ततः क्षिपेत्॥ तोयं तु तत्र तद्द्रव्यं स्नेहद्रव्यं तथा भवेत्॥ सर्वत्रिनोषधपाकस्त्वे
ष्टानां परिकीर्तितः॥ तच्चुर्म्मं ताभिन्नेष्कं प्मत तथा भवतुस्रस्रुतः॥ स्तुत्स्यौषधकार्ये च कषायाश्चोक्तवद्भवेत्॥
स्नेहे चूर्णस्मिन्निर्दिष्टं कषायस्य चतुष्पलं॥ मध्ये मैषा स्मृता मात्रा कृतिमात्राविकल्पना॥ वयः कालं बलं वह्नि
देशं द्रव्यं रुजं तथा॥ समवेक्ष्य महाभाग मात्रायाः कल्पना भवेत्॥ सौम्या स्तन्न रसाः प्रायो विज्ञेया धातुवर्धनाः॥ राम॰ २६७
दोषा एव श्लेष्मवाहनं तां द्रव्यं स सगुणं नय॥ तदेव हरुयते यं विपरीतं क्षयावहं॥ उपस्तम्भनयं त्यक्त्वा देहेस्मि
न्मनुसत्तमः॥ आहारं मैथुनं नैद्रा तेषु यत्नं सदा भवेत्॥ असेवता सेवनाश्च अत्यंतं नाशमाप्नुयात्॥ स्व

यस्य बृंहणं कार्यं स्थूलदेहस्य कर्षणं॥ रक्षणं मध्यकायस्य देहभेदास्त्रयो मताः॥ उपक्रमं द्वयं प्रोक्तं तर्पणं चापतर्पणं॥
हिताशी यमिताशी यजीर्णाशी जीवतं तथा भवेत्॥ औषधीनां पंचविधा तथा भवति कल्पना॥ रसः कल्कः शृतः शीतः फांटश्च मा
नुजोत्तमाः॥ रसस्तु पीडितो ज्ञेयः कल्कमालोडितो भवेत्॥ क्वथितस्तु शृतो ज्ञेयः शीतः पर्युषितो निशां॥ सद्योऽभिषुत
पूतं यत्तत्फांटमभिधीयते॥ करणानां शतं चैव यष्टिश्चैवाधिकाः स्मृताः॥ नो वेत्ति सत्यं तं ज्ञेय सास्त्रुके बाक्र
सौंडिकः॥ आहारस्य श्रुद्धिरस्य धर्ममग्निमूलं तु णां बलं॥ ससिंधुत्रिफलाद्राक्षा तथा गुडाग्निमांतिवर्त्मदा॥ जांगलं
चरसं सिंधुयुक्तं दधि पयः कृष्णां॥ रसाधिकं समं कुर्यान्नरो वाताधिको पिवा॥ निदाघे मर्दनं प्रोक्तं शिशिरे व
समे वक्त॥ वसंते मध्यमं ज्ञेयं निदघे मर्द्दनोत्तणं॥ लवनं तु मध्यमं समयं मज्जा च तदनंतरं॥ स्नायुः रुधिरदेहेषु
श्लेष्मवाता च सा मांसलं स्कंधौ नासू तथैवेह तथा जंह्ये सहात्मनि॥ अहिवमर्दयेत्वा तोजकं च क्षच पुष्पवत्
अंगुष्ठं धिषुसर्वासु तिष्ठीड्यवकूलं तथा॥ प्रसारयेदंगुसंधीन्वाक्षेपेशयति क्रमात्॥ नाजीर्णी नाशमंकु
र्यान्न भुक्त्वा पीतवान्नरः॥ दिनसं तु मार्गे वर्द्धते मह शार्दके॥ व्यायामात्रे चकर्त्तव्यं स्नायाद्बुनास्तु नाशस्त
वा पुष्टं तु समं जक्षारुवाश्वासन्न धारयेत्॥ व्यायामस्य कफं हन्यात् वातं हन्याच्च मर्दनं॥ स्नानं पित्ताधिकं ह
न्यात्स्नस्यते चोतयाप्रियाः॥ आतपे क्षेशाकमादिक्षतारव्यायामिनो नराः॥ ॥ इत्याग्नेये आयुर्वेदः॥ ॥ अग्नि

अ० पु० रुवाच॥ ॥ वृक्षायुर्वेदमाख्यास्ये प्लक्षश्चोत्तरतःशुभः॥ प्राग्वटो याम्यतश्चाम्र आप्येश्वत्थःक्रमेण तु॥ दक्षिणादिस
२७१ मुत्पन्नाःसमीपे कंटकद्रुमाः॥ उद्यानं गृहवासे स्यात्तिलान्वाप्याथ पुष्पितान्॥ गृह्णीयान्नरोपयेद्वृक्षान्द्विजंश्चंद्र
ले हं तथा पृष्ठे चत्वारिंशाच्च पंचच॥ ग्रीवायां च तथास्थीनि जान्वेकं च तथा हनु॥ तन्मूले द्वे ललाटाक्षिमंडले सा
घ्रनासिका॥ घयसुका स्तालुकैः सर्वैः सर्वदंस्थ्विसमुते॥ द्वे शंखके कपालानि चत्वार्येव शिरस्तथा॥ उरः सप्त स्त
या स्तिति संध्यानाडे सतेदश॥ अष्टषष्टिस्तु शाखासु षष्टिश्चैव विवर्जिता॥ अंतरा तैत्रिंशति श्चाश्रयो नरस्नाताभि
च॥ त्रिंशाधिके शते द्वे तु अंतराव्ये तु सप्ततिः॥ ऊर्द्धगाः षट्शतानेव शाखास्तु कथितानि तु॥ पंचविंशीशता मृत्त्रच
तारिंशत्योर्द्धगाः॥ चतुःशतं चतुश्शाखास्वन्तराधौ च षष्टिका॥ स्त्रीणां चैकधिका वेद्या विंशतिश्चतुरुत्तरा॥
शये स्तनयोर्दश योनौ द्वे त्रयोदशा तथा॥ गर्भस्थाच चतुष्कस्य शिराणां च शरीरिणा॥ त्रिंश क्रतस हस्राणि तथा

ग॰पु॰ न्यानि नवैव तु॥ षट्पंचाशत्सहस्राणि रसं देहे व संनिता॥ एकदा राद्रवक्रसा श्चक्रे दने पादकस्य पत्॥ श्रासप्रति
३४६ स्तथा का घोरोष्मा मी हमहामुने॥ शुक्रमममिम दश्चैव रसायस्य तथा द्विजः॥ सत्वस्यैव वपित्र स्त्वंस्यस्से प्रणः शा
कृतस्तथा॥ सक्तस्यशरपस्मीनक्रमश्रोजनयोमत॥ अर्द्धहास्पधिकोसर्वापूर्वा एवंजलेमताः॥ अर्द्धांजलिश्चश्लेक
स्तजथा ईचतथोजसः॥ रजसस्तु तथा स्त्रीणां च तत्वः कथिता बुधैः॥ शरीरं मलदोषादि पिंडं कृत्वा तु विन्यसेत्॥
इत्याग्नेये शरीरनिचयः॥ ॥ अग्निरुवाच॥ ॥ उक्रानियममाख्यादिव क्ष्येथ मरणे नृणां॥ उष्मा तत्र कुपितः कार्ये
तीव्रवायुसमीरिणे॥ शरीरस्थ पदोषादिकृत्स्ना नृदो षात्र नद्विधो॥ भिन्नति प्राणस्थानानि पुनर्मर्माणि चैव हि॥
ह्रो त्यात्र कुपितो वायुरुच्छिन्न मन्विपतेतः॥ द्वे नेत्रे द्वौ तथा कर्णौ द्वौ तु नासापुटौ तथा॥ ऊर्द्धंतुषट्छिद्राणि सप्त
मं वदनं तथा॥ एतैः प्राणो विनिर्जाति प्रायशः शुभकर्मणां॥ अधः पचिरुपस्थं च अनेनाशुभकारिणः॥ मूर्द्धा
नं योगिनोभित्वा जीवोपात्य थ विच्छया॥ अंतकाले तु संप्राप्ते प्राणोपानमुपस्थितिः॥ तमसा संवृते ज्ञाने संवृते
षु च च मर्मच॥ सजीवो नान्य विष्टानश्चान्य ते मातरिश्वना॥ वाद्यमानश्चालयने अंगात् प्राणवृत्तिकाः॥ व्यवतंजा
यमानश्च प्रविशंतु श्वयोनिषु॥ मयरंपतिव संसिक्ता देवा देस्येन चक्षुषाः॥ पत्ताति तक्षणा योगश्शरीरं वमतिवा राम॰
हिकं॥ आकाशवायुतेजांसि विग्रहरूर्द्धगामिनः॥ जलं मही च पंचत्वमापन्नः पुरुषः स्मृतः॥ अतिवाहिकदेह ३४६

वुयमदूतानवर्जितं॥ याम्यं मार्गं महाघोरं षडशीतिसहस्रकं॥ अन्नोदकनीयमानो बांधवैः दत्तमश्नुते॥ यमं दृष्ट्वा
यमोक्तेन चित्रगुप्तेन च सेवितात्॥ प्राप्नोति नरकाक्रोशान् धर्मान्शुभयधेदिवं॥ भुज्यंते पापिभिर्वक्ष्ये नरकांतांश्च
पातनात्॥ अशोत्कीटातिरेबाधपक्षिप्ति नरकोटयः॥ सप्तलक्षनलस्यांते घोरे नमसि संस्थिता॥ घोरातप्रथमा
कोपेअतिघोरा च पंचमी॥ षष्ठी तरलनाबाख्या पंचमी च भयानका॥ तयोल्कटा कालरात्रीमहारात्रिश्च चंडिका॥
कोलाहलप्रचंडा च पद्मा नरकनायका॥ पद्मावती भीषणा च भीमा चैव कारालिका॥ विवराला महावज्रा त्रिकोणा
पंचकोणिकाः॥ सुदीर्घा चतिबासप्रन्त्ससा चैवाष्ट भूमिका॥ दीप्ता मायास्तातशायः कोटयः पापिडःखदा॥ अष्टा
विंशतिकोटीनां पंच पंच च नायकाः॥ रौरवाद्याः शतं चैकं चत्वारिंशाश्च तु स्पं॥ तामिस्रमंधतामिस्रं महारौरवरौरवं॥
असिपत्रवनश्चैव लोहभारं तथैव च॥ नरकं कालसूत्रं च महानरकएव च॥ संजीवनं महावीचीतपनं संप्रताप
नं॥ संघातं च ककाकोलं कुड्मलं पूतिमृत्तिकं॥ लोहशंकुस्तजपंचपत्का नं चाल्मलीनदी॥ रक्तानविद्धिकोटिस्सा
त्सनाद्यैघोरदर्शनात्॥ पातं तैः पापकर्मणि एकैकस्मिन्बुकुश्रपि॥ मार्जाराउलूकगोमायुगृध्रादिवदनाश्चतो॥
तैलद्रोण्यानयघक्षि प्ताज्वालयंति कृताशनं॥ अंबरीषेषु चैवान्या स्ताम्रपात्रेषु चापरान्॥ अयःपात्रेषु चैवामात
अवहकिकपोषु च॥ शूलाग्रारोपिताश्चान्ये छिद्यंते नरके परे॥ ताड्यंते वचकाशाभिस्तु भोज्यते च गुडान्॥ य

अ॰पु॰ ३४७ मद्यंतैः नराः पांशून्वै शरकाकफादिकान्॥तप्तमयं पाययंति खादयंति पुनर्नवान्॥पात्रैस्तु पीडयंति स्म नक्षां
तवायसादिभिः॥तैलेनोष्णेन सिच्यंते छिद्यंते नैकधा शिरः॥हाताते ति क्रंदमानाः स्वन्निंदंति च कर्म ते॥महापा
तकजान्घोरान्नरकान्प्राप्य गर्हितान्॥कर्मक्षयान्प्रजायंते महापातकिनस्त्विह॥मृगश्वशूकरोष्ट्रा
णां ब्रह्महा योनिमृच्छति॥खरपुल्कसवेन्यानां मद्यपः स्वर्णहार्यपि॥कृमिकीटपतंगत्वं गुरुगस्तृणगुल्मतां॥
ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः॥स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः॥यो येन संस्पृशत्येषां
स तल्लिंगोभिजायते॥अन्नहर्त्तामयावी स्यान्मूको वाग्ग्रहारकः॥धान्यंतत्वातिरिक्तांगः पिशुनः पूतिनासिकः॥
तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः॥परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च॥अरण्ये निर्जले देशे जा
यते ब्रह्मराक्षसः॥रत्नहारी हीनजातिर्गंधान्छछुंदरिः शुभान्॥पत्रं शाकं केकी स्त्री काकस्वमूषिको गोधान्यहार
कः॥स्यजंपत्तुपयकाकोपानमुष्ट्रः फलं कपिः॥मधु दंशः फलं गृध्रो गौहेकारत्नपक्षारं॥श्वित्री वस्त्रं श्वा रसं
च संदीलवणहारकः॥उक्त आध्यात्मिकस्तापश्शस्त्राद्यधिभौतिकः॥ग्रहाग्निदेवपीडाद्यो घोराधिदैविक
कारितः॥त्रिधा तापेहि संसारं ज्ञानयोगाद्विनाशयेत्॥कृच्छ्रैर्व्रतैश्च दानाद्यैर्विष्णुपूजादिभिर्नरः॥ ॥इत्याग्ने राम॰
ये नरकाध्यायः॥ ॥अग्निरुवाच॥ ॥संसारतापमुक्त्यर्थं वक्ष्ये ह्यष्टांगयोगकं॥ब्रह्मप्रकाशकं ज्ञानं योगस्त ३४७

त्रैकचित्तता॥चित्तवृत्तिनिरोधश्च जीवब्रह्मात्मनेपरः॥अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ॥यमाः पंच
स्मृता विप्र नियमा भुक्तिमुक्तिदाः॥शौचं संतोषतपसी स्वाध्यायो हरिपूजने॥भूतापीडा ह्यहिंसा स्यादहिं
सा धर्म उत्तमः॥यथा नागपदेन्यानि पदानि पदगामिनां॥एवं सर्वमहिंसायां धर्मार्थमपिधीयते॥उद्वेग
जननं हिंसा संतापकरणं तथा॥रुक्कृतिः शोणितकृतिः पैशून्यकरणं तथा॥हितस्याप्रतिषेधश्च मर्मो
द्घाटनमेव च॥सुखापह्नुतिसंरोधो वधो दशविधा च सा॥यद्भूतहितमत्यंतं वचः सत्यस्य लक्षणं॥सत्यं
ब्रूयात्प्रियं ब्रूयात्न ब्रूयात्सत्यमप्रियं॥प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः॥मैथुनस्य परित्यागो ब्र
ह्मचर्यं तदष्टधा॥स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं॥संकल्पोध्यवसायश्च क्रियानिर्वृतिरेव च॥ए
तन्मैथुनमष्टांगं प्रवदंति मनीषिणः॥ब्रह्मचर्यं क्रियामूलमन्यथा विफला क्रिया॥वसिष्ठश्चंद्रमाः शुक्रो
देवाचार्यः पितामहः॥तपोवृद्धा वयोवृद्धास्तेपि स्त्रीभिर्विमोहिताः॥गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सु
रा॥माद्यति प्रमदां दृष्ट्वा सुरां पीत्वा तु माद्यति॥यस्माद्दृष्टिमदा नारी तस्मात्तां नावलोकयेत्॥यद्वा तद्वा प
रद्रव्यमपहृत्य ततो नरः॥अवश्यं पातितयाति जग्ध्वा चैवाकृतिर्हरिः॥कौपीनाच्छादनं वासः कंथां शीतनिवारि
णीं॥पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहं॥देहस्थितिनिमित्तस्य वस्त्रादेः स्यात्परिग्रहः॥शरीरं धर्मसंयु

अ॰पु॰ कं रक्षणीयं प्रयत्नतः॥ शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यंतरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धं तथांतरं॥
३४८ उभयेन शुचिर्यस्तु स शुचिर्नेतरः शुचिः॥ यथाकथंचित्प्राप्त्या यः संतोषस्तुष्टिरुच्यते॥ मनसश्चेंद्रियाणां च एका-
ग्र्यं तप उच्यते॥ तज्जयः सर्वधर्मेभ्यः स धर्मः पर उच्यते॥ वाचिकं मंत्रजप्यादि मानसं रागवर्जनं॥ शारीरं देवपूजा-
दि सर्वदं तु त्रिधा तपः॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः॥ वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत्॥ अ-
कारश्च तथोकारो मकारश्चार्धमात्रया॥ तिस्रो मात्रास्त्रयो वेदा लोका भूरादयो गुणाः॥ जाग्रत्स्वप्नसुषुप्तिश्च ब्र-
ह्मविष्णुमहेश्वराः॥ ब्रह्मा विष्णु स्कंदस्कंदस्कंदद्देवमुडेश्वरा॥ प्रद्युम्नः श्री वासुदेवः सर्वमोंकारकः क्रमात्॥ अमा-
त्रो नंतमात्रश्च द्वैतस्यांतः शिवः॥ ॐकारो निदितो येन स मुनिर्नेतरो जनः॥ चतुर्थी मात्रा गांधारी प्रयुक्ता मू-
र्ध्नि लक्ष्यते॥ तत्तुरीयं परं ब्रह्म एतद्ध्येकाक्षरं परं॥ एतद्ध्येकाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥ छंदोस्या देवी गा-
यत्री अंतर्यामी ऋषिः स्मृतः॥ देवता परमात्मास्य नियोगो भुक्तिमुक्तये॥ भूरग्न्यात्मने हृदयं भुवः प्राजापत्यात्मने॥
शिरः स्वः सूर्यात्मने शिखा नित्यं कवचमुच्यते॥ ॐ भूर्भुवः स्वः कवचं सत्यात्मने ततो स्त्रकं॥ वेन्यस्य पूजयेद्विष्णुं जपेद्भ- राम॰
क्तिमुक्तये॥ जुहुयाच्च तिलाद्यादि सर्वं संपद्यते नवे॥ यस्तु द्वादशसाहस्रं जपन्हरिं नमाचरेत्॥ यस्य द्वादश-
भिर्मासैः परं ब्रह्म प्रकाशते॥ अणिमादिकोटिजप्यान्नक्ष्म्यात्मा वसुतादिकं॥ वैदिकस्तांत्रिको मिश्रो विष्णोर्वै त्रि- ३४८

विधो मखः॥ त्रयाणामीप्सितेनैव विधिना हरिमर्चयेत्॥ प्रणम्य दंडवद्भूमौ नमस्कारेण योर्चयेत्॥ स यां गतिमवाप्नो-
ति न तां क्रतुशतैरपि॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥ ॥ इत्या-
ग्नेये यमनियमाः॥ ॥ अग्निरुवाच॥ ॥ आसनं कमलाद्युक्तं तद्बध्वा चिंतयेत्परं॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्म-
नः॥ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः॥ उपविश्यासने युंज्या-
द्योगमात्मविशुद्धये॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयेत्॥ पा-
र्ष्णिभ्यां वृषणौ रक्ष्य तथा प्रजननं पुनः॥ ऊरुभ्यामुपरिस्थाप्य बाहू तिर्यक्प्रयत्नतः॥ दक्षिणं करपृष्ठं च न्यस्य वा-
मतलोपरि॥ उन्नाम्य शनकैर्वक्त्रं मुखं विष्टभ्य चाग्रतः॥ नमं च तिनयत्वा तिस्राम यामो निबोधनं॥ नासिकापुट-
मंगुल्या पीड्यैकं च परेण च॥ उदरं रेचयेच्छायुं रेचनाद्रेचकः स्मृतः॥ बाह्येन वायुना देहं दृतिवत्पूरयेद्यथा॥ तथा पू-
रयतिहेतत्पूरणात्पूरकः स्मृतः॥ न मुंचति न गृह्णाति वायुमंतर्बहिः स्थितं॥ संपूर्णं कुंभवत्तिष्ठेदचलः स तु कुंभ-
कः॥ कन्यसः कुद्घातः स च द्वादशमात्रकः॥ मध्यमश्च द्विरुद्घातश्चतुर्विंशतिमात्रकः॥ उत्तमश्च त्रिरुद्घातः ष-
ड्त्रिंशत्तालमात्रकः॥ स्वेदकंपादिजनकः प्राणायामोत्तमोत्तमः॥ मुद्धं तामारुहेद्भूमिं हिक्काश्वासादयस्तथा॥ जितेप्रा-
णे स्वल्पदोषविण्मूत्रादिः प्रजायते॥ आरोग्यं शीघ्रगामित्वमुत्साहस्वरसौष्ठवं॥ बलवर्णप्रसादश्च सर्वदोषक्षय-

:फलं॥जपध्यानंविनागर्भःस्तत्समन्वितः॥इंद्रियाणांजयार्थायसगर्भंधारयेत्परं॥ज्ञानवैराग्यतोभ्यांप्राणायामक
सेवनं॥इंद्रियांश्चविनिर्जित्यसर्वमेवजितंभवेत्॥इंद्रियाण्येवतत्सर्वंयत्स्वर्गनरकावुभौ॥निगृहीतविसृष्टानिस्वर्गाय
नरकायच॥शरीरंरथमित्याहुरिंद्रियाण्यस्यवाजिनः॥सारथिःपुरुषःप्रोक्तःप्राणायामःकशास्मृतः॥ज्ञानवैराग्यर
श्मिभ्यामभ्यासविहितंमनः॥शनैर्निश्चलतामेतिप्राणायामैकसंहितं॥जलबिंदुकुशाग्रेणमासेमासेपिबेत्तुयः॥सं
वत्सरशतंसाग्रंप्राणायामश्चतत्समः॥इंद्रियाणिप्रसक्तानिप्रविश्यविषयोदधौ॥आहृत्ययोनिगृह्णातिप्रत्या
हारःसउच्यते॥उद्धरेदात्मनात्मानंमज्जमानंयथानसि॥रोगमद्यातिवेगेनज्ञानवृक्षंसमाश्रयेत॥॥इत्याग्नेये
प्रासनप्राणायामप्रत्याहारः॥॥अग्निरुवाच॥॥ध्यैचिंतायांस्मृतोधातुर्विष्णुचिंतांमुहुर्मुहुः॥अनाक्षिप्तेनमनसा
ध्यानमित्यभिधीयते॥आत्मनःसमनैकस्यमुक्ताशेषोपधस्यच॥ब्रह्मचिंतासमाशक्तिर्ध्यानंनामतदुच्यते॥ध्ये
यालंबनसंस्थस्यसदृशप्रत्ययस्यच॥प्रत्ययांतरनिर्मुक्ताप्रत्ययोध्यानमुच्यते॥ध्यानावस्थितचित्तस्यप्रदेशेप
क्वचित्॥ध्यानमेतत्समुद्दिष्टंप्रत्ययस्यैकभावना॥एवंध्यानसमायुक्तःस्वदेहंयःपरित्यजेत्॥कुलंस्वज
नमित्राणिसंसमुद्धृत्यहरिर्भवेत्॥एवंमुहूर्तमर्द्धंवाध्यायेद्यःश्रद्धयाहरिं॥सोपियोगतिमाप्नोतिनतांसर्वैर्धा राम.
र्मिका॥ध्याताध्यानंतथाध्येयंयच्चध्यानप्रयोजनं॥एतच्चतुष्टयंज्ञात्वायोगंयुंजीततत्त्ववित्॥योगाभ्यासाद्भवेन्मु ३४९

क्तिरैश्वर्यंचाष्टधामहत्॥ज्ञानवैराग्यसंपन्नःश्रद्दधानःक्षमान्वितः॥विष्णुभक्तःसदोत्साहीध्यावेत्वंपुरुषःस्मृतः॥मूर्ता
मूर्तंपरंब्रह्महरेर्ध्यानंहिदुस्तरं॥सकलंनिष्कलंचापिध्येयःसर्वज्ञःपरमोहरिः॥अणिमादिगुणैश्वर्यंमुक्तिर्ध्यानप्रयोज
नं॥फलेनयोजयेद्विष्णुरतोध्यायेत्परेश्वरं॥गच्छंस्तिष्ठन्स्वपंजाग्रन्नुन्मिषन्निमिषन्नपि॥शुचिर्वाप्यशुचिर्वापिध्यायेत्स
ततमीश्वरं॥स्वदेहायतनस्यांतेमनसिस्थाप्यकेशवं॥हृत्पद्मपीठिकामध्येध्यानमार्गेणपूजयेत्॥ध्यानय
ज्ञःपरःशुद्धःसर्वदोषादिवर्जितः॥तेनेष्ट्वामुक्तिमाप्नोतिबाह्यशुद्धैश्चनाध्वरैः॥सर्वदोषविमुक्तश्चविशुद्धास्वि
तसाधनः॥ध्यानयज्ञःपरस्तस्मादपवर्गफलप्रदः॥तस्मादशुद्धंसंत्यज्यत्वनित्यंबाह्यसाधनं॥यज्ञाद्यंकर्मसंत्यज्य
योगेचैवसमभ्यसेत्॥विकारयुक्तंमोग्यभोगसमन्वितं॥चिंतयेत्हृदयंपूर्वंक्रमादादौगुणत्रयं॥तमःप्रच्छादयेद्रजसास
त्वेनछादयेद्रजः॥ध्यायेत्त्रिमंडलंपूर्वंकृष्णरक्तंसितंक्रमात्॥सार्थंपरिगुणानीतःपुरुषःपंचविंशकः॥ध्येय
मेयदशुद्धंवत्सक्तात्तुध्रुवंविचिंतयेत्॥ऐश्वर्यंपंकजंमध्येपुरुषोपरिसंस्थितं॥द्वादशांगुलविस्तीर्णंशुद्धंवि
कसितंसितं॥नीलमष्टांगुलंतस्यनाभिकंदसमुद्भवं॥पद्मपत्राष्टकंज्ञेयमणिमादिगुणाष्टकं॥कर्णिकाकेसरा
रंचनालंचैवमनुत्तमं॥विष्णुधर्मश्चतत्कंदमितिपद्मंविचिंतयेत्॥तद्धर्मज्ञानवैराग्यंसिवैश्वर्यमयंपरं॥ज्ञात्वा
पद्मासनंसर्वंसर्वदुःखविनाशनं॥तत्मध्यकर्णिकामध्येशुद्धदीपशिखाकृतिं॥अंगुष्ठमात्रममलंध्यायेदोंकार

मीश्वरं॥ ध्यायेज्जपेच्च सततमोंकारं परमाक्षरं॥ मनःस्थिरत्वमिच्छति परस्त्वनमनुक्रमात्॥ नहृरडेगवलीभूतं तेनस्स
क्रोपि संस्थितं॥ नाभिकंदास्थितं नालं दशांगुलसमायितं॥ नाला देष्टदलं पद्मं द्वादशांगुलविस्तृतं॥ सकर्णिके
केसराले मूले सूर्याग्निमंडले॥ अग्निमंडलमध्यस्थः शंखचक्रगदाधरः॥ पद्मे चतुर्भुजो विष्णुरथवाष्टभुजो ह
रिः॥ शारंगवलयधरः पाशांकुशधरः परः॥ स्वर्णवर्णः श्वेतवर्णः स्वर्णवासः सकेसेस्तुभिः॥ वनसारी स्वर्णहा
री स्फुरन्मकरकुंडलः॥ रत्नोज्वलकिरीटश्च पीतांबरधरोपमाः॥ सर्वाभरणभूषाढ्यः पुष्पमालाविराजितः॥ अ
हं ब्रह्म परंज्योतिर्वासुदेवो विविक्तये॥ ध्यानाच्छ्रांतो जपेन्मंत्रं जपाच्छ्रांतश्च चिंतयेत्॥ जपध्यानादियुक्तस्य विष्णुः शी
घ्रं प्रसिध्यति॥ जपयज्ञस्य वैयज्ञाः कलांनार्हंति षोडशी॥ जपिनो नापि सर्पंति व्याधयश्चाधयो ग्रहाः॥ भुक्तिर्मुक्ति
मृत्युजयो जयेन्न प्राप्यते फलं॥ इत्याग्नेये ध्यानं॥॥ अग्निरुवाच॥ धारणा मनसो ध्येयसंस्थितिर्ध्यानवद्दि
धा॥ यद्दाप्यतस्थितं लक्ष्यं ततस्मादचलं ते मनः॥ तावत्कायप्रदेशेषु धारणा मनसः स्थितिः॥ कालावधित्वरिछि
न्नदेहे संस्थापिते मनः॥ नप्रच्यवति यत्तत्त्वाद्धारणा साभिधीयते॥ धारणा द्वादशाज्ञेया ज्ञेयं द्वादशा ध्यानकं
यस्मिन्यस्मिन्नलवेदग्नि योगिनां व्याधिसंभवः॥ मंतुतं गोधिपध्याये धारयेत्तत्वधारणं॥ आग्नेयी धार
या वैवपेश्शानी भरतेजसी॥ भावना साधुकेयस्तु तावत्सर्वं महात्मने॥ तस्मात्तु तं शरीरं च मायूज्यते न चिंतये

त्॥ ब्रह्मरंध्रांजसंक्षोभो यावदाधारमंडलं॥ सुषुम्णातु ततो गत्या तसं छ्रोर्दुरूतालयं॥ सम्प्राप्य हि समं स्फुरति
येनामूर्त्तिमूर्त्तिना॥ क्षुत्पिपासा रूमप्रायं सम्यक्संप्रेरिपीडितः॥ इडाम्ब नाडाते पापेशाण मालेक्षयं गते॥ प्रसा
संचिंतयेच्चि सोयावच्चिंताक्षयंगता॥ महाभावं ततो जायेत सर्वव्यापक ईश्वरः॥ अर्धेंदु परमं शांतं निराभासं नि
रंजनं॥ असत्सत्यमाभाति तावत्सर्वं चराचरं॥ यावत्स्वछंदरूपस्यात्दृष्टं गुरुवक्त्रतः॥ दृष्टे तस्मिन्परे तत्वे आ
ब्रह्मसचराचरं॥ प्रमाननामभेर्घवध्याने त्वत्वप्रकल्पने॥ मातृसोदकवत्सर्वं जपहोमार्जनादिकं॥ विष्णुमंत्रेण
वाकुर्यादमूर्त्ता धारणी वदे॥ मदधृत्तेंदुनिभं ध्यायेत्कमलं तं त्रिगुण्निकं॥ शिरसं चिंतयेद्यत्तात्त्रा चांकापुतव
र्षसं॥ संपूर्णमंडलेव्योम्नि शिवकल्लोलपूरितं॥ तथात्हृत्कमलं ध्यायेत्तन्मध्ये पतनुस्मरेत्॥ साधकविगतक्ले
शोजायते धारणादिभिः॥॥ इत्याग्नेये धारणा॥॥ अग्निरुवाच॥ यदात्मार्थमात्रनिर्भासं स्तिमितोदधिवत्स्थितं॥
चैतन्यरूपवद्ध्यायतस्समाधिरिहोच्यते॥ ध्यायेन्मनः सन्निवेश्य यस्तिष्ठेदचलस्थिरः॥ निर्वाणानलवद्योगीस
माधिस्थः प्रकीर्त्तितः॥ सम्भितो वा नचाघ्राति स्पृशणोति नतु किंचन॥ नतु स्पर्शं विजानाति नच संश्रयते मनः॥ नचाभि
मन्यसे किंचिसुच बुध्यविकाष्टवः॥ एवमाश्वरसंलीनं समाधिस्थः प्रलीयते॥ यथादीपो निवातस्थो नेंगते सो
पमास्मृता॥ ध्यायतो विष्णुमात्मानं समाधिस्थस्ययोगिनः॥ उपसर्गा प्रवर्तंते दिव्यासिद्धिप्रसूतिका॥ प्रातिभ

श्रावणो वर्त्तो दिग्श्रानं वार्त्तवेदना ॥ प्रार्थयंती च तं देवा योगैर्दिव्यैश्च योगिनां ॥ नृपाश्च पृथिवी देवा दानैश्च वसुधाधिपाः ॥
वेदादि सर्वशास्त्रं च सर्वमेव प्रवर्त्तते ॥ अभीष्टं छंदोविषयं काव्यं चास्य प्रवर्त्तते ॥ रसायनानि दिव्यानि दिव्याश्चौ
षधयस्तथा ॥ समस्तानि च शास्त्राणि कालास्त्रवाश्च विंदति ॥ सुरेंद्रकन्याद्यास्ताघ्रागुणाश्चायांति वादयः ॥ तप
वतां स्मजेद्यस्तु तस्य विष्णुः प्रसीदति ॥ अणिमादिगुणैश्वर्यसिद्धिर्ज्ञानप्रकाशश्च ॥ मुक्ताभोगात्स्पृहेच्छातः
तन्तत्रज्ञानपावनः ॥ क्षितेस्थानतनिविज्ञानध्यानं देवब्रह्मणीश्वरे ॥ मलिनो हि यथादर्शो ह्यात्मज्ञानाय पक्ष
सः ॥ सर्वाश्रयान्निजे देहे देहिविंदति देहिनां ॥ योगी विंदति सर्वांसां योगानां प्रोतिवेदनं ॥ अकाडमेकं ह्यियया म
वादिषु च दृश्यते ॥ तथा मैकोऽर्थ तेके भुजला धारो भिवांगनात् ॥ ब्रह्मण्यानिलते जो भिजनन्क्षिति धातवः ॥ इमे
लोका एष चात्मा तस्मात्सर्वं चराचरं ॥ मृत्कुंडं चक्रसंयोगात् कुंभकारो यथा घटं ॥ करोति तृणमृत्काष्ठैर्गृहं
वा गृहकारकः ॥ करणान्येवमादाय तासु तास्विह योनिषु ॥ सृजत्यात्मानमात्मैव चमत्कारणानि च ॥ कर्मणा
द्वेषमोहाभ्यामिच्छयैव स बध्यते ॥ ज्ञानाद्विमुच्यते योगी योजीवो गीतितो महान् ॥ दर्पोहारस्तेहयोगास्तथा
योगस्य संस्थितिः ॥ विक्रियामवदृष्टैव मकालेप्राणसंक्षयः ॥ अनंतारस्मयस्तस्य दीपवद्यः स्थितो हृदि ॥ सिता ३५१
सिताः कद्रुमालाः कपिलापीतलोहिताः ॥ ऊर्ध्वमेकः स्थितस्तेषां यो भित्वा सूर्यमंडलं ॥ ब्रह्मलोकमतिक्रम्य तेन यांति

परां गतिं ॥ यदस्याधरस्मिन्ना तमूर्द्धमेव व्यवस्थितं ॥ तेषिद्वैव निरातंकाः समयानं प्रतिपद्यते ॥ येनैकरूपाश्चाधस्ता
द्रश्मयोऽस्य मृदुसप्रभाः ॥ इह कानपि भोगाय यतिश्च रजाय्यते हि सः ॥ बुद्धीन्द्रियाणि पंचैव मनः कर्मेन्द्रियाणि च ॥ अ
हंकारश्च बुद्धिश्च पृथ्व्यादीनि तथैव हि ॥ अव्यक्त आत्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ॥ ईश्वरः सर्वभूतस्थः सन्न
सम्मदसव्ययः ॥ बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहंकारसंभवः ॥ तस्मात्खादीनि जायंते एकोत्तरगुणानि तु ॥ शब्दः स्पर्शश्च
रूपं च रसो गंधश्च सद्गुणाः ॥ योयस्मिन्नाश्रितश्चैषां स तस्मिन्नेव लीयते ॥ सत्वं रजस्तमश्चैव गुणास्तस्यैव कीर्त्तिताः
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते हि सः ॥ अनादिरादिमांश्चैव निसोय पुरुषः परः ॥ लिंगेन्द्रियैरुपग्राह्यः स
विकार उदाहृतः ॥ एते वेदाः पुराणानि विद्योपनिषदस्तथा ॥ श्लोकाः सूत्राणि भाष्याणि यंचान्यद्वाङ्मयं भवेत् ॥
पितृयाणोपरिष्यात् यदागस्त्यस्य चोत्तरं ॥ तेषामग्निहोत्रिणो यांति प्रजाकामा दिवं प्रति ॥ ये च दानपराः सम्यगष्टाभि
र्गुणैर्युता ॥ अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः ॥ पुनरावर्त्तिनो बीजं भूता धर्मप्रवर्त्तकाः ॥ सप्तर्षि
नागवीथ्यां च देवलोकं समाश्रिताः ॥ तावंत एव मुनयः सर्वारंभविवर्जिताः ॥ तपसा ब्रह्मचर्येण संगत्यागेन मेध
या ॥ यत्नपत्नीचतिष्ठंते यावदाभूतसंप्लवं ॥ वेदोदितवचनेयत्ता ब्रह्मचर्यं तपो दमः ॥ श्रद्धोपवासः सत्यत्वमात्म
नो ज्ञानहेतवः ॥ सत्वाश्रमैर्निदिध्यास्या तस्मस्ते रेवमेव तु ॥ दृष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः ॥ य एवमेक

विंदंतिये वारएणकमाश्रिताः॥ उपासते द्विजाः सत्यश्रद्धया च परायुताः॥ क्रमंते संभवात्सर्चिवचः शुक्लं तथोत्तरं।
अयनं देवलोकं श्रसवितारं सविक्षुतं॥ ततस्तान्पुरुषोभ्येत्य मानसान् ब्रह्मलौकिकान्॥ करोति पुनरावृत्ति
स्तेषामेवानिविद्यते॥ तेत्तेनतपसा दानैर्येहिः सुकर्जितजनाः॥ धूमं निशां कृष्णपक्षं दक्षिणायनमेव च॥ पित
लोकं चंद्रमसं नभो वायुं जलं महीं॥ क्रमात्ते संभवंतीह पुनरेव ब्रजंति च॥ एतद्यो निविजानाति माहुं चिंतयमात्म
नः॥ दंदश्रूकं पतंगं वा भवेत्कीटोथवा कृमिः॥ हृदये दीपवद्ब्रह्म ध्यात्वा जीवोमृतो भवेत्॥ न्यायागतधनस्त
त्वज्ञाननिष्ठोतिथिप्रियः॥ श्राद्धकृत्सत्यवादी च गृहस्थोपि विमुच्यते॥॥ इत्याग्नेये समाधिः॥ ॥ अग्निरुवाच॥॥
ब्रह्मज्ञानं प्रवक्ष्यामि संसाराज्ञानमुक्तये॥ अयमात्मा परं ब्रह्म अहमस्मीति मुच्यते॥ देहमोहो न भवति पिष्या
त्वाच्च पच्चेदिवत्॥ सुषुप्तेमरणे देहात्तथात्मास्येत्ताय यथाकृवः॥ देहं सचेच्च वरेद्वित्कोशादिसन्निभः॥ चक्षुरा
दीनीन्द्रियाणि ज्ञालावैकरणात्वतः॥ मनो धीरपि वात्मा नेदीपवत्करणात्वतः॥ प्राणोप्यात्मा नभवति सुषुप्तेषु
त्ववत्तः॥ अतो नात्मेंद्रियस्तस्मादिंद्रियादिकमात्मकः॥ अहंकारेण चैवात्मा देहवद्व्यभितावतु॥ जाग्रत्स्व
प्रपि चैतन्यं संकीर्णत्वात्तनबुध्यते॥ विज्ञानरहितः प्राणः सुषुप्तेज्ञायतेयतः॥ अतो नात्मेंद्रियस्तस्मादिंद्रिया
दिकमात्मनः॥ अहंकारेचवात्माच देहेवद्व्यभितावतु॥ उक्तेभ्योव्यतिरिक्तोयमात्मा सर्वहृदिस्थितः॥ सर्वद्रष्टा

च भोक्ता च नक्तमेणप्रदीपवत्॥ समाधारंभकाले च एवं संचिंतयेत्सुलिः॥ यतो ब्रह्मणि आकाशं खाद्वायुश्च
ततो नलः॥ अग्निरापोजलात्पृथ्वी ततः सूक्ष्मशरीरकं॥ स्थूलशरीरं ध्यात्वास्मात्लयं ब्रह्मणि चिंतयेत्॥ पंचीकृ
तानि भूतानि तत्कार्यं च विराट्स्मृतं॥ एतत्स्थूलशरीरं हि आत्मनोज्ञानकल्पितं॥ इंद्रियैरुपविज्ञानं धीराजागरितंवि
दुः॥ विश्वस्तदभिमानीस्यात्त्रयमेतदकारणं॥ अपंचीकृतभूतानि तत्कार्यं लिंगमुच्यते॥ संयुक्तं सप्तदशभिर्हि
रण्यगर्भसंज्ञकं॥ शरीरमात्मनः सूक्ष्मं लिंगमित्यभिधीयते॥ जाग्रजंकारणं स्वप्नप्रणयो विश्वयात्मिकाग्रा
त्मातदुपमानी स्यात्तैजसोक्षप्रपंचपतु॥ स्थूलसूक्ष्मशरीराख्यद्वयस्यैकं हि कारणं॥ आत्मज्ञानं च साभासात
द्व्याकृतमुच्यते॥ न सन्नासन्नेमदसनृणतसारलपंनतत्॥ लिंगं गतायववालोअभिन्नाभिन्नमेवु च॥ भिन्नाभि
न्नोक्षमिवाच्यर्थसंसारकारणं॥ एवंसब्रह्मविज्ञानात्क्रवतेवचकमुक्तिः॥ सर्वविज्ञानापेंद्रियाणी संहारः कारण
त्मनां॥ बुद्धेस्थानेच सुषुप्तेस्यात्तदुपस्याभिमानवान्॥ प्राज्ञ आत्मत्रयं चैतत्तस्य कारः प्रणवः स्मृतः॥ उकारश्च अ
कारोयत्त्वमेव च॥ अहं साक्षि चचिन्मात्रो जाग्रत्स्वप्नादिकस्य च॥ नत्तानं चैवतत्कार्यं संसारादिकबंधनं॥ नि
त्यशुद्धबुद्धयुक्तं सत्यमानंदमद्वयं॥ ब्रह्माहमस्म्यहं ब्रह्म परं ज्योतिर्विमुक्तये॥ अहं ब्रह्मेत्यवस्थानं समाधिर्व
तुपातकः॥ विज्ञानमानंदब्रह्मसत्यं ज्ञानमनंतकं॥ अकमात्मा परंब्रह्म परमम इमेव च॥ गुरुणा बोधितो जीव

अ०पु० क्षणं ब्रह्मणि नाश्नुतः॥ योसवादित्ये पुरुषः सोसावहमखंडउत्तु॥ मुच्यते सारसंसारात् तसारज्ञो ब्रह्मसज्ञवेत॥
२५२ इत्याग्नेये ब्रह्मज्ञानं॥ ॥अग्निरु॥ ॥अहं ब्रह्म परंज्योतिः पृथिव्यनिलवर्जितं॥ अहं ब्रह्म परंज्योति वायुराका
शवर्जितं॥ अहं ब्रह्म परंज्योतिर्जाग्रत्स्वप्नविवर्जितं॥ अहं ब्रह्म परंज्योतिर्जाग्रत्स्वप्नविवर्जितं॥ अहं ब्रह्म
परंज्योति विश्वभावविवर्जितं॥ अहं ब्रह्म परंज्योतिराकाक्षरविवर्जितं॥ अहं ब्रह्म परंज्योतिर्वाक्पाण्यंघ्रिवि
वर्जितं॥ अहं ब्रह्म परंज्योतिः पायूपस्थविवर्जितं॥ अहं ब्रह्म परंज्योतिः श्रोत्रत्वक्चक्षुरुक्षितं॥ अहं ब्रह्म
परंज्योतिर्जिह्वाघ्राणविवर्जितं॥ अहं ब्रह्म परंज्योतिः सर्वधर्मविवर्जितं॥ अहं ब्रह्म परंज्योतिः परस्पविवर्जि
तं॥ अहं ब्रह्म परंज्योतिर्मनोबुद्धिविवर्जितं॥ अहं ब्रह्म परंज्योतिः सुरीःशाष्टविवर्जितं अहं ब्रह्म परंज्योति
श्चित्त अहंकारवर्जितं॥ अहंकार परंज्योति प्राणापानविवर्जितं॥ इत्य ब्रह्म परंज्योति —— नाविवर्जितं॥
अहं ब्रह्म परंज्योतिः समानपरिवर्जितं॥ अहं ब्रह्म परंज्योतिर्जरामरागवर्जितं॥ अहं ब्रह्म परंज्योतिःशो
कमोहविवर्जितं॥ अहं ब्रह्म परंज्योतिस्तृणपिपासाविवर्जितं॥ अहं ब्रह्म परंज्योतिर्हिरण्यगर्भवर्जितं॥ अ राम
हं ब्रह्म परंज्योतिः स्वप्नाद्यवस्थाविवर्जितं॥ अहं ब्रह्म परंज्योतिः स्थूलसूक्ष्मादिवर्जितं॥ अहं ब्रह्म परंज्योतिस्ते २५३
जसादिविवर्जितं॥ अहं ब्रह्म परंज्योतिरुकारादिविवर्जितं॥ अहं ब्रह्म परंज्योतिर्देहादित्वाविवर्जितं॥ अहं

ब्रह्म परंज्योतिर्नामाज्ञानविवर्जितं॥ अहं ब्रह्म परंज्योतिरध्यात्तविवर्जितं॥ अहं ब्रह्म परंज्योतिः सत्वादिगुणवर्जि
तं॥ अहं ब्रह्म परंज्योतिर्हिरण्यगर्भवर्जितं॥ अहं ब्रह्म परंज्योतिः सदसद्भाववर्जितं॥ अहं ब्रह्म परंज्योतिः सर्वावय
वविवर्जितं॥ अहं ब्रह्म परंज्योतिर्भेदाभेदादिवर्जितं॥ अहं ब्रह्म परंज्योतिः सुप्तस्थानविवर्जितं॥ अहं ब्रह्म परंज्योतिः
कार्यकारणवर्जितं॥ देहेंद्रियमनोबुद्धिःप्राणाहंकारवर्जितं॥ जाग्रत्स्वप्नसुषुप्त्यादियुक्तं ब्रह्म तुरीयकं॥ नित्यशुद्ध
बुद्धयुक्तं सत्यमानंदमद्वयं॥ ब्रह्माहमस्म्यहं ब्रह्म विद्ज्ञानं विमुक्तये॥ ॐ अहं ब्रह्म परंज्योतिरात्मा मोक्षप्रदः परः॥ इ
त्याग्नेये समाधिः॥ ॥अग्निरुवाच॥ ॥यज्ञैश्च देवानाप्नोति वैराजं तपसा पदं॥ ब्रह्मणः कर्मसन्यासात् वैराग्यप्रकृतौ
लयं॥ ज्ञानात्प्राप्नोति कैवल्यं पंचैता गतयः स्मृता॥ प्रीतितापरपादादेर्विनिवृत्तिर्विरक्तता॥ संन्यासः कर्मणां त्यागः
कृतानामकृतैः सह॥ अव्यक्तादौ विशेषांते विकारेस्मिन्निवर्तते॥ चेतनाज्ञाते ब्रह्मणिज्ञानेनज्ञानमुच्यते॥ परमात्मा
च सर्वेषामाधारः परमेश्वरः॥ विष्णुनाम्ना च वेदेषु वेदांतेषु च गीयते॥ यज्ञेशो यज्ञप्रधानप्रवृत्तैर्विक्षते क्षसो॥ निर
त्तिचनियोगे युज्ञानमूर्तिसिचेक्षते॥ कमरीघस्तुतासुंच वस्तु तत्पुरुषोत्तमः॥ तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने॥
आगमोक्तं विधिरेकाद्विधा ज्ञानं तथोच्यते॥ शब्दब्रह्मागममयं परं ब्रह्म विवेकजं॥ द्वे ब्रह्मणी वेदितव्येरा त्रब्रह्मप
रं च यत्॥ वेदा द्विविधाक्षपरेनं मक्षरं ब्रह्म सत्परं॥ तदेतद्भगवद्वाच्यं मुपचारे वनेन्यतः॥ सम्हृतेतिलघावृत्तानिक

श्री०पु०
३५४

रोर्घतृषान्वितः॥ नं तागमयितास्त्र शरीरोकारोयमहामुने॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः॥ ज्ञानवैराग्ययोश्चै
वष्मां भागकृतींगता॥ वसंतिविष्णौभूतानि सचस्त्यानन्लिधात्मका॥ एवं हारोहि भगवान्शब्दोन्यत्रौपचारिकः॥
उत्पत्तिं प्रलयं चैव भूतानामागतिं॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ज्ञानशक्तिपरैश्वर्यवीर्यतेजांस्यशेष
तः॥ भगवच्छंदवाच्यानि विना हेयैर्गुणादिभिः॥ खांडिक्यजनकायायोगकेशिध्वजः खरा॥ अनात्मन्यात्मबुद्धि
र्यास्वस्वेष्टमतियामतिः॥ अविद्यातरुसंभूतिर्वीजमेतद्द्विधास्थितं॥ पंचभूतात्मके देहे देही मोहतमः स्मृतः॥ अ
हमेतदितीत्यन्द्वै कुरुतेक्षमनिर्मति॥ इत्थं च पुत्रपौत्रेषु तद्देहेत्यादिके गृहकेः॥ करोति पंडितः स्वाम्यमनात्मनि
कलेवरे॥ सर्वं देहोपकाराय कुरुते कर्म मानवः॥ देहोऽन्यो यदा पुंसस्तत्त्वबंधाय तत्परं॥ निर्वाणसमयनिर्वा
णमात्मज्ञानगतोमलः॥ दुःखाज्ञानमयो धर्मप्रकृतेः सत्वमात्मनः॥ जलस्य नाग्निना संगः स्थालीसंगात्तथापि
हि॥ शब्दोद्रेकादिका धर्मास्तत्कृतावैमहामुने॥ तथात्मापत्ततोसर्गा दहंमानादिभूषितः॥ भजतेप्रत्ततान्धर्मात्त्
न्यस्तेभ्योहि ससोध्ययः॥ बंधाय विषयासंगि निर्विषयस्य निबंधयेत्॥ विषयात्समाकृष्य ब्रह्मभूतं हरिं स्मरेत्॥ ३५४
आत्मभावं नयत्येवं तद्ध्येयधापितंमुने॥ विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा॥ आत्मप्रयत्नसापेक्षा वि
शिष्टायामनोगतिः॥ तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते॥ विलिप्यतु समाधिस्थं परंब्रह्माधिगच्छति॥ यमैः स

नियमैः स्थित्याः प्रत्याहृत्वा मरुजरूपैः॥ प्राणायामैरयवनैः प्रत्याहारेन चेंद्रियैः॥ वशीकृतैस्ततः कुर्यास्थितं चेतु
शुभाश्रये॥ आश्रयं चेतसो ब्रह्म मूर्तं चामूर्तकं द्विज॥ सनंदनादयो ब्रह्मभावनया युताः॥ कर्मभावनया चान्ये दे
वाद्याः स्थावरांतका॥ हिरण्यगर्भादिषु च तेरस्ता नास्तिकाद्विधा॥ त्रिविधा भावना प्रोक्ता विश्वं ब्रह्मततथायतो॥ प्रत्यस्त
मितभेदं यत्सत्तामात्रमगोचरं॥ च रसामान्यसंस्थं तत्तद्ब्रह्मसंस्थितं॥ तद्विष्णोः परं रूपमरूपस्याजमक्षरं॥
अशक्यप्रथममध्यातुं अतो मूर्तानि चिंतयेत्॥ तद्भावभावमापन्नस्ततो सौ परमात्मना॥ भवत्यभेदी भेदश्च त
स्याज्ञानकृतो भवेत्॥ इत्याख्येयब्रह्मज्ञानं॥ अग्निरुवाच॥ अद्वैतं ब्रह्मविज्ञानं वै देयकविता गमत्॥ शाल
ग्रामे तनुभ्यंके वासुदेवार्चनादिकृत्॥ मृगं गं स्पसगो मृत्वा त्या त्र कालेसरन्मृगं॥ जातिस्मरमृगस्त्यक्त्वा देहं
योगात्सुतो भवत्॥ अद्वैतब्रह्मभूतश्च जडवल्लोकमाचरेत्॥ क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत॥ उवाह शिबिकाम
स्य क्षत्तुर्वचनचोदित॥ गृहीतविष्टिना ज्ञानी उवाहायं तु पापतां॥ पापो जडगतिः पृष्ठात् ये चन्ये त्वरितं ययुः॥ शीघ्रात
शीघ्रगतिं दृष्ट्वा अशीघ्रं तत्रियोब्रवीत्॥ राजोवाच॥ किं श्रांतोस्यल्पमध्वानं त्वयोढा शिबिकामम॥ किमथास सहो न त्वं पी
वानसि निरीक्ष्यसे॥ ब्राह्मण उ०॥ नाहं पीवान्न चैवोढा शिबिका भवितो मया॥ न श्रांतोस्मि न च व्यासो वोढव्यास्ति महीप
ते॥ भूमौ पादयुगस्यास्तां जघोपदे कृयस्थिते॥ ऊरौ जंघाद्वयावस्थौ तदाधारं तथोदरं॥ वक्षस्थलं तथा बाहू स्कंधौ वोदर
घो

वि०पु० संस्थितो॥ स्कंधस्थितेयं शिबिका मम भारो न किं कृतः॥ शिबिकायां स्थितं चेदं देहं त्वमुपलक्षितं॥ तत्र त्वमहमप्यत्र प्रोच्यते
३५५ चेदमन्यथा॥ अहं त्वं च तथान्ये च भूतैरुह्याम पार्थिव॥ गुणप्रवाहपतितो गुणवर्गो हि यात्ययं॥ कर्मवश्या गुणाश्चैते सत्वा
द्याः पृथिवीपते॥ अविद्यासंचितं कर्म तच्चाशेषेषु जंतुषु॥ आत्मा शुद्धोक्षरः शांतो निर्गुणः प्रकृतेः परः॥ प्रवृद्ध्यपचयौ नास्य ए
कस्याखिलजंतुषु॥ यदा नोपचयस्तस्य यदा नापचयो नृप॥ तदा पीवानसीत्येतत्कया युक्त्या त्वयेरितं॥ भूजंघापा
दकट्यूरुजठरादिषु संस्थिता॥ शिबिकेयं तथा स्कंधे तदा भारः समस्त्वया॥ तदन्यजंतुभिर्भूप शिबिकोढा न केवलं॥ शै
लद्रुमगृहोत्थोपि पृथिवीसंभवोपि वा॥ यदा पुंसः पृथग्भावः प्राकृतैः कारणैर्नृप॥ सोढव्यस्तु महाभारः कतमो नृपते मया॥
यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः॥ भवतो मेखिलस्यास्य ममत्वेनोपबृंहितः॥ तच्छ्रुत्वोवाच राजा तं गृहीत्वा विप्रम
प्य च॥ प्रसादं च कुरु मत्तो शिबिकां ब्रूहि शृण्वते॥ को भवान्किंनिमित्तं वदागमनकारणं॥ ब्राह्मण उवाच॥ श्रूयतां कोह
मित्येतद्वक्तुं भूप न शक्यते॥ आत्मन्येव न दोषाय श्लोयमिति यो द्विज॥ ब्राह्मण उ०॥ शस्तोहमिति दोषाय नात्मन्येव तथैव
तत्॥ अनात्मन्यात्मविज्ञानं शब्दो वा भ्रांतिलक्षणः॥ जिह्वा ब्रवीत्यहमिति कंठं वक्तुं न शक्यते॥ आत्मन्येव न दोषाथ
मशस्तोमिति यो द्विजः॥ ब्राह्मण उ०॥ शब्दोयमिति दोषाय नात्मन्येव तथैव च॥ अनात्मन्यात्मविज्ञानं शब्दो भ्रांति राम.
लक्षणं॥ जिह्वा ब्रवीत्यहमिति दंतौष्ठौ तालुकं नृप॥ एते नाहं यतः सर्वे वाङ्निष्पादनहेतवः॥ किं हेतुभिर्वदंत्येषा वागवा ३५५

हमिति स्वयं॥ तथापि वाङ्नहमेतदुक्तमत्वं न युज्यते॥ पिंडः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः॥ ततोहमिति कुत्रै
तां संज्ञां राजन्करोम्यहं॥ जघन्योस्ति परः कोपि मत्तः पार्थिवसत्तम॥ तदेषोहमयं चान्यो वक्तुमेवमपीष्यते॥ यदा
समस्तदेहेषु पुमानेको व्यवस्थितः॥ तदा हि को भवान्कोहमित्येतद्विफलं वचः॥ त्वं राजा शिबिका चेयं वयं वाहाः
पुरःसराः॥ अयं च भवतो लोको न सदेतन्नृपोच्यते॥ वृक्षाद्दारु ततश्चेयं शिबिका वदधिष्ठिता॥ का वृक्षसंज्ञा पा
तास्य दारुसंज्ञाथवा नृप॥ वृक्षारूढो महाराजो नायं वदति ते जनः॥ न च दारुणि सर्वस्त्वां ब्रवीति शिबिकागतं॥
शिबिकादारुसंघातो रचनास्थितिसंहितः॥ अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिबिका त्वया॥ पुमान्स्त्री गौरजो वाजी कुंजरो वि
हगस्तरुः॥ देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु॥ पुमान्न देवो न नरो न पशुर्न च पादपः॥ शरीराकृतिभेदास्तु भूपैते कर्म
योनयः॥ वस्तु राजेति यल्लोके यच्च राजभटात्मकं॥ तथान्यच्च नृपेत्थं तु न सत्संकल्पनामयं॥ त्वं राजा सर्वलोकस्य पितुः
पुत्रो रिपो रिपुः॥ पत्न्याः पतिः पिता सूनोः कस्त्वां भूप वदाम्यहं॥ किं त्वमेतच्छिरः किं तु शिरस्तव तथोदरं॥ किमु पादादि
कं त्वं वै तत्किं महीपते॥ समस्तावयवेभ्यस्तु पृथग्भूतो व्यवस्थितः॥ कोहमित्यत्र निपुणं भूत्वा चिंतय पार्थिव॥ त
च्छ्रुत्वोवाच राजा तमवधूतं द्विजं हरिं॥ राजोवाच॥ श्रेयोहं प्रष्टुमुद्यतः पुष्टं कपिलमृषिमहं द्विज॥ ज्ञात्वंशः कपिलर्षेस्त्व
मत्तो ज्ञान दोषभुविः॥ ज्ञानधीस्फुरद्धिमातृयच्छ्रेयः तत्वमेव च॥ ब्राह्मण उ०॥ भूप पृच्छसि किं श्रेयः परमार्थं न पृच्छ
र्यं

अ०पु० ति॥श्रयात्मापरमार्थोनिनिर्दोषाएषेवमुच्यते॥देवताराधनंकृत्वाधनंसंपत्तिमिच्छसि॥पुत्रानिच्छतिराज्यंश्रेयस्तथैवचन
प॥विवेकिनस्तुसंयोगयोगाय:परमात्मना॥यज्ञादिकाक्रियानस्पेतमाशिन्व्योषपादिता॥परमात्मात्मनोर्योगपरमा
३५६ र्थइतीष्यतां॥एकोव्यापीसम:शुद्धोनिर्गुण:प्रकृते:पर:॥जन्मवृध्यादिरहित:आत्मासर्वगतोव्यय:॥परज्ञानमयो
संगाम्पुणजात्यादिभिर्विभु:॥निदाघऋतुसंवादश्चैतंकुरुयेश्टणु॥ऋतुब्रह्मसुतोज्ञानीतस्मिन्योभूत्पुनःस्मृत:॥निदा
घ:प्रागृदधेस्मान्नगरेवैपुरेस्थित:॥देविकापास्तुटेतंचतर्कपामासवैऋभु:॥दिव्योवर्षसहस्रेणनिदाघमवलोकि
धौ त॥निदाघोवैश्वदेवांतेभुक्तान्नमथमब्रवीत॥ऋभुंतेतन्निरूत्सन्नातुष्टिंकंताक्षरासक:॥ऋभुरुवाच॥क्षुधुपुस्ततस्य
क्षोन्नतुष्टिर्ब्राह्मणजायते॥नाममेक्षुन्नवतृप्तिर्वकस्मान्मांपरिपृच्छसि॥क्षुन्नृसोदेहधर्माख्येनमामोतयतोद्विज:॥
ततक्षुत्संभवातस्मात्तप्तिरंतेचमेसदा॥पुमान्सर्वगतोव्यापीव्याकाशीरदयंयत:॥अतउकत्वकगतोसौछंदस्तदप
र्दवत्कथं॥सोहंगंतानचागंतानैकदेशनिकेतन:॥तेचाम्भेचवचस्त्वहिनान्येनाहमहव्यहं॥मन्नरयंहिगृहंयकल्लु
दालित्नंस्थिरीभवेत॥पार्थिवोयंतथादेहपार्थिवै:परमाणुभि:॥ऋतुरप्यस्मितवाचार्य:प्रदातुंआजायतेद्विज॥इह
गतोयंमास्याभिपरमार्थस्ततोदित:॥एकमेवमिदंविद्धिनभेदिसकलंजगत॥वासुदेवाभिधेयस्यस्वरूपंपरमा राम.
त्मन:॥ऋतुर्वर्षसहस्राणिपुरस्तंनगरंययौ॥निराघंराघंराजनगरंएकांतेस्थितमब्रवीत॥एकांतेस्थीयतेक ३५६
न यौ

स्मान्निदाघऋतमब्रवीत॥मोविप्रजनसंबाधोमहानैषनरेश्वर:॥प्रविविक्षिमोपुरंरम्यंतेनात्रस्थीयतेमया॥॥ऋ
भुरुवाच॥॥निराधिपोत्रकतम:कतमश्चेतरोजन:॥कथ्यतांमेद्विजश्रेष्ठत्वमभिज्ञोद्विजोत्तम:॥निदाघउ०॥॥आरूढो
यंगजंराजापरिलोकस्तथोत्तरे:॥गजोयोयमधोब्रह्मन्उपर्यस्येवभूपति:॥ऋतुराहगज:कोत्रराजावाहनिदाघक:॥
ऋतुर्निदाघआरूढोहद्धातंपश्यवाहनं॥उपर्यहंयथाराजात्वमध:कुंजरोयथा॥ऋतु:प्राहनिदाघंतंकतमस्त्वमहंव
द:॥उक्तोनिदाघतत्वद्धात्माहमेनंगुरुकुर्वं॥नान्यस्यद्वैतसत्कार:संस्कृतमनसंतथा॥ऋतुप्रवाहनिदाघत्वमज्ञात्वान
यवागत:॥परमार्थसारभूतामद्वैतंदर्शितंयथा॥ब्रह्मणउ०॥॥निदाघोप्युपदेशेनतेनाद्वैतपरोभवेत॥सर्वभूता
न्यभेदेनसद्दृशोसमदात्मन:॥अवाप्यमुक्तिंज्ञानांत्ततथात्वंमुक्तिमाप्स्यति॥एक:समस्तंत्वंचाहंविष्णु:सर्वनिदाघ
क:॥पीतनीलादिभेदेनयथैकंदृश्यतेनभ:॥भ्रांतदृष्टिरात्मापिविभृथैकसरथक॥अग्निरुवाच॥युक्तस्यभाय
भरतोज्ञानत्सौवीरनृपति:॥संसाराज्ञानदृक्षादिज्ञानंब्रह्मेतिचिंतय॥॥इत्यद्वैतं॥॥अग्निरुवाच॥॥गीता
सारंप्रवक्ष्यामिसर्वगीतोत्तरोत्तरं॥कृष्णोर्जुनायाहपवतीभुक्तिमुक्तिकं॥भगवानुवाच॥॥गतासुरगतासर्वा
न्शोच्योदेहवानज:॥आत्माजरोमहोभेद्यस्तस्माच्छोकादिकंत्यजेत॥ध्यायतोविषयान्पुंस:संगस्तेषूपजायते॥
संगात्कामस्तत:क्रोध:क्रोधात्संमोहएवच॥संमोहात्स्मृतिविभ्रंशोबुधिनाशात्प्रणश्यति॥दुःसंगहानिसत्संगात

अ॰पु॰ मोक्षकामाश्चकामनुत्॥ कामत्यागादात्मनिष्ठास्थितप्रज्ञस्तदोच्यते॥ यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी॥ य
३५७ स्यांजाग्रतिभूतानिसानिशापश्यतोमुने॥ आत्मन्येवचसंतुष्टःतस्याकार्यंनविद्यते॥ नैवतस्यकृतेनार्थोनाकृ
तेनेहकश्चन॥ सत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः॥ गुणागुणेषुवर्त्तंतइतिमत्वानसज्जते॥ सर्वंज्ञानप्लवे
नैववृजिनंसंतरिष्यसि॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेर्जुन॥ ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोति
यः॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसा॥ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि॥ ईक्षतेयोगयुक्तात्मा
सर्वत्रसमदर्शनः॥ शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते॥ नहिकल्याणकृत्कश्चित्दुर्गतिंतातगच्छति॥ दे
वीह्येषागुणमयीममामायादुरत्यया॥ मामेवयेप्रपद्यंतेमायामेतांतरंतिते॥ आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभ
वतिमांहरिं॥ चतुर्विधाभजंतेमांजनासुकृतिनोर्जुनः॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्ममुच्यते॥ भूतभावो
द्भवकरोविसर्गकर्मसंज्ञितः॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतं॥ अधियज्ञोहमेवात्रदेहेदेहभृतांवरः॥
अंतकालेस्मरन्मांचसमद्भावंयात्यसंशयं॥ परंभावंस्मरन्नंतेत्याजदेहंतमाप्नुयात्॥ प्राणंन्यसेभ्रुवोर्मध्ये
अंतेप्राप्नोतिसत्परः॥ ओमित्येकाक्षरंब्रह्मवदन्देहंत्यजन्तथा॥ ब्रह्मादिस्तंबपर्यंताःसर्वाममविभूत राम॰
यः॥ इंद्रियाणिदशैकंचमहाभूतप्रणीमंस्मृतः॥ अहमेकोविश्वरूपइतिज्ञात्वाविमुच्यते॥ क्षेत्रंशरीरंयोवे ३५७

त्तिक्षेत्रज्ञःसप्रकीर्त्तितः॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तुज्ज्ञानंसतोमम॥ महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच॥ इंद्रि
याणिदशैकंचयंचवेंद्रियगोचराः॥ इच्छाद्वेषःसुखंदुःखंसंहतेश्चेतनाधृतिः॥ एतत्क्षेत्रंसमासीनंसविकारमु
दाहृतं॥ अमानित्वमिदंभित्वमहिंसाक्षांतिरार्जवं॥ आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः॥ इंद्रियार्थेषुवै
राग्यमनहंकारमेवच॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥ असक्तिरनभिष्वंगःपुत्रदारगृहादिषु॥ वि
श्वेष्वसमचित्तत्वंविकोपःकोपपंक्तिषु॥ अपिवानन्ययोगेनभक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्ज
नसंसदि॥ आत्मज्ञानमितिप्रोक्तमज्ञानंमदतोन्यथा॥ ज्ञेयंयत्तुप्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते॥ अनादिपरमं
ब्रह्मनसत्तन्नामउच्यते॥ सर्वतःपाणिपादांतंसर्वतोक्षिशिरोमुखं॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति॥ स
र्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं॥ असक्तंसर्वभूतेषुनिर्गुणंगुणभोक्तृच॥ बहिरंतरभूतानांअचरंचर
मेवच॥ सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत्॥ अविभक्तंचभूतेषुविभक्तमिवचस्थितं॥ भूतभर्तृचविज्ञेयं
ग्रसिष्णुःप्रभविष्णुच॥ ज्योतिषामपिमज्ज्योतिस्तमसःपरमुच्यते॥ ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितं॥ ध्यानेनात्म
निपश्यंतिकेचिदात्मानमात्मना॥ अन्येसांख्येनयोगेनकर्मयोगेनवाकरोत्॥ तेपिचातितरंत्येवामृत्युंश्रुतिपराय
णाः॥ सत्त्वात्संजायतेज्ञानंरजसोलोभएवच॥ प्रमादमोहौतमसोभवतोज्ञानमेवच॥ गुणवर्त्तमुदस्यैवयोवर्त्ततिष

तिर्येगिने॥मानावमानमित्रादितुल्यत्वात्सीतिनिर्गुणः॥ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं॥छंदांसियस्य
पत्राणियस्तंवेदसवेदवित्॥द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच॥अहिंसादिक्षमाचैवदैवीसम्पत्तितो
नृणां॥नशौचंनापिवाचारोह्यासुरीसम्पदोद्भवा॥त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः॥कामःक्रोधस्तथालोभ
स्तस्मादेतत्त्रयंत्यजेत्॥यज्ञस्तपस्तथाज्ञानंसत्वाद्यैस्त्रिविधंस्मृतं॥आयुःसत्वबलारोग्यसुखायान्नंतुसात्वि
कं॥दुःखशोकादिदंचान्नंतीक्ष्णरूक्षंतुराजसं॥अमेध्योच्छिष्टपूत्यन्नंतामसंनीरसादिकं॥यष्टव्योविधिनायज्ञो
निष्कामायससात्विकः॥यज्ञःफलायदंभार्थंराजसस्तामसस्मृतः॥श्रद्धामंत्रादिविध्युक्तंतपःशारीरमुच्यते॥
देवादिपूजाहिंसादिवाङ्मयंतपउच्यते॥अनुद्वेगकरंवाक्यंसत्यंस्वाध्यायसंज्ञकं॥मानसंचित्तसंशुद्धेर्मौनमा
त्मविनिग्रहः॥सात्विकंचतपोऽकामंफलाद्यर्थंतुराजसं॥तामसंपरपीडार्थंसात्विकंदानमुच्यते॥देशादौच
तदातव्यमुपकारयराजसं॥अदेशादाववज्ञाततामसंदानमीरितं॥ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः
यज्ञदानादिकंकर्मभुक्तिमुक्तिप्रदंनृणां॥अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणाफलं॥नवतित्यागिनांप्रेत्यनत
त्संन्यासिनांक्वचित्॥तामसःकर्मसंन्यासोमोहात्क्लेशभयादिकात्॥राजसःसात्विकोकामान्नित्यंचैतेतकर्मइ राम
तवः॥अधिष्ठानंतथाकर्त्ताकरणंचपृथग्विधं॥विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं॥एकंज्ञानंसात्विकंस्या ३५८

त्पृथग्ज्ञानंतुराजसं॥अतत्वार्थंतामसंस्यात्कर्मकामायसात्विकं॥कामायराजसंकर्ममोहात्कर्मतुतामसं॥सिद्ध्यसि
द्ध्योःसमःकर्त्तासात्विकोराजसोत्यपि॥शठोऽलसस्तामसःस्यात्कार्यादिधीश्चसात्विकी॥कार्यार्थंवेत्त्रीराजसीस्या
द्विपरीतांतुतामसी॥मनोधृतिसात्विकीस्यात्प्रीतिकामेषुराजसी॥तामसीतुप्रशोकादौसुखंसत्वाद्युदन्ततः॥
सुखंतद्राजसंत्वाग्रेअंतेदुःखंतुतामसं॥अतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं॥स्वकर्मणातमभ्यर्च्यविष्णुंसिद्धिंचविंदति
॥कर्मणामनसावाचासर्वावस्थासुसर्वदा॥ब्रह्मादिस्तंबपर्यंतंजगद्विष्णुंसमंततः॥सिद्धिमाप्नोतिभगवद्भक्तोभाग
वतोध्रुवं॥इत्याग्नेयेगीतासारं॥॥अग्निरुवाच॥॥यमगीतांप्रवक्ष्यामिउक्तायानचिकेतसे॥पठतांशृण्वतांभुक्त्यै
मुक्त्यैमोक्षार्थिनांसतां॥यमउवाच॥॥आसनंशयनंयानंपरिधानंगृहादिकं॥वांछंत्यहेतुमोहेनस्वस्मिन्नित्यंस्वयमा
स्थिरः॥भोगेष्वशक्तिःसततंतथैवात्मावलोकनं॥श्रेयंपरंमनुष्याणांकपिलोद्गीतमेवच॥सर्वत्रसमदर्शित्वंनिर्म
मत्वमसंगिता॥श्रेयःपरंमनुष्याणांगीतंपंचशिखेनहि॥आगर्भजन्मबाल्यादिवयोवस्थादिवेदनं॥श्रेयःपरंमनु
ष्याणांगंगागरिष्ठप्रगीतिकं॥आध्यात्मिकादिदुःखानामाद्यंतादिप्रतिक्रिया॥श्रेयःपरंमनुष्याणांगीतंमेजनकोद
नु॥च्छायंश्चभिन्नयोर्भेदःप्रत्ययपरमात्मनः॥तत्वज्ञातिःपरंश्रेयोब्रह्मगीतमुदाहृतं॥कर्तव्यमितियत्कर्मऋ
ग्यजुःसामसंज्ञितं॥क्रियतेप्रसंगेनजैगीषव्येनगीयते॥हानिःसर्वविधित्सानामात्मनःसुखहेतुकी॥पुमानन्याधिग

तज्ज्ञानी नेदं तान्नोति सत्वरं ॥ ब्रह्मणा विष्णुसंज्ञेन परमेनाव्ययेन च ॥ छादंतिता नमस्तिकासौ भाग्यं रूपमुत्तमं ॥ तपसा
लभ्यते सर्वं मनसा यद्यदिच्छति ॥ नास्ति विष्णुसमं ध्येयं तपो नानशनात्परं ॥ नास्त्यारोग्यसमं धन्यं नास्ति गंगासमं
सरित् ॥ न सोस्ति बांधवः कश्चिद्विष्णुं मुक्त्वा जगद्गुरुं ॥ अधश्चोर्ध्वं हरिश्चाग्रे देहेंद्रियमनोमुखे ॥ स्त्वमेवं संस्मरन्
प्राणान्यस्त्यजेत्स हरिर्भवेत् ॥ यत्र ब्रह्म यतः सर्वं यत्सर्वं तस्य संस्थितं ॥ अग्राह्यमनिर्देश्यं सुप्रतिष्ठश्च यत्प
रं ॥ परापरस्वरूपेण विष्णुः सर्वहृदि स्थितः ॥ यज्ञेशं यज्ञपुरुषं केचिदिच्छंति तत्परं ॥ केचिद्विष्णुं हरं केचित्के
चिद्ब्रह्माणमीश्वरं ॥ इंद्रादिनामभिः केचित्सूर्यं सोमं च कालकं ॥ ब्रह्मादिस्तंबपर्यंतं जगद्विष्णुं वदंति च ॥ स विष्णुः
परमं ब्रह्म यतो नावर्तते पुनः ॥ सुवर्णादिमहादानपुण्यतीर्थावगाहनैः ॥ ध्याने व्रतैः पूजया च धर्मश्रुत्या तदा
प्नुयात् ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इंद्रियाणि हयानाहुर्विष
यांश्चोपगोचरान् ॥ आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ यस्त्वज्ञानवान्भवत्युक्तेन मनसा यदा ॥ न
मत्पदं समाप्नोति संसारं चाधिगच्छति ॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा यदा ॥ सं तु तं पदमायाति यस्माद्भू
यो न जायते ॥ विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ॥ सोध्वनः परमाप्नोति तद्विष्णोः परमं पदं ॥ इंद्रियेभ्यः प राम
रा ह्यर्था अर्थेभ्यश्च परं मनः ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्परमं पदं ॥ पु ३५९

हस्पतेपर

रुषान्न परं किंचित्साकाष्ठा सा परा गतिः ॥ एष भूतेषु सर्वेषु दृश्यते च परस्परं ॥ या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ प
छेत्वा ग्मनसी प्राज्ञस्तद्युच्छेत्ज्ञानमात्मनि ॥ ज्ञानमात्मनि महति नियच्छेच्छांत आत्मनि ॥ ज्ञात्वा ब्रह्मात्मनोर्योगं य
मादौ ब्रह्मसंभवेत् ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ यमनियमाः पंच शौचसंतोषसत्तमः ॥ स्वाध्यायस्व
रपूजा च आसनं पद्मकादिकं ॥ प्राणायामो वायुजयः प्रत्याहारः स्वनिग्रहः ॥ उत्तमे कत्वविषये चेतसो यत्प्रधार
णं ॥ निश्चलत्वात्तु धीमंतिर्धारणा द्विज कथ्यते ॥ पौनःपुन्येन तत्रैव विषयेष्वेव धारणा ॥ ध्यानं स्मृतं समाधिस्तु अहं ब्र
ह्मात्मसंस्थितः ॥ घटध्वंसाद्यथाकाशमभिन्नं नभसा भवेत् ॥ मुक्तो जीवो ब्रह्मणैवं सद्ब्रह्म ब्रह्म वै भवेत् ॥ आत्मानम
न्यते ब्रह्म जीवो ज्ञानेन नान्यथा ॥ जीवो ज्ञानेन तत्कार्ययुक्तः स्यादजरामरः ॥ अग्निरुवाच ॥ ॥ विशिष्ठ एष्यमगीतोक्ता
पठतां भुक्तिमुक्तिदा ॥ आत्यंतिको लयः प्रोक्तो वेदांते ब्रह्मधीमयः ॥ ॥ इत्याग्नेये यमगीतायां आत्यंतिको लयः ॥ ॥ अ
ग्निरु ॥ आग्नेये ब्रह्मरूपं ते पुराणं कथितं मया ॥ सप्रपंचं निष्प्रपंचं विद्याद्वयमयं महत् ॥ ऋग्यजुःसामाथर्वाख्या वि
द्या विष्णुर्जगत्पतिः ॥ छंदः शिक्षा व्याकरणं निघंटुर्ज्योतिराकया ॥ निरुक्तं धर्मशास्त्रादिर्मीमांसान्यायविस्तरः ॥ वि
द्या सैवार्थशास्त्रादिर्वेदांताद्या हरिर्महान् ॥ इत्येषा चापरा विद्या परविद्याक्षरं परं ॥ यस्मा भावो खिलं विष्णुस्तस्मा
नाबाधते कलिः ॥ अनिद्धात्तु महायज्ञान्कृत्वा तु पितृस्वधां ॥ रूपामभ्यर्चयन्भक्त्या नैवं गोमरणं भवेत् ॥ सर्वका

अ॰पु॰ रणमत्यंतं विष्णुध्यानं न सीदति॥ अत्यंतं तत्र दिदोषा ये विषयाकृष्टमानसः॥ कृत्वापि पापं गोविंदं ध्यात्वा पापैः प्र
३६० मुच्यते॥ ध्यानं तत्र यत्र गोविंदः सा कथा यत्र केशवं॥ तत्कर्म यत्कृतं दद्यात् विमन्यैर्बहुभाषितैः॥ परमार्थंप
रं ब्रूयात् पदेतन्ने मयोदितं॥ संसारे भ्रमता लभ्यं पुत्रदारधनं वसु॥ सुहृदश्च तथैवान्यैर्नोपदेशो द्विजेदृशः॥
किं पुत्रदारैर्मित्रैर्वा किमन्याक्षत्रबांधवैः॥ उपदेशपरो बंधुरीदृशो यो विमुक्तये॥ द्विविधो भूतसंसर्गो देवा
नासुर एव च॥ विष्णुभक्तिपरो देवो विपरीतस्तथासुरः॥ एतत्पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनं॥ सुखप्रीति
करं नृणां मोक्षकृत्स्तु वेष्टितं॥ येषां गृहे तु लिखितं माग्नेयं हि पुराणकं॥ पुस्तकं स्यात् सन्निसदा तत्र नेशुरुपद्र
वाः॥ किं तीर्थैर्गोप्रदानैर्वा किं यज्ञैः सुमुपोषितैः॥ आग्नेयं यो हि ग्रहणाति अहन्यहनि मानवः॥ यो ददाति तिलप्र
स्थं सुवर्णस्य च माषकं॥ शृणोति श्लोकमेकं च आग्नेयस्य समाप्नुयात्॥ अध्याय पठनं चास्य गोप्रदानाद्विशिष्य
ते॥ अहोरात्रकृतं पापं श्रोतुमिच्छोः प्रणश्यति॥ कपिलानां शते दत्ते यः प्रवेत्ध्येष्टपुष्करे॥ तदाग्नेयं पुराणं हि प
ठित्वा फलमाप्नुयात्॥ प्रवृत्तं च निवृत्तं च धर्मविद्याद्वयात्मकं॥ आग्नेयस्य पुराणस्य शुश्रूणं स्वसमं न हि॥ पठ
आग्नेयं कं नित्यं शृण्वन्नापि पुराणकं॥ भक्तो वशिष्ठ मनुजः सर्वपापैः प्रमुच्यते॥ नोपसर्गा न चानर्था न चौरादि राम
भयं गृहे॥ तस्मिन्स्याद्यत्र चाग्नेयं पुराणस्य हि पुस्तकं॥ न गर्भहारिणी जाति न च बालाग्रहा गृहे॥ यत्र चाग्नेय ३६०

पुराणं स्यात् न पिशाचादिकं भयं॥ श्रुत्वा विप्रो वेदवित्स्यात् क्षत्रियः पृथिवीपतिः॥ ऋद्धिं प्रयाति वैश्यश्च शूद्रश्चारो
ग्यमृच्छति॥ यः पठेत्शृणुयान्नित्यं समदृष्टिर्महामनाः॥ ब्रह्माग्नेयपुराणे सकृत्र लक्ष्मीरूपप्रद्रवाः॥ दिव्यांतरी
क्षभौमाद्या दुःस्वप्नाद्याधिवारुकाः॥ पंचान्यत्वरितं किं चित्तत्सर्वं हंति केशवः॥ पठतः शृण्वतः पुंसः पुस्तकं
यजते महत्॥ आग्नेयं श्रीपुराणं हि हेमंते यः शृणोति वै॥ प्रपूज्य पुष्पगंधाद्यैरग्निष्टोमफलं लभेत्॥ शिशिरे
पुंडरीकस्य वसंते चाश्वमेधसं॥ ग्रीष्मे तु वाजपेयस्य राजसूयस्य वर्षति॥ गोसहस्रशरीरादिफलं तस्य गतो
त्यृतौ॥ आग्नेयं हि पुराणं यो भक्त्याग्नेः पठते हरेः॥ सार्च्यं पेतु वशिष्ठेन ज्ञानयज्ञे केशवं॥ यस्याग्नेयपुराण न
स्य पुस्तकं तस्य वै जयः॥ लिखितं पूजितं गेहे भुक्तिमुक्तिं करोति हि॥ इति कालाग्निरूपेण गीतं मे हरिणा पुरा॥
आग्नेयं हि पुराणं तु ब्रह्मविद्याद्वयात्मकं॥ विद्याद्वयं वशिष्ठेदं भक्तेभ्यः कथयिष्यति॥ वशिष्ठ उवाच॥ ॥
आग्नेयं हि पुराणं ते खराजविद्याद्वयात्मकं॥ कथितं ब्रह्मणा विष्णोरग्निना कथितं यथा॥ सार्द्धं देवैश्च मु
निभिः कृत्स्नं सर्वार्थदर्शकं॥ पुराणमग्निना गीतमाग्नेयं ब्रह्मसंमितं॥ यः पठेच्छृणुयाद्व्यासः शिखिजाले तश्च
येदपि॥ सर्वपापविनिर्मुक्तः प्राप्तकामो दिवं व्रजेत्॥ लेखयित्वा पुराणं यो दद्याद्विप्रेभ्य उत्तमं॥ स ब्रह्मलो
कमाप्नोति कुलानां शतमुद्धरेत्॥ एकं श्लोकं पठेद्यस्तु पापपंकाद्विमुच्यते॥ तस्माद्व्यास सदा श्राव्यं शिष्य

ण्यः सर्वदर्शिनः॥ आग्नेये तु नमस्तस्मै येन गीतं पुराणकं॥ व्यास उवाच॥ वशिष्ठेन पुरा गीतं सूतैः तत्ते
मयोदितं॥ अष्टादशैर्मुनिभिः सार्द्धं श्रोतुकामैः पुराणकं॥ आग्नेयं पवित्रं ध्यात्वा तं ब्रह्म सा भुक्तिमुक्तिदं॥ परा
विद्यापराविद्यास्वरूपं परमं पदं॥ आग्नेयं दुर्लभं रूपं प्राप्यते भाग्यसंयुतैः॥ ध्यायंतो ब्रह्म चाग्नेयं पुराणं ह
रिमागताः॥ विद्यार्थिनं तथा विद्या राज्यं राज्यार्थिनस्तथा॥ सौभाग्यार्थिनि सौभाग्यं मोक्षं मोक्षार्थिनो ग
ताः॥ अपुत्राः पुत्रिणः संति नाश्रया आश्रयं गताः॥ एतत्ते निहितं सूत आग्नेयस्य पुराणकं॥ सरूपं चिंतये
याता भुक्तिमुक्ति न संशयः॥ श्रावयत्वं च शिष्येभ्यश्च आग्नेयं हि पुराणकं॥ सूत उवाच॥ व्यासप्रसादादा
ग्नेयं पुराणं श्रुतमादरात्॥ आग्नेयं ब्रह्मरूपं हि मुनयः शौनकादयः॥ भवंतो नैमिषारण्ये यजंतो हरिमी
श्वरं॥ तिष्ठध्वं श्रद्धया युक्ता यस्मादत्र समुदीरितं॥ अग्निना प्रोक्तमाग्नेयपुराणं वेदसंमितं॥ ब्रह्मविद्या
द्वयोपेतं भुक्तिमुक्तिप्रदं महत्॥ नास्मात्परतरं सारं नास्मात्परतरं सुहृत्॥ नास्मात्परतरो ग्रंथो नास्मात्परत
रा गतिः॥ नास्मात्परतरं शास्त्रं नास्मात्परतरा गतिः॥ नास्मात्परतरं ज्ञानं नास्मात्परतरा स्मृतिः॥ नास्मात्प
रतरो योगो नास्माद्विद्या परा त्विह॥ नास्मात्परतरः सिद्धांतो नास्मात्परं तु मंगलं॥ नास्मात्परतरो यात्तु पुराण
मपुरस्थितः॥ नास्मात्परतरं भूमौ विद्यापरमदुर्लभा॥ आग्नेये हि पुराणेस्मिन्सर्वविद्या हि प्रदर्शिता॥ सर्वमत्स्या

वतारीणां गीतं रामायणं त्विह॥ हरिवंशं भारतं च तत्त्वसर्गप्रदर्शिताः॥ आमोगविल्वं गीतं पूजादीनां प्रतिष्ठ
या॥ पवित्रारोहणादीनि प्रतिमालक्षणादिकं॥ प्रसादलक्षणं यं च मंत्रा वै भुक्तिमुक्तिदाः॥ सैवागमं च पद्य
श्चराक्रेयः सौरागदश्च॥ मंडलानि च वात्यं च मंत्रांगादिविधानि च॥ प्रतिसर्गश्चानुगीतो ब्रह्मांडपरिमंडलं॥
गीता भुवनकोशो हि द्वीपवर्षादि निम्नगाः॥ यथा गंगाप्रयागादि तीर्थमाहात्म्यमीरितं॥ ज्योतिश्चक्रादि च
तथा गीता युद्धजयार्णवः॥ आश्रौचक्रव्यशुद्धिश्च प्रायश्चित्तं प्रदर्श्यते॥ राजधर्मा दानधर्मा व्रतानि विवि
धानि च॥ यजुर्वेदरूपं सामवेदरुग्वेदादीविधानकं॥ सूर्यवंशः सोमवंशो धनुर्वेदश्च वैद्यकं॥ सर्ववेदा
सर्वशास्त्रं मीमांसा न्यायविस्तरं॥ पुराणसंख्यामाहात्म्यं छंदो व्याकरणं स्मृतं॥ अलंकारो निघंटश्च शि
क्षा कल्पस्तथोदितं॥ नैमित्तिकः प्राकृतिको लय आत्यंतिकः स्मृतः॥ वेदाश्च ब्रह्मविज्ञानं योगमष्टांग
मीरितं॥ तत्र पुराणमाहात्म्यं विद्याष्टादश स्मृताः॥ द्वादशसाहस्रं त कोटिप्रविस्तरं॥ देवलोके
देवतैश्च पुराणं पठ्यते सदा॥ मर्त्यत्रिस्त्राति जानीध्वं मुनयः शौनकादयः॥ अर्थश्च ब्रह्मति जानीध्वं मुनयः शौ
नकादयः॥ शृणुयाच्छ्रावयेद्वापि समवेत्य भुक्ति मानरः॥ आग्नेये तु नमस्तस्मै येन गीतं पुराणकं॥ ॥
इत्याग्नेये महापुराणे आग्नेयं परिपूर्णं॥ ॥ श्रीरस्तु॥ ॥ शुभं भवतु॥ ॥ श्रीराम॥

अ०पु०
३६२

817

अग्निपुराण-५०८

राम०
३६२